सरस्वतीभवन-ग्रन्थमाला

(९)

शाण्डिल्यभक्तिसूत्रम्

भक्तिचन्द्रिकाटीकासंवलितम्

वाराणसेय-संस्कृत-विश्वविद्यालयः

SARASWATĪ BHAVANA GRANTHAMĀLĀ

VOL. 9

General Editor
Baladeva Upādhyāya
Director, Research Institute,
Varanaseya Sanskrit Vishvavidyalaya,
Varanasi.

ŚĀṆDILYA BHAKTI-SŪTRA

With

BHAKTICANDRIKĀ

By

NĀRĀYAṆA TĪRTHA

(With Svapneśwara-Bhāṣya, Nārada-Bhakti-Sūtra, Bhakti-mīmansā etc in appendix)

Second Edition

VARANASI

1967

Published by–
Director, Research Institute,
Varanaseya Sanskrit Vishvavidyalaya,
Varanasi.

Printed by–
Ghanshyam Upadhyaya, Manager
Varanaseya Sanskrit Vishvavidyalaya Press,
Varanasi.

सरस्वतीभवन-ग्रन्थमाला

(९)

शाण्डिल्यभक्तिसूत्रम्

नारायणतीर्थविरचितया

भक्तिचन्द्रिकया समन्वितम्

(परिशिष्टे स्वप्नेश्वरभाष्य-भक्तितत्त्वविवरण-त्रिविधभक्तिविवरण-नारदभक्तिसूत्र भक्तिमीमांसा-परभक्तिसूत्रैः संवलितम्)

सम्पादकः

आचार्यश्रीबलदेव उपाध्यायः

सम्पूर्णानन्द संस्कृत विश्वविद्यालय
विक्रय अनुभाग
वाराणसी

द्वितीयं संस्करणम्

वाराणस्याम्

१८८९ तमे शकाब्दे

प्राप्तिस्थानम् —
प्रकाशनविभागः
वाराणसेयसंस्कृतविश्वविद्यालयः
वाराणसी—२
मूल्यम्—१०) रूप्यकाणि

प्रास्ताविकम्

इतः पूर्वं सरस्वतीभवनग्रन्थमालायां प्रकाशितो भागद्वयात्मको 'भक्तिचन्द्रिका'नामा ग्रन्थः साम्प्रतं नानापरिशिष्टादिभिर्मण्डितः पुनः प्राकाश्यं नीयते। ग्रन्थस्य प्रथमो भागः १९२४ ईशवीये वर्षे द्वितीयश्च भागः १९३८ ईशवीये वर्षे प्रकाशितचरो विद्यते। अधुना उभयभागात्मकस्यैतस्य ग्रन्थस्य दौर्लभ्याद् नानापरीक्षासु पाठ्यग्रन्थत्वेन निर्दिष्टत्वाच्च भक्तितत्त्वनिरूपणपरोऽयं ग्रन्थः प्रकाश्यमानो नूनं भक्तितत्त्वजिज्ञासूनां विपश्चितां प्रमोदाय कल्पिष्यत इति ध्रुवं मदीयो विश्वासः। प्रथमसंस्करणे प्रकाशितचराणां वक्तव्यादीनामपि सदुपयोगत्वात् ते ते विषयाः संस्करणेऽस्मिन्नपि निवेश्यमानाः सन्ति। भक्तिचन्द्रिकायाः पुनः शोधनमपि साम्प्रतं विधीयते। परिशिष्टभागे नवीनानां विषयाणामत्र सन्निवेशो विदुषामुपकाराय भविष्यतीति नूनं प्रतीमः। तत्र प्रथमे परिशिष्टे स्वप्नेश्वरभाष्यस्य सुप्रसिद्धस्य सन्निवेशः, द्वितीये च परिशिष्टे समुपलब्धानां भक्तिसूत्राणामेकत्र संकलनं भक्तितत्त्वानुसन्धानपराणां जिज्ञासूनां ज्ञानपरिवर्धनाय भविष्यति। विषयसाकल्येन ग्रन्थस्य नामकरणेऽपि किञ्चिद् नूतनत्वमाविष्क्रियतेऽस्मिन् संस्करणे। भक्तिचन्द्रिका–स्वप्नेश्वरभाष्याभ्यां संवलितो यावत्प्राप्तभक्तिसूत्रैश्च मण्डितोऽयं शाण्डिल्यभक्तिसूत्रनामा ग्रन्थो भगवच्छ्रीकृष्णकारुण्यवशात् समाप्तिं नीतो भक्तिरहस्योपलब्धये विपश्चित उपकुर्यादिति भूतभावनं विश्वनाथं नामं नामं विरमत्ययं जनः॥

वाराणसेयसंस्कृतविश्वविद्यालयः
वाराणसी
अक्षयतृतीया सं० २०२४
(१२-५-६७)

बलदेव उपाध्यायः
अनुसन्धानसंस्थानसञ्चालकः।

भूमिका

(१)

धर्मो विश्वस्य जगतः प्रतिष्ठा

अथ धर्मस्य स्वरूपं तद्वैशिष्ट्यं प्राणिनां कृते तदुपयोगं च व्याख्यास्यामः। 'धृ'धातोर्निष्पन्नोऽयं 'धर्म'शब्दो धारणार्थमभिव्यनक्ति। विश्वस्मिन् जगति सर्वेषां पदार्थानां द्रव्याणां च संयोजनेनैकत्र धारणेन च जीवननिर्वाहः। तदर्थं धर्मः प्रभवति। सूर्यश्चन्द्रमास्तारामण्डलं पृथिवी च परस्परोपकार्योपकारकभावेन सह धृतानि परमेश्वरेण निर्दिष्टानि स्वविशिष्टानि कार्याणि कर्तुं प्रभवन्ति। समाज एव मानवानां स्वोत्कर्षसाधनायै सन्ततमपेक्ष्यते तज्ज्ञैः। विभिन्नमानसवृत्तीनां व्यष्टिभूतानां मानवानामेकत्र स्थित्यापादनेनैव समाजस्य समाजत्वं नाम। अत एव समाजस्य धर्मे एव प्रतिष्ठा। न केवलं मानवसमाजस्य, प्रत्युत विश्वस्य जगतः प्रतिष्ठा धर्म एव। तथा च श्रुतिवचनं समुपजृम्भते—

"धर्मो विश्वस्य जगतः प्रतिष्ठा।"

'चोदनालक्षणोऽर्थो धर्मः'। चोदना नाम वेदप्रतिष्ठितमन्त्रैः प्रतिपाद्यमाना विधिरूपा प्रेरणैव। धर्मस्य प्रतिपादकत्वं नाम वेदे एव मुख्यतया उपयुज्यते। अत एव वेदस्याकुण्ठितां शक्तिं सम्प्रदायविदो दर्शयन्ति। तथा च शाबरभाष्ये (१।१।२)—"चोदना हि भूतं भवन्तं भविष्यन्तं सूक्ष्मं व्यवहितं विप्रकृष्टमित्येवं जातीयकमर्थं शक्नोत्यवगमयितुम्" इति। वेदस्य प्रामाण्यत एव स्मृतिलोकप्रसिद्ध्यादीनामपि प्रामाण्यं दुर्निवारम्, स्मृतेर्वेदमूलकत्वाल्लोकप्रसिद्धेस्तदुभयमूलकत्वाच्च। ततश्चापौरुषेयेण वेदेन प्रतिपादितत्वाद् धर्मस्याप्यपौरुषेयता दुर्निवारा। यथार्थतस्तु नहि देशेन न वा कालेन धर्मः परिच्छिद्यते—देशकालाभ्यामपरिच्छिन्नत्वं नाम धर्मत्वम्।

धर्मस्य लक्षणम्

'यतोऽभ्युदयनिःश्रेयससिद्धिः स धर्मः ।' श्रुत्या यानि कर्माणि विधिरूपेण विहितानि, तानि धर्म इति कथ्यन्ते । यानि च कर्माणि निषिध्यन्ते श्रुत्या, तानि अधर्म इति मन्यन्ते, धर्माधर्मव्यवस्थायां वेदस्य परमप्रामाण्यात् । तथा च श्रीमद्भागवते व्यासस्य गम्भीरार्थप्रतिपादकं वचनम्—

वेदप्रणिहितो धर्मो ह्यधर्मस्तद्विपर्ययः ।
वेदो नारायणः साक्षात् स्वयम्भूरिति शुश्रुम ॥

(भाग० ६।१।४०)

भगवत्प्रणीतत्वेन धर्मस्य ज्ञाता बोद्धा च भगवानेक एव, न ऋषयः, न वा देवाः, न वा सिद्धाः; कुतो मनुष्या विद्याधरचारणादय इति प्रतिपादितं श्रीमद्भागवते—

धर्मं तु साक्षाद् भगवत्प्रणीतं
न वै विदुर्ऋषयो नापि देवाः ।
न सिद्धमुख्या असुरा मनुष्याः
कुतश्च विद्याधरचारणादयः ॥

(भाग० ६।३।१९)

धर्मस्याश्रयणेनैव इहलोके प्राणिनामभ्युदयः सञ्जायते, अमुष्मिन् लोके निःश्रेयसरूपा मुक्तिश्चोपलभ्यते । धर्मस्य धारकत्वं श्रीवेदव्यासो नानावचनैर्महाभारते प्रतिपादयति—

धारणाद् धर्म इत्याहुर्धर्मेण विधृताः प्रजाः ।
यः स्याद् धारणसंयुक्तः स धर्म इति निश्चयः ॥

(महा० शान्ति० १०९।११)

धर्मस्य वैशिष्ट्यम्

अधिकारिभेदस्वीकरणं प्रथमं तावद् वैशिष्ट्यं धर्मस्य, मानवानां बुद्धिस्वभावादीनां नितान्तं भिन्नत्वात् । नहि सर्व एव मानवा एकस्यैव धर्मोपदेशस्यानुकूल्यं भजन्ते । योग्यतामनुसृत्य निर्दिष्टो हि धर्मः सर्वदा हितावहः श्रेयस्करश्च भवति । नहि मनुजाः समानयोग्यताभाजोऽवलोक्यन्ते, सत्त्वादीनां च तत्स्थानां गुणानां तत्र तत्र परस्परमुपचयापचयत्वेन तेषां मानसवृत्तीनामनेकरूपत्वात् ।

कर्मसिद्धान्तस्वीकारश्च द्वितीयं वैशिष्ट्यम्। लोकेऽस्मिन् प्रत्यहमनुभूयमानदशावैषम्यस्यानेनैव सिद्धान्तेन सामञ्जस्यं घटते। केचन आढ्याः सुखेनैव स्वं कालं यापयन्ति; अपरे च हीनाः क्लेशेनैव स्वं समयं नयन्ति। को हेतुरस्य दशावैषम्यस्य? नहि सर्वेषां जनके परमेश्वरे नैर्घृण्यं कल्पयितुं पार्यते; प्राणिनां कर्मानुकूल्यादेव दशाविपर्ययस्य विनिश्चेतुं सुशकत्वात्। वैशिष्ट्यद्वयसमाश्रयणे हि सर्वासां समस्यानां समाधानं कर्तुं पार्यते विद्वज्जनैः। अन्येषु मतेष्वधिकारिभेदस्वीकरणाभावात् समान एवोपदेशस्तन्मतानुयायिनां निखिलानामुपयोगाय विधीयते। एष तु नितान्तमनौचित्यं भजते। नहि सर्व एव तन्मतावलम्बिनः समानबुद्धिवैभवशीला विलोक्यन्ते, येनोपदेशस्य सामान्यरूपमङ्गीक्रियेत। कर्मसिद्धान्तस्वीकाराभावे विश्वस्मिन् प्रत्यहं प्रतिक्षणं चानुभूयमानो व्यवहारभेदो न कथमपि सत्तर्केण समर्थयितुं पार्यते। अत एव वेदप्रतिपाद्यधर्मस्य माहात्म्यं विद्वज्जनैरुररीकरणीयमेवेति, धर्मोपदेशविषयेऽधिकारिभेदस्वीकरणात् कर्मसिद्धान्तसमर्थनाच्चेति दिक्।

वैदिकधर्मस्याद्वितीयत्वम्

धर्मस्त्वेक एव। स च चोदनाप्रतिपाद्यो वैदिको धर्मः। अन्ये तु धर्मशब्देन प्रायशो व्यपदिश्यमाना अपि सम्प्रदाया एव। सम् + प्रोप सर्गाभ्यां युक्तस्य दाधातोः 'आतो युक् चिण्कृतोः' (७।३।३३) इति सूत्रेण घञ्-प्रत्यययोगेन निष्पन्नोऽयं 'सम्प्रदाय'शब्दो गुरुपरम्परागतं सदुपदेशं शिष्टपरम्परावतीर्णोपदेशं च सम्यग् व्यनक्ति। तथा च महाकविना माघेन 'सम्प्रदाय'शब्दोऽयं सुष्ठु प्रायोज्यतस्मिन् पद्ये—

सम्प्रदायविगमादुपेयुषी-
रेष नाशमविनाशि-विग्रहः।
स्मर्तुमप्रतिहतस्मृतिः श्रुती-
र्दत्त इत्यभवदत्रिगोत्रजः॥

(शिशुपालवधे, १४।७९)

एवं च केनापि विशेषगुणगौरवशालिना आचार्येण कालिक-दैशिकदशामनुरुद्ध्य कस्मिन्नपि विशिष्टे भूभागे क्रियमाणः सदुपदेशः सम्प्रदायशब्देन व्यवह्रियते विद्वद्भिः। सार्वभौमत्वं सार्वकालिकत्वं

चाद्वितीयत्वं च यथा धर्मस्य द्योतकं तत्त्वम्, तथैव देशकालसम्बन्धतः कादाचित्कत्वमनुभूयमानत्वं सम्प्रदायस्येति तयोः पार्थक्यरेखाविभागः। 'रिलीजन' शब्दः सम्प्रदायमेव स्ववाच्यत्वेनाभिधत्ते। सम्प्रदायेष्वेव हिब्रू-ख्रिष्टीय-मोहम्मदीयादीनि विश्रुतानि धार्मिकमतान्यन्तर्भवन्तीति सुधीभिर्निभालनीयम्। त एतेऽनेकसम्प्रदायाः सनातनवैदिकधर्मस्यैवाङ्ग-भूताः, तद्विवृतैकदेशस्यैव प्राधान्येनोपदेशकरणात्। भ्रातृभावः, परस्परं मैत्रीभावना, प्राणिनां परस्पर-प्रेमानुबन्धिनी सेवा—इत्यादयो निखिल-मतेषूपलभ्यमाना धर्मगुणाः सनातनधर्मस्यैवाङ्गभूताः। एते सम्प्रदाया अपि परमपुरुषार्थभूतमोक्षस्य साधकत्वेन यदि धर्मशब्देन लोके व्यवह्रियन्ते, तत्तूपलक्षणमात्रम्। परम्परया मोक्षसाधकत्वात् तेषु धर्मशब्दो ह्युपचरितवृत्तिर्द्रष्टव्यः।

वैदिकधर्मस्य निखिलमतोपजीव्यत्वम्

वैदिकधर्म एव विश्वेषामपि मतानां सम्प्रदायानां च जनकः। सत्यास्तेयशौचादीनां सदाचारस्याङ्गानामुपलब्धिरेव नैतत्सिद्धान्त-स्वीकरणे हेतुरूपतामाधत्ते, अपि तु तत्स्वीकृतपरमेश्वरस्याभिधानमपि वेदादेव गृहीतमिति तुलनात्मकभाषाविज्ञानपद्धतिमनुरुद्ध्य ध्रुवं सत्यापयितुं पारयामः। तथा च हिब्रूमते (यस्य प्रतिपादनम् 'ओल्ड टेस्टामेण्ट'नाम्ना प्रख्यातस्य बाइबिलग्रन्थस्याऽदिमो भागो विशदं विधत्ते) परमेश्वरस्य 'यहोवा'-'यह्वेह'-'यह्वे'-इत्यादिविविधाकारैः समुदीर्यमाणमभिधानं वेदेषु देववाचक-'यह्व'-नामैव सर्वात्मना अनुसरतीति भाषासमीक्षणसिद्धान्तः। 'यह्व'शब्दस्य प्रयोग ऋग्वेदीय-विविधमन्त्रेपूपलभ्यते—

> विश्पतिं यह्वमतिथिं नरः। (ऋग्वेदः ३।३।८)
> प्र वो यह्वं पुरूणां विशां देवयतीनाम्।
> अग्निं सूक्तेभिर्वचोभिरीमहे यं सीमिदन्य इळते॥
> (ऋक्० १।३६।१)

वैदिकोऽयं 'यह्व'-शब्दो निघण्टौ (३।३) महन्नामसु पठितो महदित्यर्थं सूचयति। 'यह्व' इति महतो नामधेयम्। "यातश्च हूतश्च भवति" (८।८) इति निरुक्तं तदेव समर्थयति। 'या' 'ह्वे' इति धातुद्वयसंयोगात्

'गेहे कः' (३।१।१४४) इति सूत्रेण बाहुलकाद् भूते कप्रत्ययो ह्वयतेः सम्प्रसारणभावश्चेति वदति स्कन्दस्वामी। यातश्चासौ प्रार्थिभिर्हूतश्चेति तदर्थः। तथा च याजकैर्देवोऽयं सर्वथा गम्यते प्रार्थनास्वीकरणार्थं च बहुशो हूयत इति महत्त्वावच्छिन्नता तस्मिन् ध्रुवं जागर्ति।

हिब्रूमते परमेश्वरस्याभिधानं रोमनलिप्या Jehovah इति तद् विश्रुतम्, तत्र J इत्यस्योच्चारणं यकार एवेति भाषाविदः। आदौ नितान्तं पावित्र्याधानहेतोः परमेश्वरस्य नामोच्चारणं न कस्यापि समुचितमासीत्, परन्तु गच्छता कालेन तस्याभिधानं 'यह्वे' 'यह्वेह' इत्येव बभूव। अस्य नाम्नोऽर्थः परममहानित्येव। अस्य शब्दस्य व्युत्पत्ति-विषयेऽपि सन्दिह्यते विद्वद्भिः। 'हा वाह' हीब्रूधातोर्निष्पन्नोऽयं शब्दः स्वयम्भूरित्यर्थं प्रकटयति (Hawah to be, to exist, the self-existent); परन्तु व्युत्पत्तिरियं नहि सर्वैर्भाषाविद्भिरनुमन्यते। वैदिक-'यह्व' शब्दप्रतिरूपकोऽयं शब्द इति ममाभिप्रायः।

ख्रिष्टीयमते परमेश्वरस्याभिधानं 'गाड' (God) इति। शब्दोऽयं प्राचीनट्यूटानिकभाषायां प्रयुक्तात् 'घूतो-म्' (Ghuto-m) शब्दा-न्निष्पन्नः। 'घूतो-म्' शब्दस्तु संस्कृत-'हूतम्'-शब्दान्निष्पन्न इति वदति प्रामाणिकमूर्धन्यो महनीय-आक्सफोर्ड-आङ्गलभाषाकोशः (The great Oxford English Dictionary)। होमादिभिर्यो हूयते, प्रार्थना-स्वीकरणार्थं च य आहूयते साधकैरित्यर्थमभिव्यञ्जन्नयं शब्दः 'हु ह्वे' इत्युभयधातुभ्यां स्वनिष्पत्तिं भजते।

इत्थं 'गाड्'शब्दस्य मूलभूतोऽर्थो विद्यते—'यज्ञेनोपास्यो देवः', 'हवनादिभिः पूजितः परमेश्वरः', 'भक्तैः स्वमनोरथपूर्तिकामुकैः सेवितः सर्वशक्तिमान् भगवान्' इति। आङ्गलशार्मण्यभाषादिषु 'गाड्'शब्दस्य आदिममक्षरं गकार इति प्राचीन-ट्यूटानिकभाषायां घकारं स्वनिष्पत्ति-वर्णत्वेन परिगृह्णाति। स च संस्कृतभाषायां हकारादेव निष्पन्नः। संस्कृते हुतम्, अथवा हूतम्; प्राचीन-ट्यूटानिकभाषायाम् 'घूतो-म्', आङ्गलभाषायाम् 'गाड्'; जर्मनभाषायां च 'गात्' (Gott) इति। इत्थं च वर्णपरिवर्तनप्रणाली भाषाशास्त्रिभिर्नितान्तमभिमताऽस्य समीकरणस्य हेतुभावमुपैतीति भाषाविद्भिर्निपुणं विवेचनीयम्।

अयमत्र निष्कर्षः—परमेश्वरवाचको हिब्रूभाषायां 'यह्वे'-शब्दः खिष्टीयधर्मे च प्रयुक्तो 'गाड्' शब्द उभावप्येतौ संस्कृतमूलादेव निष्पन्नाविति। निरुक्तशैलीमनुरुद्ध्य वक्तुं पारयामो वयं यदेतावप्यवैदिकत्वेनाभासमानौ सम्प्रदायौ परमेश्वरस्य महनीयतानिधानहेतोर्वैदिकशब्दावेवाधारत्वेन स्वीकुर्वत इत्यतो जागर्ति वैदिकभाषायास्तुलनात्मकधर्मसमीक्षणविषये कोऽपि महिमा।

वैदिकधर्मस्य शिक्षास्वरसः

नानाविधेषूपदेशेषु धर्मस्य पुरुषार्थचतुष्टयस्य सामञ्जस्यं हि नाम मूर्धन्यतामाप्नोति। त्रिवर्गे धर्मार्थकामरूपे धर्मस्यैव प्राधान्यमङ्गीकुर्वन्ति धर्मशास्त्रविदो मनीषिणः। धर्मानुकूलः कामो धर्मानुकूलोऽर्थश्च वैदिकधर्मे समीहितौ। नहि धर्मेण विरुद्धोऽर्थः कामो वा साफल्यं भजते। धर्मानुकूलः कामस्तु साक्षाद् भगवद्विभूतित्वेन परिगण्यते श्रीभगवद्गीतासु—

'धर्माविरुद्धो भूतेषु कामोऽस्मि भरतर्षभ।'

इति वदता श्रीकृष्णेनापि। लोकोपकारित्वाद् जीवननिर्वाहसाधकत्वाद् निखिलमानवाभीष्टत्वाच्चार्थकामौ न कथमपि वर्जनीयतामाप्नुतः, परन्तु धर्मेणाविरुद्धावेव सन्तावभ्यर्हणीयतां भजत इति शास्त्रकाराणां हार्दम्। अत एव धर्मार्थकामानां परस्परोपकारित्वादेव संतुलिताचरणे शास्त्रस्य तात्पर्यम्, न तु तेषां विरुद्धाचरणे। तथा च व्यासस्य वचनम्—

धर्मार्थकामाः सममेव सेव्या
यो ह्येकसक्तः स नरो जघन्यः।
तयोस्तु दाक्ष्यं प्रवदन्ति मध्यं
स उत्तमो योऽभिरतस्त्रिवर्गे॥

सममित्यस्यार्थः—अनासक्तिभावेन परस्परसंतुलितरूपेणेति। स नरो जघन्यो भवति यः खल्वेकस्मिन् कस्मिन्नपि—धर्मेऽपि—आसक्तः स्यात्। अर्थकामौ विहाय धर्मासक्तिरपि नो स्वीकार्या मानवैः। अर्थकामाभ्यां साकमविरुद्धभावेन धर्मस्याचरणे शास्त्रकाराणामाग्रहः, न त्वर्थकामाभ्यां वर्जिते धर्माचरणे इति निपुणं शास्त्रमर्म निभालनीयं भव्यैः। वर्तमाने कालेऽर्थकामौ धर्मेण नितान्तं विरुद्धौ साक्षा-

त्क्रियेते। अत एव तौ त्याज्यौ। धर्माविरुद्धौ चेत्, नितान्तं ग्राह्याविति वैदिकशास्त्राणां स्पष्टं तात्पर्यम्।

आधुनिकः साम्यवादो भारतीयधर्मानुकूल एव। अन्योपमर्दनपूर्वकं स्वाभीष्टार्थोपलब्धिर्हि साम्प्रतिकी व्यवस्था लक्ष्यते पाश्चात्त्यदेशेषु, परन्तु नैषा स्थितिः साम्यवादेन साकमौचित्यं भजते। एतद्विषये श्रीमद्भागवतस्य वचनमेतन्नितान्तं महत्त्वमाधत्ते—

यावद् भ्रियेत जठरं तावत् स्वत्वं हि देहिनाम्।
अधिकं योऽभिमन्येत स स्तेनो दण्डमर्हति॥ इति।

एषा स्वत्वमीमांसा। यावता द्रव्येण प्राणिनामुदरं भ्रियेत तावत्येव द्रव्ये तेषामधिकारः, उदरपूरणार्थकत्वाद् द्रव्यस्य। ततो योऽधिकं स्वत्वमभिमन्यते. स स्तेनः, चौर एव। स च समाजे दण्डमर्हति। अनधिकृतस्य द्रव्यस्य स्वात्मापादनं हि चौर्यं नाम। तत्तु स्वोदरपूर्तिसमधिकद्रव्येऽधिकारमानिनि पुरुषेऽपि नितान्तं समन्वेति। अत एव तस्मिन् चौर्यभावो दुर्निवारः। एषा स्वत्वमीमांसा नैसर्गिकी औचित्यपूर्णेति सैव साम्प्रतमादरणीया मानवैः। यथार्थतः साम्यवादस्तु भारतवर्ष एव स्ववास्तविकं स्वरूपमाधातुं प्रभवति, नान्येषु भेद-प्रभेदवादिषु पाश्चात्त्यदेशेषु। इत्थं च धर्मानुकूलत्वेऽर्थकामयोर्नहि कुत्रापि केनचित् सङ्घर्षः, न वा क्वापि मतविरोध इति तौ नूनमुपास्यौ। कर्तव्यस्य पालनम्, न त्वधिकाराय सङ्घर्षः; मानवानां मिथो भ्रातृभावः, न तु परस्परं वैमनस्यम्; युद्धानामुपशमः, न तु पारस्परिकः कलहः—एतत् सर्वं साम्प्रतं वैदिकधर्मादेवोपगन्तुं पार्यते, नान्यतः कस्मादपि धर्माभासरूपात् सम्प्रदायात्। अतः स एवोपास्यः। तस्योपासनेन सर्वेषां मानवानामैहिकफलस्योदयः, आमुष्मिककल्याणस्योपलब्धिर्नूनं भविता। अतो वैदिको धर्मो भजनीय इति दिक्।

भक्तेर्वैदिकोद्गमः

भारतभूमिर्भक्तिरसस्य स्निग्धया धारया सिक्ता आप्यायिता च वर्तते। भारतभूमौ भक्तेरुद्गमः कदाऽभूत्, कियता कालेन वर्तते भक्तिरसस्य प्रवाहोऽस्मिन् देशे इति प्रश्ने महान् विसंवादो वर्तते विपश्चिताम्! प्राच्यविद्याविदां पाश्चात्त्यविदुषां मतानुसारेण भारतभूमौ भक्तेः प्रवाहः 'ईसाई'धर्मस्य प्रभावतः संजातः। पाश्चात्त्यधर्मेषु यहूदिधर्मः कर्मप्रधानः, ईसाइधर्मश्च भक्तिरसप्लावित इति सुनिश्चितमस्ति। ईसाईधर्मे भक्तेः प्रभुत्वं भगवति निश्चला भक्तिः प्रधानरूपेण वर्तते! तेषां विपश्चितां मतानुसारतस्तेषामेव भक्तिः संपर्कतो भारतभूमावपि प्रविश्य सर्वत्र प्रसृता अनुमता च जनैः। परन्तु गूढदृष्ट्या यदा विचार्यते, तदा एषा विचारसरणिर्दुष्टा निस्सारा च प्रतीयते।

वैदिकवाङ्मयस्यावलोकनात् स्फुटीभवतीदं यन्न केवलं वेदाः कर्मप्रचारकाः, अपि तु त एव भक्तेरप्युद्भूतिस्थानम्। यदा वयं प्राचीनसाहित्ये धर्मविवेचनं पश्यामः, तदा दृश्यते यत् कालविशेषे कस्यचित् सिद्धान्तस्य विवेच्यविषयं तु वर्तते, किन्तु तस्य सिद्धान्तस्य स्पष्टरूपेणाभिधानं न वर्तते, प्रत्यक्षाभिधानस्याभावे तस्य विषयवस्तुन उपेक्षा भवति। किन्त्वेषोपेक्षा असंगता। इदं सत्यं यत् संहितासु ब्राह्मणग्रन्थेषु चानुरक्तिसूचकभक्तिशब्दस्यासद्भावो वर्तते, किन्तु भक्तेर्विषयास्तु पर्याप्तरूपेणोपलभ्यन्ते तत्र। अत इदं कल्पनं यद् भक्तेस्तत्काले विकास एव नासीत्, सुतरामनुचितम्! संहितासु ब्राह्मणग्रन्थेषु च कर्मकाण्डविषया बाहुल्येन वर्तन्ते, किन्तु भक्तेरपि स्फुट आभासो वर्तत एव। मन्त्रेषु देवानां स्तुतिरतीव मार्मिकरूपेण कृता वर्तते। स्तुतीनां दर्शनेन स्तोतॄणां हृदयेऽनुरागस्याभाव आसीदिति मतमुपहासास्पदमेव प्रतीयते। मम मते तु हृदये भक्तेरभावे एतादृशीनां कोमलानां भावप्रवणानाञ्च स्तुतीनामुद्गम एव भवितुं नार्हतीति। शुष्कनीरसहृदये नैतादृशी कोमलता भावुकता च संभाव्यते। देवानां स्तवनकाले स्तोता ऋषिस्तैः सह माता, पिता, बन्धुरित्यादिकं नाना-

प्रकारकं संबन्धं स्थापयति। अतः स्पष्टमेव यत् स्तोतॄणां हृदये देवान् प्रति सर्वतोभावेन प्रेमानुरागश्च वर्तते।

कासाञ्चित् स्तुतीनामुदाहरणेन एष सिद्धान्तः स्फुटीभविष्यति। प्रथमं त्वग्निसंबन्धिनीनां स्तुतीनां दर्शनं क्रियताम्। यज्ञेष्वग्निः प्रधानदेवो भवति। तेनैव यज्ञानां संपादनं भवति। यद्यपि प्रत्यक्षतया इदमनुमीयते यत् कर्मकाण्डसंबद्धदेवस्य विषये भक्तेरभावो भविष्यति, किन्त्ववलोक्यते यत् तस्य विषयेऽपि भावप्रवणा स्तुतयो वर्तन्ते। स तु न केवलं विपत्तिभ्यस्त्राता वर्णितः, अपि तु मातृ-पितृ-इत्यादिरूपेणापि तस्य वर्णनं वर्तते। अधोनिर्दिष्टे ऋङ्मन्त्रेऽग्निदेवो मनुष्याणां पिता माता च वर्णितोऽस्ति—

त्वां वर्धन्ति क्षितयः पृथिव्यां
त्वां राय उभयासो जनानाम्।
त्वां त्राता तरणे चेत्यो भूः
पिता माता सदमिन्मानुषाणाम्॥

(ऋ० ६।१।५)

य ऋषिरग्निदेवं पितृरूपेण मातृरूपेण च वर्णयति, तस्य हृदये भक्तिभावनाऽवश्यमेवासीत्।

वैदिकदेवेषु इन्द्रः शौर्यस्य प्रतीकः। दस्यूनां दमने मनुष्यास्तस्य साहाय्यं कामयन्ते। तस्यानुकम्पया आर्याः शत्रून् विध्वंसयितुं समर्था भवन्ति। शौर्यप्रधानेन इन्द्रेण सहानुरागसंबन्धस्याभावोऽनुमीयते, किन्तु तेन सहापि स्निग्धानुरागसम्बन्धः स्थापितो वैदिकैर्ऋषिभिः। इन्द्रस्तु न केवलं पिता, अपि तु माताऽपि वर्णितः--

त्वं हि नः पिता वसो त्वं माता शतक्रतो बभूविथ।
अधा ते सुम्नमीमहे॥

(ऋग्वेदे, ८।९८।११)

इन्द्रस्तु न केवलमुपासकानां सखा पिता वा, अपि तु पितॄणामपि श्रेष्ठतमः—

सखा पिता पितृतमः पितॄणां कर्तेमु लोकमुशते वयोधाः।

(ऋ० ४।१७।१७)

इन्द्रदेवस्तु मित्रतायाः सहृदयताया मातृत्वस्य चावासभूमिः। को नाम मनुष्यो य एतावन्तं गुणिनं न कामयेत ?

को नानाम वचसा सोम्याय
मनायुर्वा भवति वस्त उस्राः ॥
क इन्द्रस्य युज्यं कः सखित्वं
को भ्रात्रं वष्टि कवये क ऊती ॥
(ऋग्वेदे, ४।२५।२)

एषु मन्त्रेषु भक्तिभावस्तु सुतरां स्फुटो वर्तते ।

केषुचिन्मन्त्रेष्वेतावाननुरागो वर्णितो यत् शृङ्गारभूमिं स्पृशते । एषु मन्त्रेषु शृङ्गारिकरहस्यात्मकता कमनीयतरा वर्तते चित्तमाकर्षति च । एकस्मिन् मन्त्रे कृष्ण आङ्गिरस ऋषिः कथयति यद् यथा जाया पतिं परिष्वजति, तथा मम मतिरिन्द्रस्य परिरम्भणं करोतु —

अच्छा म इन्द्रं मतयः स्वर्विदः
सध्रीचीर्विश्वा उशतीरनूषत ।
परि ष्वजन्ते जनयो यथा पतिं
मर्यं न शुन्ध्युं मघवानमूतये ॥
(ऋग्वेदे, १०।४३।१)

अपरस्मिन् मन्त्रे काक्षीवती घोषा अश्विनौ पृच्छति—हे अश्विनौ ! युवां रात्रौ कुत्र वसथः ? को वां प्रेमपाशेन तथा कर्षति यथा विधवा स्वदेवरम् —

कुह स्विद् दोषा कुह वस्तोरश्विना
कुहाभिपित्वं करतः कुहोषतुः ।
को वां शयुत्रा विधवेव देवरं
मर्यं न योषा कृणुते सधस्थ आ ॥
(ऋग्वेदे, १०।४०।२)

भक्तिभावनाया वरुणसूक्तेषु सर्वाधिक्यमुपलब्धं भवति । वैदिकदेवेषु वरुणस्य स्थानं महत्त्वपूर्णं वर्तते । स तु सर्वत्र पश्यति (विश्वतश्चक्षुः), स धृतव्रतः, सुक्रतुः, सम्राट् चास्ति । स सर्वज्ञः, स्तोतॄणां मते वरुणः करुणाया आस्पदभूतः । स अपराधिभ्यो दण्डं प्रयच्छति । स ऋतस्य नियामको निर्माता च । स्तोता ऋषिरपराधक्षमापनार्थं मङ्गलप्रदानार्थं च प्रार्थयते—

य आपिर्नित्यं वरुण: प्रियः सन्
त्वामागांसि कृणवत् सखा ते।
मा त एनस्वन्तो यक्षिन् भुजेम
यन्धि ष्मा विप्रः स्तुवते वरूथम्॥
(ऋ० ७।८८।६)

इदं तु तटस्थरूपेणोपलब्धानां भक्तिमन्त्राणां निदर्शनम्, परन्तु प्राचीनाचार्याणां मतानुसारतः साक्षाद्रूपेणापि भक्तितत्त्वस्य समर्थनमुपलभ्यते मन्त्रेषु।

स्वभक्तिसूत्रे शाण्डिल्यो वक्ति—भक्तिः प्रमेया श्रुतिभ्यः (१।२।९) श्रुतिभ्यो भक्तेरवगमो भवति। अस्य सूत्रस्य व्याख्यायां टीकाकर्त्रा नारायणतीर्थेन भक्तेर्नवविधप्रकारस्य समर्थकानां मन्त्राणां सव्याख्यानमुद्धरणं प्रस्तुतम्। अत्र केषाञ्चिदुद्धरणं प्रस्तूयते—

तमु स्तोतारः पूर्व्यं यथा विद
ऋतस्य गर्भं जनुषा पिपर्तन।
आस्य जानन्तो नाम चिद् विवक्तन
महस्ते विष्णो सुमतिं भजामहे॥
(ऋ० १।१५६।३)

[अस्य मन्त्रस्यामाशयः—स्वमत्यनुरूपं जगतः कारणभूतस्य विष्णोः स्तवनं कुरु। स वेदान्तवाक्यानां (ऋतस्य) प्रतिपाद्यः। तस्य स्तुत्या जन्मप्राप्तिर्न भवति। स्तुत्याभावे तस्य नामसंकीर्तनं कुरु। वयं विष्णोस्तेजसो गुणातीतरूपस्य च सेवनं कुर्मः]। अस्मिन् मन्त्रे भगवत्स्तुतिर्नामस्मरणं च निर्दिष्टं वर्तते।

यः पूर्वाय वेधसे नवीयसे
सुमज्जानये विष्णवे ददाशति।
यो जातमस्य महतो महि ब्रवत्
सेदु श्रवोभिर्युज्यं चिदभ्यसत्॥
(ऋ० १।१५६।२)

[यः प्राचीनतमाय नित्यनूतनाय, सृष्टिकर्त्रे स्वयमुत्पन्नाय विष्णवे द्रव्यं स्वात्मानं चार्पयति, यो महतो विष्णोर्महनीयकर्मणां कीर्तनं

करोति स दाता स्ताता वा कीर्त्या अन्नेन वा युक्तः सन् परमपदं प्राप्नोति ।]

अत्र तु श्रवणं कीर्तनं भगवदर्पणं च स्पष्टं निर्दिष्टं वर्तते ।

ब्राह्मणकालेऽप्युपासनायां भक्तेः स्वरूपं बद्धमूलं दृश्यते। यद्यपि ब्राह्मणग्रन्थेषु कर्मस्य प्राधान्यम्, तथापि श्रद्धायुक्ता भक्तिरपि स्पष्टतरा दृश्यते । आरण्यकेषु बहिर्यागानामपेक्षया अन्तर्यागस्य महत्त्वं प्रदर्शितं वर्तते । अस्मिन् समये तु योगस्यापि प्रचार आसीत् । साधकानां चित्तं तु भक्तिं प्रत्युन्मुखमासीत् । उपनिषदस्तु ज्ञाननिदर्शकानि, किन्तु तेष्वपि भक्तेर्निदर्शनं प्राप्यते ।

कठोपनिषदि तु भक्तिभावस्य स्पष्टं वर्णनमुपलभ्यते। आत्मोपलब्धे-रुपायान् दर्शयन्ती श्रुतिः कथयति—

नायमात्मा प्रवचनेन लभ्यो
न मेधया न बहुना श्रुतेन ।
यमेवैष वृणुते तेन लभ्य-
स्तस्यैष आत्मा वृणुते तनूं स्वाम् ॥
(कठ० १।२।२३)

[अयमात्मा वेदाध्ययनेन, धारणाशक्त्या, श्रवणेन चापि नोपलभ्यते। अयं साधको यमात्मानं वरयति तेनैवात्मना एष प्राप्तव्यः । तं प्रति एष आत्मा स्वां तनुं विवृणुते ।] भावस्त्वयं यदात्मनैवात्मोपलभ्यते । अस्मिन् मन्त्रेऽनुग्रहस्य निर्देशो वर्तते । अपरस्मिन् मन्त्रे तु प्रसादस्य स्पष्टनिर्देशोऽस्ति—

तमक्रतुः पश्यति वीतशोको
धातुः प्रसादान्महिमानमात्मनः ॥
(क० १।२।२०)

अर्थाद् निष्कामः पुरुषो जगत्कर्तुः प्रसादेन स्वात्मनो महिमानं पश्यति गतमन्युश्च भवति ।

वैष्णवसम्प्रदाये 'प्रसादस्य' अतिमहत्त्वं वर्तते । भगवतोऽनुग्रहेणैव भक्तस्य कामनासिद्धिर्भवति । श्रीमद्भागवते इदम् 'पोषणम्' इत्यभिधानेना-भिहितम् (पोषणं तदनुग्रहः २।१०।४) । अनेन कारणेन वल्लभाचार्यमतं पुष्टिमतमित्यभिहितम् । श्वेताश्वतरोपनिषदि वर्णितं यत् तप इत्यादि-

प्रभावातिरिक्तं देवप्रसादेनापि श्वेताश्वतर ऋषिः सिद्धिं प्राप्तवानिति (६।२१)। अत्र भक्तेः प्रथमतया स्पष्टं प्रतिपादनं प्राप्यते—

यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ।
तस्यैते कथिता ह्यर्थाः प्रकाशन्ते महात्मनः॥

(श्वेता० ६।२३)

[यस्य नरस्य देवे उत्कृष्टा भक्तिर्भवति, तथा देववदेव गुरावपि भक्तिर्भवेत्, तमेव महात्मानम् इमे उक्ता अर्थाः स्पष्टमवभासन्ते।] उपनिषत्सु तु भक्तिशब्दस्यायं प्रथमो नामतः प्रयोगो वर्तते। परवर्तिनि साहित्ये गुरोर्यन्महत्त्वं दरीदृश्यते तस्य मूलरूपा एषा श्रुतिः। वैष्णवमते तु भक्तेरपेक्षया प्रपत्तेर्महत्त्वमधिकं वर्तते। प्रपत्तौ तु भगवान् एवोपेय उपायश्च वर्तते। आवश्यकता त्वेषा यद् भक्तो भगवन्तं शरणं गच्छेत्। भक्तं शरणापन्नं भगवानुद्धरति। अस्य प्रपत्तिसिद्धान्तस्य प्रतिपादनं श्वेताश्वतरोपनिषदीत्थम्—

यो ब्रह्माणं विदधाति पूर्वं
यो वेदांश्च प्रहिणोति तस्मै।
तं ह देवमात्मबुद्धिप्रकाशं
मुमुक्षुर्वै शरणमहं प्रपद्ये॥

(श्वेता० ६।१८)

अस्मिन् मन्त्रे ब्रह्मणस्तत्कारणभूतस्य वेदस्य चोत्पादकस्य भगवतः शरणं प्रापणीयमिति वर्णितम्। श्रीमद्भगवद्गीता तु वैष्णवानां सर्वश्रेष्ठ ग्रन्थः, अस्मिन् विषये गीताऽपि कठोपनिषदः श्वेताश्वतरोपनिषदश्चानुयायिनी। इत्थं दृश्यते यद् भक्तिसिद्धान्तो वैदिकः। सत्यकामस्य सत्यसंकल्पस्य च ब्रह्मणः प्रसादेनैव साधको भौतिकक्लेशेभ्यो मुक्तो भवति।

प्राचीनटीकाकर्तृणामपि ध्यानमत्रासीत्। महाभारतस्य प्रथितव्याख्याकर्त्रा नीलकण्ठेन 'मन्त्ररामायणम्' 'मन्त्रभागवतम्' इति च यल्लिखितं तत्र वैदिकमन्त्रैर्वेदेषु रामाख्यानस्य भागवताख्यानस्य स्फुटीकरणमस्य निदर्शनम्। श्रीमद्भागवतस्य दशमस्कन्धे सप्ताशीतितमेऽध्याये वेदस्तुतिर्वर्तते, यस्याभिप्रायस्त्वयमेव यद् भक्तिरपि श्रुतीनां प्रतिपाद्या। पुराणकर्तुर्वेदव्यासस्य मतमप्येतदेव। वस्तुतः सर्वेषां धर्मदर्शनसिद्धान्तानां मूलभूतो वेद एव। भक्तेरुद्भवो मनसो वशीकरणेन

भवति। मनसो वशीकरणं तु गुरुकृपया भवति। अस्मिन् विषये उपनिषदां नानामन्त्राणां सारो वेदस्तुतेरस्मिन् पद्ये उपलभ्यते —

विजितहृषीकवायुभिरदान्तमनस्तुरगं
य इह यतन्ति यन्तुमतिलोलमुपायखिदः ।
व्यसनशतान्विताः समवहाय गुरोश्चरणं
वणिज इवाज सन्त्यक्तकर्णधरा जलधौ ॥
(भागवतम् , १०।८७।३३)

श्रीमद्भागवतमहापुराणे भक्तेर्विवेचनं वैशद्येन वर्तते। नवधाभक्तेर्विवेचनं तु प्रसिद्धमेवास्ति। अयमेव निष्कर्षो यद् ज्ञानकर्मसिद्धान्तवद् भक्तिसिद्धान्तोऽपि वैदिकसंहितायां स्फुटं बीजवन्निर्दिष्टो विलसति। अत एव भक्तेरर्वाचीनत्वमवैदिकत्वं च प्रतिपादयन्तो विपश्चितो नूनं परास्ता इति वेदितव्यम्।

(३)

मूलग्रन्थस्य व्याख्याः

शाण्डिल्यभक्तिसूत्राणां गूढार्थाभिव्यञ्जकानां स्फुटतात्पर्यावगतये अनेकैर्विद्वद्भिः प्रमेयबहुला व्याख्या निरमायि। तत्र तिस्रो व्याख्याः प्रसिद्धा विद्यन्ते—(क) स्वप्नेश्वरकृता प्राचीना स्वल्पाक्षरापि परिमितैः शब्दैः सूत्राणां रहस्यार्थं स्पष्टं बोधयति। इयं व्याख्या भाष्यनाम्ना प्रख्याता वर्तते। इयं परिशिष्टे मुद्रिताऽत्र विराजते। (ख) द्वितीया व्याख्या नारायणतीर्थविरचिता **भक्तिचन्द्रिका**भिधाऽत्रैव संस्करणे प्राथम्येन प्रकाशिता विदुषां मनांसि रञ्जयति। पूर्वव्याख्यातोऽनेकेषु विषयेषु वैलक्षण्यं भजमानेयं मूलमर्थं वैशद्येन विस्तरेण च विवृण्वती बहुशोऽवलोक्यते। टीकाकर्तुर्गम्भीरं पाण्डित्यं पदे पदेऽभिव्यक्तिं भजते। अत्र कानचित् सूत्राणि समधिकानि सन्ति, येषां परिचयोऽन्यत्र विहितः सूत्रपार्थक्यपरिज्ञानायालं भविष्यतीति मन्महे। ज्ञानमार्गाश्रयी काशीस्थसंन्यासिनां लब्धप्रतिष्ठो नारायणतीर्थो भक्तिसूत्राणां व्याख्यामरीरचदिति नितान्तं वैलक्षण्याय कल्पते। भक्तिर्वेदानुसारिणीति वैदिकमन्त्राणां याथातथ्यव्याख्यानमुपनिबध्नता ग्रन्थकारेण विशदं

प्रकटीचक्रे इति तु विपश्चितां नूनं प्रमोदकरम् । (ग) तृतीया व्याख्या भवनाथेन कृता प्रकाशितचरोपलभ्यते ।

आसु व्याख्यासु भक्तिचन्द्रिका प्रथमतो मुद्रिता, स्वप्नेश्वरभाष्यं तु परिशिष्टरूपेणोपन्यस्तं व्याख्याद्वयीपार्थक्यविमर्शाय । द्वितीयपरिशिष्टे चत्वारि भक्तिविवरणानि मुद्रितानि । पद्मपुराणे स्कन्दपुराणे च त्रिविध-भक्तिविवरणं नावीन्यमुपधत्ते । नारदभक्तिसूत्रं तु प्रख्याततममेव । भक्तिमीमांसायां नवीनो भक्तिप्रतिपादकः सूत्रग्रन्थोऽत्र संमुद्र्य प्रकाश्यते । परभक्तिसूत्राणि योगे लब्धख्यातिभिर्हरिहरारण्यस्वामिभि-र्विरचितानि विषयस्य संपूर्तयेऽत्र निबद्धानि पण्डितैर्ध्यातव्यानि । इत्थं परिशिष्टेऽस्मिन् ज्ञातानि भक्तिसूत्राणि प्रकाश्यमानानि तत्त्वजिज्ञासूनां कल्याणाय कल्पिष्यन्त इति नो विश्वासः ।

भक्तिमीमांसेति नामधेयो भक्तिविषयको महनीयो सूत्रग्रन्थः पण्डित-गोपीनाथकविराजमहोदयैः टिप्पणीविवरणादिभिः सनाथीकृतः 'सरस्वतीभवन स्टडीज़'नामधेयस्य शोधग्रन्थस्य द्वितीयभागे (१९२३ ई० प्रकाशिते) पृष्ठेषु ६५-८१ पूर्वमेव प्रकाशितो विद्यते । तत एवायं भक्ति-सूत्रग्रन्थो भक्तितत्त्वजिज्ञासूनां सुधियां सौविध्यायाध्ययनस्य सौल-भ्याय चात्र प्रकाश्यते । एतस्य भक्तिसूत्रस्य वैशिष्ट्यमधो निर्दिश्यते—

(क) भक्तिग्रन्थोऽयं भागवतमतानुसारीति स्फुटं प्रतिभाति; मोक्ष-स्यापुरुषार्थत्वं भक्तेः परमपुरुषार्थत्वं च भागवता मन्यन्त इति स्फुटमेव ४।१।७ सूत्रे भागवतानामुल्लेखो वरीवर्तते । भागवताः पाञ्चरात्रवैखानस-सम्प्रदायवद् वैष्णवसम्प्रदायान्तर्गतास्ताभ्यां स्वसिद्धान्तविषये नूनं विभि-द्यन्ते । तेषां सर्वातिशायि प्रामाणिकं पुराणं श्रीमद्भागवतमेवे-त्यस्मिन् सूत्रे निर्दिष्टः सिद्धान्तः श्रीमद्भागवते स्फुटमेव नानास्थलेषु स्फटिकवद् विद्योतमानो भक्तानां हृदयानि रञ्जयति । तथा च भागवतवाक्यम्—

(१) ······भगवान् भजतां मुकुन्दो
मुक्तिं ददाति कर्हिचिदेव न भक्तियोगम् ।
(भाग० ५।६।१८)

(२) नात्यन्तिकं विगणयन्त्यपि ते प्रसादं
किं त्वन्यदर्पितभयं भ्रुव उन्नयैस्ते ।
येऽङ्ग त्वदङ्घ्रिशरणा भवतः कथायाः
कीर्तन्यतीर्थयशसः कुशला रसज्ञाः ॥

(भाग० ३।१५।४८)

(ख) सूत्रमिदं श्रीमद्भागवतमाधारीकृत्य वोपदेवेन निर्मितं मुक्ताफलं सर्वात्मनानुहरति। भक्तिस्वरूपविषये न केवलं तयोः साम्यं प्रतिफलति, यावद् भक्तिप्रकारविषयेऽपि तयोराश्चर्यकरं साम्यं दरीदृश्यते। इदं तु ध्रुवमुन्नेतुं पारयामो यदिदं सूत्रं मुक्ताफलमाश्रित्यैव केनाप्यवान्तरकालिकेन ग्रन्थकर्त्रा निबद्धम्। भक्तिप्रकारा द्वयोर्ग्रन्थयोर्वर्णिताः कथं साम्यं भजन्त इति स्पष्टप्रदर्शनार्थं ते ते प्रकारा अधः पिण्डीकृत्य प्रदर्शिता विद्यन्ते। मुक्ताफले मुख्यतो भक्तेः प्रकारद्वयं समुपलभ्यते—विहिता निषिद्धा चेति। अत्र सूत्रे विहिताया भक्तेर्वर्णनं तु स्फुटं दृश्यत एव। निषिद्धाया भक्तेरपि संकेतोऽत्र २५-२६ अङ्किते सूत्रद्वये निगूढतया समुपलभ्यत एव। निषिद्धाया भक्तेर्नामोल्लेखमन्तरेणाप्येतत्सूत्रद्वयानुशीलनं तस्या स्वीकरणमनुमापयत्येव। तथा च २५ सूत्रे आद्यान्त्यपदेन तथा २६ सूत्रे मध्यमयोरिति पदेन च निषिद्धाया भक्तेः प्रकारचतुष्टयं ध्रुवमुपक्षिप्तं समुपलभामहे। सूत्रद्वयमेतद् वोपदेवीयमुक्ताफलमेव स्वात्मना निर्दिशति। एतद्विषयेऽत्रत्या टिप्पणी विलोकनीया। निषिद्धभक्तिप्रकारे कामजा भक्तिराद्या, स्नेहजा चान्त्या। एतयोः फलं साधनभक्तिरेव, न तु शुद्धा भक्तिः। अत एव इमौ भक्तिप्रकारौ कर्मणः सादृश्यं भजेते। यथा सात्त्विकानि कर्माणि साधनरूपाया भक्तेरुत्पत्तौ कारणानि भवन्ति, न तु साध्यरूपाया भक्तेः। इत्थमेव कामजास्नेहजाभक्तिप्रभेदावपि। मध्यमयोरिति पदं द्वेषजां भयजां च भक्तिद्वयीं परिचिनुते। नह्येताभ्यां साधनभक्तिर्जन्यते

का कथा शुद्धाया भक्तेरिति। इत्थं सूत्रद्वयं मुक्ताफलस्थं निषिद्धभक्ति-प्रकारमेव संकेतयति। तदत्र भक्तिसूत्रस्यैतस्य मुक्ताफलरचनाकाला-दानन्तर्यं दृढमुन्नेतुं पार्यत इति विदांकुर्वन्तु विपश्चितः। वोपदेवस्तु यादवनरेशमहादेवस्य (१२६० ई०—१२७१ ई०) तथा तदुत्तराधि-कारिणो रामचन्द्रस्य (१२७१ ई०—१३०९ ई०) धर्मामात्यपदेऽभिषिक्तस्य प्रख्याततमस्य हेमाद्रेराश्रयं भजमान आसीत्। अत एव ईशवीयशतकस्य त्रयोदशशतके तस्याविर्भावकालोऽवर्ततेति तु निश्चप्रचमेव। तद्-विरचितमुक्ताफलस्याश्रयणं भक्तिसूत्रस्यास्य त्रयोदशशतकादर्वाचीनत्वं ध्रुवं प्रमाणयति।

मुक्ताफले भक्तिभेदाः

- भक्तिः
  - विहिता
    - शुद्धा
    - मिश्रा
      - ज्ञानमिश्रा = (निर्गुणा)
      - कर्मज्ञानमिश्रा
        - उत्तमा
        - मध्यमा
        - अधमा
      - कर्ममिश्रा
        - सात्त्विकी
          - कर्मक्षयार्था
          - विष्णुप्रीत्यर्था
          - विधिसिद्ध्यर्था
        - राजसिकी
          - विषयार्था
          - यशोऽर्था
          - ऐश्वर्यार्था
        - तामसिकी
          - हिंसार्था
          - दम्भार्था
          - मात्सर्यार्था
  - निषिद्धा
    - कामजा
    - द्वेषजा
    - भयजा
    - स्नेहजा

भक्तिमीमांसोल्लिखिता भक्तिभेदाः

- भक्तियोगः
  - शुद्धः
  - मिश्रः
    - ज्ञानमिश्रः
    - कर्मज्ञानमिश्रः
      - उत्तमः
      - मध्यमः
      - अधमः
    - कर्ममिश्रः
      - सात्त्विकः
        - कर्मक्षयार्थः
        - विष्णवर्पणार्थः
        - विधिसिद्ध्यर्थः
      - राजसिकः
        - विषयाद्यभिसन्धि-भेदात् त्रिविधः
      - तामसिकः
        - हिंसादिफलभेदात् त्रिविधः

शाण्डिल्यभक्तिसूत्राख्यग्रन्थस्यैतस्य प्रणेताऽऽसीद् महर्षिशाण्डिल्यः। कस्मिन् देशे कस्मिँश्च काले महर्षिरयं स्वजीवनं यापयामासेति प्रश्नं दाढर्येनोत्तरितुं नैव क्षम्यते, साधकप्रमाणानां सुतरामभावात्। सन्त्यनेके शाण्डिल्याभिधानभाजो महर्षयो नानाग्रन्थेषु समुद्दिष्टाः। तेषु कतमोऽयं महर्षिः. केन च साकं साम्यमैक्यं वा भजत इति कथयितुं निश्चयेन नैव पार्यते। बृहदारण्यकस्य चतुर्थाध्याये वंशनिरूपके ब्राह्मणे 'कौण्डिन्यात् कौण्डिन्यः, शाण्डिल्यात् शाण्डिल्यः' इति रीत्या शाण्डिल्यस्य नाम समुपलभ्यते। ललितादेव्या महात्मनो व्यासस्य च शिष्यभूतः शाण्डिल्यनामभाक् शाण्डिल्यसंहिताप्रणेता कश्चित् शाण्डिल्यः स्मृतः। अनयोः कः खलु भक्तिसूत्रग्रन्थस्य लेखकः सम्भाव्यत इति तु सम्यक् कथयितुं नैव समीहे। बृहदारण्यकस्य षष्ठाध्यायपञ्चमब्राह्मणे शाण्डिल्यो वात्स्यत्वेनोल्लिखितो निर्दिश्यते। अतोऽयं व्यासशिष्यात् शाण्डिल्यसंहिताप्रणेतुः शाण्डिल्याद् भिन्न एवेति गुरुनाम्नो भिन्नत्वादनुमातुं पार्यते। पाञ्चरात्रसाहित्ये शाण्डिल्यमहर्षेर्नाम ग्रन्थकर्तृत्वेन बहुशः स्मृतो निर्दिश्यते। भक्तिसूत्रप्रणेता महर्षिः शाण्डिल्यः पाञ्चरात्रानुयायीति सूत्राणामध्ययनाद् ध्रुवं निर्णेतुं पारयति विद्वज्जनः। अत एव रामानुजाचार्याणां व्याख्याकर्तृत्वं साधु संगच्छते। ११३ पृष्ठे "वैषम्यादसिद्धम्' (१।२।६) इति, तथा च "न च क्लिष्टः परः स्यात्" (१।२।७) इति सूत्रद्वयमिदमन्यथा योजयन्ति रामानुजाचार्या इति भक्तिचन्द्रिकास्थसमुल्लेखेन स्फुटतरेण श्रीरामानुजाचार्याः शाण्डिल्यभक्तिसूत्राणामुपरि कमपि व्याख्याग्रन्थमरीरचन्निति स्पष्टं प्रतीयते। तेन भक्तिसूत्राणां निर्माणकालोऽप्यनुमातुं पार्यते। द्वादशशतकस्थाद् रामानुजाचार्यात् प्राचीनतरोऽयं ग्रन्थ इति तु निर्विवादम्। श्रीमद्भगवद्गीतायाः स्पष्टः, श्रीमद्भागवतस्य चास्फुटो निर्देशो ग्रन्थस्यैतस्य

भागवतादर्वाचीनत्वमनुमापयति। इत्थं पञ्चम-द्वादश-शतकयोर्मध्यभागे कस्मिन्नपि काले निर्मितोऽयं ग्रन्थ इति वक्तुं सुशकम्।

भक्तिचन्द्रिकाप्रणेता श्रीनारायणतीर्थः श्रीरूपगोस्वामिनो मधुसूदनसरस्वतीतश्चाऽर्वाक्कालिक इत्यपि भक्तिचन्द्रिकाध्ययनाद् निःसंशयं प्रतीयते। विनैव नामनिर्देशं भक्तिरसामृतसिन्धुतः प्रघट्टकमेकं पद्यबद्धमुद्धरति ग्रन्थकारः। मधुसूदनसरस्वती आदरसूचकेन वृद्धैरिति पदेन स्मृतः समुपलभ्यते (९ पृष्ठे)। ३० पृष्ठे एकादशभूमीनां समग्रं विवरणं मधुसूदनसरस्वतीविरचितभक्तिरसायनस्थं वर्णनसाधारीकरोति। अत्रैव भक्तिरसायनात् श्लोकत्रयं समुद्धृतमपि समुपलभ्यते। अतोऽनेन विवरणेन श्रीनारायणतीर्थस्याविर्भावकालो ध्रुवमुन्नीयते। श्रीरूपगोस्वामी वृन्दावनवासं स्वीकुर्वन् भक्तिप्रकाशनान् ग्रन्थप्रवेकान् प्रणिनिनाय, तस्याविर्भावकालः १५४८ सं०–१६४८ सं० यावत् (१४९२ ई०–१५९१ ईस्वी)। मधुसूदनसरस्वती काश्यां निवसन् रामचरितमानसाख्यस्य रामायणेतिप्रख्यातनामधेयस्य प्रणेतुर्गोस्वामितुलसीदासस्य सुहृदासीदिति वदन्ति तज्ज्ञाः। तुलसीदासेन १६३१ वैक्रमाब्दे (=१५७५ ई०) चैत्रमासस्य रामनवम्यां स्वीयरामायणस्य प्रारम्भोऽयोध्यायामकारि। १६८० वैक्रमाब्दे (=१६२४ ई०) च असीघट्टे काश्यां स्वभौतिककलेवरं विहाय वैकुण्ठवासी बभूवेति निगदन्ति तच्चरितलेखकाः। तुलसीदासस्य सुहृद्भूतस्य मधुसूदनसरस्वतीमहाभागस्य स एवाविर्भावकालो विक्रमस्य सप्तदशशतकस्य मध्यभागः। मधुसूदनस्य प्रामाण्यमुद्घोषयन्तः श्रीनारायणतीर्थचरणा अष्टादशशतकस्य प्रारम्भे काश्यामेव प्रादुर्बभूवुरिति नूनं निश्चेतुं पारयामः।

श्रीनारायणतीर्थानां दार्शनिकं वैदुष्यमतीव चेतश्चमत्करोति विपश्चिताम्। अद्वैतवेदान्तसम्प्रदाये दीक्षिता इमे महाभागा वेदस्य, उपनिषदाम्, पुराणानां च; विशेषतो भागवतस्य प्रकाण्डपण्डिता बभूवु-

रिति विषये न विद्यते संशीतिर्लेशतोऽपि। दार्शनिकानां मतान्यपि बहुषु स्थलेषूद्धृतानि, कुत्रचिद् मण्डितानि, कुत्रचिच्च खण्डितानि। ५८ पृष्ठे मीमांसकमतं तु सामान्यतो निर्दिश्यते, परन्तु १३९-१४० पृष्ठयोः श्लोकवार्त्तिकस्थपद्यान्युद्धृत्य भट्टकुमारिलमतं साग्रहं खण्ड्यत इति निभालयन्तु विपश्चितः। श्रीमद्भागवतं प्रायः प्रतिसूत्रमुद्धृत्य स्वामिचरणैर्भक्तिशास्त्रे स्वालौकिकी वैदुषी प्रकटीचक्रे। स्वप्नेश्वरस्य भाष्यं लघ्वक्षरसमन्वितं मूलं सारल्येन व्याख्याति। भक्तिचन्द्रिका तु विपुलाक्षरमण्डिता मूलं वैशद्येन विवृणुते।

शाण्डिल्यभक्तिसूत्रस्य नवीनमिदं संस्करणं संकुर्वता मयाऽनेकतः साहाय्यं समुपलब्धम्। तत्रानुसन्धानसंस्थानेऽनुसन्धानसहायकपदभाजा डा० रामशङ्करभट्टाचार्यसहोदयेन भक्तिचन्द्रिकायां समुद्धृतानां पद्यानां मतानां च सम्यङ्निर्देशो महता परिश्रमेण व्यधायि। साहित्याचार्य-पालिभाषाचार्यपदवीकेन पण्डितपरमेश्वरपाण्डेयेन ग्रन्थस्य संशोधने महान् भारः स्वयमेव गृहीतः। साहाय्यकर्मणाऽनेन भृशमुपकृताः स्म इत्येताभ्यामुभाभ्यामाशीर्वचांसि वितरामः। रसशृङ्गारशिरोमणेः श्रीराधामाधवस्यानुकम्पासान्द्रमानसोऽयं जनो भक्तिप्रमेयवर्णनपरमिदं ग्रन्थरत्नं तस्यैव चरणारविन्दयोः समर्प्य कामप्यानन्दततिमनुभवति—

यो दुर्विमर्शपथया निजमाययेदं
सृष्ट्वा गुणान् विभजते तदनु प्रविष्टः।
तस्मै नमो दुरवबोधविहारतन्त्र-
संसारचक्रगतये परमेश्वराय॥

वैशाखी पूर्णिमा, सं० २०२४
२३-५-६७
वारागसेय संस्कृत विश्वविद्यालयः
वाराणसी

बलदेव उपाध्यायः
अनुसन्धानसंस्थानस्य संचालकः

PREFATORY NOTE

(Part I First Edition)

The present edition of Bhakti Chandrikā is based upon a single Manuscript, the only one available, existing in the Government Sanskrit Library, Benares. It may be described as follows:—

Leaves, 1 – 116. Size, 9.9″ × 4.5″ inches, Lines, 11 in a page; and letters, 45 in a line. Countrymade paper. Deva Nāgar script. Date, Saṃvat 1813 (= 1756 A. D.).Read and Corrected. The Colophon: संव० १८१३ समैनाम जेठ सुदि ६ वार के पुस्तक समाप्त ।। श्रीरस्तु शुभमस्तु ।। श्री ।। गोविंदाय नमः ।। At the end of the Ms. appear the following verses:—

अपश्यन्नेवेदं श्रतधनकलत्रादिनिखिलं
समस्तव्यापारोपरतमनसौत्सुक्यविवशः ।
अवश्यं त्वं द्रक्ष्यस्यवहितदृशा कंसमथनं
समासीनं वृन्दावनभुवि महानन्दसुभगम् ।।
कदाचिद् गोविन्दे नयनपथमुल्लंघ्य विपिनं
परं प्राप्ते काचिद्धरिचरणसंसक्तहृदया ।
गलद्बाष्पासारप्लुतकुचतटीभारनमिता
तदानीमेवाभूत् तनुतनुतया स्रस्तवलया ।।

❃ ❃ ❃

There have appeared on Śāṇḍilya's Bhaktisūtras *two* Commentaries up to date, viz. one be Svapneśvara and the other by Bhavadeva. The Bhakti Chandrikā, by Nārāyana T rtha, is an addition, and a valuable

addition, to this list. The interest of this Commentry is derived from the fact that it is an elaborate interpretation on the sūtras embodying many of the current views of the Bhakti Schools and that it is the work of a scholar who, apart from his versatile productions, was one of the foremost Sannyāsins of his time at Benares. In this last respect he bears a close affinity to the great Madhusūdana Sarasvatī, of whose Bhagavadbhaktirasāyana he seems to have made a liberal use.

Further details regarding the work and its author will appear in the 'Introduction' in the second part of this work.

Government Sanskrit College.
BENARES.
March 30, 1924.

Gopi Nath Kaviraj

FOREWORD

(Part II First Edition)

The following pages contain the Second Part of the Bhakti-Candrikā Part I already published, as No. 9 of this Series, in 1924. It is a pity that, like the first part, it is also based upon a single manuscript already described in the Prefatory Note to that part. In view of this paucity of manuscript material there is nothing strange if the edited text of the commentary published herewith is not as thoroughly satisfactory as one would like it to be. Still it is evident that the learned editor, who has already edited several works on Bhakti in the same series and is familiar with the Bhakti literature, has spared no pains in preparing the present edition and for this he deserves our hearty congratulations. The several Appendices, including the list of Corrigenda, he has added, at my suggestion, towards the end of the book, with reference to the whole work, have greatly enhanced the usefulness of the edition.

It is not necessary to point out here the importance of the Bhakti-Chandrikā. It is more eloborate than any other known commentary on the Śāṇḍilya-Sūtras. Its every page bears a stamp of the vast learning of its versatile author. But it would seem that in spite of these facts it cannot outweigh the importance of Svapneśvara's commentary (called Bhāṣya). The latter is the earliest known commen-

tary on the same Sūtras and probably for the same reason, to my mind, offers more natural explanation of many a Sūtra. This is especially true, I think, in the case of those Sūtras in which old ancient texts are evidently referred too; cp., for instance, Sūtras 14. 23 and 84. There is also every probability that in such cases the older commentary is based on some tradition directly coming from the author of the Sūtras himself.

It may also be mentioned here that, apart from the differences in interpretation, the Bhāṣya and the Bhakti-Candrikā also differ, not only as regards the readings of many Sūtras, but also as regards the total number of the same. It will not be out of place here to add a list of all such differences. In some cases obviously the difference must be due to the carelessness on the part of scribes. In other cases the differences are real as would appear from a comparison of both the commentaries.

Svapneśvara's Bhāṣya[1]		Bhakti-Candrikā	
अत एव	८	अत एव च	१।१।८
प्रकरणाच्च	११	प्रकरणात्	१।२।२
तद्भावाद्	१४	तद्भावाद्	१।२।५
अभिज्ञाप्त्या	१५	अभिज्ञंया	१।२।६
प्रागुक्तं च	१६	The Sūtra is omitted	
The Sūtra is omitted		भक्तिः प्रमेया श्रुतिभ्यः	१।२।९
Ditto		पुराणेतिहासाभ्यां चेति	१।२।१०

1. For the Bhāṣya I have utilized the Bib. Indica edition.

Svapneśvara's Bhāṣya	Bhakti-Candrikā	
Ditto	पृथुध्रुवप्रह्लादाम्बरीष-शुकसनकनारद-भजनाचाराच्च	१।२।११
प्रयाजवत् १९	प्रयाजादिवत् (But cf. Comm.)	१।२।१२
ऐश्वर्यपरां २९	ऐश्वर्यपदां	२।१।३
आत्मैकपरां ३०	आत्मैकपदां	२।१।४
उभयपरां ३१	उभयपदां	२।१।५
अभिज्ञानवद् ३२ (But cf. Bhāṣya).	प्रत्यभिज्ञावद्	२।१।६
परैश्वर्यम् ३५	परमैश्वर्यम्	२।१।९
सर्वानृते ३६	सर्वामृते	२।१।१०
अनुवर्तमानात् ३७	अनुवर्तनात्	२।१।११
वेद्यम् ४२	चेत्यम्	२।१।१६
तत्परिशुद्धिश्च ४३	तत्परिशुद्धिस्तु	२।१।१७
चाजन्मशब्दात् ४७	चाजन्मने शब्दात्	२।१।२१
तस्य हि ४९	हि तस्य	२।१।२३
उपास्यादौ ५८	उपास्यादौ	२।२।३
अत्राङ्गप्रयोगानां ६२ (—णां Bombay edition)	अप्रयोगानां	२।२।७
इतरेषां ६६	इतरेषां तु	२।२।११
स्वयमर्पितं ६८	स्वयमप्यर्पितं	२।२।१३
निमित्तगुणाव्यपेक्षणात् ६९ (According to Cowell गुणा-is a misprint)	निमित्तगुणव्य-पेक्षणात्	२।२।१४
श्रेयस्यः ७१	ताः श्रेयस्यः	२।२।१६
गौणं ७२	गौण-	२।२।१७
अननुष्ठितिर् ७५	अनुष्ठितिर्	२।२।२०

Svapneśvara's Bhāṣya	Bhakti.Candrikā	
	(But cf. Cnmm.)	
आप्रयाणम् ५७	आप्रायणम्	२।२।२०
(Cowell corrects to आप्रायणम्)		
भक्ताधिकारे ७६	भक्त्यधिकारे	२।२।२१
उत्क्रान्तिस्मृति-८१	उत्क्रान्ति-	२।२।२६
(See however Cowell's note)		
सैकान्तभावो ८३	सैकान्तभावे	२।२।२८
अस्माद् ९१	अस्मादिति	३।१।७
तथा ९२	तथा हि	३।१।८
-बुद्धिर्बुद्धिलयाद् ९६	-बुद्धिलयाद्	३।२।४
(Cf. Cowell's note)		
अभक्तिः ९८	अभक्तेः	३।२।६
कारणासिद्धेः ९८	करणत्वासिद्धेः	३।२।६
(Cf. Cowell's note)		
अविस्तरोभावा विकाराः १००	आविस्तिरोभाव-	
(Cowell corrcets according to several Mss. to आविस्तिरोभावा विकाराः)	विकाशाः (?)	३।२।८

Sarasvati Bhavana,
Benares.
18th June, 1938

M. D. Shastri,
Principal, Sanskrit College
Benares

किञ्चित्प्रास्ताविकम्

(प्रथमसंस्करणस्य)

अथेदं मुद्राप्य प्रकाश्यते भक्तिचन्द्रिकासंज्ञकं भक्तिशास्त्रीयं ग्रन्थरत्नम । नवविधश्रवणादिभक्तिबोधकेभ्यः-'तमुस्तोतारः' इत्यादि-ऋग्वेद-मन्त्रेभ्यः[1], जयासंहिता[2]ब्रह्मवैवर्तपुराणा[3]लोचनतः काण्वीशाखातः, शाण्डिल्यसंहिता[4]लोचनेन तैत्तिरीय-बौधायनशाखातः सूक्ष्मरूपेण विनिर्गतं भक्तिस्वरूपमिति ज्ञातुं शक्यते । भक्तेः शास्त्ररूपं तु श्रीनारद-शाण्डिल्यमहर्षिभिः प्रकटीकृतमिति तेषां सूत्रालोचनतः स्फुटीभवति । अनयोः सूत्रावलोकनेन भक्तिशास्त्रविषये पूर्वमासन्ननेकर्षिमुनीप्रणीता अनेकमतबोधका ग्रन्था[5] इति निश्चेतुं शक्यते, परन्त्वस्माकं सर्वथा दौर्भाग्येण तेषामेकोऽप्यधुना नोपलभ्यते ।

श्रीमहर्षिनारदेन भक्तिविषये चतुरशीतिसूत्राणि, तथा श्रीमहर्षि-शाण्डिल्येन शतं द्व्यधिकशतं वा [6]सूत्राणि प्रणीतानि । श्रीनारदमहर्षि-

---

१. अस्मिन् विषये भक्तिनिर्णयः, भगवन्नाममाहात्म्यसंग्रहः, प्रकृतग्रन्थश्च (पृ० ७७-८२) द्रष्टव्यः ।

२. काण्वीं शाखामधीयानौ वौपगायनकौशिकौ ।
प्रपत्तिशास्त्रनिष्णातौ स्वनिष्ठानिष्ठितावुभौ ॥ (ज० सं० प० १)

३. अत्र राधिकाया आख्यानं कण्वशाखायामस्तीति प्रतिपादितम् । (८२-४८)

४. तैत्तिरीया जगुश्चोर्ध्वं पुण्ड्रं वै श्रौतभस्मना ।
वर्णाश्रमाचारवता धार्या तुलसिमालिका ।
शिखोपवीतवन्नित्या जगावार्थवणश्रुतिः ॥ (शां० अं० ३-४)
पदोदकं हरेः पेयं पूजान्तेऽपि दिने दिने ।
सर्वतीर्थसमं तद्धि प्राह बौधायनश्रुतिः ॥ (शां० अं० ३-८)
उरुक्रमस्य पादाब्जपाथो यो न पिबेन्नरः ।
विष्णोर्लोकं स न व्रजेदिति ऋक् शाश्वती श्रुता ॥ (शां० अं० ३-८)

५. नारदसूत्राणि—१६, १७, १८, १९, ३०, ७६, ८३, द्रष्टव्यानि ।
तथा शाण्डिल्यप्रणीतानि—२-१-३, ४, ६ द्रष्टव्यानि ।

६. इदमत्रत्यसूत्रसङ्ख्याबोधकपरिशिष्टतो ज्ञेयम् ।

रचितसूत्रापेक्षया श्रीशाण्डिल्यमहर्षिविरचितसूत्राण्येव भक्तिविषयकसकलविचारकरणेन मन्दजनानुग्राहकाणीति सुप्रथितं तद्विदाम्। अत एवेमान्येव भाष्यकारादिभिरनेकविद्वच्छ्रेष्ठैर्भाष्यव्याख्यादिभिर्भूषितानीति[1] सुप्रसिद्धम्। अत्र मोक्षोपायत्वेन प्रसिद्धानां ज्ञान-भक्ति-कर्मयोगोपायानां गौणमुख्यभावं सयुक्तिकं विचार्य भक्तेरेव सर्वेषामुपायानां श्रैष्ठ्यं प्रतिपादितम्। सर्वथा वैदिककर्मविरोधिनि वैषयिकानेकाशास्त्रीयसुखप्रदायके ज्ञानशत्रुभूते शरीरेन्द्रियमनोदुर्बलत्वेनाशक्ययोगे कराले कलिकाले मन्दमतीनां सम्पूर्णं कर्मादिकं कर्तुमसमर्थानां कृते विना भक्तिं नान्य उपायश्चित्तशान्तये परसुखप्राप्तये च समर्थः। सोऽप्युपायः स्वस्ववर्णाश्रमोचितकर्मयुत एव सफलीभवतीति विदितचरमेव भक्तिशास्त्रविदाम्। अस्य भक्तिप्रतिपादकसूत्रजातस्य सम्यगर्थप्रतिपादकस्य सर्वभक्तिशास्त्रीयटीकापेक्षया प्राचीनस्य श्रीस्वप्नेश्वरकृतभाष्यस्यार्थं विशदयन्ती, अपेक्षितसकलार्थसंपादयन्त्येषा भक्तिचन्द्रिकैव साधयति भक्तिरहस्यजिज्ञासूनां स्वाभिप्रेतं सकलमर्थजातम्। नैषा टीका विद्यमानचैतन्यवाल्लभरामानुजीयमाध्वादिमतसम्बद्धभक्तिशास्त्रग्रन्थवत् तत्तन्मतसम्बद्धभक्तिस्वरूपप्रतिपादयित्री, नापि सकलतत्तन्मतस्थभक्तिस्वरूपस्यैकान्ततो विरोधिनी, अपि तु श्रीमधुसूदनसरस्वतीविरचितभक्तिरसायनवद् विशुद्धभक्तिप्रवाहप्रतिपादयित्रीति ग्रन्थस्थविषयावलोकनेनैव स्फुटं भवेत्।

भक्तिचन्द्रिकावलोकनतो ज्ञायते भक्तिसूत्राणामेतेषामासन्ननेकाः टीका इति। यतस्तत्तत्स्थलेषु ग्रन्थकृता श्रीनारायणतीर्थेन क्वचित् सूत्रव्याख्यानान्तराणि प्रदर्श्य तेषां साधुत्वादिकं विवेचितम्[2]। विशेषतः १०१ पृष्ठे श्रीरामानुजचरणानां मतं नामोल्लेखपूर्वकं प्रदर्शितम्। अनुमीयते चानेनासीद्रामानुजचरणानां व्याख्यानं भक्तिसूत्रोपरि, परन्त्वस्माकं दुरदृष्टवशतो नैव दृष्टिगोचरमद्यापि जातम्[3]। अत्रत्यविशेषविषयादिकं विषयसूचीपरिशिष्टतो ज्ञातुं सुशकम्। अतोऽत्र नायं विचारः

---

१. श्रीस्वप्नेश्वरकृतभाष्यम्, श्रीभवदेवमिश्रकृतमभिनवभाष्यम्, श्रीनारायणतीर्थकृता भक्तिचन्द्रिकाटीका भक्त्यधिकरणमालेति सर्वं चैतस्य सूत्रजातस्य सम्बन्धि।

२. द्रष्टव्यानि—९१, ९२, १४२, २१८ इत्यादिपृष्ठानि।

३. यदि स्यात्केषाञ्चिन्महाभागानां निकटे सम्पूर्णं खण्डितं वा तत्, तैः स्वयं प्रकाश्याथवास्मन्निकटे प्रेषणेनानुग्रहः कर्तव्य इति।

प्रतन्यते। प्रकृतशाण्डिल्यसूत्राणि नारदप्रणीतभक्तिसूत्रतः प्राचीनानि श्रीभगवद्गीताश्रीमद्भागवतपुराणतोऽर्वाचीनानीति वक्तुं पार्यते। यतो महर्षिणा नारदेन महर्षिशाण्डिल्यस्य नामसंकीर्तनं भक्तिविषयकमतान्तरप्रतिपादनप्रसङ्गे 'आत्मरत्यविरोधेनेति शाण्डिल्यः' इति रीत्या कृतं दरीदृश्यते। भगवद्गीतातोऽर्वाचीनत्वे 'सैकान्तभावे गीतार्थप्रत्यभिज्ञानात्' इति महर्षिशाण्डिल्यसूत्रमेव प्रमाणम्। श्रीमद्भागवततोऽर्वाचीनत्वे च 'परां कृत्वैव सर्वेषां तथा ह्याह' इति सूत्रं प्रमाणतया निर्देष्टुं शक्यम्। यद्यप्यस्मिन् सूत्रे स्पष्टतया श्रीमद्भागवतस्योल्लेखो गीतावन्नोपलभ्यते, तथापि यमर्थमुद्दिश्य 'तथाह्याह' इत्युक्तम्, सोऽर्थः— ज्ञानान्तानां साधनानां परानुरक्तिरूपां भक्तिमुत्पाद्यैव श्रैष्ठ्यं नान्यथेत्याकारको विशेषरूपेण श्रीमद्भागवत एवोपलभ्यते नान्यत्र। भक्तिशास्त्रसम्बन्धित्वेन निर्देशोऽस्य शाण्डिल्यमहर्षेः शाण्डिल्यसंहितायामुपलभ्यते[१]। सूत्रोपरि श्रीरामानुजचरणानां भाष्यकृतत्वेनोपलब्धेरीशवीयदशमशताब्दीतः पूर्वं सूत्राणामुपलब्धिः कल्पयितुं शक्या[२]। अस्तु।

अस्य सूत्रजातस्य कर्तृश्रीशाण्डिल्यविषयकेतिवृत्तजिज्ञासायां वंशाध्यायवर्णितो भक्तिशास्त्राध्येता महर्षिः शाण्डिल्यः स्यादिति कल्पयितुं सुशकम्[3]। शाण्डिल्यसंहिताप्रणेता ललितादेवीशिष्योऽप्येकः शाण्डिल्य उपलभ्यते, तेन प्रणीतभक्तिशास्त्रीयशाण्डिल्यसंहिताया उपलब्धेः, शाण्डिल्यसंहितायां संहिताकर्तृशाण्डिल्यस्य वंशाध्यायनिरूपितशाण्डिल्याद्भिन्नत्वेन निर्देशाच्च वंशाध्यायवर्णितः शाण्डिल्य एव सूत्रप्रणेता। जया-

१. द्वितीयो वेदशाण्डिल्यो वंशाध्याये निरूपितः।
येनाधीता त्रयी विद्या भक्तिविद्या ह्यनुत्तमा॥ (अं० ४, अ० १६, श्लोकः २७)

२. इदमप्यपरं प्रसङ्गतः प्रसिद्ध्यति श्रीमद्भागवतं श्रीमहर्षिशाण्डिल्यसूत्रकालतः प्राचीनतममिति।

३. द्वितीयो वेदशाण्डिल्यो वंशाध्याये निरूपितः। येनाधीता त्रयी विद्या भक्तिविद्या ह्यनुत्तमा॥ (शां० अं० ४, अ० १६–२७)। बृहदारण्यके चतुर्थाध्याये वंशनिरूपके पञ्चमब्राह्मणे 'कौण्डिन्यात् कौण्डिन्यः शाण्डिल्यात् शाण्डिल्यः' इत्युक्तम्।

४. तृतीयो गार्धभिः प्रोक्तो वीरवैष्णवशासनम्।.........॥ शिष्यः श्रीललितादेव्याः व्यासस्य च महात्मनः। संहिता कथिता तेन सारभूतागमाम्बुधे॥ (शां० अं० ४ अ० १६)

संहिताप्रणेता शाण्डिल्यस्त्वस्मात् सूत्रप्रणेतृश्रीमहर्षिशाण्डिल्याद्भिन्न एव, यतो जयासंहितासम्बद्धत्वेन नारदशिष्यत्वेन च तस्योपलब्धेः[१]। अस्य तु गुरुशिष्यानुक्रमे वात्स्यादनन्तरत्वेनोपलब्धेः[२]।

भक्तिचन्द्रिकाप्रणेता विद्वदग्रेसरः श्रीनारायणतीर्थो भक्तिरसायनस्थानेकपङ्क्त्यानुपूर्वीलेखनेन वृद्धपदेन मधुसूदनसरस्वतीबोधनेन[3] श्रीमधुसूदनकृतसिद्धान्तबिन्दुव्याख्याकरणेन च मधुसूदनसरस्वत्या अनन्तरं जात इति, संस्कारकौस्तुभादिग्रन्थप्रणेतृद्वितीयानन्तदेवात् प्राचीन इति च वक्तुं शक्यम्। यतोऽनन्तदेवेन स्वीयभक्तिनिर्णये श्रीनारायणतीर्थप्रदर्शितानामृक्शाखागतानां नानाविधभक्तिबोधकानां मन्त्राणां स्वीकारस्य दर्शनात्, श्रीब्रह्मानन्दानां नारायणतीर्थशिष्याणां द्वितीयानन्तदेवतः प्राचीनत्वाच्च। एवं च श्रीमधुसूदनसरस्वत्या अनन्तरं द्वितीयानन्तदेवात् पूर्वं श्रीनारायणतीर्थानां स्थितिकाल इति संभावयितुं शक्यते। अथापि श्रीमधुसूदनसरस्वत्याः कालस्त्वीशवीयषोडशशतकमिति विदुषां सम्मतः। द्वितीयानन्तदेवसमयस्तु तदाश्रयदातुर्बाजबहादूरचन्द्रदेवस्योपलब्धदानपत्राधारेण बाजबहादूरचन्द्रदेवस्य निश्चितेन वैक्रमीयेण १७३० कालेन सम एव[५]। एवं च सप्तदशशतकमध्यकालः श्रीनारायणतीर्थानामिति कल्पनं सुसमीचीनमेव। अनेन कृता अद्ययावच्छ्रुता केचनोपलब्धाश्च ग्रन्था एते—

१ तत्त्वचन्द्रः—साङ्ख्यतत्त्वकौमुदीव्याख्या।
२ न्यायकुसुमाञ्जलिव्याख्या।
३ भक्तिचन्द्रिका शाण्डिल्यसूत्रव्याख्या।
४ भक्त्यधिकरणमाला।

---

१. कृतकृत्यो जगत्यस्मिन् शाण्डिल्यः श्रूयते भुवि।.........॥ यादृक् प्राप्तं मया पूर्वं परितुष्टाच्च नारदात्। इति (जयासं० प० १)

२. बृहदारण्यके पष्ठाध्यायपञ्चमब्राह्मणे 'वामकक्षायणः शाण्डिल्याच्छाण्डिल्यो वात्स्यात्' इत्युक्तम्।

३. द्रष्टव्यानि २८, १९८, २२० पृष्ठानि।

४. द्रष्टव्यम् 'अच्युतग्रन्थमालायास्तृतीयवर्षीयचतुर्थाङ्के पृष्ठम् ११४।

५. अस्मत्संपादितभक्तिनिर्णयभूमिका द्रष्टव्या।

५ योगचन्द्रिका ।

६ योगसूत्रवृत्तिः, गूढार्थद्योतनिका ।

७ वेदस्तवटीका ।

८ वेदान्तविभाविता टीका ।

९ सांख्यचन्द्रः, ईश्वरकृष्णकृतसांख्यकारिकाटीका ।

१० सिद्धान्तबिन्दुसहद्व्याख्या ।

११ सिद्धान्तबिन्दुलघुव्याख्या । इति ।

प्रायः सर्वदर्शनग्रन्थकाराणामेतेषां पाण्डित्यं श्रीवाचस्पतिमिश्रवल्लोकातिशायीति कथने न मिथ्योक्तिवादस्य भीतिः । अनेन महात्मना चतुर्थाश्रमं स्वीकृत्य तीर्थाधिपे प्रयागे भक्तिचन्द्रिका कृतेति प्रारम्भिकश्लोकतो ज्ञायते[1] । अस्य महात्मनो विद्यागुरवो श्रीवासुदेवसंज्ञकाः, तथाश्रमगुरवः श्रीरामगोविन्दतीर्थपादा आसन्निति भक्त्यधिकरणमालादिग्रन्थतो ज्ञायते[2] । अस्तु ।

अस्य ग्रन्थस्य प्रथमो भाग ईशवीये १९२४ तमे वर्षे श्रीमन्महामहोपाध्यायविद्वदग्रेसरानेकगुणालंकृतप्रिन्सिपॉलश्रीगोपीनाथकविराज - महोदयैः संशोद्धय संमुद्रय प्रकाशितः । अनन्तरं च तैरेव द्वितीयभागसंशोधने प्रवर्तितोऽहमेकमेवाशुद्धिबहुलं क्वचित् खण्डितं लिखितपुस्तकं स्वीकृत्य कार्यं प्रारब्धवान् । समाप्तप्राये ग्रन्थे पुस्तकबन्धनात् प्रागेव मध्यखण्डितचन्द्रिकायाः पृष्ठद्वयमेकत्र स्थान उपलब्धम् , तच्च यथास्थाने पुनस्तमेवाङ्कं समुल्लिख्य समयोजितवान् । अस्तु ।

अत्र प्रथमत एतत्कार्यकरणे योजितवतां प्रिन्सिपॉलश्रीमन्महामहोपाध्यायश्रीविद्वदग्रेसराणां श्रीगोपीनाथकविराजमहोदयानां तथा च तत्स्थानापन्नानां तथैव मां कार्यकरणे प्रोत्साहयतां विद्वद्वराणां डॉ०

---

१. स्मृत्वा चित्तरितीर्णशास्त्रजलधीन् नत्वा गुरून् तीर्थपे
तीर्थे तीर्थफलां तनोति मतिमान् नारायणाख्यो यतिः ।

२. श्रीरामगोविन्दसुतीर्थपादकृपाविशेषादुपलभ्य बोधम् ।
श्रीवासुदेवादधिगत्य सर्वशास्त्राणि वक्तुं किमपि स्पृहा नः ।

श्रीमन्मङ्गलदेवशास्त्रिमहोदयानामुपकारं संप्रकाश्य यस्य कृपाकटाक्षक्षेपात् पदमपि चलितुं न शक्नोति मानवस्तस्य परमेश्वरस्य दयां संविभाव्यात्रत्याशुद्धिस्थलानि शोधनपत्राधारेण संशोध्य सफलीकुर्वन्तु मामकीनं परिश्रमं विद्वदग्रेसरा हंसव्रतधरा गुणैकपक्षकक्षीकुर्वाणा इति निवेदयते ॥

गवर्नमेन्ट संस्कृत कालेज
वैक्रम १९९४ पौषशुद्धप्रतिपद्
काशी

विद्वद्वशंवदः—
अनन्तशास्त्री फडके
व्याकरणाचार्यो मीमांसातीर्थश्च

भक्तिचन्द्रिका-विषयानुक्रमणिका

विषयः	पृष्ठम्
प्रास्ताविकम्	१
भूमिका	
धर्मो विश्वस्य जगतः प्रतिष्ठा	२-८
भक्तेर्वैदिकोद्गमः	९-१५
मूलग्रन्थस्य व्याख्या:	१५-२३
Prefatory Note (First Edition)	२४-२५
Foreword (First Edition)	२६-२९
किञ्चित्प्रास्ताविकम् (प्रथमसंस्करणस्य)	३०-३५
मङ्गलाचरणम्	१
परप्रेम-भक्ति-रस-इत्यादेः स्वरूपम्	२
प्रथमसूत्रपदार्थः	३
अनुबन्धचतुष्टयप्रदर्शनम्	४
भक्तिस्वरूपकथनम्	४
भक्तिस्वरूपबोधकद्वितीयसूत्रार्थः	५
विष्णुविषयकानन्यममतास्वरूपम्	६
ईशप्रसादजभावजत्वरूपेण प्रेम्णो द्वैविध्यम्	७
भावस्वरूपम्	८
लौकिकरसापेक्षया भक्तिरसवैलक्षण्यम्	८
साधनजभावोदाहरणम्	९
ब्रह्मण्याविष्टचित्तचातुर्विध्यम्	१०
प्रेम्णो वियोगे दुःखजनकत्वमिति शङ्कासमाधानम्	१०-११
उद्देशादिभेदेन प्रेम द्वादशधा	११
पत्तस्य स्वरूपोदाहरणे	१३
ललितस्य स्वरूपोदाहरणे	१४

विषयः | पृष्ठम्

विषयः	पृष्ठम्
दलितस्य स्वरूपोदाहरणे	१५
मिलितस्वरूपोदाहरणे	१६
सपूर्वादिभेदेन मिलितस्य द्वैविध्यम्	१६
कलितलक्षणोदाहरणे	१७
छलितलक्षणोदाहरणे	१८
चलितस्य लक्षणोदाहरणे	१९
क्रान्तस्य लक्षणोदाहरणे	२०
विक्रान्तलक्षणोदाहरणे	२०
संक्रान्तस्वरूपोदाहरणे	२१
विहृतस्वरूपोदाहरणे	२२
गलितस्वरूपोदाहरणे	२४
सन्तृप्तस्वरूपोदाहरणे	२४
द्रवावस्थैव प्रणयादिशब्दैरुच्यते	२६
भक्तावशनादिविक्षेपो निवर्तते	२७
सर्वमिथ्यात्वज्ञानेऽपि भक्तिः संभवति	२९
अप्राकृतरूपवति भगवति भक्तिः संभवति	३०
महत्सेवा-भगवत्सेवास्वरूपोदाहरणे	३०-३१
भगवद्भक्तसेवाफलादिबोधनम्	३२
तद्दयापात्रतास्वरूपवर्णनम्	३४
तद्दयापात्रताया द्वैविध्यम्	३५
तद्धर्मश्रद्धारूपभक्तिभूमिकावर्णनम्	३७
श्रद्धाविहीना निन्द्याः	३८
हरिगुणश्रुत्यादिरूपभूमिकावर्णनम्	३८
रत्यङ्कुरोत्पत्तिरूपभूमिकावर्णनम्	४१
स्वरूपाधिगमरूपभूमिकावर्णनम्	४२
प्रेमवृद्धिरूपभूमिकावर्णनम्	४४
परमात्मस्फुरणरूपभूमिकावर्णनम्	४५
भगवद्धर्मनिष्ठारूपभूमिकावर्णनम्	४६
स्वस्मिंस्तद्गुणशालितारूपभूमिकावर्णनम्	४९

विषयः	पृष्ठम्
प्रेमपराकाष्ठारूपभूमिकावर्णनम्	५०
उक्तं प्रेम विषयनिष्ठगुणादिविशेषाद्भवति	५१
भक्तेः सफलत्वसाधनम्	५२
ब्रह्मसंस्थपदेनानुरक्त उच्यते	५३
ज्ञानादेव मोक्ष इति मतनिराकरणपरं तृतीयसूत्रम्	५६
प्रसङ्गतः चतुर्विधेति गीताश्लोकव्याख्यानम्	५६
तृतीयसूत्रस्य व्याख्यानान्तरम्	५७
मुक्तिविषये नैयायिकमतखण्डनम्	५९
भक्ते रागरूपत्वसंसाधनम्	६१
फलभक्तेः स्वरूपवर्णनम्	६१-६२
विभावादिस्वरूपोदाहरणप्रदर्शनम्	६३
उद्दीपनविभावानुभावस्वरूपोदाहरणप्रदर्शनम्	६५
सात्त्विकभावादिवर्णनम्	६६
व्यभिचारिभावस्वरूपोदाहरणप्रदर्शनम्	६७
भक्तेः क्रियारूपत्वस्य खण्डनम्	६९
रागरूपो भावो हार्दसौहार्दपेक्षया भिन्नः	६९
विहिताचरणादिरूपा न भक्तिः, किन्तु तदुपलक्षणम्	७१
भक्तेरपरिमितफलदातृत्वम्	७२
भक्तितो ज्ञानस्य मुख्यत्वनिराकरणम्	७३
परभक्तिर्मुख्येति समर्थनम्	७६
आत्मरतेरधिकारिविशेषणताया निराकरणम्	७७
स्वाराज्यफलस्य साक्षात्कारणकत्वनिराकरणम्	७७
लोकदृष्टान्तेनापि ज्ञानस्य भक्तेरङ्गत्वस्थापनम्	७८
ज्ञानस्य भक्त्यङ्गत्वेऽपि भक्तिशेषत्वं नास्ति	७९
भक्तेर्ज्ञानस्य साधनत्वनिराकरणम्	८१
ज्ञानभक्त्योर्विकल्प इति मतनिराकरणम्	८३
अपरभक्तिविषयबोधनम्	८४-८५
भक्तिबोधकश्रुतिप्रदर्शनम्	८६
श्रवणकीर्तनस्वीयसर्वस्वभगवदर्पणे श्रुतिः	८७

विषयः	पृष्ठम्
स्मरणकीर्तने श्रुतिः	८७
पादसेवनदानपूजनपरिचरणे श्रुतिः	८८
दास्यचरणोदकग्रहणसख्ये श्रुतिः	८९
आत्मनिवेदनसामान्यसेवने श्रुतिः	९०
श्रवणकीर्तनादिसामान्यसेवने श्रुतिः	९०
पुराणादितो भक्तेर्ज्ञानं कर्तव्यम्	९१
शिष्टाचारादपि भक्तेः कर्तव्यत्वबोधनम्	९२
वैष्णवशिष्टाचारोदाहरणप्रदर्शनम्	९४
शैवशिष्टाचारोदाहरणप्रदर्शनम्	९७
कृपासिद्धनित्यसिद्धभक्तोदाहरणम्	९७-९८
योगस्य वहिरङ्गत्वबोधनम्	१००
रागरूपभक्तेः क्लेशरूपत्वनिराकरणम्	१००
भक्तेर्मुख्यत्वस्य हेत्वन्तरतः संसाधनम्	१००
प्रश्ननिरूपणेति सूत्रस्यान्यप्रोक्तार्थखण्डनम्	१०१
श्रद्धापेक्षया भक्तेर्मुख्यत्वसाधनम्	१०३
वेदान्तस्य भक्तिनिमित्तत्वसंसाधनम्	१०४
भक्तिपरिशुद्धिपर्यन्तं श्रवणादीनामभ्यासः	१०६
शान्त्याद्यङ्गानामपि सेवनम्	१०७
भेदवादिकाश्यपमतबोधनम्	१०७-१०८
अभेदवादिनो बादरायणस्य मतम्	१०८
यथाधिकारमुभयवादिशाण्डिल्यमतम्	१०९
भेदाभेदासंभवनिराकरणम्	११०
भगवतो विरुद्धधर्मसम्बन्धो भवति	१११
रामानुजमतेन वैषम्यादिसूत्रार्थबोधनम्	११३
अविभागस्यैव मुख्यत्वमिति वादिमतेन सूत्रार्थकथनम्	११४
भेदबोधकश्रुतितोऽभेदबोधकश्रुतेर्बलवत्वस्थापनम्	११५
अस्य मतस्य खण्डनपूर्वकमन्योन्याभावखण्डनम्	११६
अद्वैतमतबोधनम्	११७
अत्र वास्तविकमतप्रदर्शनम्	११८
ईश्वरैश्वर्यं स्वाभाविकम्	१२०

विषयः	पृष्ठम्
बुद्धेरानन्त्यादपि नित्यमैश्वर्यम्	१२१
ईश्वरस्य विकारित्वनिराकरणम्	१२२
प्रकृतिब्रह्मणोरुभयोरनन्यथासिद्धत्वम्	१२३
प्रकृतिपुरुषरूपपदार्थद्वयस्थापनम्	१२३
प्रकृतेः शक्तिरूपत्वेन सत्यत्वस्थापनम्	१२४
उभयपदामित्यादिसूत्राणां वास्तविकार्थप्रतिपादनम्	१२४
भक्तिपरिपाकावस्था सम्मानादिलिङ्गाद् ज्ञेया	१३०
द्वेषादयो न मुक्तौ कारणानि	१३३
अत्रार्थे विष्णुपुराणप्रघट्टकप्रदर्शनम्	१३३
भगवदवतारविषयापि भक्तिर्मुख्या	१३४
परमेश्वरस्याङ्गीकृतदेहादिकं दिव्यम्	१३५
परमेश्वरः कारुण्येन शरीरं गृह्णाति	१३८
विना प्रयोजनं लीलादिदर्शनाद् मीमांसकोक्तदोषवारणम्	१४०
विभूतीनां भगवद्रूपत्वेऽपि न मुक्तिः	१४१
वासुदेवरूपस्य तथात्ववारणम्	१४१
कृष्णस्य परमेश्वरत्ववर्णनम्	१४२
ब्रह्मनिष्ठेषु कृता भक्तिर्मुक्तिफला	१४३
रामनृसिंहादिकानामवतारिनारायणब्रह्मरूपत्वम्	१४४
गोपालतापिन्यादिप्रमाणतः कृष्णस्य सर्वावतारापेक्षया श्रेष्ठत्वम्	१४५
परमेश्वरस्यैव रामादयो लीलावताराः	१४६-१४७
अवतारविषये व्यवस्थाबोधनम्	१४७
विभवाद्यवतारलक्षणोदाहरणप्रदर्शनम्	१५०
भक्तिभजनयोः स्वरूपवर्णनम्	१५२
अनुरागार्थमेव कीर्तनादिसाधनभक्तिः	१५४
कीर्तनादिसाधनभक्तेः कालबोधनम्	१५६
गौणभक्तिष्वनुरागात् फलाधिक्यमिति वादिनां मतम्	१५७
अस्मिन् विषये जैमिनिमतम्	१५७
श्रवणादिषु न समुच्चयः	१५९
श्रवणादिकानां लक्षणानि	१५९-१६०

विषयः	पृष्ठम्
भक्तेरनेकप्रकारत्वम्	१६१
कीर्तनादिष्वेकमपि साधनमीश्वरतुष्टेः कारणम्	१६५
भक्तेः क्लेशादिनाशकत्वम्	१६६
तस्याः सुखादिसाधकत्वम्	१६७
सगुणनिर्गुणध्यानविषये विचारः	१६८
इदमेव ध्येयमिति नियमो नास्ति	१६९
मद्याजीत्यादिश्लोकस्थयजिः पूजायां प्रयुक्तः	१७०
पादोदकशब्दपादसेवार्हजलस्य बोधकः	१७१
नैवेद्यादिकं स्वयमर्पितमपि ग्राह्यम्	१७२
पूजायामपराधवर्जनतत्प्रायश्चित्तयोर्व्यवस्थाबोधनम्	१७३
देवापराधवर्णनम्	१७४
अशक्तौ यद्दानादिबोधितं न तच्छक्तौ फलदम्	१७५
स्वस्वविहितकर्मापेक्षया श्रवणादेर्विलक्षणफलदत्वम्	१७६
भक्तेर्गौणमुख्यभावोऽयुक्त इति शङ्कावारणम्	१७७
कीर्तनादिकं परभक्त्यङ्गमपि स्वतन्त्रफलकम्	१७८
स्मृत्यादीनां प्रायश्चित्तरूपत्वम्	१७९
स्मृत्युक्तप्रायश्चित्तानां वैफल्यं नास्ति	१८०
कीर्तनादिना सकलपापक्षयोऽन्तर्मुखस्य, बहिर्मुखस्य तु म्रियमाणस्येति व्यवस्थापनम् ।	१८१
परमतेन कीर्तनादि सकलपापनाशकम् , न तु काचित्तत्र व्यवस्था	१८२
मीमांसकमतेन पापक्षयबोधकपुराणवाक्यमर्थवादः	१८४
मीमांसकमतखण्डनप्रसङ्गेनार्थवादस्वरूपवर्णनम्	१८५
स्तुतिस्वरूपवर्णनम्	१८७
लघ्वपि भक्तिसाधनं महाज्ञानस्य नाशकम्	१८९
लघ्वपि सूत्रस्यार्थान्तरवर्णनम्	१९०
श्रवणादेः प्रायश्चित्तरूपत्वेऽपि न स्मार्तधर्मयुक्तत्वम्	१९२
चाण्डालादिपर्यन्तः सर्वोऽप्यधिकारी	१९३
अस्मिन् विषये प्रमाणोपस्थापनम्	१९३
कर्मणा ब्राह्मण्यादिप्रतिपादकसर्पयुधिष्ठिरसंवादः	१९६
जन्मना ब्राह्मण्यसंसाधनम्	१९८

विषयः | पृष्ठम्

विषयः	पृष्ठम्
पुराणानि स्त्रीशूद्राद्यर्थानि न द्विजविषयाणीति शङ्का	१९८
अस्याः शङ्कायाः खण्डनम्	१९९
अत्र विषये स्वाभिप्रायवर्णनम्	२००
कीर्तनादिषु चाण्डालोऽप्यधिकारी	२०१
अत्र लिङ्गपुराणीयसन्दर्भप्रदर्शनम्	२०२
भगवद्गुणश्रवणं साधुशब्देनैव कर्तव्यमिति न नियमः	२०५
मुमुक्षूणामपि कीर्तनेऽधिकारः	२०६
विदुषां द्वैतमिथ्यात्वे पक्षपातेन कीर्तनस्य संभवोऽस्त्येव	२०७
अस्मिन्नर्थे योगवासिष्ठोक्तसप्तभूमिकाप्रदर्शनम्	२०८
विदुषो भोगाभावेऽपि रतिविशेषरूपभक्तिः संभवति	२०९
विद्वदविदुषोर्व्यवहारे समानेऽपि विद्वान्नासक्तः	२११
भक्तेः पुरुषार्थेष्वन्तर्भावकथनपूर्वकं स्वतन्त्रपुरुषार्थत्वस्थापनम्	२११
मलिनान्तःकरणानां सत्सङ्गेन भक्त्यधिकारः	२१२
मलिनान्तःकरणानां व्यवधानेन भगवत्प्राप्तिः	२१३
अविपक्वानां साधनभक्त्या भगवल्लोकप्राप्तिसमर्थनम्	२१५
द्वारभेदेऽपि विकल्पस्य संसाधनम्	२१७
विकल्पस्याष्टदोषदुष्टत्वेऽपि प्रामाणिकस्य स्वीकर्तव्यत्वम्	२१७
ब्रह्मलोकादिगमनमपक्वरागाणामेव	२१८
उत्क्रान्तिगमनागमनमार्गविचारः	२१९
उत्क्रान्त्यव्यवहितकालमत्यनुगुणैव गतिर्भवति	२२०
प्रारब्धायत्तासद्वासनानां नाशः सन्ततभजनेन भवति	२२२
अत्र विषये विशेषो विचारः	२२३
प्रसङ्गतः षड्विधकर्मस्वरूपप्रदर्शम्	२२४
सत्कर्मणः फलदानप्रकारः	२२५
सर्वस्यादृष्टायत्तत्वेऽपि पुरुषप्रयत्नस्यास्त्येवावकाशः	२२६
महापातकिनामपि भगवत्परायणत्वे दिव्यमार्गः संभवति	२२८
दिव्यगतिरेकान्तभक्तौ भवति	२२९
परभक्त्युत्पादनद्वारैव सर्वोपायानां श्रैष्ठ्यम्	२३१
भक्तिज्ञानरूपमार्गद्वयस्य स्थापनम्	२३२

विषयः	पृष्ठम्
ज्ञानरूप एको मार्ग इति मतसाधनम्	२३४
एतन्मतखण्डनम्	२३५
भक्त्यङ्गसंकलनम्	२३५
गुरुपादाश्रयबोधकप्रमाणम्	२३६
सद्धर्मपृच्छादीनां प्रमाणम्	२३७
एकादश्यादिसन्मानादिकम्	२३८
भूतानुद्वेगदायितादिकम्	२३९
शोकाद्यवशवर्तितादिकम्	२४०
सर्वधर्मान् परित्यज्येति श्लोकस्यार्थवर्णनम्	२४०
सगुणशरणतादिवर्णनम्	२४२
द्वितीयाध्यायोपसंहारः	२४३
जगत् परमात्मनो विवर्तः	२४४
अत्रान्यमतप्रदर्शनपुरःसरं साधनम्	२४५
तथापि भूमन्निति पद्यस्य प्रसङ्गतो विवरणम्	२४६
जगत्कारिणी परमात्मनः शक्तिर्माया	२४७
संसारो जीवज्ञानेच्छादितो न भवतीति प्रतिपादनम्	२४८
परमात्मा शक्तिमत्वेन स्वयं सर्वं करोति	२४८
ब्रह्मणो वेदकर्तृत्वरूपलक्षणीयकर्तृत्वपदविचारः	२४९
हिंसादिनिषिद्धकर्मोपदेष्टृत्वेऽपि ब्रह्मणो हितकारकत्वम्	२५०
यज्ञीयहिंसाया इष्टानिष्टत्वविषये विचारः	२५१
कर्मणेश्वरतोषादिकं ततश्च फलम्	२५२
स्वतन्त्र ईश्वरः सर्वं फलं ददाति	२५४
कर्मण ईश्वरतोषादिकारणत्वे वनपर्वस्थद्रौपदीयुधिष्ठिर-संवादप्रदर्शनम्	२५५
सर्वगते परमेश्वरे जीवलयः	२५७
जीवपरमात्मनोरत्यन्तैक्यम्	२५९
तयोर्भेदस्य निराकरणम्	२६०
जीवानां विकारित्वे कथं ब्रह्मणा भेद इति शङ्कावारणम्	२६१
अनन्यभक्त्यैव मोक्ष इति साधनम्	२६२

विषयः	पृष्ठम्
भक्तस्य कैवल्ये प्रारब्धापरिसमाप्तिरेव विलम्बः	२६३
संसारकारणमभक्तिरेव	२६४
शुक्तिरजताविषयेऽन्यथाख्यातिं निवार्यानिवर्चनख्यातिबोधनम्	२६५
शब्दलिङ्गप्रत्यक्षरूपप्रमाणत्रयस्वीकरणम्	२६५
सान्वयनाशोत्पत्त्योश्च बोधनम्	२६६
सत्कार्यमते प्राप्तशङ्कावारणम्	२६७
ग्रन्थसमापनम्	२६८

—:०:—

परिशिष्टम्

शाण्डिल्यशतसूत्रीयभाष्यानुक्रमणिका

विषयः	पृष्ठम्
मङ्गलाचरणम्	१
भक्तिजिज्ञासावतरणम्	१-२
प्रतिपदनिर्वचनपूर्वकं प्रथमसूत्रव्याख्यानम्	२-३
पराया भक्तेर्निर्वचनम्	३-५
ब्रह्मसंस्थस्यामृततत्वोपदेशः	५
संस्थाशब्दस्य भक्तिरेवार्थः	५
भक्तिरेव मुक्तिसाधनं न ज्ञानम्	६
मुक्तिसाधिकाया भक्तेरागरूपत्वोपन्यासः	७-८
भक्तेः क्रियात्वप्रत्याख्यानम्	६
भक्तेः प्रतिपत्तिपर्यायित्वप्रतिपादनम्	६-१०
गीताया वेदवत् प्रामाण्यनिरूपणम्	१०
ज्ञानयोगापेक्षया भक्तेः प्राधान्यम्	१०-१२
भक्तेर्ज्ञानहेतुत्वसमर्थनम्	१३
योगोपयोगप्रतिपादनम्	१४
प्रणिधानस्य गौणभक्तित्वप्रतिपादनम्	१५
रागरूपाया भक्तेर्हेयत्वनिरासः	१५-१६
भक्तेः श्रद्धात्वनिरासः	१६-१७
भक्तिसाधनविवेकनिरूपणम्	१७-१८
बुद्धिविषयपरिशुद्धिचिन्तनम्	१८
जीवानामागन्तुकक्लेशादौ हेतुप्रदर्शनम्	२०-२१
ऐश्वर्यस्य स्वाभाविकत्वप्रतिपादनम्	२१-२२
जगतो ब्रह्मणः प्रतिष्ठात्वनिरूपणम्	२२
ब्रह्मणोऽन्यथासिद्धत्वप्रत्याख्यानम्	२२
प्रकृतेर्वेद्यत्वनिरूपणम्	२३

विषयः	पृष्ठम्
भक्तिलिङ्गनिरूपणम्	२३
लिङ्गानां स्मृतिभ्यो बाहुल्यनिरूपणम्	२४-२६
द्वेषादीनां लिङ्गत्वनिराकरणम्	२६
पराया भक्तेः प्रादुर्भावात्मविषयकत्वनिरूपणम्	२६-२७
भगवतः शरीरपरिग्रहप्रयोजनम्	२७
परिग्रहस्य दिव्यत्वप्रदर्शनम्	२७-२८
भगवतो मुख्यस्य कारुण्यस्य प्रदर्शनम्	२८
राजादिभक्तेर्मुक्तिनिषेधः, वासुदेवभक्तेर्मुक्तिप्रदत्वनिरूपणम्	२९-३०
गौणभक्तिनिरूपणम्	३०-३३
अत्रैव जैमिनिमतम्	३३-३४
कीर्तनमस्यादीनां सहानुष्ठाननियमनिषेधः	३४-३५
भगवत्यर्पितशुभाशुभकर्मणां स्वफलाजननलक्षणबन्धाभावस्य द्वारत्वप्रतिपादनम्	३५
ध्यानस्याधारनिरूपणम्	३६
'यान्ति मद्याजिनोऽपि माम्' अत्र यजधात्वर्थनिरूपणम्	३६-३७
पादोदकार्थविवेचनम्	३७
भगवते स्वनिवेदितनैवेद्यस्य स्वग्राह्याग्राह्यत्वविचारः	३७-३८
देवपूजापराधव्यवस्था	३८
भगवदुद्देश्यकदानमात्रस्य भक्त्यङ्गत्वविधिः	३८-३९
सर्वकर्मापेक्षया भक्तेः श्रेष्ठत्वप्रतिपादनम्	३९
भक्तानां गौणमुख्यभावविचारः	३९-४१
आर्तभक्तौ विशेषविचारः	४१-४२
सततभगवत्स्मरणनिरूपणम्	४२-४३
सकृदपि स्मरणादिमहापापनाशकम्	४३-४५
हरिस्मरणस्यैव प्रायश्चित्तत्वम्	४५
भक्तौ सर्वेषां वर्णानामधिकारनिरूपणम्	४५-४८
महापातकिनामपि परभक्तावधिकारः	४८
परमभक्तेरेवैकान्तत्वम्	४९
परयैव भक्त्या मुक्त्यधिकारो भवति	४९-५०

विषयः	पृष्ठम्
ब्रह्मण ऐश्वर्यशक्तेर्मायाया निरूपणम्	५१
ब्रह्मणो व्यापकत्वम्	५१-५३
'मिश्रोपदेशान्नेति' इत्यस्य निरूपणम्	५३-५४
सर्वस्य ब्रह्मात्मकत्वप्रतिपादनम्	५४-५७
जीवस्य ब्रह्मभावाप्तिनिरूपणम्	५७ ५८
जीवन्मुक्तिविवेचनम्	५८
जीवस्य संसारित्वेऽभक्तेः कारणत्वप्रदर्शनम्	५८-५९
जीवानां त्रिनेत्रत्वप्रतिपादनम्	५९-६०
श्रीशाण्डिल्यमहर्षिप्रणीतानि भक्तिसूत्राणि	६२-६७
विशेषनामघटितसूत्राणि	६८
भक्तितत्त्वविवरणम्	६९-७०
त्रिविधभक्तिविवरणम्	७१-७४
नारदभक्तिसूत्रम्	७५-८०
भक्तेः स्वरूपम्	७५
प्रेम्णि अनन्यता	७५
प्रेमरूपाया भक्तेर्लक्षणानि उदाहरणानि च	७५-७६
प्रेमरूपाया भक्तेः फलस्वरूत्वम्	७६
भक्तेः साधनानि	७६
एतत्संगस्य महात्म्यम्	७६-७७
दुःसङ्गस्य त्यागः	७७
मायां कस्तरति	७७
परा भक्तिर्गौणी भक्तिश्च	७७
भक्तेः सौलभ्यं महत्वं च	७८
भक्तेः साधनान्यन्तरायाश्च	७८
प्रेमिभक्तानां महिमा	७८
वादविवादरूपा विघ्नाः	७९
भक्तेः प्रधानाः सहायकाः	७९
प्रेमभक्तेः फलं भक्तेः सर्वश्रेष्ठता च	७९-८०
भक्तिमीमांसा	८१-८७
प्रथमाध्यायः	८१

विषयः	पृष्ठम्

प्रथमः पादः	८१
द्वितीयः पादः	८१
द्वितीयाध्यायः	८२
प्रथमः पादः	८२-८३
द्वितीयः पादः	८२-८३
तृतीयाध्यायः	८४-८५
प्रथमः पादः	८४
द्वितीयः पादः	८४-८५
चतुर्थाध्यायः	८५-८७
प्रथमः पादः	८५-८६
द्वितीयः पादः	८६-८७
परभक्तिसूत्राणि	८७-८८
विशेषार्थबोधकपदसंकलनम्	८९-९७
भक्तेः प्रधानाः सहायकाः	८६
प्रत्यययायादिसूत्रसंकलनम्	९७
भक्तिविभागादिबोधकं चित्रम्	९८
उद्धृतग्रन्थ-ग्रन्थकारनामानि	९९-१००
पाठभेदसंकलनम्	१०१-१०३

—:०:—

शाण्डिल्यभक्तिसूत्राणां

व्याख्या

भक्तिचन्द्रिका

गानैर्नारदगोपिकादिषु निजप्रेमाणमावर्द्धयन्
स्वे स्वे कर्मणि योजयन् सुरमुखान् शुद्धात्मबुद्धिप्रदः ।
नित्यं यः सनकादिकेभ्य उरुधीगीतः श्रुतौ राजते
सत्यज्ञानसुखात्मकं तमनिशं कृष्णाभिधानं नुमः ॥ १ ॥
अजस्रमसितोज्ज्वलो युगयुजोः परं शर्मकृत्
कलङ्करहितः कलासहित ईश्वरो विश्वतः ।
रसामृतमयोऽनिशं प्रसृतभाश्च राधादिभृद्
वितारबुधसूरसौ स्फुरति कृष्णचन्द्रः प्रियः ॥ २ ॥
चेतोवृत्तिश्चकोरी हरिचरणजुषां वेदबद्धादराणां
सानन्दाः कुर्वती या यदि सकृतद्गता (?) पूर्वसत्सङ्गलभ्या ।
कर्मज्ञानाभिमानाऽधमनिबिडतमःस्तोमविध्वंसदक्षा
पक्षाभ्यामाप्तरक्षा जयति हरिरतिश्चन्द्रिका तापतक्षा ॥३॥
ब्रह्माद्वैतपुमर्थपूर्णरसिकां शाण्डिल्यसूत्रे युतां
द्वैतध्वान्तविनाशमुख्यफलिकां सद्भक्तिसचन्द्रिकाम् ।
स्मृत्वा चित्तरितीर्णशास्त्रजलधीन् नत्वा गुरून् तीर्थपे
तीर्थे तीर्थफलां तनोति मतिमान्नारायणाख्यो यतिः ॥४॥

परत्रानासङ्गञ्जनयति रतिर्या नियमतः
परस्मिन्नेवास्मिन् समरसतया पश्यत इमाम् ।
परप्रेमा सेयं भवति परमानन्दमधुरा
परा भक्तिः प्रोक्ता रस इति रसास्वादनचणैः ॥ ५ ॥

रतिर्भावः पूर्वः समुचितविभावादिनिचयै-
श्चमत्कारोन्निद्रैश्चटुलतरकाव्याद्यवचितैः ।
मुहुश्चर्व्यः पूर्णः प्रविगलितवेद्यान्तरभरः
परानन्दाऽऽभोगः स्फुरति धुरि शृङ्गारवचनः ॥ ६ ॥

अखण्डं विज्ञानं विदलितपराज्ञानममलं
समुत्कर्षज्ञानप्रविततसरण्या सरलया ।
रतौ हेतुः पश्यन्निति निगममौलौ निगदिता
रतिः क्रीडानन्दो मिथुनमिति पूर्णा परिणता ॥ ७ ॥

इहैवं शब्देनोल्लिखितसदखण्डाकलनतः
स्फुटं पश्यन्नित्ये तदपि ननु मन्वान इति च ।
विजानन्नित्येवं क्रममसरणितो हेतुनिकरं
श्रुतिर्ब्रूते रत्यादिषु भवति शीर्षा भगवती ॥ ८ ॥

अभिक्रामं वाचा क्रमणमयतेऽङ्गत्वमुदिते
हुधातोरर्थेऽश्नन् सुहित इति वाक्येऽशनमपि ।
निदानत्वं तृप्ताविति निखिलविद्वत्सु नयतः
प्रसिद्धं छन्दोगश्रुतिगिरि समुन्नेयमुचितम् ॥ ९ ॥

रतिक्रीडावाक्यं स्मृतिरपि हि माञ्चेति वदतः
फलं भक्तेर्मुक्तिं परमपुरुषार्थाऽऽत्मकतया ।
महाभक्तो मुक्तिं निरतरतितो नेच्छति फलं
तथाप्यस्मै दत्ते हितधिषणया साधु भगवान् ॥ १० ॥

प्रभुर्लोके सेवानिरतमनुरागेण रहितं
जनं वित्ते दृष्ट्वोपचितविधये स्वं वितरति ॥
तथा भक्तं मुक्तौ कलयति दयापूर्णहृदयः
स्वरूपे स्वस्मिंस्तत्सुखमयमयं हीति भगवान् ॥ ११ ॥
रतौ हेतुं ज्ञानं हृदि परिकलय्योदितदिशाऽ–
तनोद्व्यासः सूत्रं विमलचतुरध्यायविततम् ।
ततो ह्यस्येत्येवं विलसदपि संराधन इति
स्फुटं प्रोक्तं युक्तं फलमत इतीदृक् च तदिह ॥ १२ ॥
विनेयैर्जिज्ञास्यामृतफलपरा भक्तिरखिलै–
स्ततस्तामानाद्यैर्विलसदनुबन्धा प्रथमतः ।
मनोज्ञं शाण्डिल्यो मधुरतरमाङ्गल्यवचसा
निबध्नाति न्यायैरथ पदमुखेनातिविशदम् ॥ १३ ॥

अथातो भक्तिजिज्ञासा ॥ १ ॥

अथेति । अथशब्दः स्वरूपेण मङ्गलम् । अर्थश्चास्यारम्भ एव । अत इति । इदंशब्दो भक्तेः पुमर्थसाधनत्वपरामर्शकः । जिज्ञासाशब्दो निरूपणलाक्षणिकः । तथा चायमर्थः–अत्यन्तपुमर्थोपायत्वाद्भक्तिर्निरूप्यत इति । अथवा अथशब्द आनन्तर्ये । अत इतीदंशब्दार्थ आनन्तर्यनिरूपकः । इदंशब्दश्च बुद्धिस्थकर्मकाण्डफलस्य स्वर्गादेः क्षयित्वादिदोषस्य ब्रह्मविद्यायाश्च दुर्निरूपफलत्वस्य परामर्शं परामृशति । तदयमर्थः–कर्मणः फलं तावद्बहुतरदुःखानुविद्धम्, साधनपारतन्त्र्यक्षयित्वादिदोषात् । ब्रह्मविद्या च दुर्निरूपफला, मोक्षस्याविद्यानिवृत्तिरूपस्य दुःखध्वंसस्य चात्मनो भेदे सत्यत्वे द्वैतप्रसङ्गात् । मिथ्यात्वे प्रतियोग्युन्मज्जनप्रसङ्गात् । अभेदे त्वात्मरूपतया नित्यत्वेनासाध्यत्वादिति परा-

मर्शानन्तरं विवक्षितविवेकेन सुखसंविदालिङ्गितत्वेन भक्तेरेव पुमर्थकोटिप्रविष्टतयेष्टत्वात्तद्धेतौ तद्गोचरज्ञाने इच्छा भवतीत्यर्थः अथवा सम्पादितकर्मज्ञानोभयस्यापि चेतसो भगवद्गुणगानपराणामिवानन्दमग्नताया अनुपलब्धेर्भक्तेरेव विजातीयानन्दाविर्भावहेतुत्वमिति परामर्शानन्तरं केयं कतिविधेति जिज्ञासा भवतीत्यर्थः। पुमर्थस्यानन्दस्य स्वत एवेष्टत्वेन तदुपायेऽवश्यं जिज्ञासोदयादिति भावः। अत्र भक्तिमीमांसेति विहाय भक्तिजिज्ञासेति कथनेन भक्तेः पुमर्थता सूचिता। वेदान्ते ब्रह्मगोचरज्ञानेच्छया ब्राह्मण इवात्र भक्तिगोचरज्ञानेच्छया भक्तेरिष्टत्वलाभादिति स्वयं बोध्यम्। अत्रास्य शास्त्रस्य भक्तिर्विषयो भक्तिद्वारा कैवल्यं फलम्। अर्थाद् भक्तिकामोऽधिकारी। सम्बन्धस्तु शास्त्रकैवल्ययोः प्रयोज्यप्रयोजकभावः। भक्तिकैवल्ययोस्तु साध्यसाधनभावो बोध्य इत्यास्तां विस्तरः॥ १॥

तत्र भक्तिर्भजनम्, तच्च भज सेवायामिति (भ्वादि ९९८) धात्वनुसारान्न सेवामात्रम्, समानेऽपि राजसेवाकर्मणि भक्तोऽयमभक्तोऽयमिति भेदव्यपदेशदर्शनात्। नाप्याराध्यत्वेन ज्ञानम्, सा भयबलादिना नमस्कार्यत्वादिज्ञानवत्यपि भक्तोऽयमिति व्यवहारापत्तेः, पूजानमस्काराद्याराधनास्वननुगमाच्च। अत एव न श्रवणादयोऽपि, तत्र धातोः शक्तिकल्पने गौरवात्। किन्तु 'भक्तिरस्य [भजनम्] तदिहामुत्रोपाधिनैराश्येनामुष्मिन् मनःकल्पनमेतदेव च नैष्कर्म्यम्।'

भक्तियोगो बहुविधो मार्गैर्भामिनि भाव्यते।
स्वभावगुणमार्गेण पुंसां भावो हि भिद्यते॥
(भाग० ३।२९।७)

इत्यादिश्रुतिस्मृतिवचनानुसाराद् भावविशेष एवेत्याशयवानाह—

सा पराऽनुरक्तिरीश्वरे ॥ २ ॥

अत्र सेति लक्ष्यनिर्देशः, शेषं लक्षणम्। परेति गौणीं व्यावर्तयति, ईश्वर इत्याराध्याभिप्रायम्। तथा चाराध्यविषयकागौणरागवत्त्वमेव सा, इह तु जगदाराध्यपरमेश्वरविषया। अनुस्त्वत्र न लक्षणान्तर्गतः, किन्तु तन्महिमादिज्ञानादनु पश्चाद्जायमानत्वादनुरक्तिरित्युक्तम्। तस्या अगौणत्वन्तु तद्गुणगणश्रवणादिनानन्यविषयोत्कण्ठाह्लादविशेषादिजनकत्वेन लौकिकानुरागादाविव सुग्रहम्। यथोक्तं प्रह्लादेन—

या प्रीतिरविवेकानां विषयेष्वनपायिनी।
त्वामनुस्मरतः सा मे हृदयान्माऽपसर्पतु ॥

(विष्णु पु० १।२०।१९)

अत्राविवेकिनां विषयेषु सुखसाधनेषु या प्रीतिरनुरागविशेषः, सा त्वामनुस्मरतो मम हृदयान्नापयातु; विषयानुल्लङ्घ्य त्वामेव निरतिशयसुखरूपमालम्बतामित्यर्थात् प्रीतिशब्दः सुखनियतरागार्थः, न सुखार्थः; तस्य सविषयत्वाभावेन विषयसप्तम्यनुपपत्तेः। तस्याः सुखज्ञानरूपत्वेऽपि तज्ज्ञानस्य सुखविषयत्वाद्विषयविषयकत्वासम्भवात्। नन्वास्तामनुक्तिः प्रीतिर्भक्तिस्त्वन्यैव—

नाथ योनिसहस्रेषु येषु येषु व्रजाम्यहम्।
तेषु तेष्वच्युता भक्तिरच्युतास्तु सदा त्वयि ॥

(विष्णु पु० १।२०।१८)

इति प्रार्थ्य या प्रीतिरविवेकानामिति पृथक् प्रार्थनात्। न च भक्तिरच्युताऽस्त्विति प्रोच्य या प्रीतिरित्युत्तरत्र सैव भक्तिः प्रीतिशब्देनोच्यत इति श्लोकद्वयस्यैकवाक्यतापौनरुक्त्यप्रसङ्गात्;

अपि च न प्रीतिः प्रार्थ्यते, किन्तु विरक्तिः। तथा हि—हे नाथ लक्ष्मीपते ! अविवेकिनां विषयेषु या प्रीतिः सा त्वामनुस्मरतो हृदयात् सर्पतु गच्छतादिति रागनिवृत्तिः प्रार्थ्यते। अतो नैकवाक्यतेति चेत्, असाध्वेतत्। यदि भक्तेरन्या प्रीतिर्विरक्तिर्वा प्रार्थ्यते तर्हि तस्या अपि भगवद्वाक्ये भक्तेरिवानुभाषणेनाऽनुग्रहेण भवितव्यम्—'भक्तिर्मयि तवाऽस्त्येव भूयोऽप्येवं भविष्यति' इतिवत्,

प्रीतिर्मयि तवास्त्येव भूयोऽप्येवं भविष्यति।
विषयेषु विरागोऽस्ति भूयोऽप्येवं भविष्यति॥

इति वा। न चैवमभवत्। तस्मान्नाथ योनिसहस्रेष्विति श्लोकोद्दिष्टाया भक्तेः स्वरूपवर्णनमुत्तरश्लोकेन क्रियत इति श्लोकद्वयस्यैकवाक्यत्वात् प्रीतिभक्त्योरभेदमेवावगम्यते, प्रीतिरेव च रतेः परां काष्ठां गता प्रेमेत्युच्यते। यथा **पञ्चरात्रे**—

अनन्यममता विष्णौ ममता प्रेमसंज्ञिता।
भक्तिरित्युच्यते भीष्मप्रह्लादोद्धवनारदैः॥ इति।

अनन्यममताऽव्यभिचारिममता यस्यां न कदाचिदपि कथमप्यलंबुद्धिः। **तदुक्तम्**—

काम्याप्तौ न विवर्तते मम मुहुः स्यादेधते किन्तु तत्-
संयोगेऽपि वियोगलालनमितौ विश्लेषभीत्या मुहुः।
मोषो यस्य न दोषतोऽपि रसतां नीतो विभावादिभि-
र्भावः कोऽपि पराऽनुरक्तिरिति तां भक्तिं जगौ सूत्रकृत्॥

यथा **श्रीभागवते**—

गोप्यश्च कृष्णमुपलभ्य चिरादभीष्टं
यत्प्रेक्षणे दृशिषु पक्ष्मकृतं शपन्ति।

दृग्भिर्हृदीकृतमलं परिरभ्य सर्वा-
स्तद्भावमापुरपि नित्ययुजां दुरापम् ॥
(भाग० १०।८२।३९)

दृढं प्रलब्धास्त्रपया च हापिताः
प्रस्तोभिताः क्रीडनवच्च कारिताः ।
वस्त्राणि चैवापहृतान्यथाप्यमुं
तानभ्यसूयन् प्रियसङ्गनिर्वृताः ॥
(भाग० १०।२२।२२)

अटति यद्भवानह्नि काननं
त्रुटिर्युगायते त्वामपश्यताम् ।
कुटिलकुन्तलं श्रीमुखञ्च ते
जड उदीक्षतां पक्ष्मकृद्दृशाम् ॥ इति ॥
(भाग० १०।३१।१५)

यथा वाऽन्यत्र—

श्यामं वामगतिं दृशि श्रुतिवशाच्चेतोहरं स्वं जुषां
देहादेर्ममतापहं ममतयाऽऽक्रान्तं नयन् मानसम् ।
हा हा हन्त सहस्रशो न च गुणैराकर्णितं वीक्षितं
कृष्णं मुञ्चति नो मनोऽभिलषति श्रोत्रस्य कोटिं दृशाम् ॥

अस्यास्तु वृत्तेः सुखरूपभगवत्प्रतिविम्बोद्ग्राहित्वेन भगवद्विषयत्वात् सुखरूपतापि । इत्थमेव च भक्तेरत्र रसरूपत्वलब्ध्या निरुपधीच्छाविषयतया फलाभिसन्धानशून्यायाः पुमर्थरूपता सिध्यति । अन्यथा तु स्वतः पुरुषार्थत्वहानौ फलाभिसन्धानवती प्रवृत्तिरिति भक्तेः स्वरूपहानिरेव स्यादिति स्वयं बोध्यम् ।

अयञ्च प्रेमा द्विधा—ईशप्रसादजो भावजश्च । तत्रेशप्रसादजो

यथा—

ते नाधीतश्रुतिगणा नोपासितमहत्तमाः ।
अव्रतातप्ततपसो मत्सङ्गाद् मामुपागताः ॥
(भाग० ११।१२।७)

अथ भावजः । तत्र भावो नाम भाव्यगुणश्रवणेन स्नेहाद्युद्दीपनद्वारा द्रुतस्य चित्तस्य धारावाहिकी भाव्याकारा वृत्तिः । यथा भागवते—

मद्गुणश्रुतिमात्रेण मयि सर्वगुहाशये ।
मनोगतिरविच्छिन्ना यथा गङ्गाऽम्भसोऽम्बुधौ ॥इति।
(३।२९।११)

अस्यामेव विभावादिना रसरूपतयाऽभिव्यक्तपरमानन्दलक्षणभाव्याकारानपायात् स्थायिभावं रसं वदन्ति रसविदः । इत्थश्च लौकिकरसे शृङ्गारादौ विषयावच्छिन्नस्यैव चिदानन्दांशस्य स्फुरणादानन्दांशस्य न्यूनत्वं भगवदाकारोक्तचेतोवृत्तिलक्षणे भक्तिरसे त्वनवच्छिन्नचिदानन्दघनस्य भगवतः स्फुरणादत्यन्ताधिक्यमानन्दस्य। अतो भगवद्भक्तिरस एव लौकिकरसानुपेक्ष्य परमरसिकैः सेव्यः । यथा भागवते—

त्रिभुवनविभवहेतवेऽप्यकुण्ठ—
स्मृतिरजितात्मसुरादिभिर्विमृग्यात् ।
न चलति भगवत्पदारविन्दा—
ल्लवनिमिषार्धमपि स वैष्णवाग्र्यः ॥ इति ॥
(भाग० ११।२।५३)

भावश्चायमीशतद्भक्तप्रसादजः साधनजश्चेति द्विविधोऽपि प्रेमहेतुः ।

तत्रेशप्रसादजो यथा नारदीये—

सर्वमङ्गलमूर्धन्या पूर्णानन्दमयी शुभा ।
द्विजेन्द्र तव मय्यस्तु भक्तिरव्यभिचारिणी ॥ इति ।

ईशभक्तप्रसादजो यथा सप्तमे नारदप्रसादेन **प्रह्लादस्य**—

गुणैरलमसङ्ख्येयैर्माहात्म्यं तस्य सूच्यते ।
वासुदेवे भगवति यस्य नैसर्गिकी रतिः ॥
(भाग० ७।४।३६)

न्यस्तक्रीडनको बालो जडवत्तन्मयस्तथा ।
कृष्णग्रहगृहीतात्मा न वेद जगदीदृशम् ॥
आसीनः पर्यटन्नश्नन् शयानः प्रविदन् ब्रुवन् ।
नानुसन्धत्त एतानि गोविन्दपरिरम्भितः ॥ इत्यादि ।
(भाग० ७।४।३७–३८)

साधनजो यथा प्रथमे—

तत्रान्वहं कृष्णकथाः प्रगायता-
मनुग्रहेणाशृणवं मनोहराः ।
ताः श्रद्धया मेऽनुपदं विशृण्वतः
प्रियश्रवस्यङ्ग ममाभवद्रतिः ॥ इति ।
(भाग० १।५।२६)

कथाश्रवणादिकं धर्मबुद्धचाऽनुष्ठानपर्यन्तमविवक्षितम् । तेन गोप्यादौ न व्यभिचारः । अत एव पामराणां कामिन्यादिष्विवात्मारामाणां भगवति विद्यमानस्य भावोत्थप्रेम्णः कार्यकारणादिलिङ्गैर्भेदाभावेऽपि विषयप्रेमापेक्षया भगवत्प्रेम्ण उत्कृष्टत्वं स्वरूपगुणाद्युत्कर्षनिबन्धनमेवोपवर्णितं वृद्धैः ।

ब्रह्मण्याविष्टचित्तानां सर्वदाऽऽनन्ददर्शनम् ।
पुत्राद्यासक्तचित्तानां तापश्रेणीति दृश्यते ॥
अत एव विषयस्नेहं न्यक्कुर्वन्त्यभिज्ञाः ।
स्नेहस्य तस्य धिक्कारो यो न चुम्बति केशवम् ॥ इति ।

ब्रह्मण्याविष्टचित्ता अपि चतुर्विधा उदाहृतास्तन्त्रे—

नित्यं प्रेमपरीतात्मा कदाचित्प्रेममोहितः ।
कृत्रिमप्रेमयुक्तश्च प्रेमोदारश्चतुर्थकः ॥
चत्वारः प्रेमभक्ताः स्युस्तत्राद्यो गोपिकागणः ।
नैतस्य विप्रलम्भोऽस्ति कृष्णप्रेमसमाधिना ॥
द्वितीयः शुकदेवादिः सम+++दर्शनात् ।
ईशप्रेम्णि हठाच्चित्तं चिरं येन निवेश्यते ॥
स स्यात्तृतीयः सोऽपि स्याद् द्विविधस्तत्र चादिमः ।
विषयस्य विरोधेनाविरोधेनापि चेतरः ॥
प्रह्लादादिमुखस्त्वाद्य अर्जुनादिस्तथा परः ।
गोपीमुखानां मुक्तानां मध्ये नैकतरोऽप्यहम् ॥
इति शोचति यो नित्यं प्रेमोदारः स उच्यते ।
यथा युधिष्ठिरो राजेत्येवं भक्तचतुष्टयम् ॥ इति ।

ननु सर्वस्यापि सगुणप्रेम्णो वियोगे दुःखजनकत्वाद् गोपीप्रभृतीनाञ्च तथाश्रवणात् कामिन्यादिगोचरस्येव हेयत्वमेव युक्तम्। उक्तञ्च **विष्णुपुराणे**—

यावद्धि कुरुते जन्तुः सम्बन्धान्मनसः प्रियान् ।
तावन्तोऽस्य निखन्यन्ते हृदये शोकशङ्कवः ॥ इति
(१।१७।६६)

अतः प्रेम्ण उत्कर्षवर्णनमसङ्गतमिति चेन्मैवम् ; तद्वियोगस्य नान्तरीयदुःखजनकत्वेऽपि प्रेमविवर्धकत्वेनोत्कर्षाक्षतेः । तदुक्तं तत्रैव—

उत्तमे वस्तुनि प्रेमा योऽस्ति तस्य विवृद्धये ।
वियोगो दुःखयोगस्तु नान्तरीयकतां गतः ॥

नन्विदं कामिन्यादिवियोगेऽपि तुल्यमिति चेत् ? भ्रान्तोऽसि ; तत्रापि वियोगस्य प्रेमविवर्धकत्वेऽपि तत्प्रेम्णो दुःखमात्रफलकत्वेनोत्कर्षासम्भवात् । एतदप्युक्तं तत्रैव—

अनुत्तमेऽप्ययोगेन बहुलं प्रेम जन्यताम् ।
नैतावता तदुत्कर्षो दुःखमात्रं फलं यतः ॥ इति ।

तथा च वियोगकृतदुःखेनापकर्षसाधने भवानुबन्धित्वमुपाधिरिति ध्येयम् । उत्कर्षोऽपि न बाहुल्यम्, किन्तु भवबन्धनाशकत्वरूपमेव वा बोध्यः । अतो गोपीनां कृष्णवियोगेऽपि न हानिः । वस्तुतस्तु तादृशप्रेमभक्तानां न कदापि भगवद्वियोगः, नित्यलीलाविग्रहस्य सदा सान्निध्यात् । तेषु भूतावेशन्यायेन प्रवेशोपगमाद्वा । अत एव **रासादौ**—

ता वार्यमाणाः पतिभिः पितृभिर्भ्रातृबन्धुभिः ।
गोविन्दापहृतात्मानो न न्यवर्तन्त सौहृदात् ॥
(भाग० १०।२९।८)

इत्यास्तां विस्तरः ।

प्रेम द्वादशधा निरुक्तमखिलैर्भक्तैर्यदास्वादितं
गोपीभिर्हरिपादपद्ममकरन्दानन्दपूर्णात्मभिः ।
उद्देशं क्रमशो वदामि पृथगेषां तत्परं लक्षणं
स्वारस्यात्तदुदाहृतीरभिदधे प्रेमाभिधे वस्तुनि ॥

उद्देशो यथा—

उप्तं पत्तं ललितं दलितं मिलितं तथा कलितम् ।
छलितं चलितं क्रान्तं विहृतं गलितश्च सन्तृप्तम् ॥
विक्रान्तमथ संक्रान्तं संहृतश्चेति भेदतः ।
भेदाः पञ्चदशेत्यन्ये प्रेम्णां लक्षणभेदतः ॥

(१) अथोप्तम्—

समौत्सुक्यं चित्ते श्रुतिमुखनिमित्तेन दृशिगं
मुकुन्दादावन्यासहनमनिशं यन्नियमतः ।
मम स्यादित्येवं परिणतिमिता स्यात्सुमनसो
द्रुतिः सोप्तं प्रेम प्रथितमितरालभ्यमुदितम् ॥

यथा—

घनश्यामः कामं लघयति निकामं निजरुचा
ततः श्रुत्वा दृष्ट्वा भवति च दृगौत्कण्ठ्यविवशा ।
उदासीना गेहे भवति निजदेहेऽपि नितरां
न सेहेऽन्यालोकश्रवणमननानि द्रुतमनाः ॥

तदुक्तं भागवते ऋषिपत्नीनाम्—

श्रुत्वाच्युतमुपायान्तं नित्यं तद्दर्शनोत्सुकाः ।
तत्कथाक्षिप्तमनसो बभूवुर्जातसंभ्रमाः ॥ इति ॥
(१०।२३।१८)

यथा वाऽक्रूरस्य—

किं मे पूर्वंतयोऽधमस्य कृतवान् कृष्णः परानुग्रहं
सौन्दर्यार्णवविग्रहं स्मितमुखं द्रक्ष्यामि नन्दात्मजम् ।
कृष्णो मां परिरक्ष्यते शिरसि मे हस्ताब्जमाधास्यतेऽ-
क्रूर स्वागतमास्यतामिति वदन् कर्ता कृतार्थं तनुः ॥

(२) अथ पत्त्रम्—

यदा व्याजप्रश्नाद्भवति तदभिव्यक्तमतुलं
　　प्रियादर्शौत्कठ्यकपटकृतितो वा पटुधियः ।
तदा पत्तं प्रेम प्रथितसुषमायत्तमुदितं
　　यतः श्रुत्यानन्दो गुणकथनलभ्यादपि परः ॥

यथा—

अथोदन्तप्रातस्तरलनयनाभ्यां निगदितः
　　किमर्थं कस्यायं स्ववहितमतिभ्यामपि च कः ।
निशम्यानन्दस्य द्रुततरमितानन्दजनुष-
　　स्तदा प्रेम्णारण्यं कुसुमनिचयायेति वदती ॥

यथा वा—

गोप्यो दूतं प्रकल्प्य भ्रमरमनुगतं प्रोचुरङ्घ्रिं स्पृश त्वं
मा मे कृष्णप्रियायाः कुचमिलितस्रजासक्तसत्कुङ्कुमास्यः ।
तासामेव प्रसादं चरतु यदुपतिर्वाचमेतां निशम्य
प्रोचे रन्तुं मनो वः सह यदुपतिनेत्युद्धवः सोद्धवस्ताः ॥

स्पष्टं भागवते—

मधुप कितवबन्धो मा स्पृशाङ्घ्रिं सपत्न्याः
कुचविलुलितमालाकुङ्कुमश्मश्रुभिर्नः ।
वहतु मधुपतिस्तन्मानिनीनां प्रसादं
यदुसदसि विडम्ब्यं यस्य दूतस्त्वमीदृक् ॥
　　　　(१०।४७।१२)

यथा वा जनकस्य **रामायणे**—

शार्दूलाविव बालकौ गजगती तूणीधनुर्धारिणौ
पद्माक्षौ त्रिदिवागताविव सुरौ दृष्टाविवैतौ बुधैः ।

काावेतौ कुत आगतौ मृदुपदौ कस्यात्मजौ कौशिकः
प्राहोक्तो जनकेन तं दशरथस्यैतौ नृपस्यात्मजौ ॥इत्यादि।

(३) अथ ललितम्—

यदौत्सुक्यान्मध्येऽसदृशवयसां निस्त्रपतया
मुहुर्द्रष्टुं धाष्टर्यं भवति रुदिता वत्समुदितम्।
निदानं स्वेदादेः सततमनुयानं दृशिकृते
यदस्याः सङ्कोचः प्रियगुरुजनास्तेऽस्तिललितम् ॥

यथा—

दधत्यौत्कण्ठ्यादीन् सदृशवयसां मध्यगतया
त्वया श्रीकृष्णस्याऽऽननकमलजातं मधुमुदा।
समापीय स्वीयैर्नयनचषकैर्निर्भरतरं
किमास्यं प्रेयोदृग्विषयमितया संवृतमदः ॥

तदुक्तं भागवते—

पीत्वा मुकुन्दमुखसारघमक्षिभृङ्गै-
स्तापं जहुर्विरहजं व्रजयोषितोऽह्नि।
तत्सत्कृतिं समधिगम्य विवेश गोष्ठं
सव्रीडहासविनयं यदपाङ्गमोक्षम् ॥
(१०।१५।४३)

यथा वा सुदाम्नः —

श्रियः स्वामी कृष्णस्तव ननु सखा गच्छतमिति
प्रयुक्तः पत्न्या तं नयनचषकैः पास्य इति सः।
सुदामा संप्राप्तो मम सख उपानीतमिति किं
स पृष्टः कृष्णेनावनतवदनो लज्जितमनाः ॥ इति।

यथा वा जनकस्य—

शार्दूलाविव बालकौ गजगती तूणीधनुर्धारिणौ
पद्माक्षौ त्रिदिवागताविव सुरौ दृष्टाविवैतौ बुधैः ।
कावेतौ कुत आगतौ मृदुपदौ कस्यात्मजौ कौशिकः
प्राहोक्तो जनकेन तं दशरथस्यैतौ नृपस्यात्मजौ ॥

(४) अथ दलितम्—

दुशः+विच्छेदे कतिचन निमित्तेन वपुषो
विवर्णत्वं धाष्टर्यं दवदहनदग्धेऽङ्कुर इव ।
अवस्थायामस्यां द्रवति हृदयं यत्सुखमयं
भवेत् प्रेम व्यक्तं दलितमिति शब्देन फलितम् ॥

यथा—

विचिन्वन्ती कृष्णं तरुवनलताशैलशिखरेऽ-
नुयोगं कुर्वाणाऽनुकृतिमपि कृष्णाकृतिकृतैः ।
विवर्णा गायन्ती प्रलपति मुधा रोदिति मुहु-
र्मुकुन्देऽन्तर्भूते सरसहृदया गोपतनया ॥

तदुक्तं श्रीभागवते—

इति गोप्यः प्रगायन्त्यः प्रलपन्त्यश्च चित्रधा ।
रुरुदुः सुस्वरं राजन् कृष्णदर्शनलालसाः ॥ इत्यादि ।
(भाग० १०।३२।१)

यथा वा युधिष्ठिरस्य—

निस्तेजसं भ्रातरमर्जुनं नृपः
समागतं वीक्ष्य चिरेण दुर्मनाः ।
शुचा समाक्रान्तहृदा तदाऽऽतुरो
युधिष्ठिरः कृष्णवियोगशङ्कितः ॥

(५) अथ मिलितम्—

वियुक्तं यत्स्वेष्टं परमिह चिरप्रार्थ्यमपि त-
द्भवेदाप्तं दैवात् कथमपि तदा तत्सुखततेः ।
द्रुतिं प्राप्तं चित्तं भवति दयिताऽऽकारमनिशं
प्रसिद्धं प्रेमेदं मिलितमिति नाम्ना समुदितम् ॥

यथा—

वियुक्तस्यान्तःघनसुभगमूर्तेः स्मरजितो
हरेर्लब्धालोकं सरससुखपूर्णाऽनवरतम् ।
तदाकाराधारासदृशरभसा योजितमनाः
समाधिस्थेवाऽऽसीत् प्रियमिलितसत्प्रेमविवशा ॥

तदुक्तं श्रीभागवते—

सर्वास्ताः केशवालोकपरमोत्सवनिर्वृताः ।
जहुर्विरहजं तापं प्राज्ञं प्राप्य यथा जनाः ॥ इति ।
(१०।३२।९)

अथ पुनस्तत्सपूर्वापूर्वभेदेन द्विविधम् । तत्र सपूर्वं यथा—

चित्रकूटनिलयं भरतोऽसौ
राममीक्ष्य चरणे निपपात ।
सम्बभूव पुलकम् ।

अथापूर्वम्—

मिथिलायां समुपागतं हरिं
श्रुतदेवः समवेक्ष्य भूसुरः ।
अभि तस्य मुनीन्ननर्त वासः
परिधुन्वन् रतिमग्नमानसः ॥

(६) अथ कलितम्—

यदा चित्तं भोगाद्रुतिमितपदः स्यात् समुदितं
　　तदा प्रेम व्यक्तं कलितमिति नाम्ना नरवरैः ।
स चेद्भोगः प्रेयोविषयजनितः स्वात्मजनितो
　　द्विधापि प्रेमायं परतरसुखास्वादजनकः ॥

यथा—

संवक्ति लाति परियाति जहाति दोषं
　　संश्लिष्यतीक्षत इमं सुभगं शृणोति ।
जिघ्रत्यथो रसयतीच्छति निश्चिनोति
　　चित्ते द्विधाऽभिमनुते स्मरसुन्दरोऽपि ॥

एवमन्यत्रापि यथा—

संवीक्षणेन सविधागमनेन वाचा-
　　मुच्चारणेन सुलभेतरयाचनेन ।
चेलाञ्चलग्रहमुखैश्चरितैः स शौरिः
　　संसारसारसुखसीमनि तां युयोज ॥ इत्यादि ।

तदुक्तं श्रीभागवते—

तदङ्गसङ्गप्रमदाऽऽकुलेन्द्रियाः
　　केशान् दुकूलं कुचपट्टिकां वा ।
नान्तः प्रतिव्योढुमलं व्रजस्त्रियो
　　वित्रस्तमालाभरणाः कुरूद्वह ॥ इत्यादि ।

(१०।३३।१७)

यथा वा श्रीदामादीनाम्—

बाह्यावाहकनर्मशर्मजनकः कर्मान्तराक्षेपको
　　धर्माद्यर्थसमर्पकः स्मरणतोऽभूत् सङ्गतो बालकैः ।

स्वेदोद्भिन्नतनूरुहं नयनयोरार्द्रं कृपार्द्रः प्रभुः
श्रीदामानमुवाह नन्दतनयो भाण्डीरवृक्षावधि ॥ इत्यादि ।

एवं विपदस्मरणादिकमान्तरं बोध्यम् । अत एवात्राऽऽ-नन्दसमाधिमुपवर्णयति ।

(७) अथ छलितम्—

अमर्षेण प्रेम्णोऽनुगतिमहितेनाऽनवरतं
द्रुतिप्राप्तं चित्तं छलितमिति तत्प्रेम गदितम् ।
यतो निन्दारोपं वहति मनुजे कोपजननं
भवेत् साटोपश्चाभिमतनतिगर्वः प्रभवति ॥

यथा—

पुराणं नीरागं प्रथितबहुदोषं द्विजनकं
महः श्यामं वामं विषमगमनं चित्तशमनम् ।
मुहुः किं श्रीकृष्णं वदसि न वदिष्यामि वचनं
समाकर्ण्याश्याते मन इति रुषा तामभिदधे ॥

श्रीभागवतेऽपि—

मृगयुरिव कपीन्द्रं विव्यधे लुब्धधर्मा
स्त्रियमकृत विरूपां स्त्रीजितः कामयानाम् ।
बलिमपि बलिमत्त्वाऽवेष्टयद्ध्वाङ्क्षवद्य-
स्तदलमसितसख्यैर्दुस्त्यजस्तत्कथार्थः ॥
(१०।४७।१७)

यदनुचरितलीलाकर्णपीयूषविप्रुट्
सकृददनविधूतद्वन्द्वधर्मा विनष्टाः ।

सपदि गृहकुटुम्बं दीनमुत्सृज्य दीना
बहव इव विहङ्गा भिक्षुचर्यां चरन्ति ॥ इत्यादि ।
(१०।४७।१८)

यथा वा लक्ष्मणस्य रामायणे—

किं वाक्यं बहु मन्यसेऽतिवयसः क्षात्रे स्वधर्मे स्थितः
ब्रूषे ब्राह्मणवत् कथं स्थितवति त्वद्भृत्य आज्ञाप्यताम् ।
सर्वास्त्वत्प्रतिकूलशीलिन इतो नेष्यामि यामीं पुरीं
बद्धान् वा प्रकरिष्य आह वचनं सौमित्रिरार्द्रान्तरः ॥

(८) अथ चलितम्—

यदुत्क्रान्तौ चिन्ता द्रुतमहह चित्तं पुनरद-
स्तनुं लब्ध्वाऽप्यन्यां भजति विषयं प्राक्परिचितम् ।
भृशं सत्त्वोद्रेकादधिगतसुखाऽऽस्वादवशतः
पतत्त्रीसंस्कारादनिशमिव तत्प्रेम चलितम् ॥

यथा—

कपाली खट्वाङ्गी पितृवनरतिर्भूतिमहितः
सितोक्षाणं रूढः श्रुतिपथगतैर्भीषणगुणैः ।
विभीः सानन्देयं सरसहृदया निर्भरतरं
दशास्याः पार्वत्याः प्रथयति रतिं पूर्वजनुषः ॥

यथा वा दशरथस्य रामे रामायणे—

विलोक्यासौ विष्टां जनकतनयां दैवतगणा
विरिञ्चयाद्या ईयुर्दशरथनृपश्चाह तनयम् ।
चिरं प्रेमोत्कण्ठासरसहृदयः साश्रुनयनो
मतो मे स्वर्लोको न बहुतरसन्दर्शरहितः ॥

(९) अथ क्रान्तम्—

मनोनीतं व्यक्तिं भजति सुदृशामीलनजुषा
परस्माद्वैमुख्यं भवति ननु मुख्यं मतमृते ।
समारम्भानो निगदितमिदं क्रान्तपदतः
परप्रेमप्राप्तं भवति कृतिभिः श्रेष्ठमतिभिः ॥

यथाऽन्यत्र—

नान्यं शृणोति न च पश्यति नाऽभिधत्ते
चित्ते न कञ्चन परं कुरुते स्मृतिस्थम् ।
कृष्णं हृदा समभिनीय निमील्य नेत्रे
काचित् सुखातिशयवासितमानसाऽऽसीत् ॥

तदुक्तं श्रीभागवते—

तं काचिन्नेत्ररन्ध्रेण हृदिकृत्य निमील्य च ।
पुलकाङ्ग्युपगूह्यास्ते योगीवानन्दसंप्लुतः ॥ इत्यादि ।
(१०।३२।८)

(१०) अथ विक्रान्तम्—

तदेतत्क्रान्ताख्यं भवति ननु विक्रान्तपदभाग्
यदा स्वीयं भाग्यं स्वभिनयति तस्याथ गुरुताम् ।
परं तद्दौर्लभ्यं सुखमहह मे तादृशगिरा
परेषां सा हर्षाद् वदति गुणयोगश्च नितराम् ॥

यथा—

अहो श्रीकृष्णोऽयं सरससुखवर्षी घनतनु-
स्तथाहो मच्चेतः सुखघननिकेताश्रितमिदम् ।
अहो प्रेमा नेतः परतर उपेतोऽतिसुकृते-
रहोऽवस्थापेतः परतरसुखोद्गाररभसा ॥

तदुक्तं श्रीभागवते—

अक्षण्वतां फलमिदं न वयं विदामः
　　सख्यः पशूननु विवेशयतोर्वयस्यैः ।
वक्त्रं व्रजेशसुतयोरनुवेणु जुष्टं
　　यैर्वा निपीतमनुरक्तकटाक्षमोक्षम् ॥

(१०।२१।७)

यथा वा—

ब्रह्मा प्राह हरिं सुवेशमुरलीनादामृतेनात्मनां
　　जीवानाममृतप्रदं सुखघनं पश्यन्ति धन्या मुहुः ।
अस्मद्भाग्यमहित्वमीदृशमिदं किं वर्णयामो यतः
　　सच्चिच्छर्मरसं स्वनेत्रचषकैर्यत् संपिबामो भृशम् ॥

(११) अथ **संक्रान्तम्**—

तापः परं स्वात्मनिवेदनान्तो
　　मानो वृथाऽकारि मयेति चित्तम् ।
++++++शु तदा निरुक्तं
　　प्रेमेह संक्रान्तपदप्रयुक्तम् ॥

यथा—

दैन्यं कामयुतस्य वामचरितं वामासु सन्दर्शयन्
　　कृष्णो यामनयद्रहो रतिकृते सा साऽभिमानाऽऽह तम् ।
शक्यं नेतुमुपा+मिति तां प्रोच्य प्रियेऽन्तर्हिते
　　काचित् स्वात्मनिवेदनान्तपरितापेन द्रुतं हृद्रुजा ॥

तदुक्तं श्रीभागवते यथा—

हा नाथ ! रमण ! प्रेष्ठ । क्वासि क्वासि महाभुज ।
दास्यास्ते कृपणाया मे सखे दर्शय सन्निधिम् ॥इत्यादि।
(१०।३०।४०)

यथा वा सुग्रीवस्य रामे रामायणे—

लब्ध्वा राज्यपदं गृहानुपगतो भोगेषु संसक्तधीः
सुग्रीवः स्मरति स्म कार्यमनिशं रामस्य नायं लघुः ।
कोपाल्लक्ष्मणबोधितः सहृदयः प्राप्तानुतापः पुनः
श्रीरामो द्रुतचित्त आगत इति प्रोवाच मृत्योऽस्म्यहम् ॥

(१२) अथ विहृतम्—

द्रुतं न प्राग्जन्मन्यतनुभवनस्यानधिगते-
र्द्रवावस्थामुत्राप्यहह मनसो नो तनुमृते ।
द्रवावस्थापायो न हि भवतु कायाऽनधिगमं
विहायैवं मुक्तौ स्पृहयति न तत्प्रेम विहृतम् ॥

यथा—

मनः कृष्णाकारं क्वचिदपि पुरा जन्मनि न मे
वपुःप्रादुर्भूते न च भवति कृष्णे कति मनः ।
अभावाद् देहस्यामृत इति मृतं साऽभिमनुतेऽ-
मृतं काचित् प्रेम्णो सरसहृदया गोपतनया ॥

तदुक्तम्—

एताः परं तनुभृतो भुवि गोपवध्वो
गोविन्द एवमखिलात्मनि रूढभावाः ।

वाञ्छन्ति यद्भवभियो मुनयो वयं च
किं ब्रह्म जन्मभिरनन्तकथारसस्य ॥
(भाग० ११।१०।३०)

यत् पत्यपत्यसुहृदामनुवृत्तिरङ्ग
स्त्रीणां स्वधर्म इति धर्मविदा त्वयोक्तम् ।
अस्त्वेवमेतदुपदेशपदे त्वयीशे
प्रेष्ठो भवांस्तनुभृतां किल बन्धुरात्मा ॥ इत्यादि ।
(भाग० १०।२९।३२)

यथा वा—

पृथुः प्राह श्रीमच्चरणनलिनस्य स्मृतितति-
र्न यत्र स्वर्गो मे भवतु न च मोक्षोऽपि नितराम् ।
विधत्तां कर्णस्यायुतमथ दृशां कोटिमनिशं
यशः श्रोतुं विष्णोर्ननु तनुमथाऽऽलोकितुमपि ॥

अथवा—

मानो वृथाऽकारि मयेति ताप-
द्रुतान्तरा यत्र भवे परत्र ।
तमेकमालम्बनमाश्रयाणां
तत्प्रेम चोक्तं विहृताभिधेयम् ॥

यथा वा—

प्रियेऽहं संग्राह्यः सगुण इति याऽऽज्ञा भगवतः
परालम्बा नैवाश्रयदुपनिषन्मानवशतः ।
ततस्तस्मा राधाकृतसमपराधापहृतये
वियुक्ता संयुक्ता मधुरिपुधुरीणोऽनवरतम् ॥

(१३) अथ गलितम्

द्रवावस्था ह्यस्य प्रियतमगुणानां स्मरणतो
दृशोर्वा स्वाभाविक्यथ दहनतापद्रुतमिव ।
सुगन्धानां सत्त्वं भजति कठिनत्वं न हि यथा
मनोव्यक्तं प्रोक्तं गलितमिति तत्प्रेमरसिकैः ॥

यथा—

क्षणं तूष्णीमास्ते परसुखगता योगिसदृशी
सरोमाश्रोत्कम्पं विलपति कदा द्रक्ष्यत इति ।
सकृत्कृष्णं श्रुत्वा गलितहृदयैवाभवदियं
दशा त्वस्याः का स्याद् गतवति हरौ दृग्विषयताम् ॥

तदुक्तं श्रीभागवते—

तन्मनस्कास्तदालापास्तद्विचेष्टास्तदात्मिकाः ।
तद्गुणानेव गायन्त्यो नात्मागाराणि सस्मरुः ॥
(१०।३०।४४)

यथा वा—

सुपुण्यः प्रह्लादो जठरनिलयो नारदमुखाद्
निशम्य श्रीकृष्णं पररसमसौ निर्भररसः ।
न सस्मार प्रेम्णा गलितहृदयोऽन्यज्जलमही-
विकारं प्रोन्मत्तो जड इव परानन्दमुदितः ॥

(१४) अथ सन्तृप्तम्—

समस्तानुस्यूते सति चिति सुखे न्यस्तहृदय-
स्ततो भिन्नं नैव श्रयति कृतिनामुत्तमपदे ।
तदा सन्तृप्ताख्यां भजति ननु तत्प्रेम नितरां
यतः पूर्णं लब्ध्वा भवति हृदयं पूर्णसुखभाक् ॥

यथा—

प्रियः सन् भातीति प्रभृतिमतिभिर्यत्सुविदितं
समस्ताधिष्ठानं निखिलसुखमालम्बनमलम् ।
अहं तत्त्वंशब्दैर्य्यवहृतमिदं दृग्विषयगं
परानन्दः पूर्णोऽस्म्यहह ननु सच्चित्सुखतनुः ॥

तदुक्तं श्रीभागवते—

अन्याश्च तदनुध्याननिवृत्ताशेषकल्मषाः ।
नाभ्यजानन्निमं लोकमात्मलोकं गता इव ॥ इति ।
(१०।३९।१५)

नारदोऽपि—

प्रेमाशाभरनिर्भिन्नपुलकाङ्गोऽतिनिर्भरः ।
आनन्दसंप्लवे लीनो नापश्यमुभयं मुने ॥
(भाग० १।६।१८)

यथा वा—

सर्वं ब्रह्मैव पूर्णं क्षितिजलपवनव्योमवह्न्यादिनाऽहं-
काराद्यं पूर्णशर्मानुभवजनितया पूर्णबुद्ध्या समेताः ।
रोधाच्चित्तस्य यान्ति श्रुतिमुखमखिनः पूर्णमेवास्ति पूर्णं-
स्वात्मानं भावयन्तो मुनय इति परप्रेमभाजः सनाद्याः ॥

अस्मिन् सम्पन्ने प्रेमविषयवियोगे प्रेमाधारस्य क्षणं युगशतमिव भवति प्रसिद्धम् । गोपीनां क्षणं युगशतमिव यासां येन विनाऽभवदिति । ननु गलितान्तं प्रेम सावच्छिन्नविषयकमित्युच्यते, तत्कथमन्यविषयकस्यान्यत्रानुवृत्तिः, मानाभावादिति चेत्, मैवम् । स्यादेवम्—यद्यवच्छिन्नानवच्छिन्नयोरत्यन्तभेदः स्यात् । न त्वेवम्,

किन्तु घटाकाशमहाकाशयोरिव तयोरभेद एव। अतः सगुण-विषयस्यनिर्गुणेऽनुवृत्तिरबाधितैव।

तदुक्तम्—

अवच्छिन्नानवच्छिन्ने भिद्येते गगने नहि।
आनन्दो विषयाच्छन्नो विषयानन्द उच्यते॥

स एव चानवच्छिन्नो भूमानन्द इतीर्यते।
तस्माद् दोपादयोऽन्यत्र संलग्ने वर्तिकान्तरे॥

यथाऽऽयान्ति तथा प्रेमविषयाच्चित्सरूपके।
विषयस्य परित्यागे द्रवकाष्ठैव कारणम्॥

अपि प्रमादमलिनाच्चित्ताल्लोके न दृश्यते।
विषयव्यवहारोऽत्र किं वाच्यं मग्नचेतसः॥ इति।

तत्र प्रमादाद् विषयविस्मरणं पामराणाम्, द्रवकाष्ठया तु गोपीनां प्रसिद्धम्। पुराणेषु द्रवावस्थातारतम्येनैव चाप्राकृतोत्तममध्यम-भेदेन विभागो भक्तानामग्रे स्फुटीभविष्यति (भाग० ११ स्क०)। सैव च द्रवावस्था प्रणयानुरागस्नेहशब्दैरपि संकीर्त्यते।

यथा—

विसृजति हृदयं न यस्य साक्षा-
द्धरिरवशाभिहितोऽप्यघौघनाशः।
प्रणयरशनया धृताङ्घ्रिपद्मः
स भवति भागवतप्रधान उक्तः॥ इति।

(भाग० ११।२।५५)

प्रणयो द्रवावस्था सैव रशना रज्जुवद्बन्धनसाधनम्, तस्यां प्रविष्टस्य पुनर्निर्गमाभावादित्यर्थं इति भगवत्पादीयाः। नन्व-

स्मिन् मते कथं परमात्मनि भक्तिः सम्भवति ? जीवाभिन्ने तस्मिन् स्वस्मिन्निव भक्त्ययोगात् । न हि स्वस्मिन्नेव भक्तिरुपपद्यत इति चेत्, भ्रान्तोऽसि ; स्नेहविशेषरूपायां भक्तावद्वैतज्ञानस्याप्रतिबन्धकत्वात् । ननु माहात्म्यज्ञानं भक्तौ कारणम्; असत्यसङ्कल्पाद्यनेकदोषाश्रयजीवाभेदे च परमात्मनस्तत्प्रसक्त्या सत्यसङ्कल्पत्वादिमाहात्म्यस्य बाधेन तद्ध्यानपूर्वा भक्तिः प्रतिबध्येत एवेति चेत्, अभिप्रायमज्ञातवानसि । यतो माहात्म्यं गुणगरिमा गुणाश्चानन्दादयः प्रधानस्येति न्यायेन सत्यज्ञानानन्दाः, न तु पूर्णत्वादयः स्वरूपात्मका एवाद्वैतघटिता इत्यद्वैतज्ञानं माहात्म्यज्ञानविधयाऽखण्डार्थे सन्तृप्तप्रेम्णि कारणमेवेति तत्कथं भक्तौ प्रतिबन्धकं स्यात् । सत्यसङ्कल्पादयस्तु गुणाः सात्त्विकप्रकृतिमूलतया व्यवहारिका अप्युपाधिना जीवाद्भिन्न एवेशेऽभिमता इति, तत्रापि माहात्म्यस्य बाधो न संभवत्यद्वैतिनाम्; अपि तु हानिपूर्विका गलितान्ता प्रीतिः संस्कारादृष्टसचिवा या पुनः प्रपञ्चजातमेव विस्मारयति । इयांस्तु विशेषः—केवलबोधेऽशनादिविक्षेपो न निवर्तते, भक्तौ सोऽपि निवर्तते इति । **यथोक्तम्**—

नैषाऽतिदुःसहा क्षुन्मां त्यक्तोदमपि बाधते ।
पिबन्तं त्वन्मुखाम्भोजच्युतं हरिकथाऽमृतम् ॥
(भाग० १०।१।१३)

इति तदीयगुणानुवादस्यैव रसविशेषाऽभिव्यञ्जकतायास्तादृशस्वभावकत्वादिति भावः । अत एव निवृत्तसर्वा गायन्ति जडकल्पाश्च विरज्यन्ते ।

यथोक्तम्—

निवृत्ततर्षैरुपगीयमाना-
द्भवौषधाच्छ्रोत्रमनोऽभिरामात् ।

क उत्तमश्लोकगुणानुवादात्-
पुमान् विरज्येत विना पशुघ्नात् ॥ इति ।
(भाग० १०।१।४)

अत्रोत्तमश्लोकगुणानुवादस्य ब्रह्मविदुपगीयमानत्वभवरोग-निवर्तकत्वसुन्दरतमविषयकत्वेन श्रोत्रमनःप्रीतिविषयत्वजड-कल्पविरक्तिविषयत्वेन ब्रह्मविद्याफलत्वं पुमर्थहेतुत्वं रसरूपत्वं भाग्यफलत्वञ्च ध्वनितम्। तस्मादद्वैते भक्तिर्न संभवतीति द्वैतिना-मप्रयोजनेति चाद्वैतिनां केषाञ्चिद्वचनं साहसमात्रम्। कथितान-वच्छिन्नाया भक्तेरेव सद्रूपतया पुमर्थत्वात्। तत्र चाद्वैतज्ञानस्यैव माहात्म्यज्ञानविधया हेतुत्वात्। स्यादेतच्चैतन्मते प्रेमभक्तिसम्भ-वेऽपि सेव्यसेवकभावरूपा तु कथम्? तथाहि—सेव्यं सेवकान-न्यदुतान्यत्? नाद्यः, सेव्यसेवकभावस्यैकस्मिन्नयोगात्। द्वितीयोऽपि किं तात्त्विकमुताऽतात्त्विकम्। आद्येऽद्वैतक्षतिः, अन्त्येऽसत्त्वापत्त्या सेव्यत्वानुपपत्तेरिति चेन्मैवम्; "जन्माद्यस्य यतः" (ब्र० सू० १।१।२) इति न्यायेन कारणत्वाक्रान्तस्य ब्रह्मणः सेव्यत्वोपपत्तेः। न च "सर्वकर्मा" (छान्दोग्य० ३।१४) इत्यादिश्रुतेः कारणरूपं तात्त्विकमिति शङ्क्यम्; तात्पर्यलिङ्गानुगृहीतनिर्विशेष-वस्तुप्रतिपादकवचनविरोधात्। "द्वे वा व ब्रह्मणो रूपे मूर्तञ्चामूर्तञ्च" (बृहदा० २।३।१) इति प्रकृत्य समस्तस्थूलसूक्ष्मरूपं प्रपञ्चं ब्रह्मणो रूपत्वेन परामृश्य "तस्य ह वा एतस्य पुरुषस्वरूपं यथा महा-रजनं वासः" (बृहदा० २।३।६) इत्यादिनाऽऽकारविशेषञ्चाभिधाय "अथात आदेशो नेति नेति न ह्येतस्मादिति न ह्यन्यत्परमस्ति" (बृहदा० २।३।६) इति सर्वं प्रकृतं ब्रह्मणः प्रकारमितिशब्देन परामृश्य तत्र ज्ञाननिषिध्यमानानृतसर्वविशेषाधिष्ठानसन्मात्रस्यैव

निर्विशेषस्वप्रकाशैकस्वरूपस्य सत्यज्ञानानन्तादिपदबोधितस्य ब्रह्मणः श्रुत्या बोधनात् । ननु तर्हि सर्वमिथ्यात्वं जानतां कथमीशे भक्तिः स्यादिति चेत्, साधनदशाभ्यासजसंस्काराल्लौकिकव्यवहारवदेव प्राप्तया प्रपञ्चबाधस्यापि विस्मारणादेवेत्यवेहि । भक्तिरसस्य परमानन्दरूपतया स्वेतरसर्वाभिभावकत्वात् । अत एव दुःखासंस्पर्शित्वात् तादृशभक्तिरसव्याप्त्या विपदोऽपि स्वकीयाः कामिताः कुन्त्या—

विपदः सन्तु नस्तास्तास्तत्र तत्र जगद्गुरो ।
भवतो दर्शनं यस्मादपुनर्भवदर्शनम् ॥ इति ।
(भाग० १।८।२५)

युक्तञ्चैतत् । यस्मिन् सत्यवश्यमिष्टसम्बन्धस्तस्यापीष्टतौचित्यात् । नन्वेवं भक्तिसुखाद्वैराग्यासम्भवेन मुमुक्षुत्वासम्भवात् तदधिकारिकवेदान्तविचार आसुप्तेरामृतेः कालमवश्यकर्तव्यतयोक्तो बाध्येतेति चेत्, मैवम् ; भक्तिसुखानासक्तान् प्रति तस्यावश्यकत्वेऽपि भजनीयस्वरूपनिर्णयार्थं तद्भक्तानामपि तद्विचारस्याऽऽवश्यकत्वात् । भक्तिसुखाद्वैराग्यं न स्यादिति त्विष्टमेवापादितम् । जीवन्मुक्तानामपि श्रुतिस्मृतिषु भगवद्भक्तिप्रतिपादनादिति रहस्यम् । मतान्तरे तु गलितान्ते प्रेम्णि विषयोऽवतारविशिष्टोऽवतारी भगवान् षड्गुणपूर्णः सन्तृप्ते त्ववतारोपलक्षितोऽवतारी । अवतारश्च लीलाविग्रहादिः । तदुक्तम्—

मतान्तरेऽवतारी तु सन्तृप्तविषयो मतः ।
गलितान्तस्य विषयोऽवतारः परिवर्ण्यते ॥ इति ।

नन्वस्मिन् मते कथं भगवति भक्तिः संभवति ? नीरूपत्वेन सौन्दर्याभावात्, रूपवत्त्वे त्वनित्यत्वदोषाऽऽपत्तिभिया

माहात्म्यज्ञानस्य बाधेन सुतरामिति चेन्न ; प्रकृत्यादिप्रवर्तकतया प्राकृतरूपशून्यत्वेऽपि सत्यज्ञानानन्दाद्यप्राकृतरूपवत्त्वादेव सुन्दरतमे तस्मिन् भक्तिसम्भवात् । एतेन करचरणादिमति मत्स्यादावपि भक्तिर्व्याख्याता । वक्ष्यमाणरीत्या स्वप्रकाशसुखाद्यवयववत्त्वात् । विचारान्तरमेतत् । जीवन्मुक्तिसुखं सन्तृप्ते पूर्णमित्यत्र तु न कस्यापि विवादः । अत एवोक्तं तत्रैव—

अनेकजन्मसंसिद्धसन्तृप्तहृदयः सुधीः ।
जीवन्मुक्तिदशोपेतो नास्य कर्तव्यमिष्यते ॥ इत्यादि ।

वस्तुतस्तु—

वस्त्वेकं सगुणं च निर्गुणमदः सर्पो यथा कुण्डली-
त्येवं सत्सुखपूर्णं आत्मनि मनो लग्नं यशोदाऽऽत्मजे ।
यस्यासौ सुखमश्नुतेऽनवरतं स प्राप्तपुण्यो नर-
स्तत्तस्मिन् सगुणे कथमपि प्रेम्णा कृतार्थः पुमान्॥

एकादशभूमीनां वर्णनम्

एतदेव भूमिकाभेदलब्धज्ञानस्य फलम् ।

भूमयस्तूपवर्णिता वृद्धैर्यथा—

प्रथमं महतां सेवा तद्दयापात्रता ततः ।
श्रद्धाऽथ तेषां धर्मेषु ततो हरिगुणश्रुतिः ॥
ततो रत्यङ्कुरोत्पत्तिः स्वरूपाधिगमस्ततः ।
प्रेमवृद्धिः परानन्दे तस्याथ स्फुरणं ततः ॥
भगवद्धर्मनिष्ठाऽतः स्वस्मिंस्तद्गुणशालिता ।
प्रेम्णोऽथ परमा काष्ठेत्युदिता भक्तिभूमिकाः ॥ इति।

(भक्तिरसायनम् १।३४–३६)

(१) तत्र महत्सेवा

सर्वेशः सुखचिद्घनः परतरः प्रोक्तो महाँस्तस्य ये
भक्ताः कायमनोवचोभिरनिशं रक्ता महान्तो हरौ ।
तेषां तस्य च कायतो वचनतः प्रीत्यै कृतिर्या हृदा
सोक्ता भक्तिधरासु तासु महतः सेवाऽदिमा भूमिका ॥

यथा—

ध्यायन् सादरमानसेन सुयशो गायँस्तवास्मि ब्रुवन्
पश्यन्नाहितया दृशा हितवचः शृण्वन् न मन् सादरम् ।
सत्कृत्या हितमाचरन्नमहतां सङ्गं त्यजन् दूरतः
स्वेशं स्वेशपरायणं च सततं धन्यो नरः सेवते ॥

तत्र भगवत्सेवापरा यथा—

वृषपर्वा बलिर्बाणो मयश्चाऽथ विभीषणः ।
सुग्रीवो हनुमानृक्षो गजो गृध्रो वणिक्पथः ॥
(भाग० ११।१२।५)

व्याधः कुब्जा व्रजे गोप्यो यज्ञपत्न्यस्तथा परे ।
ते नाऽधीतश्रुतिगणा नोपासितमहत्तमाः ॥
(११।१२।६)

अव्रतातप्ततपसो मत्सङ्गाद् मामुपागताः ।
केवलेन हि भावेन गोप्यो गावो नगा मृगाः ॥
(११।१२।७)

येऽन्ये मूढधियो नागाः सिद्धा मामीयुरञ्जसा ।
यन्न योगेन साङ्ख्येन दानव्रततपोऽध्वरैः ॥
(११।१२।८)

व्याख्यास्वाध्यायसंन्यासैः प्राप्नुयाद्यत्नवानपि ।
मत्कामा रमणं जारं मत्स्वरूपाविदोऽबलाः ॥
(११।१२।९)

ब्रह्म मां परमं प्रापुः सङ्गाच्छतसहस्रशः ।
तस्मात्त्वमुद्धवोत्सृज्य चोदनां प्रतिचोदनाम् ॥
(११।१२।१३)

प्रवृत्तिश्च निवृत्तिश्च श्रोतव्यं श्रुतमेव च ।
मामेकमेव शरणमात्मानं सर्वदेहिनाम् ॥
(११।१२।१४)

याहि सर्वात्मभावेन यास्यसे त्वकुतोभयम् । इति ।
(भाग० ११।१२)

भगवद्भक्तसेवा यथा—

महत्सेवां द्वारमाहुर्विमुक्ते-
स्तमोद्वारं योषितां सङ्गिसङ्गम् ।
महान्तस्ते समचित्ताः प्रशान्ता
विमन्यवः सुहृदः साधवो ये ॥
(भाग० ५।५।२)

मय्यनन्येन भावेन भक्तिं कुर्वन्ति ये दृढाम् ।
मत्कृते त्यक्तकर्माणस्त्यक्तस्वजनबान्धवाः ॥
(भाग० ३।२५।२२)

मदाश्रयाः कथाहृष्टाःशृण्वन्ति कथयन्ति च ।
तपन्ति विविधांस्तापानेतान् मद्गतचेतसः ॥
(भाग० ३।२५।२३)

त एव साधवः साध्वि ! सर्वसङ्गविवर्जिताः ।
सङ्गस्तेष्वथ ते प्रार्थ्यः सङ्गदोषहरा हि ते ॥
(भाग० ३।२५।२३)

यथा—

यत्पादसंश्रयाः सूत मुनयः प्रशमायनाः ।
सद्यः पुनन्त्युपस्पृष्टाः स्वर्धुन्यापोऽनुसेवया ॥
(भाग० १।१।१५)

तुलयाम लवेनापि न स्वर्गं नापुनर्भवम् ।
भगवत्सङ्गिसङ्गस्य मर्त्यानां किमुताऽशिषः ॥
(भाग० १।१८।१३)

तथा—

दुर्लभो मानवो देहो देहिनां क्षणभङ्गुरः ।
तत्रापि दुर्लभं मन्ये वैकुण्ठप्रियदर्शनम् ॥
(भाग० ११।२।२९)

अत आत्यन्तिकं क्षेमं पृच्छामो भवतोऽनघाः ।
संसारेऽस्मिन् क्षणार्धोऽपि सत्सङ्गः शेवधिर्नृणाम् ॥ इत्यादि।
(भाग० ११।२।३०)

अयमत्र निष्कर्षः—भगवत्सङ्गं भगवत्सङ्गिसङ्गं वा यथा योग्यमन्तरेण न भगवति भक्तिरुदेति ॥ एतावांस्तु विशेषः—साक्षाद्भगवत्सङ्गिनां कृतार्थत्वान्न सङ्गापेक्षा, भगवत्सङ्गसङ्गिनां तु विद्यत एव फलतया भगवत्सङ्गापेक्षेति व्याख्याता द्विविधा महत्सेवा ।

(२) तद्दयापात्रता यथा—

ईशस्येशपरायणस्य च मुहुः सङ्गाद्भवेत्तद्दया
दुःखं माऽस्य भवत्वियं च सततं सौशील्यमुख्यैर्गुणैः ।
स्वस्मिंस्तच्चरणाश्रितैरविरतं या धीयते गीयते
श्रुत्याद्यैर्विरलेन केनचिदियं लभ्या दयापात्रता ॥

ते च गुणा भगवतोक्ताः—

कृपालुरकृतद्रोहस्तितिक्षुः सर्वदेहिनाम् ।
सत्यसारोऽनवद्यात्मा समः सर्वोपकारकः ॥

(भाग० ११।११।२९)

कामैरहत—धीर्दान्तो मृदुः शुचिरकिञ्चनः ।
अनीहो मितवाक् शान्तः स्थिरो मच्छरणो मुनिः ॥

(भाग० ११।११।३०)

अप्रमत्तो गभीरात्मा धृतिमान् जितषड्गुणः ।
अमान्यमत्सरो दक्षो निर्ममो दृढसौहृदः ॥

(भाग० ११।११।३१)

असत्वरोऽर्थजिज्ञासुरनसूयुरमोघवाक् । इत्यादि ।

(भाग० ११।१०।६)

यथा—

क्षिप्तोऽगाधह्रदे सितश्च सततं पाशैर्विषं भक्षितः
शैलादेरवपातितः पुनरयं नीतः करीन्द्रान्तिके ।
खड्गैर्हन्तुमपृच्छदात्मतनयं त्राता तव काऽस्ति कः
सर्वत्राऽस्ति हरिर्द्रुतं नरहरेः कारुण्यपात्रं बभौ ॥

प्रह्लाद इति शेषः। एतादृश शिष्यगुणाभावे तु जातोऽपि महत्सङ्गो निरर्थक एव, यथा दुर्योधनादीनाम्। तथा चैतादृश-गुणसम्पत्तिरेव दयापात्रता नाम द्वितीया भूमिका। साऽपि द्विविधा—स्वप्रयत्नानपेक्षा तत्सापेक्षा च। तत्राद्या यथा—रुद्रप्राचेतससंवादे —

तप्तहेमनिकायाभं शितिकण्ठं त्रिलोचनम्।
प्रसादसुमुखं वीक्ष्य प्रणेमुर्जातकौतुकाः॥
(भाग० ४।२४।२५)

स तान् प्रपन्नार्तिहरो भगवान् धर्मवत्सलः।
धर्मज्ञान् शीलसम्पन्नान् प्रीतान् प्रीत उवाच ह॥
(४।२४।२६)

श्रीरुद्रः—

यूयं वेदिषदः पुत्रा विदितं वश्चिकीर्षितम्।
अनुग्रहाय भद्रं व एवं मे दर्शनं कृतम्॥
(४।२४।२७)

परं यद्ब्रहसः साक्षात्त्रिगुणाद् जीवसंज्ञितात्।
भगवन्तं वासुदेवं प्रपन्नः स प्रियो हि मे॥
(४।२४।२८)

स्वधर्मनिष्ठः शतजन्मभिः पुमान्
विरिञ्चितामेति ततः परे हि माम्।
अव्याकृतं भागवतोऽथ वैष्णवं
पदं यथाऽहं विबुधाः कलात्यये॥
(४।२४।२९)

अथ भागवता यूयं प्रियाः स्थ भगवान् यथा ।
न मद्भागवतानां च प्रेयानन्योऽस्ति कर्हिचित् ॥
(४।२४।३०)

इदं विविक्तं जप्तव्यं पवित्रं मङ्गलं परम् । इत्यादौ ।
(४।२४।३१)

द्वितीया यथा ध्रुवनारदसंवादे ध्रुवः—

सोऽयं शमो भगवता सुखदुःखहृतात्मनाम् ।
दर्शितः कृपया पुंसां दुर्दर्शोऽस्मद्विधैस्तु यः ॥
(भाग० ४।८।३५)

अथाऽपि मेऽविनीतस्य क्षात्रं घोरमुपेयुषः ।
विनदन्नटते वीणां हिताय जगतोऽर्कवत् ॥
(४।८।३६)

इत्यभ्युदितमाकर्ण्य भगवान् नारदस्तदा ।
प्रीतः प्रीत्याऽऽह तं बालं सद्वाक्यमनुकम्पया ॥
(४।८।३९)

नारद उवाच—

मात्राभिहितः पन्थाः स वै निःश्रेयसस्य ते ।
भगवान् वासुदेवस्तं भज तत्प्रवणात्मना ॥
(४।८।४०)

धर्मार्थकाममोक्षाख्यं य इच्छेच्छ्रेयमात्मनः ।
एकं ह्येव हरेस्तत्र केवलं पादसेवनम् ॥
(४।८।४१)

तत्रानुगच्छ भद्रं ते यमुनायास्तटं शुचि ।
पुण्यं मधुवनं यत्र सान्निध्यं नित्यदा हरेः ॥ इत्यादौ ।
(४।८।४२)

(३) श्रद्धाऽथ तेषां धर्मेषु यथा---

ईशस्येशपरायणस्य च दयापात्रत्वतस्तद्गुणः
श्रुत्यादौ रुचिरादरोऽभिलषितं कार्यान्तरा संग्रहः ।
श्रुत्यादिप्रतिबन्धकेषु विरतिः सद्वाक्यविश्वासिताऽऽ-
स्तिक्यं सद्गुरुदर्शितेषु कृतिनां श्रद्धा तृतीया धरा ॥

तदुक्तम्—

शुश्रूषोः श्रद्दधानस्य वासुदेवकथारुचिः ।
स्यान्महत्सेवया विप्राः पुण्यतीर्थनिषेवणात् ॥
(भाग० १।२।१६)

यदनुध्यासिना युक्ताः कर्मग्रन्थिनिबन्धनम् ।
छिन्दन्ति कोविदास्तस्य को न कुर्यात् कथारतिम् ॥
(भाग० १।२।१५)

ज्ञानं यदा प्रतिनिवृत्तगुणोर्मिचक्र-
मात्मप्रसाद उत यत्र गुणेष्वसङ्गः ।
कैवल्यसम्मतपथस्त्वथ भक्तियोगः
को निर्वृतो हरिकथासु रतिं न कुर्यात् ॥ इत्यादि ।
(भाग० २।३।१२)

कथास्वित्युपलक्षणमन्येषामपि भागवतधर्माणामुदाहरणम् ।

परीक्षितो यथा—

राज्ञा दैववशाद् मृतोरगवपुष्यंशेऽर्पिते तत्सुतः
सर्पेणैव मृतिं क्रुधाऽभिहितवान् श्रुत्वाऽथ राजा वचः ।
त्यक्त्वा राज्यसुताऽऽदिकं सुरनदीतीरं श्रितः श्रीहरिं
श्रोतुं सादरमानसोऽभवदयं ध्यातुं प्रमातुं मुदा ॥

अथ भागवता यूयं प्रियाः स्थ भगवान् यथा ।
न मद्भागवतानां च प्रेयानन्योऽस्ति कर्हिचित् ॥
(४।२४।३०)

इदं विविक्तं जप्तव्यं पवित्रं मङ्गलं परम् । इत्यादौ ।
(४।२४।३१)

द्वितीया यथा ध्रुवनारदसंवादे ध्रुवः—

सोऽयं शमो भगवता सुखदुःखहृतात्मनाम् ।
दर्शितः कृपया पुंसां दुर्दर्शोऽस्मद्विधैस्तु यः ॥
(भाग० ४।८।३५)

अथाऽपि मेऽविनीतस्य क्षात्रं घोरमुपेयुषः ।
विनदन्नटते वीणां हिताय जगतोऽर्कवत् ॥
(४।८।३६)

इत्यभ्युदितमाकर्ण्य भगवान् नारदस्तदा ।
प्रीतः प्रीत्याऽऽह तं बालं सद्वाक्यमनुकम्पया ॥
(४।८।३९)

नारद उवाच—

मात्राभिहितः पन्थाः स वै निःश्रेयसस्य ते ।
भगवान् वासुदेवस्तं भज तत्प्रवणात्मना ॥
(४।८।४०)

धर्मार्थकाममोक्षाख्यं य इच्छेच्छ्रेयमात्मनः ।
एकं ह्येव हरेस्तत्र केवलं पादसेवनम् ॥
(४।८।४१)

तत्रानुगच्छ भद्रं ते यमुनायास्तटं शुचि ।
पुण्यं मधुवनं यत्र सान्निध्यं नित्यदा हरेः ॥ इत्यादौ ।
(४।८।४२)

(३) श्रद्धाऽथ तेषां धर्मेषु यथा—

ईशस्येशपरायगस्य च दयापात्रत्वतस्तद्गुणः
श्रुत्यादौ रुचिरादरोऽभिलषितं कार्यान्तरा संग्रहः ।
श्रुत्यादिप्रतिबन्धकेषु विरतिः सद्वाक्यविश्वासिताऽऽ-
स्तिक्यं सद्गुरुदर्शितेषु कृतिनां श्रद्धा तृतीया धरा ॥

तदुक्तम्—

शुश्रूषोः श्रद्दधानस्य वासुदेवकथारुचिः ।
स्यान्महत्सेवया विप्राः पुण्यतीर्थनिषेवणात् ॥
(भाग० १।२।१६)

यदनुध्यासिना युक्ताः कर्मग्रन्थिनिबन्धनम् ।
छिन्दन्ति कोविदास्तस्य को न कुर्यात् कथारतिम् ॥
(भाग० १।२।१५)

ज्ञानं यदा प्रतिनिवृत्तगुणोर्मिचक्र-
मात्मप्रसाद उत यत्र गुणेष्वसङ्गः ।
कैवल्यसम्मतपथस्त्वथ भक्तियोगः
को निर्वृतो हरिकथासु रतिं न कुर्यात् ॥ इत्यादि ।
(भाग० २।३।१२)

कथास्वित्युपलक्षणमन्येषामपि भागवतधर्माणामुदाहरणम् ।

परीक्षितो यथा—

राज्ञा दैववशाद् मृतोरगवपुष्यंशेऽर्पिते तत्सुतः
सर्पेणैव मृतिं क्रुधाऽभिहितवान् श्रुत्वाऽथ राजा वचः ।
त्यक्त्वा राज्यसुताऽऽदिकं सुरनदीतीरं श्रितः श्रीहरिं
श्रोतुं सादरमानसोऽभवदयं ध्यातुं प्रमातुं मुदा ॥

तत्र श्रद्धाविहीनास्तु निन्द्या एव । तत्र केचिद्विषयभोगपराः, केचिद्गर्विताः ।

तत्राद्या यथा—

तरवः किन्न जीवन्ति भस्त्राः किन्न श्वसन्ति हि ।
न खादन्ति न मेहन्ति किं ग्रामपशवोऽपरे ॥
(भाग० २।३।१८)

श्वविड्वराहोष्ट्रखरैः संस्तुतः पुरुषः पशुः ।
न यत्कर्णपथोपेतो जातु नाम गदाग्रजः ॥ इत्यादि ।
(२।३।१९)

द्वितीया यथा—

सर्वेषु शश्वत्तनुभृत्स्ववस्थितं
यथा स्वमात्मानमभीष्टमीश्वरे ।
वेदोपगीतञ्च न शृण्वतेऽबुधाः
मनोरथानां प्रवदन्ति वार्तया ॥
(११।५।१०)

हित्वाऽऽत्ममायाविरतो गृहापत्यसुहृत्स्त्रियः ।
तमो विशन्त्यनिच्छन्ति वासुदेवपराङ्मुखाः ॥ इत्यादि ।
(११।५।१८)

तथा शिवपराङ्मुखा अपि । यथा पराशरोपपुराणे—

अन्तर्नेच्छन्ति ये रुद्रं भवानीसहितं भवम् ।
पुरीषमेव गृह्णन्ति जिह्वया ते न संशयः ॥ इति ।

तथा श्रीभागवते—

हसन्ति तस्याचरितं हि दुर्भगाः । इति ।
(३।१४।२६)

एतदेवाऽऽश्रित्याऽन्यत्रापि—

त्वमेवाऽऽत्मन् विश्वाधिक इति जगत्सेव्य इति च
स्फुटं ब्रूते वेदस्तदपि विवदन्ते बत खलाः ।
किमेषां त्वद्-द्रोहव्यसननिहतं जीवनमिदं
यदुक्तीः श्रोतॄणां मरणमुदितं निष्कृतिरिति ॥

तथा भगवद्भक्तनिन्दका अपि निन्द्या एव । ते यथा—

रजसा घोरसङ्कल्पाः कामुका अहिमन्यवः ।
दाम्भिका मानिनः पापा विहसन्त्यच्युतप्रियान् ॥
(भाग० ११।५।७)

वदन्ति तेऽन्योन्यमुपासितस्त्रियो
गृहेषु मैथुन्यसुखेषु चाऽऽशिषः ।
यजन्त्यसृष्टान्नविधानदक्षिणं
वृत्त्यै परं घ्नन्ति पशूनतद्विदः ॥ इति ।
(११।५।८)

तस्माद् भगवद्धर्मश्रद्धा भवति तृतीया भूमिका ।

(४) ततो हरिगुणश्रुतिः—

ईशस्येशपरायणस्य च यदा श्रद्धा भवेद्धर्मत-
स्तस्यास्तद्गुणसंश्रवस्तवमुखा या सत्कृतिर्धीमताम् ।
सेयं भक्तिजभूमिकासु परमा भूमिश्चतुर्थी स्मृता
या लभ्या परमेश्वरस्य दयया सभ्यादृता नित्यशः ॥

यथा श्रीभागवते—

इत्थं परस्य निजधर्मरिरक्षयाऽऽत्त-
लीलातनोस्तदनुरूपविडम्बनानि ।

कर्माणि कर्मकषणानि यदूत्तमस्य
श्रूयादमुष्य पदयोरनुवृत्तिमिच्छन् ॥
(१०।९०।४९)

मर्त्यस्तया ननु समेधितया मुकुन्दं
श्रीमत्कथाश्रवणकीर्तनचिन्तयेति ।
तद्धाम दुस्तरकृतान्तभवापवर्गं
ग्रामाद्वनं क्षितिभुजोऽपि ययुर्यदर्थाः ॥
(१०।९०।५०)

संसारसिन्धुमतिदुस्तरमुत्तितीर्षो-
र्नान्यः प्लवो भगवतः पुरुषोत्तमस्य ।
लीलाकथारसनिषेवणमन्तरेण
पुंसो भवेद् विविधदुःखदवार्दितस्य ॥
(१२।४।४०)

निवृत्ततर्षैरित्यादिहरिगुणश्रुतिरिति कृत्स्नभागवतधर्मोपलक्षणम् । तथा—

को नु राजन्निन्द्रियवान् मुकुन्दचरणाम्बुजम् ।
न भजेत् सर्वतोमृत्युरुपास्यममरोत्तमैः ॥
(भाग० ११।२।२)

तच्च भजनं श्रवणकीर्तनादिलक्षणं द्वितीये वक्ष्यते । यथा—

यशः शृण्वन् गायन् श्रुतिपथमदो यन्न विरतं
हरेः सेवां कुर्वन् सरसकुसुमाद्यैरभियजन् ।
नमन् पादौ दास्यं मनसि गमयन् सख्यमपि वा
स्वमात्मानं यच्छन् जयति सुतरां कोऽपि सुकृती ॥

तस्मादेवंविधमनुष्ठानं भवति चतुर्थी भूमिका। एतच्चतुष्टयसाधनमेव।

(५) ततो रत्यङ्कुरोत्पत्तिः—

ईशस्येशपरस्य च श्रुतिमुखैर्या स्थायिभावाह्वया
संस्काराऽपरसंज्ञिका भगवदात्मस्वानुकारा हृदि।
वृत्तिर्याऽङ्कुरतां गता भगवदाकारान्तरं मुष्णती
पूर्वस्याः फलतां गता भुव इयं रत्यङ्कुरा पञ्चमी॥

तदुक्तम्—

सतां प्रसङ्गाद् मम वीर्यसंविदो
भवन्ति हृत्कर्णरसायनाः कथाः।
तज्जोषणादाश्वपवर्गवर्त्मनि
श्रद्धा रतिर्भक्तिरनुक्रमिष्यति॥
(भाग० ३।२५।२५)

श्रद्धा भक्तिरसानुभावः, ततो रतिः स्थायिभावः, स एव भक्तिरसतां प्राप्नोतीत्यर्थः।

एवं मनः कर्मवशं प्रयुङ्क्ते
अविद्ययाऽऽत्मन्युपधीयमाने।
प्रीतिर्न यावन्मयि वासुदेवे
न मुच्यते देहयोगेन तावत्॥
(भाग० ५।५।६)

भवापवर्गो भ्रमतो यदा भवेद्
जनस्य तर्ह्यच्युतसत्समागमः।

सत्संगमो र्यहि तदैव सद्गतौ
परावरेशे त्वयि जायते रतिः ॥ इत्यादि ।
(१०।५१।५३)

यथा—

महत्सङ्गाद्दासीसुत उत पुरा नारदमुनि-
र्मनीषां सत्येऽर्थे सततमनुश्रित्य निरगात् ।
विदग्धा व्यालेनाप्यहह जननीमीश्वरदयां
निधाय स्वस्वान्ते विरतमिह भक्तः पदमितः ॥

इयं पञ्चमी भूमिका । भक्तेः स्वरूपमेवैतत् । परिपाकविशेषादन्याः षड् भूमिकाः फलभूताः ।

(६) **स्वरूपाधिगमस्ततः**—

देहप्राणदृगादि याति न मनः प्राप्तानुरागं प्रिये
तद्विक्षेपनिवृत्तये श्रुतिमते ज्ञाने प्रयत्नं जुषाम् ।
प्रत्यक्स्वात्मन ईशितुर्भगवतो दृश्यं तिरस्कृत्य यः
साक्षात्कार उदाहृता रतिभुवि स्वात्मावबोधा धरा ॥

इयं षष्ठी भूमिका । अन्यथा देहेन्द्रियादिविक्षेपेण जाताया अपि रतेरनिर्वाहात् ।

तदुक्तम्—

ज्ञानं निःश्रेयसार्थाय पुरुषस्याऽऽत्मदर्शनम् ।
यदाहुर्वर्णयेत् तत्ते हृदयग्रन्थिभेदनम् ॥
(भाग० ३।२६।२)

अनादिरात्मा पुरुषो निर्गुणः प्रकृतेः परः ।
प्रत्यगात्मा स्वयं ज्योतिर्विश्वं येन समन्वितम् ॥
(३।२६।३)

स एव प्रकृतिं सूक्ष्मां देवीं गुणमयीं विभुः ।
यदृच्छयैवोपगतामभ्यपद्यत लीलया ॥
(३।२६।४)

गुणैर्विचित्राः सृजती स्वरूपा प्रकृतिः प्रजाः ।
विलोक्य मुमुहे सद्यः स इह ज्ञानगूहया ।
(३।२६।५)

एवं पराभिज्ञानेन कर्तृत्वं प्रकृतेः पुमान् ।
कर्मसु क्रियमाणेषु गुणैरात्मनि मन्यते ॥
(३।२६।६)

तदस्य संसृतिर्बन्धः पारतन्त्र्यश्च तत्कृतम् ।
भवत्यकर्तुरीशस्य साक्षिणो निर्वृतात्मनः ॥
(३।२६।७)

तथा—

आत्मा नित्योऽव्ययः शुद्ध एकः क्षेत्रज्ञ आश्रयः ।
अविक्रियः स्वदृग्घेतुर्व्यापकोऽसङ्ग्यनावृतः ॥
(भाग० ७।७।१९)

एतैर्द्वादशभिर्विद्वानात्मनो लक्षणैः परैः ।
अहं ममेत्यसद्भावं देहादौ मोहजं त्यजेत् ॥
(७।७।२०)

एवं शुद्धे त्वंपदलक्ष्येऽवगते तत्पदलक्ष्येण सहाऽभेदज्ञानं भवति । तदुक्तम्—

कृष्णमेनमवेहि त्वमात्मानमखिलात्मनाम् ।
जगद्धिताय सोऽप्यत्र देहीवाऽऽभाति मायया ॥ इत्यादि ।
(भाग० १०।१४।५५)

एतादृशज्ञानस्य भक्त्युत्तरकालत्वं दर्शितम् ।

वासुदेवे भगवति भक्तियोगः प्रयोजितः ।
जनयत्याशु वैराग्यं ज्ञानञ्च यदहेतुकम् ॥ इत्यादि ।
(भाग० १।२।७)

नारदस्य यथोक्तम्—

गतो दूराध्वानं श्रमयुत उतायं ननु ततो
ह्युदासीनो दीनो हरिचरणलीनो हि नितराम् ।
विविक्ते तद्ध्यानाद् जगदिदमपश्यन् समसुखं
परं प्राप्तः स्वस्मिन् स्वयमिह पुरा नारदमुनिः ॥ इति ।

(७) अथ प्रेमविवृद्धिनामिका सप्तमी यथा—

परात्मानन्दास्यापरविषयरत्योपचितया
प्रपञ्चस्याऽनादेरनधिगतिप्राप्तं परसुखम् ।
यदेवं चेष्टाभिः स्वभिनयति कश्चित् सुकृतभाक्
तदा प्रेम्णो वृद्धिर्भवति रतिभूमौ परतरा ॥

यथा श्रीभागवते—

न्यस्तक्रीडनको बालो जडवत्तन्मयस्तदा ।
कृष्णग्रहगृहीतात्मा न वेद जगदीदृशम् ॥
(७।४।३७)

आसीनः पर्यटन्नश्नन् शयानः प्रपिबन् ब्रुवन् ।
नानुसन्धत्त एतानि गोविन्दपरिरम्भितः ॥
(७।४।३८)

क्वचिद्रुदति वैकुण्ठचिन्ताशबलचेतनः ।
क्वचिद्धसति तच्चिन्ताह्लाद उद्गायति क्वचित् ॥
(७।४।३९)

नदति क्वचिदुत्कण्ठो विलज्जो नृत्यति क्वचित् ।
क्वचित्तद्भावनायुक्तस्तन्मयोऽनुचकार ह ॥
(७।४।४०)

क्वचिदुत्पुलकस्तूष्णीमास्ते संस्पर्शनिर्वृतः ।
अस्पन्दप्रणयानन्दसलिलामीलितेक्षणः ॥
(७।४।४१)

स उत्तमश्लोकपदारविन्दयो-
र्निषेवयाऽकिञ्चनसङ्गलब्धया ।
तन्वन् परां निर्वृतिमात्मनो मुहु-
र्दुःसङ्गहीनः स्वमनः समं व्यधात् ॥
(७।४।४२)

अन्यत्रापि—

गर्भे नारदबोधितो बहिरपि प्रह्लाद ईशं स्मरन्
न्यस्तक्रीडनको हसत्ययमथो रोदित्यथो गायति ।
तूष्णीं तिष्ठति रोमहर्षसहितो नृत्यत्यथो भावय-
त्यस्यैवाऽनुकरोति सत्कृतिमितः प्रेम्णो विवृद्धिं पराम् ॥

एवमन्यदप्यूहनीयम् । एतादृशदशोत्पत्तिपर्यन्तमेव साधना-ऽभ्यासः । अतः परं भूमिकाचतुष्टयमयत्नसाध्यम् ।

(८) तस्याऽथ स्फुरणं ततः, यथा—

प्रेम्णो यो विषयोऽस्य दि++भवेत् साक्षात्कृतिर्वृद्धितः
प्रेम्णस्तेन समं प्रवक्ति वचनं पश्यन्नमुं तुष्यति ।
यस्याऽनुग्रहतो भवेन्ननु सदाऽनर्थस्य नाशो ध्रुवं
स्फूर्तिः प्रेमपरस्य भक्तिजगतीवर्गोऽष्टमी भूमिका ॥

उदाहरणं ध्रुवो यथा—

बालो मातृसपत्नदुर्विनयतः खेदेन गेहाद् गतो
मध्ये नारदवाक्यतो हरिमनुध्यायन् ध्रुवस्तस्थिवान् ।
ईशप्रेमविवृद्धितो भगवतो लेभे परं दर्शनं
सर्वाऽनर्थनिवृत्तमैश्वरपदं सर्वाश्रयं प्रापितः ॥

एवमन्येऽपि । तदुक्तं भागवते—

नैकात्मतां मे स्पृहयन्ति केचिद्
मत्पादसेवाऽभिरता मदीहाः ।
येऽन्योन्यतो भागवताः प्रसह्य
सभाजयन्ते मम पौरुषाणि ॥
(३।२५।३३)

पश्यन्ति ते मे रुचिराण्यम्ब सन्तः
प्रसन्नवक्त्राऽरुणलोचनानि ।
रूपाणि दिव्यानि वरप्रदानि
साकं वाचं स्पृहणीयां वदन्ति ॥
(३।२५।३४)

तैर्दर्शनीयावयवैरुदार-
विलासहासेक्षितवामसूक्तैः ।
हृतात्मनो हृतप्राणांश्च भक्ति-
रनिच्छतो गतिमण्वीं प्रयुङ्क्ते ॥
(३।२५।३५)

एवमन्यदप्यूह्यम् ।

(९) भगवद्धर्मनिष्ठाऽतः—

विष्णोः संश्रवकीर्तनस्मृतिमतिः सेवार्चनं वन्दनं
दास्यं सख्यमथाऽऽत्मदाननियमः स्वप्नेऽपि न त्यज्यते ।

अन्यस्याऽस्मरणं यथा सुकृतिनः कस्याऽपि हीयं कृतिः
प्रोक्ता सा परमेशधर्मविषये निष्ठा परा भूमिका ॥

यथा—

राजा श्रीभरतो रतो हरिगुणे सत्संगतः शान्तधी-
र्यज्ञेशाऽच्युतमाधवाऽऽदिकवचः स्वप्नेऽपि न त्यक्तवान् ।
गोविन्दाऽर्चनसंस्मरणानिसततध्यानानि मुक्त्वा परं
नान्यत्किञ्चन जागरे प्रतिदिनं स्वप्नेऽकरोद्वा नृपः ॥

यथा श्रीविष्णुपुराणे—

शालग्रामे महाभागो भगवन्न्यस्तमानसः ।
उवास कतिचित्कालं मैत्रेय पृथिवीपतिः ॥
अहिंसादिष्वशेषेषु गुणेषु गुणिनां वरः ।
अवाप परमां काष्ठां मनसश्चाऽपि संयमे ॥
यज्ञेशाऽच्युत गोविन्द माधवाऽनन्त केशव ।
कृष्ण विष्णो हृषीकेशेत्याह राजा स केवलम् ॥
नान्यज्जगाद मैत्रेय किञ्चित् स्वप्नान्तरेष्वपि ।
एतत्परं तदर्थं च विना नाऽन्यदचिन्तयत् ॥
समित्पुष्पकुशाऽऽदानं चक्रे देवक्रियाकृते ।
नान्यानि चक्रे कर्माणि निःसङ्गो योगतापसः ॥
(२।१३।७-११)

श्रीभागवते च—

अम्बरीषो महाभागः सप्तद्वीपवसुन्धराम् ।
अव्ययाञ्च श्रियं लब्ध्वा विभवञ्चाऽतुलं भुवि ॥
(९।४।१५)

मेनेऽतिदुर्लभं पुंसा सर्वं तत्स्वप्नसंप्लुतम् ।
विद्वान् विभवनिर्वाणं तमो विशति यत्पुमान् ॥
(९।४।१६)

वासुदेवे भगवति तद्भक्तेषु च साधुषु ।
प्राप्तो भावं परं विश्वं येनेदं लोष्ट्रवत्स्मृतम् ॥
(९।४।१७)

स वै मनः कृष्णपदारविन्दयो-
र्वचांसि वैकुण्ठगुणाऽनुवर्णने ।
करौ हरेर्मन्दिरमार्जनादिषु
श्रुतिं चकाराऽच्युतसत्कथोदये ।
(९।४।१८)

मुकुन्दलिङ्गालयदर्शने दृशौ
तद्भृत्यगात्रस्पर्शाङ्गसङ्गम् ।
घ्राणं च तत्पादसरोजसौरभे
श्रीमत्तुलस्या रसना तदर्पिते ॥
(९।४।१९)

पादौ हरेः क्षेत्रपदोपसर्पणे
शिरो हृषीकेशपदाऽभिवन्दने ।
कामञ्च दास्ये न तु कामकाम्यया
यथोत्तमश्लोकजनाश्रया रतिः ॥
(९।४।२०)

एवं सदा कर्मकलापमात्मनः
परेऽधियज्ञे भगवत्यधोक्षजे ।

सर्वाऽऽत्मभावं विदधन्महीमिमां
तन्निष्ठविप्राऽभिहितः शशास ह ॥
(९।४।२१)

एवमन्यदप्यूह्यम्। भगवद्धर्मनिष्ठा च यत्नपूर्विका साधनम्। स्वतः सिद्धा तु भगवद्धर्मनिष्ठा फलभूता नवमी भूमिका।

(१०) स्वस्मिंस्तद्गुणशालिता।

एवं स्वप्रियसंरतस्य कृतिनोऽनिष्ठा तदन्यत्र या
कामानां समवाप्तता हृदि भवेद्याऽऽनन्दपूर्णात्मता।
सन्तृप्तत्वमनुक्षणं भगवतो भावेन सद्रूपता
सेयं तद्गुणशालिताऽऽत्मनि मता भक्तेः परा भूमिका ॥

यथा—

सच्चित्स्वात्मसुखस्य नारदगिरा संबोधतस्तद्व्रते-
नित्यानन्दनिमग्नचेतस उरुध्यानेन तृप्तस्य च।
प्रह्लादस्य नृसिंहरूपभगवत्कारुण्यपात्रस्य म-
त्कामानामविरोहणं हृदि सदा सोऽयं पराऽनुग्रहः ॥

श्रीभागवतेऽपि—

अथो विभूतिं मम मायिनस्ता-
मैश्वर्यमष्टाङ्गमनुव्रतश्च।
श्रियश्च तेन स्पृहयन्ति भद्रां
परस्य ते मेऽश्नुवते च लोके ॥
(३।२५।३७)

न कर्हिचिन्मत्पराः शान्तरूपे
नङ्क्षचन्ति नो मेऽनिमिषो लेढिहेतिः।

येषामहं प्रिय आत्मा सुतश्च
सखा गुरुः सुहृदो दैवमिष्टम् ॥
(३।२५।३८)

एवमविनश्वरभगवत्तुल्यगुणाऽऽविर्भावो भवति दशमी भूमिका ।

(११) प्रेम्णोऽथ परा काष्ठा ।

प्रेम्णस्तद्विषयस्य या विरहिता सोढुं न शक्या भवे-
द्यस्यामल्पनिमेषकोऽपि युगतां प्राप्नोति हानं तनोः ।
एकं द्वे अपि वा यदैव भवतः प्रेम्णस्तु काष्ठा परा
सेयं भक्तिजभूमिकासु गदिता ह्येकादशी भूमिका ॥

यथा—

रुद्धा काऽपि गृहे हि गोपतनया श्रीकृष्णवंशीध्वनिं
श्रुत्वा जातरतिर्गता न हि बहिस्तस्मिन्क्षणे कोटयः ।
वर्षाणामिव सङ्गताः पुनरियं श्रीकृष्णविश्लेषिता
सोढुं नाऽशकदित्यहो प्रमुमुचे देहाऽऽख्यगेहं ध्रुवम् ॥

श्रीभागवतेऽपि—

गोपीनां परमाऽऽनन्द आसीद् गोविन्ददर्शने ।
क्षणं युगशतमिव यासां येन विनाऽभवत् ॥
(१०।१६।१६)

दुःसहप्रेष्ठविरहतीव्रतापधुताऽशुभाः ।
ध्यानप्राप्ताच्युताऽऽश्लेषनिर्वृत्या क्षीणमङ्गलाः ॥
(१०।२९।१०)

तमेव परमात्मानं जारबुद्ध्याऽपि सङ्गताः ।
जहुर्गुणमयं देहं सद्यः प्रक्षीणबन्धनाः ॥
(१०।२९।११)

तदेवमुपवर्णितं प्रेमविषयनिष्ठाभावविशेषात्, तन्निष्ठमाधुर्यभावविशेषात्, तन्निष्ठमुग्धभावविशेषात् तन्निष्ठसख्यभावविशेषाद्वा भवति ।

तत्राऽऽद्यं दैन्यादक्रूरस्य यथा—

तद्दर्शनाऽऽह्लादविवृद्धसम्भ्रमः
प्रेम्णोर्ध्वरोमाऽश्रुकलाकुलेन्द्रियः ।
रथादवस्कन्द्य स तेष्वचेष्टत
प्रभोरमून्यङ्घ्रिरजांस्यहो इति ॥
(भाग० १०।३८।२६)

गुणाभिमानाद्रुक्मिण्यादेर्यथा—

का त्वा मुकुन्द महती कुलशीलरूप-
विद्यावयोद्रविणधामभिरात्मतुल्या ।
धीरा पतिं कुलवती न वृणीत कन्या
काले नृसिंहनरलोकमनोऽभिरामम् ॥ इति ।
(भाग० १०।५२।३८)

द्वितीयं तु व्रजसुन्दरीणाम् । यथा—

वीक्ष्याऽलकावृतमुखं तव कुण्डलश्री-
गण्डस्थलाधरसुधं हसितावलोकम् ।
दत्ताऽभयञ्च भुजदण्डयुगं विलोक्य
वक्षः श्रियैकरमणञ्च भवाम दास्यः ॥
(भाग० १०।२९।३९)

अत एवासामधिको [रागो] रागोद्दीपितचित्तस्य सर्वदाद्रुतत्वात् । तृतीयं तु वात्सल्यज्ञानवतां मातृप्रभृतीनाम् । यथा—

इति मायामनुष्यस्य हरेर्विश्वात्मनो गिरा ।
मोहितावङ्कमारोप्य परिष्वज्याऽऽपतुर्मुदम् ॥
(भाग० १०।४५।१०)

चतुर्थं तु गोपादीनाम् । यथा—

पादसंवाहनञ्चक्रुः केचित्तस्य महात्मनः ।
अपरे हतपाप्मानो व्यजनैः समवीजयन् ॥
(भाग० १०।१५।१७)

अन्ये तदनुरूपाणि मनोज्ञानि महात्मनः ।
गायन्ति स्म महाराजस्नेहक्लिन्नधियः शनैः ॥ इत्यादि ।
(१०।१५।१८)

अत्राऽयं विशेषः—अक्रूरादीनां ज्ञानकर्माऽऽदिनिबन्धना वैधी गोपीप्रभृतीनां तु कामसम्बन्धादिनिबन्धना रागानुगेत्युच्यते । नाऽत्र शास्त्राद्यपेक्षा इत्यग्रे स्फुटीभविष्यति ॥ २ ॥

ननु विरोधविषयकत्वेन स्वज्ञानस्यैव स्वाऽविद्योच्छेदक्षमत्वात्, रागस्य चातथात्वेन निष्फलत्वान्नोपादेया भक्तिः, तत्राऽऽह—

तत्संस्थस्यामृतत्वोपदेशात् ॥ ३ ॥

तस्मिन्नीश्वरे संस्था निष्ठाऽन्यानुरागत्यागेनाऽनुरक्तिर्यस्य तथोक्तस्याऽमृतत्वं फलमुद्दिश्यते 'ब्रह्मसंस्थोऽमृतत्वमेति' (छान्दोग्य० २।२३।१) इति । तस्मात्स्वतः पुमर्थसाधनत्वादुपादेयैव भक्तिः विरोधिविधया निवर्तनाऽक्षमत्वेऽप्यनुग्रहद्वाराऽविद्योच्छेदक्षमा भवत्येव 'यमेवैष वृणुते तेन लभ्यस्तस्यैष आत्मा विवृणुते तनूं स्वाम्' (कठ० २।२२) इत्यादिप्रमाणादिति भावः ।

वस्तुतस्तु—वक्ष्यमाणरीत्या पराऽनुरक्तिरेव स्वतः पुमर्थरूपेति न मोक्षे तस्या उपयोगः, किन्तु ज्ञानस्यैव यद्यपि, तथाऽपि प्रतियोगिजनकसामग्र्या एव प्रागभावनाशकत्वदर्शनात्तत्त्वज्ञानप्रागभावस्थानीयाऽज्ञानरूपबन्धनांशे तत्त्वज्ञानसामग्र्या गौणभक्तेरेव कारणत्वं लभ्यत इत्यभिप्रेत्याऽऽह—तत्संस्थस्येति। तत्पदं बुद्धिस्थप्रणवपरम्। तथा च तस्मिन्प्रणवे ब्रह्मप्रतीके संस्था निष्ठा यस्य प्रणवजपतदर्थभावनपरस्य 'ब्रह्मसंस्थोऽमृतत्वमेति' (छान्दोग्य० २।२३।१) इत्यनेनोक्ताऽभिप्रायेण मोक्षोपदेशादित्यर्थः।

एतत्सर्वमभिप्रेत्यैव भगवान् पतञ्जलिरप्याह—'ईश्वरप्रणिधानाद्वा' (१।२३), 'तस्य वाचकः प्रणवः' (१।२७), 'तज्जपस्तदर्थभावनम्' (१।२८), 'ततः प्रत्यक्चेतनाऽधिगमोऽप्यन्तरायाऽभावश्च' (१।२९) इति। प्रणवजप उपलक्षणम्। श्रवणकीर्तनादीनां तेषामपि सर्वपुरुषार्थसाधनत्वश्रवणात्। अत एव ब्रह्मादिभक्तेभ्यस्तारतम्येन फलं दददपि भगवान्न विषमः तत्तद्भक्त्यनुसारिफलदातृत्वादित्यास्तां विस्तरः ॥ ३ ॥

ननु ब्रह्मसंस्थाशब्देन ब्रह्मज्ञानमेवोच्यतां ज्ञानस्य गौणभक्तिं प्रति फलत्वात्। मुख्यभक्तिं प्रति साधनत्वात्। अतोऽमृतत्वफलमपि तस्यैवेत्यभिप्रेत्याऽऽशङ्क्य निषेधति—

ज्ञानमिति चेन्न द्विषतोऽपि ज्ञानस्य तदसंस्थितेः ॥ ४ ॥

ज्ञानमिति चेन्नेति। ब्रह्मसंस्था ब्रह्मज्ञानमिति चेन्न। कुतः? द्विषतोऽपि ज्ञानस्य तदसंस्थितेः द्वेषं कुर्वतोऽपि शिशुपालादेः

अपि नैश्वर्यमदमत्तस्येन्द्रादेर्भगवल्लीलादर्शनजमाहात्म्यज्ञानस्य सत्त्वेऽपि तदसंस्थितेः । तत्संस्थत्वाऽव्यवहारादिति भावः । लोकेऽपि राजाद्यनुरक्ताः खल्वमात्यादयस्तत्संस्था इति व्यपदिश्यन्ते, न पुनः प्रतिपक्षभूपालाः । शब्दार्थनिर्णयो हि लोकवदेव वेदेऽपि । अत एव **चिरकारिकोपाख्याने**—

> विमृश्यते न कालेन पत्न्याः संस्थाव्यतिक्रमम् ॥
> सोऽब्रवीच्च भृशं तप्तो दुःखेनाऽश्रूणि वर्तयन् ।
> (शान्ति० २६६।४५-४६)

इत्यनेन पतिभक्तिर्व्यतिक्रम उक्तः । तस्मात्संस्थेति भक्तिरेव । अत एव **'तन्निष्ठस्य मोक्षोपदेशात्'** (ब्रह्मसू० १।१।७) इति बादरायणसूत्रस्याऽप्ययमेवार्थः । निष्ठासंस्थयोरैक्यात् । न च संस्थाऽन्यवृत्तिनिरोधेन तद्वृत्तिरेव सा च वृत्तिर्ज्ञानमपि सम्भवतीति वाच्यम् । रागाऽवान्तरजातेरेव वृत्त्यन्तरविरोधित्वस्याऽन्वयव्यतिरेकाभ्यामवगमात् ॥ ४ ॥

एतेन **त्रयो धर्मस्कन्धाः, यज्ञोऽध्ययनं दानमिति । प्रथम**स्तप एव, द्वितीयो ब्रह्मचार्याऽऽचार्यकुलवासी, तृतीयोऽत्यन्तमात्मानमवसादयंस्त एते सर्वे पुण्यलोका भवन्ती (छान्दोग्य० २।२३।१) त्युपक्रम्याऽथ ब्रह्मसंस्थोऽमृतत्वमेतीत्यस्मिन्वाक्ये धर्मत्रित्वं व्यवस्थापयितुं त्रयो धर्मस्कन्धा इत्याश्रमत्रयं प्रतिज्ञाय तत्र यज्ञादिलिङ्गो गृहस्थाश्रम एको धर्मस्कन्धो ब्रह्मचारीति च द्वितीयस्तप इति च तपःप्राधान्याद्वानप्रस्थाश्रमोऽत्राऽन्यः । ब्रह्मसंस्था इति च पारिशेष्यात्परिव्राडिति गम्यते । ब्रह्मपरतया सर्वैषणापरित्यागलक्षणस्य ब्रह्मसंस्थत्वस्याऽन्यत्राऽसम्भवात् ब्रह्मसाक्षात्काराऽङ्गतया पारिव्राज्यस्य विवक्षितत्वात् परिव्राडेव

मोक्षमाप्नोतीति ब्रह्मसंस्थावाक्यस्यार्थं इति निरस्तम्। ब्रह्मसंस्थ इति शब्दस्य मानाऽभावेन परिव्राजके रूढ्यभावात्, तदाश्रम-प्राप्तिमात्रेण मोक्षस्य तमेवेत्यादिश्रुतिविरोधेन बाधितत्वाच्च, पूर्वोक्ताऽऽश्रमोपलक्षितेषु सत्कर्मशालिषु यस्यैव ब्रह्मणि संस्थाऽस्येति व्युत्पत्तिगम्यं ब्रह्मनिष्ठत्वं 'सोऽमृतत्वमेति' इत्यर्थस्य विवक्षि-तत्वात्।

न च गृहस्थादेः कर्मिणो ब्रह्मनिष्ठत्वाऽसम्भवः, गृहस्था-दीनामपि ब्रह्मनिष्ठत्वे बाधकाऽभावात्। मानाभावेन कर्मत्याग-मात्रस्याऽविवक्षितत्वात्। तपसा च भिक्षुवानप्रस्थयोर्द्वयोरप्या-श्रमयोरेकीकरणेन त्रय इति त्रित्वम्। त्रयो धर्मस्कन्धा इत्यत्र त एते च चत्वारोऽप्याश्रमास्तदुपलक्षिताः पुण्यभाजो ब्रह्मसंस्थाः सन्तः पुण्यलोकभाजो भवन्ति। यः पुनरेतेषु ब्रह्मसंस्थः सोऽमृ-तत्वभागिति न च येषां पुण्यलोकभागित्वं तेषामेवाऽमृतत्वमिति विरोधः। देवदत्तयज्ञदत्तयोर्मन्दप्रज्ञयोः पश्चाद्यज्ञदत्तस्य शास्त्राऽ-भ्यासात् पटुप्रज्ञत्ववदवस्थाभेदेनाऽविरोधात्। तथा च ब्रह्मसंस्थ इति यौगिकं प्रकृतसर्वविषयं न परिव्राणमात्रमिति वदन्ति।

ननु 'विमृश्य तेन कालेन पत्न्याः संस्थाव्यतिक्रमम्' इत्यत्र संस्थाशब्दस्य विहितपालनाऽऽदिरूपमर्यादापरत्वमेव 'संस्था तु मर्यादा धारणा स्थितिः' (अमर० २।८।२६) इति कोशात्। तन्निष्ठस्येत्यत्र तु 'तत्त्वमसि' इत्यादिनाऽभेदबोधनेन तत्पर्य-वसन्नस्य तदभिन्नस्येत्यर्थः। 'तरति शोकमात्मवित्' (छान्दोग्य० ७।१।३), 'तद्यो यो देवानां प्रत्यबुध्यत स एव तदभवत्' (बृहदा० १।४।१०) इत्यादिश्रुत्यनुसारात्। तस्माद् ब्रह्मसंस्था न भक्तिर्न वा भक्तिः कैवल्यहेतुः। तथा हि—किं शुद्धविषया भक्तिः कैवल्य-

हेतुः, सगुणविषया वा। नाऽऽद्या, दुःखहेत्वज्ञाननिवृत्तेर्ज्ञानैक-साध्यत्वात्। न हि शुक्तिविषयं ज्ञानमज्ञाननिवृत्तौ भक्ति द्वारत्वेनाऽपेक्षते। नाऽन्त्या, सगुणभजनस्य चित्तशुद्धावुपयोगेन कैवल्याऽहेतुत्वात्। किन्तु 'तमेव विदित्वाऽतिमृत्युमेति नाऽन्यः पन्था विद्यतेऽयनाय' (श्वेताश्व० ३।८) इत्यादिश्रुतेर्ज्ञानादेव मोक्षस्तत्राऽऽह—

तयोपक्षयाच्च ॥ ५ ॥

तयेति। तया भक्त्या मुक्तिं प्रति ज्ञानमुपक्षीणं यस्मात् **'यं सर्वे देवा नमन्ति मुमुक्षवो ब्रह्मवादिनश्च'** (नृसिंहतापनी० पूर्व २।४) इति श्रुतिभिर्भक्तिं प्रति ज्ञानस्य हेतुत्वकथनेन मोक्षं प्रत्यन्यथासिद्धत्वज्ञापनात्। अत एव भगवद्गीतायां 'पुरुषः स परः पार्थ भक्त्या लभ्यस्त्वनन्यया' (गीता ८।२२) इत्यादिना ब्रह्मसम्पत्तिरूपमोक्षस्य भक्तिमात्रैकलभ्यत्वं श्रूयते। उदाहृत-श्रुतेस्तु भक्तिद्वारा ज्ञानमेव मोक्षजनने समर्थम्, न कर्माऽऽदिकं प्रथमभूमित्वादित्यभिप्राय इति न कोऽपि विरोधः; अपि च तत्राऽतिमृत्युपदं न मुक्तौ रूढं प्रमाणाभावात्। किन्तु मृत्युमति-क्रान्तेति व्युत्पत्त्या भक्तिपरमेव। नाऽन्यः पन्थेत्यस्यापि भक्तितोऽन्य उपायो मोक्षाय नास्तीत्येवार्थः। तत एव मृत्यवतिक्रमणस्य प्रमाणान्तरतो निर्धारणात्। अत एव—

चतुर्विधा भजन्ते मा जनाः सुकृतिनोऽर्जुन।
आर्तो जिज्ञासुरर्थाऽऽर्थी ज्ञानी च भरतर्षभ॥

(गीता ७।१६)।

इत्यादिना गीतायां ज्ञानिनां भक्तावेवाऽधिकारः प्रतिपाद्यते। अत्र भजन्त इति वर्तमानापदेशत्वेऽपि 'तरति ब्रह्महत्यां वाऽश्वमेधेन यजते' (शतपथ० १३।३।१।१) 'अग्निहोत्रं जुहोति' (तै० सं० १।५।९।१) इत्यादाविवाऽपूर्वार्थत्वाद्विधिः स्वीक्रियते भजेयुरिति। तत्र चत्वारोऽधिकारिणः। आर्तो जिज्ञासुरर्थार्थी ज्ञानी चेति। तत्राऽऽर्तस्यार्तिनिवृत्तिः, जिज्ञासोर्ज्ञानम्, अर्थार्थिनस्त्वर्थः फलमिति निश्चीयते सामर्थ्यात्। ज्ञानिनस्तु फलाऽऽकाङ्क्षायां निष्कामत्वेनोक्तफलानामसम्भवात्। विश्वजिन्न्यायाऽनवताराच्च योग्यतया सहेतुकसंसारनिवृत्तिरेव कल्प्यते। अत एव 'तेषामहं समुद्धर्ता' (गीता १२।७) इत्यादिना भक्तेर्मृत्युव्यतिक्रम उक्त इति संक्षेपः। शुक्त्याऽऽदिज्ञानञ्च संसारभ्रमाऽनिवर्तकत्वान्न भवित द्वारीकरोति। परमाऽत्मज्ञानन्तु तन्निवर्तकत्वात्तां द्वारीकरोत्येव महाराजज्ञानमिव तत्सेवां महाऽनर्थनिवृत्तिकामस्य। वस्तुतस्तु ज्ञानादेवाऽज्ञाननाशो यद्यपि भवति, तथाऽपि न स मोक्षः, सुखदुःखाऽभावाऽन्यत्वेन स्वतोऽपुरुषार्थत्वात्, किन्तु भगवत्प्रीतिरेव तस्याः स्वप्रकाशनिजसुखसंविदालिङ्गितत्वेन सुखरूपत्वाऽभ्युपगमादित्यभिप्रेत्याह—तयोपक्षयादिति।

तया प्रेमलक्षणया भक्त्या स्वाऽज्ञाननाशरूपमोक्षस्योपक्षयात्। उक्तरीत्याऽन्यथासिद्धेः प्रकृतिभक्तिनान्तरीयकत्वाच्चेत्यर्थः। वस्तुतो ब्रह्माऽऽवाप्तिरपि नाऽज्ञाननाशोपलक्षिता पुमर्थः, किन्तु विजातीयप्रेमोपलक्षितैव। तथा हि—भगवद्भजनाज्जाततत्कोपने स्वाऽज्ञानधाराभिर्विविधबन्धदर्शनात्तदभजनमेव सर्वाऽनर्थहेतुरिति तत्प्रसादतस्तत्कोपाऽपनयनेन स्वाऽज्ञानोच्छेदेनाऽनर्थो-

च्छेदद्वारा तद्भजनमेव तत्प्राप्तिहेतुः। 'तस्याऽभिध्यानाद्योजनात्तत्त्वभावात्' (श्वेताश्व० १।१०) इत्यादिश्रुतिभिः 'पराऽभिध्यानात्तु तिरोहितं ततो ह्यस्य बन्धविपर्ययौ' (ब्र० सू० ३।२।५), इति पारमर्षसूत्रैश्च तथा ज्ञापनात्। अनर्थोच्छेदश्चाऽनर्थविरोधिभजनस्वरूप एव। प्रागभावनाशस्य प्रागभावविरोधिप्रतियोगिस्वरूपत्वाऽभ्युपगमेन नाश्यनाशस्य विरोधिपदार्थस्वरूपत्वसिद्धान्तात्। तस्माद्विजातीयप्रेमैव पुमर्थकोटिप्रविष्टतया पुमर्थः। अत एव स्वरूपसम्बन्धविशेषरूपाया ब्रह्माऽवाप्तेः स्वतः सिद्धत्वेऽपि न ज्ञानवैयर्थ्यम्। विजातीयप्रेम्णस्तत्फलत्वात्। अत एव न प्रेमोपलक्षिताऽऽनन्दस्य तत्त्वज्ञानकार्यता, किन्त्वज्ञाननाशस्यैव। अज्ञाननाशकालीनप्रेमोपलिक्षिताऽऽनन्दत्वेन निवेशे त्वतिगौरवं स्यादिति निरस्तम्। अज्ञानात् प्रागपि सिद्धैर्न तत्त्वज्ञाननाशत्वाऽपेक्षया प्रेमगतवैजात्यस्यैव तत्त्वज्ञानजन्यताऽवच्छेदकत्वे लाघवात्।

नन्वज्ञाननाशाऽव्यवहितमुक्तौ जन्यभावाऽसम्भवात्कथं प्रेमोपलक्षिताऽऽनन्दस्य पुमर्थतेति चेत्। शृणु, यथा वेदान्तविदां नयेऽज्ञाननिवृत्तेरतिरेकपक्षे विरोधिवृत्तित्वपक्षे वा पाकनाशे पाचकवह्निवृत्तिनाशेऽपि निवृत्त्युपलक्षितस्यैव पुमर्थत्वम्, तथा प्रकृतेऽपि प्रेमोपलक्षिताऽऽनन्दस्य पूमर्थत्वं सुवचमिति। वस्तुतो यथा **मीमांसकनये देहेन्द्रियाद्यभावेऽपि सुखसाक्षात्कारो मुक्तावभ्युपेयते**, साऽवच्छिन्नज्ञानं प्रत्येव देहादेः कारणत्वात् निरवच्छिन्नज्ञाने बाधकाऽभावात्। तथाऽस्मन्मतेऽपि तदानीं प्रेमसद्भावे बाधकाऽभावात्। नाऽद्वैतभङ्गः, विषमसत्ताकेनाऽद्वैतभङ्गाऽयोगात्। अन्यथा व्यवहारकाले घटादिनाऽप्यद्वैतभङ्गाऽऽपत्तेः।

तस्मात्सिद्धम्—मुक्तिकालेऽप्यबाधात्तत्त्वज्ञानसाध्यः सुखसंविद्भगवदालिङ्गितः प्रेमैव पूमर्थ इति। ज्ञानादप्यधिकत्वात्। कामुकस्येव विरक्तस्याऽपि कामिनीसंस्पर्शजसुखानुभवेऽपीष्यमाणतया तत्सुखस्य कामुकं प्रत्येव पुरुषार्थत्वात्। ज्ञायमानत्वमात्रेण सुखस्य पुरुषार्थत्वाऽनभ्युपगमात्। अत एव भगवानपि गोपीनां पुमर्थं आसीत्, न दुष्टदुर्योधनादीनाम्। एतत्सर्वं मनसि निधायैवोक्तं वृद्धैरपि—

सुखदुःखात्ययाद्भिन्ने प्रेम्णि चेन्न पुमर्थता।
समसज्ञाननाशेऽपि सुखे सिद्धे न साध्यता॥
अवच्छेदकता तुल्या प्रेम्ण्यज्ञानविनाशवत्।
लाघवात्सा विजातीये प्रेम्ण्येव परमार्थतः॥
अज्ञाननाशकालोत्थप्रेमायितेऽपि धर्मिणि।
तिष्ठेदेव विदेहाख्या मुक्तिरेवेति गीयते॥
सुखाऽभिवेदनं नित्यं मुक्तिं भट्टोऽपि यज्जगौ।
प्रेम्णा भेदो मतादस्माज्ज्ञानात्प्रेमाधिकं यतः॥ इति।

'आत्यन्तिकी दुःखविमुक्तिरेव मुक्तिः' इति **नैयायिकानां मतं** (द्र० न्यायभाष्य १।१।२२), तु न साधीयः। सुषुप्तिभाराऽपगमादौ दुःखाऽभावेऽपि सुखानुपलब्धेर्दुःखाऽभावस्य सुखाऽव्याप्यत्वात्। सुखसत्त्वे च दुःखाऽभावस्य स्वाऽनुभवसिद्धत्वात्सुखस्यैव तद्व्याप्यत्वात्पुमर्थतौचित्यात्। तथा तदालिङ्गितत्वात्तद्रूपतया तद्रतेरपि। एतदभिप्रेत्यैव **पुराणादिषु**—

नैकात्मतां मे स्पृहयन्ति केचि-
न्मत्पादसेवाऽभिरता मदीहाः।
(भाग० ३।२५।३४)।

न किञ्चित्साधवो धीरा भक्ता ह्येकान्तिनो मम ।
वाञ्छन्त्यपि मया दत्तं कैवल्यमपुनर्भवम् ॥
(भाग० ११।२०।३४) ।

नैरपेक्ष्यं परं प्राहुर्निःश्रेयसमनल्पकम् ।
तस्मान्निराशिषो भक्तिर्निरपेक्षस्य मे भवेत् ॥
(भाग० ११।२०।३५) ।

इत्युक्तम्—

आत्मारामाश्च मुनयो निर्ग्रन्था अप्युरुक्रमे ।
कुर्वन्त्यहैतुकीं भक्तिमित्थंभूतगुणो हरिः ॥
(भाग० १।७।१०) ।

इत्यादिना निर्वासना अपि कृतसाक्षात्कारा: फलमनभिसन्धाय भक्ति कुर्वन्तीत्युक्त्या भक्तेः स्वतः पुमर्थत्वं च ज्ञापितम्। **'दुःखेनात्यन्तविमुक्तश्चरति'** इति श्रुतिस्तु मुक्तिकाले दुःखाऽभावस्य सत्त्वात्स चाधिकरणपरमाऽऽनन्दाऽऽत्मतयोद्देश्योऽपीत्यभिप्रेत्य दुःखाऽभावस्य पुमर्थत्वपरा । चकारः सूत्रे युक्तिसमुच्चायकः । सा च लोके स्वरूपज्ञानस्य प्रेमवृद्धिजनकत्वदर्शनरूपा इत्यास्तां विस्तरः ॥ ५ ॥

ननु तथाऽपि भक्ते रागरूपत्वे किं कारणमित्यपेक्षायामाह—

द्वेषप्रतिपक्षभावाद्रसशब्दाच्च रागः ॥ ६ ॥

द्वेषेति । सेत्यनुवर्तते । सा भक्ती रागरूपा । कुतः द्वेषप्रतिपक्षभावात् द्वेषविरोधित्वात् । लोके हि द्वेष्टाऽयं भक्तोऽयमिति मिथोविरुद्धधर्मद्वयवति प्रतीयते । तत्र द्वेषविरोधी राग एव प्रसिद्धो न ज्ञानादिः । अत एव वैष्णवे शिशुपालस्य द्वेषाऽनुबन्धम-

भिधाय 'अयं हि भगवान् कीर्तितः संस्मृतश्च द्वेषाऽनुबन्धेनाऽप्यखिलसुराऽसुरदुर्लभफलं प्रयच्छति किमुत भक्तिमताम्' (विष्णुपु० ४।१५।१७) इत्युक्तम् । एवमन्यत्राऽपि ।

विद्वेषादपि गोविन्दं दमघोषाऽऽत्मजः स्मरन् ।
शिशुपालो गतः स्वर्गं किं पुनस्तत्परायणः ॥ इति ।

तस्मादनुरक्तिरेव भक्तिरित्यायातम् । द्वेषविरोधित्वञ्चात्र द्वेषमात्रविरोधित्वं कार्योन्मुखं वा वाच्यम् । तेनौदासीन्ये नाऽनैकान्तिकम् ।

ननु द्वेषकार्यनिवृत्तिविरोधिप्रवृत्तिजनकत्वलक्षणं कार्योन्मुखं विरोधित्वमिष्टसाधनताज्ञानेऽपि, तत्राह—रसेति । विभावाद्यभिव्यक्तराग एव मुख्यरसशब्दात् 'मुहुरहो रसिका भुवि भावुकाः' (भागवत १।१।३) इति भक्तौ रसशब्दाच्च भक्ती रागरूपेत्यर्थः । रसश्च रागः 'रसवर्जं रसोऽप्यस्य परं दृष्ट्वा' (गीता २।५९) इत्यत्र प्रसिद्धः । अत्र रसो विषयरागः । वैष्णव एव च रामलक्ष्मणादीनां स्वर्गारोहणमुक्त्वा 'येऽपि भगवदंशेष्वनुरागिणः कोसलनगरजनपालास्तेऽपि तन्मनसस्तल्लोकतामापुः' इति साक्षादेव रागशब्दो भक्तौ प्रयुक्तः । एवं स्कान्देऽपि—

वीभत्सिते दुर्विषये कदाचि-
द्यो वाऽपि रागो भविता जनस्य ।
स चेद्भविष्यत्यपि नाम रुद्रे
को नाम मुक्तो न भवेद्भवाब्धेः ॥ इति ।

तथा च श्रीमन्मुरपुरमथनचरणारविन्दमकरन्दमन्दाकिनीमवगाहमानस्य मनसः समुल्लासो रागभावप्रेमादिशब्दाऽभिधेय

एव स्वाऽऽनन्दमाविर्भावयन् कार्यकारणलिङ्गाऽऽदिभिरभिव्य-क्तो रसरूपो रत्याऽऽख्यः स्थायी भावो मोक्षमपि न्यक्कुर्वन् फलभक्तिरिति सिद्धम् ।

उक्तञ्च श्रीभागवते —

देवानां गुणलिङ्गानामानुश्रविककर्मणाम् ।
सत्त्व एवैकमनसो वृत्तिः स्वाभाविकी तु या ॥
(३।२५।३१)

अनिमित्ता भागवती भक्तिः सिद्धेर्गरीयसी ।
जरयत्याशु या कोशं निगीर्णमनलो यथा ॥
(३।२५।३२)

इत्यादिना ।

तत्राऽयमर्थः । गुणलिङ्गानां गुणमयशरीराणाम् आनुश्रविकं श्रुतिपुराणाऽऽदिगम्यं कर्म चरितं येषां ते तथोक्तास्तेषां देवानां मध्ये सत्त्व एव मोक्षाऽनुगुणप्रसादमयमङ्गलमूर्ताविव मुरपुर-मथनरूपा या एकमनसः योगाऽदिनैकाग्रमनसो या वृत्तिरनि-मित्ता फलाऽभिसन्धानशून्या स्वाभाविकी स्वरसत एव विषय-सौन्दर्यादयत्नेनैव जायमाना न बलादापाद्यमाना सा भागवती भक्तिः सिद्धेर्ज्ञानान्मोक्षाच्च गरीयसी । गरीयस्त्वमेव विवृणोति—जरयतीति । यथा निगीर्णमन्नपानाऽऽदिकं जाठरो जातवेदा जर-यति, तथा या कोशमन्नमयाऽऽदिपञ्चप्रकारम् आशु सद्यो भगव-त्प्रसादान्नाशयति । न ज्ञानमिव श्रवणाऽऽदिसहायैः क्रमेण तस्मा-द्भवति ज्ञानान्मुक्तेश्च गरीयसी, विनाऽपि कामनां मोक्षस्य प्रकृत-भक्तिनाऽऽन्तरीयकत्वात् । 'रसं ह्येवायं लब्ध्वाऽऽनन्दी भवति'

(तै० उप० २।७), इति श्रुतितत्त्वपर्यालोचनतस्तथाऽवगमात् । 'रसो वै सः' इत्याऽऽदिना प्रकृतस्य रस्यत इति व्युत्पत्त्या रस्यमानाऽऽनन्दस्य 'रसं ह्येवायं लब्ध्वाऽऽनन्दी भवति' (तै० उप० २।७) इत्यादिना ब्रह्माऽऽनन्दाऽऽविर्भावलक्षणमुक्तिं प्रति हेतुतालाभे तद्विषयकभक्त्याख्यरसस्याऽपि ज्ञायमानलिङ्गकरणतापक्षे लिङ्गज्ञानस्येव सम्बन्धविधया तल्लाभात् । कथं तर्हि भक्ता न वाञ्छन्तीति चेत्, कलय । अविद्यानाशरूपमोक्षस्य निर्विषयतया ब्रह्मसुखसंविदनालिङ्गितत्वेन स्वतोऽपुरुषार्थत्वात् सालोक्याऽऽदिसायुज्यान्तानामैश्वर्यविशेषरूपत्वात् एकत्व आनन्दभोक्तृत्वाऽभावात् । इत्यभिप्रेत्यैवोक्तं तत्रैव । यथा—

सालोक्यसार्ष्टिसामीप्यसायुज्यैकत्वमप्युत ।
दीयमानं न गृह्णन्ति विना मत्सेवनं जनाः ॥ इति ।

(भाग० ३।२९।१३)

सार्ष्टिः सारूप्यम्, सायुज्यं तादात्म्यमेकत्वमभेदः । तस्माद्भगवद्विषयः प्रेमाऽतिशय एव सर्वोपायफलमिति सिद्धम् ।

अस्य ज्ञानवद्विभावाऽऽदयोऽप्यङ्गानि । तदुक्तं भरतेन— 'विभावाऽनुभावव्यभिचारिसंयोगाद्रसनिष्पत्तिः' (नाट्यशास्त्र ६ अ०) इति । तत्र विभावो यत्र येन च रसो विभाव्यते । स द्विविधः, आलम्बन उद्दीपनश्चेति । तत्राऽऽलम्बनो यमुद्दिश्य यत्र च रतिः प्रवर्तते सः । यथा—

श्रीहरिर्हरिभक्ताश्च बुधैरालम्बना मताः ।
रत्याऽऽदेर्विषयत्वेन तथाऽऽधारतयाऽपि च ॥

तत्र श्रीहरिर्यथा श्रीभागवते—

स्वयन्त्वसाम्यातिशयस्त्र्यधीशः
स्वाराज्यलक्ष्म्याऽऽप्तसमस्तकामः ।
बलिं हरद्भिश्चिरलोकपालैः
किरीटकोट्येडितपादपीठः ॥ इति ।

(३।२।२१)

यथा वा—

ह्रीमान्धैर्यनिधिः कृतज्ञरुचिरः शूरः क्षमी सत्यवाक्
तेजोबुद्धिवयोऽन्वितः प्रियवचोदक्षः शुचिर्धार्मिकः ।
नेता रम्यतनुर्बली विविधवाक् सल्लक्षणो दक्षिणः
सर्वाऽऽराध्यसमृद्धिमान्समपटुर्गम्भीरसत्संश्रयः ॥

दाता मान्यसुमान्यकृत् श्रुतदृशिः प्रेमैकवश्यः सुखी
श्रेष्ठः सर्वमनोहरो विनयवान् कन्दर्पदर्पाऽपहः ।
व्यन्तःसत्सुखचिद्घनोऽनवरते सद्देशकालाऽऽदिविद्
भक्तानर्थनिवारणः सकलसूर्ब्रह्मादिसंमोहकृत् ॥

धीरोदारदयाकरो निजरताऽऽकर्षी शरण्यो नवः
सर्वज्ञः प्रतिभान्वितो रसमयः शान्तो विनीतः प्रियः ।
ब्रह्मण्यो गतिदायकोऽगतिमतामात्मद्विषामीशिते-
त्याद्यानन्तगुणा स्थिरा भगवतीत्यालम्बनः श्रीहरिः ॥

तत्राऽपि—

कान्त्या कामविमोहकृत् कृतनयः काम्यप्रदः कीर्तिभृ-
त्केकावाक्करिकुञ्जकार्पितकरः कान्तः कृती कंसहृत् ।

कैवल्याऽर्थंकरः सतां कृतिमतां कल्याणमूर्तिः कभूः
　　कृष्णोऽयं करुणाकरोऽतिमधुरः कर्षन्मनः क्रीडति ॥

अथ तद्भक्ताः—

भक्ता ईश्वरभावभावितहृदस्तेऽपि द्विधा साधकाः
　　सिद्धाश्चेति यथायथं हरिगुणान् स्वस्मिन्निधातुं क्षमाः ।
ते हि स्वान्तनितान्तभारितसुखाः स्वीयेष्वपि स्वैर्गुणै-
　　रासक्तिं परमेशितुर्जनयितुं शक्ताः सदालम्बनाः ॥

ते यथा—

प्रह्लादः सुखचिद्घनं हरिमनुध्यायन् सदा मातृवा-
　　ग्विद्धः सिद्धपदोऽम्बरीषनृपतिर्दुर्वाससोऽपीष्टकृत् ।
राजा श्रीहरिसंश्रयो हि भरतः श्रोता परीक्षिद्धरेः
　　कीर्तीनां जनकः स्वरूपरतयो व्यासः शुकाद्या अपि ॥

अथोद्दीपनविभावो यस्मिन्कृते रस उद्दीप्तः पुष्टो भवति ।

यथोक्तम्—

भावोद्दीपनकारका निगदिता उद्दीपनास्ते हरे-
　　श्चेष्टाश्चारुगुणाः प्रसाधनमथो वंशीध्वनिः सुस्मितम् ।
वाणी चामृतदर्पहृत्तुलसिकापत्राणि तद्वासरा
　　वृन्दाऽरण्यमुखाः सुभूमय इमाः श्रीकृष्णपादाङ्किताः ॥

अन्यत्राऽपि—

वृन्दाऽरण्यभुवः कलिन्दतनयावंशीध्वनिर्ध्यायिना-
　　मप्याश्चर्यकरी धृता तुलसिका जन्माऽऽदिवारोत्सवाः ।
रासाऽऽद्यान्यनुचेष्टितानि करुणानन्दादयः सद्गुणा
　　भावं मङ्क्षु विभावयन्ति भजतां प्रोक्ता विभावाह्वयाः ॥

श्रीभागवतेऽपि—

तस्याऽरविन्दनयनस्य पदारबिन्द-
किञ्जल्कमिश्रतुलसीमकरन्दवायुः ।
अन्तर्गतः स्वविवरेण चकार तेषां
सङ्क्षोभमक्षरधियामपि चित्ततन्वोः ॥ इत्यादि ।
(३।१५।४३)

अथाऽनुभावाः । रसो यैरनुभाव्यते प्रकाश्यते । तदुक्तम्—

भावानामवबोधिका विकृतयस्ताश्चाऽनुभावाह्वया
गीतीक्रोशननृत्यभूविलुठितश्वासास्तनोर्मोटनम् ।
लालास्रावजनाऽनवेक्षणमथो हिक्काऽट्टहासो भ्रमि-
र्हुङ्कारः परिजृम्भणादय इमे स्वान्तस्थितव्यञ्जकाः ॥ इति ।

यथा—

राधा माधवभावनाविलुठितश्वासाऽधिका मूर्छिता
गीतक्रोशननृत्यहुङ्कृतिजनाऽनीक्षाऽट्टहासभ्रमीः ।
लालास्रावमथो विमोटिततनुर्जृम्भां च हिक्कामसौ
धत्ते ध्यानपराऽथ मज्जति सुखे कस्मिश्चिदेषा चिरम् ॥

एवमन्येऽपि । यथा श्रीभागवते—

एवंव्रतः स्वप्रियनामकीर्त्या
जाताऽनुरागो द्रुतचित्त उच्चैः ।
हसत्यथो रोदिति रौति गाय-
त्युन्मादवन्नृत्यति लोकबाह्यः ॥ इत्यादि ।
(११।२।४०)

तत्र सात्त्विकाः—

भावाऽऽक्रान्तमनो हि सत्त्वमुदितं तज्जाः स्मृताः सात्त्विका
भावाः स्तम्भतनुष्विदा स्वरभिदा रोमाञ्चकम्पास्तनोः ।

वैवर्ण्यश्रुलया इमे निगदिता अष्टावमीषां पृथग्
　　व्यक्तिर्याऽस्तु समुच्चिता, रतिभृतां ज्ञेया यथास्वं बुधैः ॥

यथा—

राधा स्वेदसमन्विताऽश्रुनयना रोमाञ्चकम्पाऽन्विता
　　स्तब्धा ध्यायति योगिनीव कमपि श्रोतुं तथा वीक्षितुम् ।
अन्यन्नोत्सहते गता क्वचिदहो श्यामेन दष्टाऽधरा
　　तद्दंशेन तनोः स्वकीयमनसः स्वास्थ्यं मुहुर्वाञ्छति ॥

अत्र स्नि(ग्धा) मुख्याः स्वेदादयः, स्निग्धा गौणा वैवर्ण्यस्वरभेदाऽऽदयः, दिग्धा गात्रकम्पाऽऽदयः, सूक्ष्मा रोमाञ्चप्रभृतयः । त एते सर्वे स्निग्धदिग्धसूक्ष्मभेदेन त्रिविधा उक्ताः ।

श्रीभागवतेऽपि, यथा—

क्वचिदुत्पुलकस्तूष्णीं प्रेमप्रसरसंप्लुतः ।
अस्पन्दप्रणयाऽऽनन्दसलिलामीलितेक्षणः ॥ इत्यादि ।
(७।४।४१)

अथ व्यभिचारिणः—

रत्यादेर्हि विशेषतोऽभिमुखतां ये चारयन्ति स्मृता
　　भावास्ते व्यभिचारिणो रतिभृतां निर्वेदगर्वौ मदः ।
दैन्यग्लानिविषादमोहमृतयः शङ्का वितर्कः स्मृति-
　　र्व्रीडाजाड्यमसूयितौग्र्यचमतयो हर्षो धृतिश्चोत्कता ॥

निद्राऽपस्मृतिचापले श्रम उताऽऽलस्याऽवहित्थे स्वाप-
　　श्चिन्तावेगरुजा—भययुता उन्मादबोधाः कथाः ।
संख्याभिस्त्रिभिरन्विताभिरुदितास्त्रिशद्भिरित्थं रते-
　　र्व्यक्तिं सम्यगिमे यतो विदधते स्वान्तस्थितायाअपि ॥

यथा—

निर्वि-ह्यभिमानयुङ्मदयुता दीना परं ग्लानिभाक्
प्राप्ता चापि विषादमोहमरणाऽऽशङ्काऽवितर्कस्मृतीः ।
व्रीडां जाड्यमसूयितौग्र्यमतिभिर्हर्षेण धृत्योत्कता-
निद्राऽपस्मृतिचापलश्रममहाऽऽलस्याऽवहित्थैर्युता ॥
स्वापं चिन्तनवेगरोगकुपितं भीतिं दधाना तथा
सोन्मादा ननु बोधभाक्सुनयना भावैरुपेता चिरम् ।
पूर्वोक्तैर्मुरलीरवाऽमृतभरः पीताम्बरः सुन्दरः
कान्तिद्योदितमन्दिरः किमनया स्वान्ते धृतः श्यामलः ?॥

तदेवमनेकरसव्याप्त्या व्यभिचारिणः श्रीभागवतेऽप्युक्ताः ।

यथा—

क्व चाऽहं कितवः पापो ब्रह्मघ्नो निरपत्रपः ।
क्व च नारायणेत्येतद्भगवन्नाम मङ्गलम् ॥ इत्यादि ।
(६।२।३४)

ननु भवतु तत्र विभावानां रसपुष्टिकरत्वेन स्वरूपनिर्वर्तकत्वादङ्गत्वम्, अनुभावाऽऽदीनां तु कथमङ्गत्वम् ? स्वरनेत्रादिविक्रियारूपाणां तेषां भावोत्पत्त्यनन्तरमेव जायमानतया स्वरूपाऽनिर्वर्तकत्वादिति चेत्सत्यम् । प्रयाजानामिव दर्शाऽऽदावनुयाजानां स्वरूपनिर्वर्तकत्वरूपाऽङ्गत्वाऽभावेऽपि फलं प्रति योग्यतासम्पादकत्वेनोत्तराङ्गत्ववदत्रैषां विभावाऽऽदिवदङ्गत्वाऽभावेऽप्यभिव्यञ्जकत्वात्तत्प्रतीतिजनकत्वेनोत्तराङ्गत्वस्वीकारादित्यन्यत्र विस्तरः ॥ ६ ॥

ननु 'तमेतं वेदाऽनुवचनेन ब्राह्मणा विविदिष्यन्ति' (बृहदा० ४।४।२२) इत्यादिवाक्येन ज्ञानोद्देशेन वेदाऽनुवचनयज्ञादीनां

विधाने वाक्यभेदात्, 'जातपुत्रः कृष्णकेशः' इत्यत्र जातपुत्र-कृष्णकेशपदाभ्यामवस्थाविशेष इव यज्ञादिपदैर्विहितं कर्म सामान्यं लक्षयित्वा तज्ज्ञानोद्देशेन विधीयत इति भक्तेरपि विहितत्वेन विविदिषावाक्ये यज्ञादिवज्ज्ञानोद्देशेन विधानात् यज्ञादिवज्ज्ञानोपकारककर्मरूपैव सा। अतो निःश्रेयसफला भवितुमर्हति। 'न कर्मणा प्रजया धनेन त्यागेनैके अमृतत्वमानशुः' (कैवल्य १।३) 'तमेव विदित्वाऽतिमृत्युमेति नाऽन्यः पन्था विद्यतेऽयनाय' (श्वेताश्व० ३।८) इत्यादिश्रुतेरित्याशङ्कां परिहरन्नाह—

न क्रिया कृत्यनपेक्षणाज्ज्ञानवत् ॥७॥

न क्रियेति। सा भक्तिर्न क्रियात्मिका भवितुमर्हति, कुतः कृत्यनपेक्षणात्। भगवद्गुणादिज्ञानादिमात्रसाध्यायामनुराग-रूपायां तस्यां पुंप्रयत्नानुविधानाऽभावात्। यन्न प्रयत्नाऽनुविधायि तन्न कर्मेत्यत्र दृष्टान्तमाह—ज्ञानवदिति। ज्ञानं यथा प्रमाण-सम्पत्त्यधीनं न पुरुषेण स्वेच्छया कर्तुमकर्तुमन्यथाकर्तुं शक्यते, तथा भक्तिरपि। न हि रागिणां प्रमदादिविषया रतिः पुंव्या-पारतो भवति, किंतु कामगुणबुद्ध्यादितो भवति। यद्यपि ज्ञानभक्त्योरपि कृत्युद्देश्यतया कृत्युत्पाद्यत्वमस्त्येव, तथाऽपि साध्यत्वाख्यकृतिविषयतया विशेषो नास्तीति मन्तव्यम्। तस्मा-द्भावो न यागादिवत्क्रियारूपो न वेच्छादिरूपः, किंतु 'प्रीणाम्य-नुरज्यामि' इति प्रतीतेः पृथगेव द्वेषवत् इच्छादीनामसिद्धमात्र-विषयत्वात् रागस्य तु सिद्धाऽसिद्धविषयत्वादित्युपवादितं प्रागेव। अत एव हार्दात्सौहार्दाच्चाऽस्यं भिद्यते। तदुक्तम्—

दोषदर्शननाश्यो हि स्नेहो हार्दमितीर्यते ।
धृतराष्ट्रस्य विदुरे पुत्रं मुञ्चेति वक्तरि ॥
दोषे दृष्टे प्रियः स्नेहो न नश्येत् सौहृदं हि तत् ।
कुवृत्तस्याऽप्युपकृतौ यथा कर्णोऽतिसादरः ॥
दोषे दृष्टे प्रियः स्नेहः प्रियाप्तौ च न गच्छति ।
स प्रेमांऽशुकचोरोऽपि कृष्णे दृष्टेऽपि दृक्-स्पृहा ॥

यथा—

दृष्टेऽपि कृष्णे तृष्णेयं लोचने न विमुञ्चति । इत्यादि ।

ननु तृष्णेयं सामान्यलक्षणयोपस्थापिताऽसिद्धदर्शनविषया । तल्लाभे तु तद्विषया निवर्तत एवेति चेन्न । सिद्धदर्शन एव दर्शनत्वेन तस्या अङ्गीकारात् । न च सिद्धत्वज्ञानं प्रतिबन्धकम्, दर्शनत्वाऽवच्छिन्नसिद्धत्वज्ञानस्य प्रतिबन्धकत्वात् तस्य चेहाऽभावात् । कथमन्यथाऽज्ञातकान्तामरणस्य पुंसः कान्ताऽवलोकनेच्छा । तत्र सिद्धकान्ताऽवलोकनस्याऽभावेन सामान्यलक्षणयाऽपि तदुपस्थितेः कर्तुमशक्यत्वात् । तस्मात्कान्ताऽवलोकनत्वाऽवच्छेदेन सिद्धत्वज्ञानरूपप्रतिबन्धकाऽभावात् सिद्धविषयिण्येवेच्छा । एवं प्रकृतेऽपीति भावः । ज्ञातकान्तामरणस्य शोकाऽऽकुलस्य पुंसः कान्ताऽवलोकनत्वाऽवच्छेदेन सिद्धत्वज्ञानेऽपि कान्ताऽवलोकनेच्छा तु शोकाद्युत्तेजकबलादुपपाद्या । एतेनाऽसिद्ध एव यत्किञ्चिदवलोकने सामान्यलक्षणयोपस्थापिते कान्ताविषयत्वारोपाद्व्यधिकरणधर्मप्रकारिकेच्छेति निरस्तम्, विशिष्टाऽभावेनैव निर्वाहात् सिद्धान्ते सामान्यलक्षणाऽनभ्युपगमाच्चेत्यलमतिविस्तरेण ।

यद्यप्यत्र दर्शनस्यैव काम्यत्वमवगम्यते, तथाऽपि दर्शनवृत्तिविशिष्टतया भगवतः काम्यत्वे तात्पर्यम्। कृष्णनिष्ठविषयताऽवच्छेदकतालोचनकर्मत्यागाभावकथनेन तदवगमात्।

ननु विष्णुपुराणे विहिताचरणप्रतिषिद्धवर्जने च भक्तिरित्युक्तम्—

न चलति निजवर्णधर्मतो यः
समसतिरात्मसुहृद्विपक्षपक्षे।
न हरति न च हन्ति किञ्चिदुच्चैः
सितमनसं तमवेहि कृष्णभक्तम्॥इत्यादिना।

(विष्णुपुराण ३।७।२०)

तत्कथं न क्रिया भक्तिरिति चेत्, सत्यम्। उपलक्षणं तु तत् शाखाऽग्रमिव चन्द्रस्य न स्वरूपं भक्तेः। तत्रैव 'मनसि कृतजनार्दनं मनुष्यं सततमवेहि हरेरतीव भक्तम्' (३।७।२१) इत्याऽऽदिना भावलक्षणाया भक्तेः पृथगुपादानात्। अत्र हि 'सततं मनसि कृतजनार्दनम्' इति सम्बन्धः। सातत्यञ्च न भावमन्तरेणाऽवकल्पते। 'अतीव भक्तम्' इति च स एव मुख्यो भक्त इति दर्शयति। समसतित्वमपि सर्वात्मनि वासुदेवे भावमन्तरेण नोपपद्यते। उपपद्यते चोपलक्षणत्वे। विधिप्रतिषेधाऽतिक्रमो हि रागादिनिबन्धः। न च पुरुषोत्तमप्रवणे चेतसि रागादयोऽवकाशं लभन्ते। अत एवाऽभाषि।

श्रीशुकेन—

स्वपादमूलं भजतः प्रियस्य
त्यक्ताऽन्यभावस्य हरिः परेशः।

विकर्म यच्चोत्पतितं कथञ्चिद्-
धुनोति सर्वं हृदि सन्निविष्टः ॥ इति ।

(भाग० ११।५।४२)

अत्र 'त्यक्ताऽन्यभावस्य भजतः' इति कथनात्पूर्वोक्तपराऽनुरक्तिमत इति लब्धम् । 'विकर्म कथञ्चित्' इति कथनाद्भक्तानां विषयरागादिहेतुकस्य विधिप्रतिषेधव्यतिक्रमस्याऽभावः सूचितः । तस्माद्भाव एव भक्तिः, न क्रिया । 'किंतु लाङ्गलं जीवनम्' इतिवदुपचाराद्भक्तिरुच्यत इत्यास्तां विस्तरः ॥ ७ ॥

ज्ञानक्रियोभयभिन्नत्वादेव तस्या अपरिमितफलत्वमित्याह—

अत एव च फलाऽऽनन्त्यम् ॥ ८ ॥

अत एवेति । यतः सा न क्रियात्मिका नाऽपि ज्ञानात्मिका, ज्ञानहेतुकत्वात् , अत एव तत्फलानामानन्त्यमसंख्येयत्वं भवति । ज्ञानफलभूतायास्तस्या असंख्येयानि फलानि भवन्तीति यावत् ।

यत्कर्मभिर्यत्तपसा ज्ञानवैराग्यतश्च यत् ।
योगेन दानधर्मेण श्रेयोभिरितरैरपि ॥

(भाग० ११।२०।३२)

सर्वं मद्भक्तियोगेन मद्भक्तो लभतेऽञ्जसा ।
स्वर्गाऽपवर्गं यद्धाम यत्किञ्चिदपि वाञ्छति ॥

(भाग० १०।२०।३३)

इत्यादिस्मृतेः क्रियारूपत्वे स्वर्गादिमात्रफलकत्वं ज्ञानरूपत्वे मोक्षमात्रफलकत्वं स्यात् , न सर्वफलावाप्तिः स्यात् । अतः सर्वफलकत्वात्तदुभयादिभिन्नैवेत्यर्थः ।

अथ वा यतो भक्तिर्न क्रिया अत एव निःश्रेयसस्याऽऽनन्त्यम् अक्षयत्वं भवतीत्याह—अत एवेति । भक्तेः क्रियात्वे 'तद्यथेह कर्मचितो लोकः क्षीयते एवमेवाऽमुत्र पुण्यचितो लोकः क्षीयते' (छान्दोग्य ८।१।६) इति न्यायापाते ब्रह्मलोकमभिसंपद्यते न स पुनरावर्तते ।

विभेदजनके ज्ञाने नाशमात्यन्तिकं गते ।
आत्मनो ब्रह्मणोऽभेदमसन्तं कः करिष्यति ॥
(विष्णु० ६।७।९६)

इत्यादिवाक्यविरोधः प्रसज्येत ॥ ८ ॥

पूर्वोक्तमुपक्षयं समर्थयते—

तद्वतः प्रपत्तिशब्दाच्च न ज्ञानमितरप्रपत्तिवत् ॥ ९ ॥

तद्वत इति । तद्वतः ज्ञानवतः भक्तिरूपप्रपत्तिशब्दान्न ज्ञानं मुख्यमिति सा मुख्येत्यतो लिङ्गविपरिणामेनाऽनुवर्तते । रागत्वेनैव ज्ञानभेदस्य सिद्धत्वादेवं व्याख्यानम् । प्रपत्तिशब्दः

'बहूनां जन्मनामन्ते ज्ञानवान्मां प्रपद्यते' (गीता ७।१९)

इत्यादिचकाराऽज्ज्ञानत्वाऽभावनिदानं ज्ञानाऽऽनन्तर्यश्रवणमपि

'स सर्वविद्भजति मां सर्वभावेन भारत' । इति ।
(गीता १५।१९) ।

एतेन माऽस्तु केवलज्ञानं भक्तिः, द्रवीभावपूर्वकं तु स्यादिति निरस्तम् । द्रवस्य सविषयत्वाऽभावात् । कथञ्चिद् द्रवो रससमकालिकतया प्रेमण्यन्तर्भूतोऽपि ज्ञानं न तथा श्रुतिस्मृतिपुराणपर्यालोचनया तथैवाऽवगमात् । न च

महत्त्वबुद्धिर्भक्तिस्तु स्नेहपूर्वाऽभिधीयते ।
तयैव व्यज्यते सम्यग्जीवरूपं सुखात्मकम् ॥

इत्यनेन विरोधः, यागादौ स्वर्गादेरिवाऽधिकारिविशेषणतया स्नेहपूर्वत्वस्य विवक्षितत्वात् । तथा च भगवति स्नेहविशेषलक्षणप्रीत्यर्थं शास्त्राऽऽदिना माहात्म्यज्ञानं संपाद्यम् । तदपि भक्तिसाधनत्वाद्भक्तिरित्युच्यते । तत एव भक्तितत्फलप्रतिबन्धकाऽऽवरणनिवृत्तेः संभवात् । प्रपत्तिशब्दस्तत्र न प्राप्त्यर्थकः, किन्तु भक्तिपर इत्यत्र विनिगमकमाह—इतरप्रपत्तिवदिति । यथा तदनन्तरं **'कामैस्तैस्तैर्हृतज्ञानाः प्रपद्यन्तेऽन्यदेवताः'** (गीता ७।२०) इति देवताऽन्तरप्रपत्तिनिन्दामुखेनैव स्वप्रपत्तिः स्तूयते । तत्र देवताभक्तेरेव प्रपत्तिशब्देन कथनम्, न तज्ज्ञानस्य न वा प्राप्तेः । **'तं तं नियममास्थाय'** (७।२०) इति स्वारस्यात् । तस्मादुभयत्र प्रपत्तिर्भक्तिरेव, तस्या एव प्रस्तावादिति सिद्धम् ।

अथ वा भक्तेर्मुख्यत्वे दृष्टान्तमाह—इतरप्रपत्तिवदिति । यथा देवताऽन्तरप्रपत्तिस्तत्फलहेतुरतो मुख्या न तज्ज्ञानम्, तथा प्रकृतेऽपीति भावः । वस्तुतो माऽस्तु ज्ञानं क्रिया वा भक्तिः भवतु च भक्तिरेव कैवल्यान्तसर्वपुमर्थहेतुः । परन्तु—

'मद्भक्त एतद्विज्ञाय मद्भावायोपपद्यते'
(गीता १३।१९) ।

इत्यादिवचनाऽनुसारात्कैवल्ये सा ज्ञानद्वारैव हेतुर्भविष्यति । अत एव कैवल्यं प्रति ज्ञानकारणत्वबोधकवाक्यानामविरोधोऽपि भक्त्यवान्तरव्यापारत्वात् ज्ञानस्य । न हि काष्ठैः पचतीत्युक्ते ज्वालानामसाधनत्वमुक्तं भवति । तस्मात्साक्षात्साधनं ज्ञानम्, व्यवहितं साधनं भक्तिरिति, तत्राऽऽह—तद्वत इति । 'ज्ञानवान्मां

प्रपद्यते' (गीता ७।१९) इति ज्ञानवतो भजनाऽर्थकप्रपत्ति-शब्दाज्ज्ञानं न द्वारमिति भावः। आनन्दहेतौ रतिरूपायां फलभक्तौ साधनस्य ज्ञानस्य द्वारत्वाऽयोगात्। तत्र दृष्टान्तः—इतरप्रपत्ति-वदिति। यथा तत्तत्फलहेतौ देवताऽन्तरभक्तौ देवताऽन्तरज्ञानस्य न द्वारत्वं भक्तित एव फललाभस्य शास्त्रतः प्रसिद्धेः। भक्तितो ज्ञानश्रवणं तु साधनभक्तिपरतया नेयम्। तमेवेत्यादिश्रुत्यर्थ-पर्यालोचनतोऽपि भक्तिरव्यवहितसाधनं ज्ञानं व्यवहितसाधन-मित्येवाऽवगतम्। तस्माद्विपरीत एव द्वारद्वारिभावो बोध्यः। ज्ञानमेव भक्तिद्वारा कैवल्यहेतुरिति। 'नान्यः पन्थाः' (श्वेताश्व० ३।८) इत्यनेन तु न व्यापारभूताया भक्तेः साधनत्वं व्यवच्छिद्यते किन्तु कर्माऽऽदेः। यथा चक्षुषैव पश्यतीत्युक्ते न सम्बन्धस्य व्यवच्छेदः, किन्तु प्रमाणाऽन्तरस्येति संक्षेपः ॥ ९ ॥

इति श्रीनारायणतीर्थकृतायां शाण्डिल्यसूत्रवृत्तौ भक्ति-
चन्द्रिकायां प्रथमाऽध्यायस्य प्रथमाह्निकम् ॥

आह्निके भक्तिरुक्ताऽत्र ज्ञानकर्माद्यनावृता ।
पराऽनुरक्तिः परमे ततो भूयो न जायते ॥

अथ द्वितीयमाह्निकम् ।

एवं मोक्षं प्रत्यनन्यथासिद्धायां भक्तौ निरूपितायां ज्ञानयोगभक्तीनामङ्गप्रधानभावविवेकाय द्वितीयाह्निकस्य प्रारम्भः । तत्राऽपि गौणमुख्यभक्त्योर्मध्ये परभक्तेरेव प्रधानत्वज्ञापनाय प्रवृत्तमिदमादिमं सूत्रम्—

सा मुख्येतराऽपेक्षितत्वात् ॥ १ ॥

सा मुख्येति । आह्निकाऽन्तरारम्भे तस्या एव पुनः स्मरणाय—सेति । एतेन तदादीनां प्रक्रान्तपरामर्शित्वनियमो ज्ञापितः । सा पराऽनुरक्तिरूपा भक्तिर्मुख्या प्रधानम् । कुतः, इतराऽपेक्षितत्वात् । इतरैरात्मज्ञानयोगगौणभक्तिभिः स्वोपकार्यतयाऽपेक्षितत्वादित्यर्थः । छान्दोग्ये 'यो वै भूमा तत्सुखम्' (७।२३।१) इत्याद्युपक्रम्याऽऽम्नायते—'आत्मैवेदं सर्वमिति । स वा एष एवं पश्यन्नेवं मन्वान एवं विजानन्नात्मरतिरात्मक्रीड आत्ममिथुन आत्मानन्दः स स्वराड् भवति' (७।२५।२) इत्यत्र पश्यन्निति सिद्धत्वेन कृदन्तनिर्दिष्टदर्शनोत्तरभाविन्या रतेरेव भवतीति साध्यत्वेन निर्दिष्टायाः स्वाराज्यफलत्वोक्त्या मुख्यत्वज्ञापनादिति भावः । अत एव मनुरपि—

> यस्त्यक्त्वा प्राकृतं मोहं नित्यमात्मरतिर्मुनिः ।
> सर्वभूतात्मभूतात्मा ।

इत्यात्मरतेः प्राधान्यमाह ॥ १ ॥

नन्वात्मरतमधिकारिविशेषणम्। तथा च य आत्मरतः स एवं पश्यन्नित्यन्वयोऽस्तु। तथा च न रतेः प्राधान्यम्। तत्राऽऽह—

प्रकरणात् ॥ २ ॥

प्रकरणादिति। प्रकरणं भवति रतेरेव आत्मानन्दादिफलत्वात्। रतित एवानन्दस्य लोके दर्शनात्। तस्मात्प्रकरणस्थं दर्शनमङ्गमेव यथाभिक्रामं जुहोतीत्यादौ प्रकरणादभिक्रमणं प्रयाजाद्यङ्गम्। सिद्धसाध्यसमभिव्यवहारे सिद्धं साध्यायोपकल्पत इति न्यायेनाऽश्नन्सुखीत्यादौ चाशनं तृप्ताविति भावः ॥ २ ॥

ननु 'ब्रह्मविदाप्नोति परम्' (तै० उप० २।१।१) इत्यादिवाक्यानुसारादुदाहृतवाक्येऽपि ज्ञानस्य दर्शनरूपस्य हेतुत्वं कल्पनीयम्। 'ज्ञानवान्मां प्रपद्यते' (गीता० ७।१९) इत्यादौ तु परोक्षज्ञानमर्थ इत्याशङ्कामनुभाष्य दूषयति—

दर्शनफलमिति चेन्न तेन व्यवधानात् ॥ ३ ॥

दर्शनफलमिति चेन्नेति। साक्षात्काररूपदर्शनस्यैव फलं स्वाराज्यलक्षणममृतत्वमिति चेन्न। कुतः, तेन तच्छब्देन व्यवधानात्। स स्वराट् भवतीत्यत्र स इति तच्छब्देन सन्निकृष्टात्मरतिरेवोपस्थाप्यते न विप्रकृष्टः पश्यन्निति व्यवहितोपस्थितौ कारणाऽभावात्। न च प्रकरणमेव कारणम्, अन्योन्याश्रयात् ॥ ३ ॥

लौकिकाऽन्वयव्यतिरेकाभ्यामपि ज्ञानं भक्तेरङ्गमित्याह—

दृष्टत्वाच्च ॥ ४ ॥

दृष्टत्वादिति। तरुणीसौन्दर्यज्ञानस्य तरुणीविषयकाऽनुरागं प्रति हेतुताया अन्वयव्यतिरेकाभ्यां निश्चिततत्वादित्यर्थः।

अतः सिद्धं ज्ञानं भक्तेरङ्गमेव। दृष्टश्च प्रकृतेऽपि निष्करुणत्वाल्पमहिमत्वाप्रियत्वादिज्ञानं मनोमालिन्यकारणम्। कारुण्याप्रतिहतैश्वर्यभक्तवात्सल्यादिमाहात्म्यज्ञानञ्च मालिन्यनिरासे कारणम्। ततश्च परा भक्तिरिति च। तस्माज्ज्ञानं दृष्टोपकारमङ्गमेव, न प्रधानम्। एतत्सर्वमभिप्रेत्यैव भगवतोक्तम्—

तद्बुद्धयस्तदात्मानस्तन्निष्ठास्तत्परायणाः।
गच्छन्त्यपुनरावृत्तिं ज्ञाननिर्धूतकल्मषाः॥ इति।
(गीता ५।१७)।

तन्निष्ठतत्परायणत्वं प्रेमाधिक्यविषयं मन्तव्यम्।

ननु माहात्म्यज्ञानं नानुरागजनकं, तद्विनापि पुत्रादावनुरागदर्शनादिति चेन्न। तृणारणिमणिन्यायेन तत्समाधानात्। ननु तथाऽप्यन्वयव्यभिचारो दुर्वारः। केषाञ्चित्पामराणां भगवद्गुणगणं शृण्वतामपि भक्त्यनुदयादिति चेन्न। मत्सराऽऽदिप्रतिबन्धेन कार्यानुदयेऽपि कारणस्य स्वरूपयोग्यत्वाऽनपायात्। न हि प्रतिबन्धकमण्यादिसमवधाने तृणादिकमदहतोऽप्यग्नेर्दाहशक्तिर्विरुध्यते इति दिक्।

स्यादेतत्। तथाऽपि निर्गुणे परमात्मनि कथं भक्तिः स्यात्। न च आनन्दादयस्तस्य गुणाः तेषां स्वरूपत्वाभ्युपगमात्। न ह्यभेदे गुणगुणिभावः सम्भवतीति चेन्न। अभेदेऽप्य-

हिकुण्डलादिवद् गुणगुणिभावस्य वेदान्ते व्युत्पादनात्। स चायं सगुणवादो निर्गुणत्वे विश्राम्यतीति नाद्वैतसिद्धान्तभङ्गोऽपीत्यास्तां विस्तरः।

एतेन निर्गुणे भक्तिर्न संभवति उपायाभावात्, गुणकर्मश्रवणादयो ह्युपायाः सगुणा एव संभवन्ति, शुद्धे गुणकर्मविरहादिति निरस्तम्। अन्तःकरणवृत्तेर्बाह्याकारतानिवृत्तेरेव तदुपायत्वाच्च। बाह्याकारतानिवृत्तिश्च केषाञ्चिच्छ्रौतश्रवणादित्रयाभ्यासेनातिक्लेशात् केषाञ्चिद्भगवच्चरणाम्भोजकथामृतपानतारतम्यासादितपरिपाकातिशयसगुणभक्तितो भगवदनुग्रहेणाऽनायासेनैव। तत्र यदा सगुणभक्तिः परां काष्ठामधितिष्ठति, तदा मनः प्रागेव विस्मृत्याखिलबाह्यं चरणाम्बुजमात्रालम्बनवृत्तिकमास्वादातिशयान्मदिरामदान्धो वास इव गुणानपि विस्मरति, अनुभवति तु सच्चिदानन्दैकरूपमिति। तस्मान्नोपायाभावः। अतो भक्तिः संभवतीति सिद्धम्॥ ४॥

ज्ञानभक्त्योः साध्यसाधनभावपर्यालोचनेन भक्तौ ज्ञानस्याङ्गत्वेऽपि भक्तिफलोपकारकत्वरूपं भक्तिशेषत्वं नास्ति। भक्तेर्निरपेक्षप्रधानत्वादित्यभिप्रायेणाऽऽह—

अत एव तद्भावाद्वल्लवीनाम्॥ ५॥

अत एवेति। फलमिति शेषः। यतो भक्तिः सर्वनिरपेक्षानन्तफला ज्ञानादिकं भक्तेर्न फलोपकार्यङ्गम्। अत एव तद्भावाद्भगवद्विषयकप्रेममात्रतो वल्लवीनां गोपीप्रभृतीनां तत्प्राप्तिरूपा मुक्तिरित्यर्थः। तदुक्तम्—

क्वेमाः स्त्रियो वनचरीर्व्यभिचारदुष्टाः
कृष्णे क्व चैष परमात्मनि रूढभावः ।
नन्वीश्वरो नु भजतोऽविदुषोऽपि साक्षा-
च्छ्रेयस्तनोत्यगदराज इवोपयुक्तः ॥

(भाग० १०।४७।५९)

तस्माद्द्वारबाधादनववहतकृष्णलेनापि (?) कर्मसिद्धिवत्तासां ज्ञानबाधेऽपि भक्तित एव फलसिद्धिरिति सिद्धम्

यत्त्वादिपुराणे—

'त्रैलोक्ये के भवद्भक्ताः, के त्वां जानन्ति मर्मणि' इत्यर्जुनप्रश्ने ।

न मां जानन्ति मुनयो योगिनश्च कथञ्चन ।
न च रुद्रादयो देवा यथा गोप्यो विदन्ति माम् ॥
मन्माहात्म्यं मत्सपर्यां मच्छ्रद्धां यन्मनोगतिम् ।
गोप्य एव हि जानन्ति नाऽन्यो जानाति मर्मणि ॥
वेदान्तिनोऽपि मुनयो न मां जानन्ति तत्त्वतः ।
यथा ता गोपसुदृशो मम जानन्ति वैभवम् ॥
अहमेव परं रूपं नाऽन्ये जानन्ति केचन ।
गोप्य एव हि जानन्ति मद्रूपं मत्क्रियादिकम् ॥

इति वल्लवीनामपि ज्ञानं स्मर्यते तच्छ्रुत्यवतारगोपीनाम्, न सर्वासाम् । विविधपुराणवाक्यपर्यालोचनतस्तथैवाऽवगमात् । प्रेम्णश्च ज्ञानिमते ज्ञानस्येव वैजात्यमन्तर्भाव्यैव कैवल्यं प्रति हेतुता । तेन ज्ञानस्य मनोनाशादिकं प्रतीव तद्गुणज्ञानजन्य-तदनुरागस्य तच्चिन्तनपरम्परारूपनिदिध्यासनं प्रति हेतुत्वेऽपि

त्वेऽपि न हानिः, अविद्यानिवृत्तिसमकालिकरतेरेव सकलसाधन-साध्याया ब्रह्मावाप्तिहेतुत्वाभ्युपगमादित्यास्तां विस्तरः ॥ ५ ॥

ननु 'श्रद्धाभक्तिध्यानयोगादवेहि' (कैवल्य० १।२) 'भक्त्या मामभिजानाति' (गीता ११।५५) इत्यादिश्रुतिस्मृतिभिर्भक्तेर्ज्ञान-साधनत्वमात्रमवगम्यते न कैवल्यफलत्वं, किन्तु ज्ञानस्यैव तदि-त्याशङ्कामनुभाष्य निषेधति—

भक्त्या जानातीति चेन्नाऽभिज्ञया साहाय्यात् ॥ ६ ॥

भक्त्या जानातीति चेन्नेति । भक्त्या जानात्येव केवलं न तु मुक्तिमाप्नोति किन्तु ज्ञानादेवेति चेन्न; कुतः, अभिज्ञया अनुरागस्फूर्तिपूर्वकस्फूर्तिद्वारा परभक्त्युपकारादित्यर्थः । तथा च—

भक्त्या मामभिजानाति यावान् यश्चास्मि तत्त्वतः ।
ततो मां तत्त्वतो ज्ञात्वा विशते तदनन्तरम् ॥ इति ।
(गीता ११।५५)

भगवद्वाक्यस्याऽयमर्थः—भक्त्या साधनभक्त्या श्रवणा-दिकया मामभिजानातीति न तत्त्वज्ञानोक्तिः, तत्त्वतो ज्ञात्वेति वैयर्थ्यापत्तेः । किन्तु अभीत्याभिमुख्यमनुराग उच्यते, जानातीति स्फूर्तिः । अनुरागेण मामनुभवतीत्यर्थः । स्फूर्तेर्विषयभूतां मूर्ति-माह—यावानिति । लीलाविग्रहोपहित इत्यर्थः । कथं स्फूर्ति-विषयता, तत्राऽऽह—यश्चास्मि तत्त्वत इति । आनन्दरूप इत्यर्थः । ततो मदनुरागस्मरणमाहात्म्यान्मां भगवन्तं सर्वकल्याणगुणपूर्णं तत्त्वतो ज्ञात्वाऽशेषविषयतः साक्षात्कृत्यैतच्छास्त्रेषु ज्ञानफलत्वेन प्रसिद्धं प्रेम भवति यत इतराऽभानम् । अनन्तरं तादृशप्रेमाऽ-

व्यवहितं विशते मां प्राप्नोति। 'पुरुषः स परः पार्थ भक्त्या लभ्यस्त्वनन्यया' (गीता ८।२२) इत्युक्तेरिति भावः। तथा चेदं पर्यवसितम्–'भक्त्या सञ्जातया भक्त्या विभ्रत्युत्पुलकां तनुम् (भाग० ११।३।३१) इत्यादिना साधनभक्तिपरभक्त्योर्यः साध्यसाधनभावोऽवगम्यते, स न साक्षात् किन्तु साधनभक्त्या भगवदनुरागेण, भववत्स्फूर्तितो भगवदनुग्रहाद्भगवत्स्वरूपज्ञानात्प्रेमवृद्धितस्तन्मात्रनिष्ठादिभूमितश्चरमं प्रेमेत्येवं साधनभक्तिर्ज्ञानस्याङ्गम्। ज्ञानन्तु भक्तेरङ्गमित्यास्तां विस्तरः।

परे तु भक्त्या निदिध्यासनात्मिकया ज्ञाननिष्ठया मामद्वितीयमात्मानमभिजानाति साक्षात्करोति। यावान्विभुर्नित्यश्च यश्च परिपूर्णसत्यज्ञानानन्दघनः सदा विध्वस्तसर्वोपाधिरखण्डैकरस एकस्तावन्तं मां विजानाति। मामेव तत्त्वतो ज्ञात्वा 'अहमस्म्यखण्डानन्दाऽद्वितीयं ब्रह्म'इति साक्षात्कृत्य विशते अज्ञानतत्कार्यनिवृत्तौ सर्वोपाधिशून्यतया मद्रूप एव भवति। तदनन्तरं बलवत्प्रारब्धकर्मभोगेन देहपाताऽनन्तरं, न तु ज्ञानाऽनन्तरमेव, क्त्वाप्रत्ययेनैव तल्लाभे तदनन्तरमित्यस्य वैयर्थ्याऽऽपातादिति वदन्ति।

तच्चिन्त्यम्। 'तत्त्वतोऽभिजानाति, ततस्तदनन्तरं विशते' (द्र० गीता ११।५५)इत्यनेनैव तल्लाभे ज्ञात्वेत्यस्य वैयर्थ्याऽऽपातात्।

ब्रह्मभूतः प्रसन्नात्मा न शोचति न काङ्क्षति।
समः सर्वेषु भूतेषु मद्भक्तिं लभते पराम्॥

(गीता १८।५४)

इत्यनेन विरोधप्रसङ्गाच्च। अत्र वाक्यार्थपर्यालोचनतो भक्तेर्ज्ञानफलत्वलाभात् ॥ ६ ॥

'ज्ञात्वा देवं मुच्यते सर्वपाशैः' (श्वेताश्व० १।११) इत्यादिना ज्ञानस्य, 'यमेवैष वृणुते तेन लभ्यः' (कठ० २।२२) इत्यादिना भक्तेर्मोक्षफलत्वश्रवणात्तत्रैकतरस्यैव द्वारत्वमित्याद्यर्थे विशेष-निर्णायकाऽभावाच्च तयोर्विकल्प एवाऽस्त्विति शङ्कामतिदेशेन निराकरोति—

एतेन विकल्पोऽपि प्रत्युक्तः ॥ ७ ॥

एतेनेति। एतेन उक्तप्रमाणैर्युक्तिभिश्च ज्ञानस्याङ्गत्वनिर्णयेन ज्ञानभक्त्योरत्र विकल्पपक्षः; अपिना दर्शपूर्णमासवत्समुच्चयश्च निराकृत इति मन्तव्यम्। न ह्यङ्गाऽङ्गिनोरेकत्र विकल्पः संभवति, भिन्नवाक्योपात्तत्वेऽपि पृथगेकार्थत्वाभावात्। नापि समुच्चयः, एकप्रयोगविधिविषयत्वेऽपि दर्शपूर्णमासयोरिव तुल्यः प्रधानतयाऽहेतुत्वात्।

ननु ज्ञानभक्त्योर्भिन्नाधिकारिकत्वात् कथमङ्गाङ्गिभावः ? तथा हि—'ब्राह्मणो निर्वेदमायात्' (मुण्डक० १।२।१२) 'शान्तो दान्त उपरतस्तितिक्षुः' (बृहदा० ४।४।२३) इत्यादिना वैराग्यशमाद्युपेतं प्रत्येव श्रवणादिविधानाद्विरक्त एव शान्त्यादि-गुणवान् श्रवणादिसाध्ये तत्त्वज्ञानेऽधिकारी यथा 'राजा राजसूयेनेति' वचनाद्राजसूये राजैव। भक्तौ तु 'न निर्विण्णो नातिसक्तः' इत्यादिवचनात् सकलोऽपि जनः सकलतद्गुणशून्योऽपि तथा दर्शनात्। तस्मान्नाङ्गाङ्गिभावः। किन्तु मुक्तौ मार्गद्वयमुद्भिद्वल-भिदादिवद्भिन्नवाक्योपात्तत्वे सति तुल्यार्थत्वाद्वैकल्पिकमेव।

अत एव बृहदारण्यके 'येनाहं नामृता स्यां किमहं तेन कुर्याम्' (बृहदा० २।४।३) 'यदेव भगवान्वेत्थ तदेव मे ब्रूहि' (बृहदा० २।४।३) इति मैत्रेय्या मोक्षसाधनप्रश्ने 'आत्मा वा अरे द्रष्टव्यः' इति ज्ञानस्य मोक्षसाधनताबोधकं याज्ञवल्क्यस्य प्रतिवचनम्। गोपालतापिन्यां तु 'यो यो ध्यायति रसति भजति सोऽमृतत्वमेति' इत्युपक्रम्य किं तद्रूपमिति ध्येयप्रश्नपूर्वकं 'गोपवेषमभ्राभं तरुणं कल्पद्रुमाश्रितं' तदिह श्लोका भवन्ति—

सत्पुण्डरीकनयनं मेघाभं वैद्युताम्बरम्।
द्विभुजं ज्ञानमुद्राढ्यं वनमालिनमीश्वरम्॥
गोपगोपीगवावीतं सुरद्रुमलताश्रयम्।
चिन्तयंश्चेतसा कृष्णं मुक्तो भवति संसृतेः॥

(गोपालतापनी १।१-२)

इति वाक्यं गौणमुख्यभेदभिन्नाया भक्तेर्मोक्षसाधनताबोधकमिति ज्ञानभक्त्योरुक्तयुक्त्या विकल्पेन मोक्षसाधनत्वं भक्तिशास्त्रकारैः सिद्धान्तितमिति चेत्। अत्र वदन्ति—

यद्यपि विकल्प उचितस्तथाऽपि सूत्रकृता न स आदृतः तस्याष्टविधदोषदुष्टत्वात्। न चोभयकारणताबोधकवाक्यादावावश्यकः, उक्तप्रकाराङ्गाङ्गिभावेनाऽप्युपपत्तेः। न च भिन्नाऽधिकारिकत्वादङ्गाङ्गिभावाभावः, वैजात्यं प्रवेश्यैव ज्ञानानुरागयोर्हेतुहेतुमद्भावाद्यत्र तादृशज्ञानतो भक्तिस्तत्र ज्ञानभक्त्योरेकाधिकारिकत्वेनाङ्गाङ्गिभावसंभवात्। अत एव सर्वत्र ज्ञानाऽनावश्यकतां वक्ष्यति सूत्रकारः॥ ७॥

अथ प्रसङ्गात्परम्परया परभक्तसंयोगिनीमपरभक्तिमप्याह—

देवभक्तिरितरस्मिन्साहचर्यात् ॥ ८ ॥

देवेति । 'देवान्देवयजो यान्ति मद्भक्ता यान्ति मामपि'
(गीता ७।२३)

इत्यत्र सूच्यमाना देवभक्तिरितरस्मिन् ईश्वरभिन्नविषयिणी, मद्भक्ता इतीश्वरभक्तिसहपाठात् । अन्यथा पौनरुक्त्यापत्तिरिति भावः ।

यत्तु—

यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ ।
तस्यैते कथिता ह्यर्थाः प्रकाशन्ते महाऽऽत्मनः ॥
(श्वेताश्व० ६।२३)

इत्यादिश्रुत्या गुरुभक्तिसमतया देवभक्तेर्ज्ञानसाधनत्वमेव श्रूयते तस्य का गतिस्तत्राह—देवेति । अत्र देवभक्तिः परमेश्वरेतरस्मिन्पार्षदे देवे मन्तव्या । पुराणे तन्त्रे च हनुमदाद्याराधनं विना श्रीरामाद्याराधनस्य विपरीतफलत्वकथनात् । किमर्थेयं कल्पना, तत्राह—साहचर्यादिति । गुरुभक्तिसाहचर्यादित्यर्थः । साहचर्यं हि नामृतफलायां भक्तौ घटते, तत्स्थात् । यथैव गुरुभक्तिः शुभत्वाज्ज्ञानफलाय, तथैव पार्षदभक्तिरपीति ।

तन्न रमणीयम् । परमार्थप्रकाशकगुरुभक्तिसादृश्यप्रतियोगिभक्तिविषयस्य परदेवतात्वौचित्यात्, निरङ्कुशस्येश्वरमात्रवृत्तेर्देवशब्दार्थस्य परित्यागानौचित्याच्च । साहचर्यादुलूकशब्दवदिति भाष्यकारवचनं, तस्यायमर्थः—यथा काकादिशब्दसहपठित उलूकशब्दस्तद्भिन्नपक्षिपर इति ॥ ८ ॥

ननु यथा 'आत्मा वाऽरे द्रष्टव्यः' (बृहदा० २।४।५) इत्याद्या आत्मदर्शनकर्तव्यताबोधिकाः श्रुतय उपलभ्यन्ते, न तथा भक्तिबोधिकास्तत्राह—

भक्तिः प्रमेया श्रुतिभ्यः ॥ ९ ॥

भक्तिः प्रमेयेति ।

तमु स्तोतारः पूर्व्यं यथा विद ऋतस्य गर्भं जनुषा पिपर्तन ।

आस्य जानन्तो नाम चिद्विवक्तन महस्ते विष्णो सुमतिं भजामहे' (ऋग्वेद १।१५६।३) इत्यादिश्रुतिभ्यो ज्ञातव्येत्यर्थः। श्रुतेरयमर्थः । तं प्रसिद्धम्। उ इत्यनर्थको निपातः । स्तोतारः स्तुध्वम् । पूर्व्यं जगत्कारणम् । यथाविदः गुणानामानन्त्येऽपि स्वमतिपरिणामावधिः इत्यर्थः । ऋतस्य वेदान्तवाक्यस्य । गर्भं प्रतिपाद्यम् । स्तुतेः फलमाह—जनुषा पिपर्तनेति । जन्म पूर्यतामिति वक्तव्ये कर्मकर्तृप्रयोगे तनप्रत्ययः । कारणत्वनिर्देशश्च छान्दसः । जन्मसमाप्तिः फलमिति भावः । स्तुत्यसम्भवे अस्य परमात्मनो नाम चिन्नामापि विवक्तन वदतेति । एवं परान् साधनभक्तानुपदिश्य श्रुतयः स्वस्वरूपज्ञानूचुः—एते फलभक्त्यर्थं भजन्तु मा वा वयं तु स्वरूपज्ञास्ते तव महस्तेजो भाभिः शक्तिभिर्गच्छति नानाविधं रामकृष्णादिरूपं ज्ञायत इन्यभिप्रेत्य गायत्र्यामुक्तं भक्तानुग्राहकं सुमतिं सर्वसाक्षिरूपं सच्चिदानन्दविग्रहं गुणातीतं भजामहे प्रेमलक्षणां सेवां कुर्मः । त्वयि कृतसौहृदाः खलु पतन्ति न ये विमुखाः' (भाग० १०।८७।२७) इत्यादिनाऽन्वयव्यतिरेकाभ्यां प्रेम्ण एव पुमर्थसाधनत्वकथनात् । अत्र च 'तमु स्तोतारः' इत्युपक्रमात् 'भजा-

महे' इत्युपसंहाराद् द्वादशविधायाः फलभक्तेर्नवविधायाः साधनभक्तेश्च कर्तव्यत्वमवगतम्। तथा च नवविधाया वाक्यान्तरतोऽपि तदवगम्यते । तथा हि—

तत्र श्रवणे कीर्त्तने सर्वस्य स्वीयस्य भगवदर्पणे च श्रुतिः–
'यः पूर्व्याय वेधसे नवीयसे सुमज्जानये विष्णवे ददाशति ।

यो जातमस्य महतो महि ब्रवत् सेदु श्रवोभिर्युज्यं चिदभ्यसत्' । (ऋग्वेदे १।१५६।२)

अस्यार्थः—पुरुषः पूर्व्याय कारणाय वेधसे कर्त्रे नवीयसे नित्यनूतनाय सुमज्जानये सुमती श्रीर्जाया यस्य तस्मै विष्णवे ददाशति ददाति अर्पयति। अविशेषात्सर्वदेहादि। यो जातं जन्म उपलक्षणमेतत्। महतो महि श्रेष्ठम्। अस्य विष्णोः ब्रवत् ब्रूयात् स इत् उ नियतौ अवधारणार्थौ प्राप्नुयादेवेति युज्यं चित् गन्तव्यं उत्तमं पदं अभ्यसत् प्राप्नुयात् श्रवोभिः श्रवणैः जन्मगुणकर्मणां "द्वा सुपर्णा" इति मन्त्रवर्णात् युज्यं चित्स्वरूपं परमात्मानं अभि आभिमुख्येनाऽनुरागेण अभेदेन वा असत् प्राप्नुयादिति ॥ १ ॥

अथ स्मरणे कीर्तने च श्रुतिः–

'वि चक्रमे पृथिवीमेष एतां क्षेत्राय विष्णुर्मनुषे दशस्यन् ।

ध्रुवासो अस्य कीरयो जनास उरुक्षितिं सुजनिमा चकार'
(ऋग्वेदे ७।१००।४) ।

अस्यार्थः–अस्य विष्णुः एतां पृथिवीं लोकत्रयं मनुषे स्वस्मरणशीलाय भक्ताय देवगणाय क्षेत्राय निवासाय दशस्यन्

असुरेभ्योऽपहृत्य दास्यन् विचक्रमे विक्रान्तवान् वामनावतारे देवैः स्तुत इति कृत्वाऽपि तेभ्यस्त्रैलोक्यं दत्तवानित्याह—ध्रुवास इति। कीरयः कीर्तनशीलाः उरुक्षितिं महान्तं निवासिनं सुजनिमा सुजन्म कृष्णावतारैश्चकार। अनेन भगवतो भक्तवत्सलता सूच्यते तदा पुराणवचसां समूलत्वम् ॥ २ ॥

अथ पादसेवने श्रुतिः—

'यस्य त्री पूर्णा मधुना पदान्यक्षीयमाणा स्वधया मदन्ति।
य उ त्रिधातु पृथिवीमुत द्यामेको दाधार भुवनानि विश्वा'
(ऋग्वेदे १।१५४।४)।

अस्यार्थः—यस्य विष्णोः त्रीणि मधुना पूर्णा पूर्णानि आनन्दरूपाणीत्यर्थः। त्रिस्त्वं पादप्रक्षेपत्रित्वात्। अक्षीयमाणा पादप्रक्षेपणे अक्षीणानि पदानि स्वधयाऽन्नेन उपलक्षणमेतत् सर्वफलेन मदन्ति मादयन्ति हर्षयन्ति तदाश्रितजनानिति भाष्यकारैर्व्याख्यातम्। यः त्रिधातु त्रिप्रकारं पृथिवीम् उत द्यां किं बहूक्त्या विश्वा विश्वानि सर्वाणि भुवनानि एको दाधार दधारेति ॥ ३ ॥

अथ विष्णुसंप्रदानकदाने पूजने परिचरणे च श्रुतिः—

'नूमर्तो दयते सनिष्यन् यो विष्णव उरुगायाय दाशत्।
प्र यः सत्राचा मनसा यजात एतावन्तं नर्यमाविवासात्'
(ऋग्वेदे ७।१००।१)।

अस्यार्थः। यो मर्तो मर्त्यो उरुगायाय बहुभिः कीर्त्यमानाय विष्णवे दाशत् दद्यात् यः सत्राचा समीचीनेन मनसा प्रयजते

भगवन्तमर्चयतीत्यर्थः। सः सनिष्यन् फलमिच्छन् नू क्षिप्रं दयते प्राप्नोति। अविशेषात्सर्वं प्राप्नोतीत्यर्थः। तत एतावन्तं महान्तं नर्यं नरेषु हितं विष्णुं आविवासात् वन्दनादिभक्त्या परिचरेदित्यर्थः। अनेन श्रवणकीर्तनादीनां सर्वेषां परिग्रहः ॥४॥

अथ दास्ये श्रुतिः—

'त्रिर्देवः पृथिवीमेष एतां वि चक्रमे शतर्चसं महित्वा।

प्र विष्णुरस्तु तवसस्तवीयान् त्वेषं ह्यस्य स्थविरस्य नाम'

(ऋग्वेदे ७।१००।३)।

अस्यार्थः—एष देवः शतर्चिषं शतं ऋचींषि यस्याः एतां पृथिवीं त्रींल्लोकानित्यर्थः। महित्वा महित्वे त्रिर्विचक्रमे विक्रान्तवानिति। सोऽयं विष्णुः प्रास्तु प्रभुरस्तु स्वामी भवत्वस्माकम्। 'एको दाधार भुवनानि विश्वा' इति वचनात्, स्वामिन एव स्वामित्वस्याप्रार्थनीयत्वाद्दासा वयं भवामेति तात्पर्याल्लभ्यते। तवसस्तवीयान् महतो महीयानित्यर्थः। किमिति तस्य दास्यं प्राार्थ्यते तत्राह हि यस्मादस्य स्थविरस्य पुराणपुरुषस्य नाम त्वेषं दीप्तं महत्। महतो हि दास्यमाशास्यं लोकानाम्। अनेन हेतुमन्निगदेन विष्णोर्दास्यमेव प्रार्थ्यतेऽस्मिन्मन्त्रे। अन्यथा स स्वामी अस्तु यतोऽस्य नाम महदित्यसम्बद्धं स्यात्। अस्माकं तद्दास्यमस्तु यतोऽस्य नाम महदिति तु युक्तम् ॥ ५ ॥

अथ विष्णोश्चरणोदकग्रहणे सख्ये च श्रुतिः—

'तदस्य प्रियमभि पाथो अश्यां नरो यत्र देवयवो मदन्ति।

उरुक्रमस्य स हि बन्धुरित्था विष्णोः पदे परमे मध्व उत्सः'। (ऋग्वेदे १।१५४।५)।

अस्यार्थः—अभिप्रियं रुच्यं तत्पाथः अस्यां पिबेयम्। तत्कि तदाह—यत् अस्य विष्णोः परमे पदे मध्वः मधुरस्य उत्सः निष्यन्दो वर्तते यत्र पाथसि पाने वा नरो नराः देवयवः देवं विष्णुं प्राप्तुमिच्छन्तो मदन्ति स हि पुरुषः इत्था इत्थं पानप्रकारेण उरुक्रमस्य विष्णोः बन्धुः सुहृद् वल्लभ इत्यर्थः। अथवा—सः इत्था इत्थं उरुक्रमस्य विष्णोः बन्धुः सखा भवेयमिति तदनेन सख्यं निर्दिश्यते। अस्यैव मन्त्रस्याऽर्थान्तरव्याख्यानेऽपि नेदं व्याख्यानमसमर्थमिति भवत्ये विष्णोश्चरणोदकग्रहणे सख्ये च लिङ्गम्॥ ६॥

अथ भगवदेकशरणतयाऽवस्थानात्मकात्मनिवेदने श्रुतिः—

'यो ब्रह्माणं विदधाति पूर्वं यो वै वेदांश्च प्राहिणोति तस्मै।
तं ह देवमात्मबुद्धिप्रकाशं मुमुक्षुर्वै शरणमहं प्रपद्ये'
(श्वेताश्व० ६।१८.)।

अस्यार्थः—अहं शरणं प्रपद्य इति शरणप्रपदनं भगवदेकशरणतयाऽवस्थानं आत्मनिवेदनभक्तिरभिधीयते मुमुक्षुरिति तस्या मोक्षफलकत्वम्। तच्च ज्ञानद्वारेति दर्शयति। आत्मबुद्धिप्रकाशं आत्मनां जीवानां बुद्धेः प्रकाशयितारं तत्त्वज्ञानप्रदमित्यर्थः। देवं द्योतनात्मकं तस्यैव सामर्थ्याऽतिशयमाह—यो ब्रह्माणमित्यादि। यद्वा, प्रपद्य इत्यत्र तकारलोपः छान्दसः। प्रपद्येतेत्यर्थः। अहं शब्दः किन्तु अहंकारोपहितजीवाऽभिधानमित्यास्तां विस्तरः॥ ७॥

अथ श्रवणकीर्तनादिसामान्यसेवने श्रुतिः—

'प्र विष्णवे शूषमेतु मन्म गिरिक्षित उरुगायाय वृष्णे।

य इदं दीर्घं प्रयतं सधस्थमेको विममे त्रिभिरित्पदेभिः'
(ऋग्वेदे १।१५४।३)।

अस्यार्थः—प्रकर्षेण शूषं बलं एते आयातु मन्म महत् किमर्थं विष्णव विष्णुं सेवितु गिरिक्षिते वाचि तिष्ठते, कस्यां वाचि तिष्ठते इत्यपेक्षायां उरुगायायेति सन्निधानात् यत्रैनं गायन्ति तस्यां वाचि विशेषेण तिष्ठत इति लभ्यते।

ततश्च—

'मद्भक्ता यत्र गायन्ति तत्र तिष्ठामि नारद'

इतिस्मृतमूलमेतत्। अतश्चाऽवश्यं ते सेवनीया इत्यर्थः। महत्त्वाऽतिशयमाह। य इदं दीर्घं प्रयतं नियतं सधस्थं स्थानं लोकत्रयं त्रिभिः पदेभिः एक इत एव विममे विक्रान्तवानिति ॥ ८ ॥

अपि च वेदार्थः सूक्ष्मो भवति। अतः पुराणेतिहासदर्शनेन जीवैर्निर्धार्यः। पुराणादिकं नु भक्तेरेव प्राधान्यं वक्ति, इत्यभिप्रेत्याह—

पुराणेतिहासाभ्याञ्चेति ॥ १० ॥

पुराणं भागवतादि, इतिहासः महाभारतादि, ताभ्यामपि भक्तिः प्रमेयेति। पूर्वसूत्रस्थपदाऽनुषङ्गो ज्ञातव्यः। चकारो भक्तौ प्रमाणाऽन्तरसमुच्चयार्थः।

तथा च भागवते—

तस्मादेकेन मनसा भगवान्सात्वतां पतिः।
श्रोतव्यः कीर्तितव्यश्च ध्येयः पूज्यश्च नित्यदा ॥ इति।
(१।२।१४)

महाभारते—

क्रियतां मद्वचः शिष्याः सेव्यतां हरिरीश्वरः ।
गीयतां वेदशब्दैश्च पूज्यतां च यथाविधि ॥

इति पुराणेतिहासाभ्याम् । एवमन्यान्यपि द्रष्टव्यानि । अत्र स्मृतिभ्य इति विहाय पुराणेतिहासाभ्यामिति कथनं तु कर्मार्थिक-मन्वादिस्मृतिभ्योऽपि भारतभागवतादीनामाधिक्यज्ञापनाय वेदोपबृंहणत्वात् । अत एव—

बिभेत्यल्पश्रुताद्वेदो मामयं प्रहरिष्यति ।
इतिहासपुराणाभ्यां वेदं समुपबृंहयेत्[1] ॥ इत्यादि ।

इतिहासपुराणानां प्रायो भक्तिपरत्वात्सर्वोपि वेदो भगवद्भक्तितात्पर्यक इति गम्यते इत्यन्यत्र विस्तरः ॥ १० ॥

शिष्टाचारादपि तथेत्यभिप्रेत्याह—

पृथुध्रुवप्रह्लादाऽम्बरीषशुकसनकनारद-भजनाचाराच्च ॥ ११ ॥

पृथुध्रुवेति । तत्र पृथोर्भजनाचारो यथा श्रीभागवते—

न कामये नाथ तदप्यहं कचि-
न्न यत्र युष्मच्चरणाऽम्बुजासवः ।
महत्तमाऽन्तर्हृदयान्मुखच्युतो
विधत्स्व कर्णाऽयुतमेष मे वरः ॥
(४।२०।२४)

---

१. श्लोकोऽयं महाभारते (आदि १।२६७-६८) उपलभ्यते, अत्र इतिहासेत्यादिवाक्यमादौ पठ्यते ।

ध्रुवस्य यथा तत्रैव—

या निर्वृतिस्तनुभृतां तव पादपद्म-
　　ध्यानाद्भवज्जनकथाश्रवणेन वा स्यात् ।
सा ब्रह्मणि स्वमहिमन्यपि नाथ मा भूत्
　　किं त्वन्तकासिलुलितात्पततां विमानात् ॥
(भाग० ४।९।१०)

अहो बत ममानात्म्यं मन्दभाग्यस्य पश्यत ।
भवच्छिदः पादमूलं गत्वा याचे यदन्तवत् ॥
(४।९।३१)

प्रह्लादस्य यथा तत्रैव—

यस्मात्प्रियाप्रियवियोगसयोगजन्म-
　　शोकाग्निना सकलयोनिषु दह्यमानः ।
दुःखौषधं तदपि दुःखमतद्धियाऽहं
　　भूमन् भ्रमामि वद मे तव दास्ययोगम् ॥
(७।९।१७)

अम्बरीषस्य यथा तत्रैव—

वासुदेवे भगवति तद्भक्तेषु च साधुषु ।
प्राप्तो भावं परं विश्वं येनेदं लोष्ट्रवत्स्मृतम् ॥
(९।४।१७)

स वै मनः कृष्णपदारविन्दयो-
　　र्वचांसि वैकुण्ठगुणाऽनुवर्णने ।
करौ हरेर्मन्दिरमार्जनादिषु
　　श्रुतिं चकाराऽच्युतसत्कथोदये ॥ इत्यादि ।
(९।४।१८)

शुकस्य यथा तत्रैव—

इत्थं स्म पृष्टः स तु बादरायणि-
स्तत्स्मारिताऽनन्तहृताऽखिलेन्द्रियः।
कृच्छ्रात्पुनर्लब्धबहिर्दृशिः शनैः
प्रत्याह तं भागवतोत्तमोत्तमम् ॥

(१०।१२।४४)

सनकस्य तथा तत्रैव—

कामं भवः स्ववृजिनैर्निरयेषु नः स्याच्
चेतोऽलिवद्यदनु ते पदयो रमेत।
वाचस्तु नस्तुलसिवद्यदि तेऽङ्घ्रिशोभाः
पूर्येत ते गुणगणैर्यदि कर्णरन्ध्रः ॥

(३।१५।४९)

नारदस्य यथा तत्रैव—

तत्राऽन्वहं कृष्णकथाः प्रगायता-
मनुग्रहेणाऽशृणवं मनोहराः।
ताः श्रद्धया मेऽनुसर्वं विशृण्वतः
प्रियश्रवस्यङ्ग ममाऽभवद्रतिः ॥

(१।५।२६)

उपलक्षणमेतत् स्वयम्भुशम्भुकुमारकपिलमनुजनकभीष्म-बलियमप्रभृतीनाम्। तत्र ब्रह्मणो यथा तत्रैव—

तावद्भयं द्रविणदेहसुहृन्निमित्तं
शोकः स्पृहा परिभवो विपुलश्च लोभः।

तावन्ममेत्यसदवग्रह आर्तिमूलो
यावन्न तेऽङ्घ्रियुगलं प्रवृणीत लोकः ॥
(३।९।६)

शम्भोर्यथाऽन्यत्र—

रकारादीनि नामानि शृण्वतो मम पार्वति ।
मनः प्रसन्नतामेति रामनामाऽभिशङ्कया ॥

यथा वा तत्रैव—

नारायणपराः सर्वे न कुतश्चन बिभ्यति ।
स्वर्गाऽपवर्गनरकेष्वपि तुल्यार्थदर्शिनः ॥
(६।१७।२८)

अथाऽनघाङ्घ्रेस्तव कीर्तितीर्थयो-
रन्तर्बहिः स्नानविधूतपाप्मनाम् ।
भूतेष्वनुक्रोशसुसत्त्वशीलिनां
स्यात्सङ्गमोऽनुग्रह एष नस्तव ॥ इत्यादि ।
(४।२४।५८)

कपिलस्य यथा श्रीभागवते—

न युज्यमानया भक्त्या भगवत्यखिलात्मनि ।
सदृशोऽस्ति शिवः पन्था योगिनां ब्रह्मसिद्धये ॥
(३।२५।१९)

मनोर्यथा तत्रैव—

तमीहमानो निरहङ्कृतं बुधं
निराशिषं पूर्णमनन्यनोदितम् ।

नॄन् शिक्षयन्तं निजवर्त्मसंस्थितं
प्रभुं प्रपद्येऽखिलधर्मवानहम् ॥
(८।१।१६)

जनकस्य यथाऽन्यत्र—

पुर्यां तु दह्यमानायां न मे दुःखं मनागपि ।
निश्चिता निजभृत्येषु दया भगवतः परा ॥
(तु० शान्ति० १०७।२)

भीष्मस्य यथा भागवते—

स्वनिगममपहाय मत्प्रतिज्ञा-
मृतमधिकर्तुमवप्लुतो रथस्थः ।
धृतरथचरणोऽभ्ययाच्चलद्गु-
र्हरिरिव हन्तुमिभं गतोत्तरीयः ॥
(१।९।३७)

बलेर्यथा—

यद्युत्तमश्लोक भवान्ममेरितं
वचो व्यलीकं सुरवर्य मन्यते ।
करोम्यृतं न प्रभवेत्प्रलम्भनं
पदं तृतीयं कुरु शीर्ष्णि मे निजम् ॥
(भाग० ८।२२।२)

यमस्य यथा तत्रैव—

जिह्वा न वक्ति भगवद्गुणनामधेयं
चेतश्च न स्मरति तच्चरणारविन्दम् ।
कृष्णाय नो नमति यच्छिर एकदाऽपि
तानानयध्वमसतोऽकृतविष्णुकृत्यान् ॥
(भाग० ६।३।२९)

एवमुपमन्यु-तण्डि-दधीचि-मार्कण्डेयादीनां शैवानामपि भजनाचारा उदाहार्याः ।

तत्रोपमन्योर्यथा महाभारते—

अपि कीटः पतङ्गो वा भवेयं शङ्कराज्ञया ।
न तु शक्र त्वया दत्तं त्रैलोक्यमपि कामये ॥
(अनुशा० १४।१८६)

तण्डेर्यथा तत्रैव—

जन्मकोटिसहस्रेषु नानासंसारयोनिषु ।
जन्तोर्विशुद्धपापस्य भवे भक्तिः प्रजायते ॥
(अनुशा० १७।१६४)

दधीचेर्यथाऽन्यत्र—

न राजते दक्षसभा शिवचैतन्यवर्जिता ।
अपि भृग्वादिसहिता मृतकानां यथा बलिः ॥

मार्कण्डेयस्य यथा स्कन्दपुराणे—

हरहरशब्दमादितो वै
मुहुरभिधाय मुनीन्द्रवृन्दवर्यः ।
अपरुदखिलमेघघोषतुल्यं
सकलहिताय 'नमः शिवाय' शब्दम् ॥

एते सर्वे साधनसिद्धा भक्ताः । कृपासिद्धास्तु यज्ञपत्न्यः । तदुक्तं श्रीभागवते ।

नाऽऽसां द्विजातिसंस्कारो न निवासो गुरावपि ।
न जपो नाऽऽत्ममीमांसा न शौचं न क्रियाः शुभाः ॥
(१०।२३।२४)

अथाऽपि ह्युत्तमश्लोके कृष्णे योगेश्वरेश्वरे ।
भक्तिर्दृढा न चाऽस्माकं संस्कारादिमतामपि ॥ इति ।
(१०।२३।४३)

नित्यसिद्धास्तु गोप्यः ।

आत्मकोटिगुणकृष्णप्रेमाणं परमं गताः ।
नित्यानन्दगुणाः सर्वा नित्ययुक्ता हरौ मुदा ॥

साधकभक्तास्तु कथञ्चिदुत्पन्नमतयः साक्षात्कृतौ योग्याः ।

ईश्वरे तदधीनेषु बालिशेषु द्विषत्सु च ।
प्रेममैत्रीकृपोपेक्षा यः करोति स मध्यमः ॥
(भाग० ११।२।४६)

इत्यादिनोक्ताः द्वितीये वक्ष्यन्ते । चकारः सूत्रे प्रमाणाऽन्तरसमुच्चयाऽर्थः ॥ ११ ॥

ज्ञानवद्योगोऽपि यदि भक्त्यङ्गमेव तथाऽपि न केवलं भक्त्यङ्गं किन्तु ज्ञानस्याऽप्यङ्गम् । अतो योगो नाऽन्तरङ्गं किन्तु बहिरङ्गमित्यभिप्रायवानाह—

योगस्तूभयाऽर्थमपेक्षणात् प्रयाजाऽऽदिवत् ॥ १२ ॥

योगस्तूभयाऽर्थमिति । योगः पुनर्ज्ञानार्थं भक्त्यर्थञ्च समाहितमनस्कताया उभाभ्यामपेक्षणात् । भक्तिर्यद्यपि माहात्म्यज्ञानमात्रेणैव सम्भवति समाहितमनस्कत्वमपि नाऽपेक्षते तथाऽपि सा तेन दृढीभवतीति तथोक्तम् । ननु 'गुणानाञ्च पराऽर्थत्वादसम्बन्धः समत्वात्स्यात्' (मीमांसा सू० ३।१।२२) इति न्यायात् प्रधानाङ्गयोगस्य कथमङ्गाऽङ्गित्वमित्यत आह—प्रयाजवदिति । यथा प्रयाजो वाजपेयाऽऽदेरङ्गं तदङ्गदीक्षणीयादेरप्यङ्गम्,

तद्वदङ्गत्वबोधकप्रमाणाऽविशेषात् केवलं ज्ञानाऽर्थं योगानुष्ठानं प्रसङ्गेन भक्तिमुपकरोतीति भावः। वृत्तिसामान्यनिरोधमात्र-रूपस्याऽसम्प्रज्ञातस्यापि स्वजन्याऽदृष्टाऽऽदिद्वारा कैवल्योपधायक-ज्ञानं प्रत्येव विवेकतो हेतुत्वलाभात्। उक्तञ्च—

यत्साङ्ख्यैः प्राप्यते स्थानं तद्योगैरपि गम्यते।
एकं सांख्यं च योगं च यः पश्यति स पश्यति ॥
(गीता ५।५)।

इत्यादि। एवं विषयवैराग्यमप्युभयाऽर्थं मन्तव्यम्।

असेवयाऽयं प्रकृतेर्गुणानां
ज्ञानेन वैराग्यविजृम्भितेन।
योगेन सर्वाऽर्पितया च भक्त्या
मां प्रत्यगात्मानमिहाऽवरुन्धे ॥
(भाग० ३।२५।२७)

ज्ञानवैराग्ययुक्तेन भक्तियोगेन योगिनः।
क्षेमाय पादमूलं मे प्रविशन्त्यकुतोभयम् ॥
(३।२५।४३)

इत्युक्तेः। परवैराग्ये सति फलाऽन्तरे प्रेम्णोऽनुत्पादात्। परमाऽऽनन्दरूपेण परमाऽत्मन्येव प्रेमा परां काष्ठामारोहति। अपरवैराग्यं विना ज्ञानाऽभावात्। ज्ञानेन विना परवैराग्याऽ-भावात्। योगं विना वासनाया अनिवृत्तेस्तदवृत्ते च प्रेमपरम-काष्ठाया अनुदयात्। तदर्थं ज्ञानवैराग्याणि दृढीकर्तव्यानीति तात्पर्याऽर्थः ॥ १२ ॥

ननु भक्तेः प्राधान्यम् 'ईश्वरप्रणिधानाद्वा' (१।२३) इत्यनेन योगसूत्रेण भक्तेर्योगसाधनताबोधकेन विरुध्यते तत्राऽऽह—

गौण्या तु समाधिसिद्धिः ॥ १३ ॥

गौण्येति । तत्र प्रणिधानं गौणभक्तिरेव न प्रधानम्, तया समाधेर्योगस्य सिद्धिरिति न तद्विरोधोऽपीति । भवति च वाक्यशेषः तत्रैव 'तज्जपस्तदर्थभावनम्' (१।२८) इति । अत एवाऽनावश्यकेषु नियमेषु प्रणिधानं गणितम् ॥ १३ ॥

स्यादेतत् । रागरूपा भक्तिस्तु कथं मुख्या रागस्य योगशास्त्राऽऽदौ क्लेशेषु गणनेन हेयत्वज्ञापनादित्याऽऽशङ्क्य समाधत्ते—

हेया रागत्वादिति चेन्नोत्तमाऽऽस्पदत्वात् सङ्गवत् ॥ १४ ॥

हेयेति । लौकिकरागवदुक्ता भक्तिरपि मुमुक्षुणा हेया, रागत्वादिति चेन्न । कुतः उत्तमाऽऽस्पदत्वात् संसारोद्धारकपरमेश्वरविषयत्वाद्भक्तेरित्यर्थः । उत्तमाऽऽस्पदस्याऽहेयत्वे दृष्टान्तमाह—सङ्गवदिति । यथोत्तमाऽनुगुणः सत्सङ्गो न हेयः किन्त्वसत्सङ्ग एव । तथा संसाराऽनुगुणो रागो हेयो न मोक्षाऽनुगुण इत्यर्थः । तथा च केवलरागत्वहेतुकहेयत्वसाध्यकाऽनुमाने संसाराऽनुबन्धित्वं मोक्षाऽननुगुणत्वञ्चोपाधिरिति भावः ॥ १४ ॥

प्रासङ्गिकं परिसमाप्य भक्तेः प्रसाधितमुख्यत्वमुपसंहरन् हेत्वन्तरतोऽपि द्रढयति—

तदेव कर्मिज्ञानियोगिभ्य आधिक्यशब्दात् ॥ १५ ॥

तदेवेति । तदेव गौण्या समाधिरित्येव प्रेमलक्षणं भजनं मुख्यमित्येव । कुतः कर्मिज्ञानियोगिभ्य आधिक्यशब्दात् ।

तपस्विभ्योऽधिको योगी ज्ञानिभ्योऽपि मतोऽधिकः ।
कर्मिभ्यश्चाऽधिको योगी तस्माद्योगी भवाऽर्जुन ॥
(गीता ६।४६)

योगिनामपि सर्वेषां मद्गतेनाऽन्तराऽऽत्मना ।
श्रद्धावान् भजते यो मां स मे युक्ततमो मतः ॥
(गीता ६।४७) ।

इति भक्तेराधिक्यशब्दश्रवणादित्यर्थः । अत्र ज्ञानी परोक्षज्ञानी योगस्याऽपरोक्षज्ञानपूर्वभाविनस्तस्मादाधिक्याऽसम्भवात् । अत्र विशेषणानां तप आदीनामाधिक्याद्विशेष्याणामाधिक्यं क्रमात् । न खल्वङ्गस्य मुख्यादाधिक्यं सम्भवति । तस्माद्भक्तिः प्रधानमिति भावः ॥ १५ ॥

प्रशंसापरत्वमपाकरोति—

प्रश्ननिरूपणाभ्यामाधिक्यसिद्धेः ॥ १६ ॥

प्रश्नेति । 'श्रुतं ह्येव मे भवादृशेभ्यस्तरति शोकमात्मवित्' (छान्दोग्य० ७।१।३) इति प्रश्नेन 'स वा एष एवं पश्यन्नेवं मन्वान एवं विजानन्नाऽऽत्मरत आत्ममिथुन आत्माऽऽनन्दः स स्वराड् भवति' (छान्दोग्य० ७।२५।२) इत्युत्तरेण च मोक्षहेतुत्वेनाऽऽधिक्यसिद्धेरित्यर्थः ।

केचित्तु—प्रश्नोऽर्जुनस्य 'एवं सततयुक्ता ते भक्तास्त्वां पर्युपासते' (गीता १२।१) इत्याऽऽदि निरूपणं समाधानं भगवतः 'सर्वत्रगमचिन्त्यं च कूटस्थमचलं ध्रुवम्' (गीता १२।१) इत्याऽऽदिना निर्गुणाऽनुसन्धानं सफलमुक्त्वा 'ये तु सर्वाणि कर्माणि मयि संन्यस्य मत्पराः' (गीता १२।६) इत्याऽऽदिना सगुणभक्तिमुपक्रम्य—

'तेषामहं समुद्धर्ता मृत्युसंसारसागरात्'

(गीता १२।७)

इत्याऽऽदिना तत्फलकथनरूपम्। ताभ्यामाधिक्यसिद्धेर्भक्तेः प्राधान्यनिश्चयादिति भावः। अत एव नाऽर्थवादत्वमपीति मन्तव्यम्। प्रश्नोत्तरे हि निर्णयाऽर्थं भवतः न स्तुत्यर्थम्, तथैव सर्वत्र दर्शनात्। अतः केवलाऽज्ञानुष्ठाने क्लेशाऽऽधिक्यमेव—

श्रेयः सृतिं भक्तिमुदस्य ते विभो
क्लिश्यन्ति ये केवलबोधलब्धये।
तेषामसौ क्लेशल एव शिष्यते
नान्यद्यथा स्थूलतुषाऽवघातिनाम्॥

(भाग० १०।१४।४)

इति स्मृतेः—इति वदन्ति।

तच्चिन्त्यम्।

गीताद्वादशे—

क्लेशोऽधिकतरस्तेषामव्यक्ताऽसक्तचेतसाम्।
अव्यक्ता हि गतिर्दुःखं देहवद्भिरवाप्यते॥

(१२।५)

इति निर्गुणोपासनस्य निर्गुणसाक्षात्कारतदनुरागद्वारा मोक्षहेतोर्दुःसाध्यत्वोक्ते सुसाध्यसगुणोपासनस्य क्रममुक्तिहेतोराधिक्यकथनस्य प्रशंसापरत्वस्याऽऽवश्यकत्वात्। अन्यथा तदग्रेऽभिहितस्य—

श्रेयो हि ज्ञानमभ्यासाज्ज्ञानाद्ध्यानं विशिष्यते।
ध्यानात् कर्मफलत्यागस्त्यागाच्छान्तिरनन्तरम्॥

(गीता १२।१२)

इति वाक्यस्याऽपि यथाश्रुतार्थे प्रामाण्याऽऽपत्तेः। अत एव निर्विशेषब्रह्मबोधमार्गस्य मुख्यत्वम्।

निर्विशेषं परं ब्रह्म साक्षात्कर्तुमनीश्वराः।
ये मन्दास्तेऽनुकम्प्यन्ते सविशेषनिरूपणैः॥

इत्यादिवाक्ये प्रतीयत इत्याऽऽस्तां विस्तरः॥ १६॥

'श्रद्धावान् भजते यो माम्' (गीता ६।४७) इत्यत्र श्रद्धाया अप्यावश्यकत्वज्ञापनाच्छ्रद्धैव मुख्याऽस्तु इत्याऽऽशङ्कां निराकरोति—

नैव श्रद्धा तु साधारण्यात्॥ १७॥

नैवेति। श्रद्धा नैव मुख्या मन्तव्या। कुतः सा ज्ञानयोगभक्तिकर्मसु सर्वत्र श्रद्धायाः सहकारितयाऽपेक्षणात्। तथा च कर्माऽऽद्यङ्गत्वान्न श्रद्धा मुख्यत्वेन कदाऽपि शङ्क्या भगवद्भक्तिस्तु रतिरूपा नैवमतो मुख्यैवेति भावः॥ १७॥

मुख्यत्वे दोषान्तरमप्याऽऽह—

तस्यां तत्त्वे चाऽनवस्थानात्॥ १८॥

तस्यामिति। तस्यां श्रद्धायां तत्त्वे च मुख्यत्वे चाऽनवस्थानात्। सर्वस्य मुख्यस्य श्रद्धासापेक्षत्वात्तत्र तत्र श्रद्धाऽपेक्षायामनवस्थाप्रसङ्गादिति भावः॥ १८॥

प्राचीनास्तु सूत्रद्वयमिदं भक्तेः श्रद्धारूपत्वनिराऽऽकरणपरतया योजयन्ति। तथा हि-भक्तिर्न श्रद्धाऽऽत्मा सर्वविहिताऽङ्गत्वात्।

ननु भक्तेरप्यङ्गत्वं वक्ष्यत एवेति तुल्यमित्यत आह—तस्यामिति। तस्यां भक्तौ तत्त्वे श्रद्धात्वेऽनवस्थानात्। 'श्रद्धावान् भजते यो माम्' (गीता ६।४७) इत्यनेन श्रद्धायामपि श्रद्धाऽपेक्षा तव मते प्राप्तेत्यनवस्था स्यादिति भावः। ननु यथा सिद्धान्ते मोक्षहेतुपरमातिशयिताऽनुरागस्य कीर्तनाऽऽदिसम्प्रयोत्थाऽनुरागसाध्यत्वेऽपि नाऽनवस्था तथा तादृशश्रद्धाया निरुक्तश्रद्धासाध्यत्वेऽपि को दोष इति चेन्न। श्रद्धधे भजे इत्यध्यक्षविषययोर्वैलक्षण्याऽनुभवात्। अत एव श्रद्धाभक्तिसमन्वित' इति भेदव्यपदेशः। अथवा—योगवच्छ्रद्धा किमित्यङ्गतया नोच्यते तत्राह—साधारण्यात् वक्ष्यमाणगौणभक्तावप्यपेक्षितत्वात् स्वातन्त्र्येण नोच्यते किन्तु कीर्तनाऽऽदिकथनेनैवोक्तप्राया मन्तव्या। ननु कीर्तनाऽऽदौ श्रद्धाऽपेक्षायामविशेषाच्छ्रद्धायामपि तदपेक्षाऽऽपत्तिरित्यत आह—तस्यामिति। श्रद्धायाः श्रद्धाऽपेक्षकत्वेऽनवस्था, तथा चैतद्दोषभियैव न तत्र श्रद्धाऽपेक्षेति भावः॥ १८॥

ब्रह्मकाण्डन्तु भक्तौ तस्याऽनुज्ञानाय सामान्यात्॥ १९॥

इति शाण्डिल्यसूत्रे द्वितीयमाह्निकम्।

इति प्रथमोऽध्यायः॥

ब्रह्मकाण्डमिति। श्रवणाऽऽद्यर्थको वेदान्तभागस्तस्य ब्रह्मणो भक्तौ निमित्तसप्तमी भक्तिनिमित्तमित्यर्थः। किंद्वारा तत्राऽऽह—अनुज्ञानायेति। अनु शास्त्रीयज्ञानात्पश्चाद्विज्ञानं तदर्थमित्यर्थः। ननु कथमुच्यते भक्तिनिमित्तं विज्ञानार्थञ्चेति। तत्राऽऽह—सामान्यादिति। ज्ञानभक्त्योरङ्गाऽङ्गिनोरेकाऽर्थत्वात् एकप्र-

योजनकत्वादिति यावत्। तथा च' 'आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः (बृहदा० २।९।५) इत्याऽऽदिवेदान्तवाक्यैर्भक्त्यर्थमेव ज्ञानोद्देशेन श्रवणाऽऽदिकं विधीयते, न ज्ञानप्राधान्येन। अतो न कोऽपि विरोध इति भावः। परे तु 'ब्रह्मकाण्डन्तु भक्तौ तस्य न ज्ञानाय' इति पाठान्तरमनुसृत्याऽवतार्याऽन्यथा व्याचख्युः। यथा—ननु ज्ञानाऽप्राधान्ये ज्ञानकाण्डमित्युत्तरकाण्डप्रसिद्धिर्न स्यादिति मन्वानम्प्रत्याह—ब्रह्मकाण्डमिति। तस्य ब्रह्मणो भक्त्यर्थं ज्ञानकाण्डं श्रूयते न ज्ञानाऽर्थम् अज्ञाताऽर्थज्ञापनस्य काण्डद्वयसाधारण्यात्। अन्यथा धर्मज्ञापनाऽर्थं पूर्वकाण्डाऽऽम्नातमपि ज्ञानकाण्डं स्यात्। न च ज्ञाने विधिः सम्भवति येन तत्प्राधान्यादपि ज्ञानकाण्डं भवेदिति तस्माज्ज्ञानकाण्डमिति भ्रमः, किन्तु ब्रह्मकाण्डमिति। अत एव 'अथाऽतो ब्रह्मजिज्ञासा' (ब्र० सू० १।१।१) इति सूत्रितं तत्तु भक्त्यर्थत्वाद्भक्तिकाण्डमिति। तदेतन्नाऽतिरमणीयम्। भक्त्यर्थत्वज्ञानाऽर्थत्वयोरविरोधात्। प्रधानाऽङ्गत्वाऽङ्गाङ्गत्वयोरविरोधस्य प्रयाजाऽऽदौ कथनादित्यास्तां विस्तरः॥ १९ ॥ ६ ॥

अस्मिन्नध्याये प्रथमाऽऽह्निके भक्तिस्वरूपनिर्णयः द्वितीयाह्निके भक्तेरेव मुख्यत्वसमर्थनम्॥

इति नारायणतीर्थकृतायां शाण्डिल्यसूत्रवृत्तौ
भक्तिचन्द्रिकायां प्रथमाऽध्यायस्य
द्वितीयमाह्निकम्॥

॥ समाप्तश्च प्रथमोऽध्यायः॥

अथ द्वितीयोऽध्यायः ।

प्रथममाह्निकम् ।

जातवैराग्यस्य भगवत्कृपामात्रेण भगवद्भक्तिनिष्पत्तिर्ज्ञापिता प्रथमेऽध्याये। सञ्जातविवेकवैराग्यस्याऽपरिपक्वस्य तु तादृशभक्तिसाधनानामभ्यासं स्वरूपं च द्वितीये वदति—

बुद्धिहेतुप्रवृत्तिराविशुद्धेरवघातवत् ॥ १ ॥

बुद्धीति। बुद्धिर्ब्रह्मप्रतिपत्तिस्तद्धेतूनां श्रवणमनननिदिध्यासनानां प्रवृत्तिः-असकृदावृत्तिः, आविशुद्धेः भक्तिपरिशुद्धिपर्यन्तं कार्येत्यर्थः। अदृष्टद्वारकस्यैव सोमादेः सकृदनुष्ठानेनाऽपि फलजनकता। ज्ञानादीनां तु मनोमालिन्यनिरासादिरूपदृष्टद्वारकत्वात् सम्यग् भक्त्युदयपर्यन्तमभ्यासः कार्य एवेति यावत्। अदृष्टद्वारकस्यैव सकृदनुष्ठानं दृष्टद्वारकस्य त्वसकृदित्यत्र दृष्टान्तमाह—अवघातवदिति। यथा व्रीहीनवहन्तीत्यनेन विहितव्रीह्यवघातस्य यावद्वैतुष्यमनुष्ठानं शास्त्राऽर्थो दृष्टोपकारकत्वात्तद्वदित्यर्थः। अत एवाऽऽह भगवान् बादरायणः 'आवृत्तिरसकृदुपदेशात्' (ब्र० सू० ४।१।१) इति। इदन्तु बोध्यम्। दृष्टाऽर्थत्वेऽपि विचारस्य 'स्वाऽध्यायोऽध्येतव्यः' (शतपथ० ११।५।७।२) 'श्रोतव्यः श्रुतिवाक्येभ्यः' इति पुराणादिनिरासे च वेदान्तनियमोऽदृष्टाऽर्थं इति तददृष्टं साक्षात्कार

उपयुज्यत इति। एवं मननस्य युक्तिचिन्तनरूपत्वेऽपि 'मन्तव्यश्चोपपत्तिभिः' इत्युपपत्तिचिन्तनोपदेशाद् द्वैतस्य त्रैकालिकाऽऽभावप्रतियोगित्वरूपौपाधिकत्वाऽभावे ज्ञानेन नाशो न स्यादित्यार्षयुक्त्यनुसन्धाननियमोऽपि। एवं ध्यानाश्रित आसीनत्वादिनियमश्च बोध्यः ॥ १ ॥

न केवलं ज्ञानाऽऽदीन्येवाऽसकृत् सेव्यानि, किन्तु तदङ्गानि शान्तिदान्तिप्रभृतीन्यपीत्याऽऽह—

तदङ्गानाञ्च ॥ २ ॥

तदङ्गानाञ्चेति। तदङ्गानाञ्च 'शान्तो दान्त उपरतस्तितिक्षुः समाहितो भूत्वाऽऽत्मन्येवाऽऽत्मानं पश्यति' (बृहदा० ४।४।२३) इत्यादिश्रुतिबोधितानां ज्ञानाद्यङ्गानां शान्त्यादीनामप्यसकृदावृत्तिः कार्येत्यर्थः। यद्यपि परमाऽऽत्मरतिः साधनाऽऽत्मप्रमाणत एव भवति न तत्र साधनाऽन्तराऽपेक्षा तथाऽप्यप्रामाण्यशङ्कयाऽसम्भावनया विपरीतभावनया विषयवासनया च कलुषीकृतज्ञानं न फलाय कल्पत इति तत्राऽप्रामाण्यशङ्कानिरासाय श्रवणस्याऽसम्भावनानिरासाय मननस्य विपरीतभावनानिरासाय निदिध्यासनस्य विषयवासनानिरासाय शमदमाऽऽदीनामभ्यासः कार्य इति भावः ॥ २ ॥

साङ्गा बुद्धिरभ्यसनीयेत्युक्तम्। तत्र बुद्धिः किं भेदविषया उताऽभेदविषया वाऽभ्यसनीया। मतभेदेन द्वयोः श्रवणादित्याऽऽशङ्क्य यथाऽधिकारं द्विविधाऽप्यभ्यसनीयेति स्वमतं वदिष्यन् आदौ भेदरुचेः काश्यपस्य मतमाह—

तामैश्वर्यपदां काश्यपः परत्वात् ॥ ३॥

तामैश्वर्येति । तां ब्रह्मप्रतिपत्तिं परमैश्वर्याऽऽदिमद्विषयिणीं निःश्रेयसफलां काश्यपाऽऽचार्यो मन्यते । कुतो जीवाऽऽत्मभ्यः परत्वात् । तैः स्वज्ञानाय परज्ञानस्याऽपेक्षितत्वात् । अदृष्टविशेषजनकपरज्ञानं विना विरोधिविषयकत्वेन भ्रमनिवर्तकस्य स्वज्ञानस्याऽसम्भवादिति भावः । अत एवैतन्मते 'द्वा सुपर्णा' (ऋग्वेद १।१६४।२०) इत्याऽऽदिश्रुतिमूलको जीवब्रह्मणोरत्यन्तं भेद इत्यास्तां विस्तरः ॥ ३ ॥

नैतद्युक्तम् । स एष तत्त्वमसीत्यात्माऽवगम्याऽहं ब्रह्माऽस्मीत्यादिविरोधात् । अतो भजनीयान्नाऽतिरिक्तः कश्चनोऽहश्चेत्याकारिकाऽभेदप्रज्ञैवाऽभ्यसनीया । एवं जानत एव 'ये यथा माम्' (गीता ४।११) इति न्यायेन भगवत्सम्पत्तिरूपमोक्षलाभसम्भवादित्यभिप्रायवतो भगवतो बादरायणस्य मतमाह—

आत्मैकपदां बादरायणः ॥ ४ ॥

आत्मैकेति । आत्मा सर्वाऽधिष्ठानमेकोऽद्वितीयः पदं विषयो यस्यास्तादृशीं अखण्डाऽर्थविषयिणीमिति यावत् । बादरायण आचार्यो भगवान् मनुते व्यासः । 'आत्मेति तूपगच्छन्ति ग्राहयन्ति च' (ब्रह्मसूत्र ४।१।३) इति सूत्रैरित्यर्थः । एतन्मते जीवेश्वरविभागस्य लोकप्रसिद्धस्य 'द्वा सुपर्णा' इति श्रुत्याऽनूदितस्य मिथ्यात्वादखण्डार्थ धियोऽबाधिताऽज्ञाताऽर्थकत्वेन प्रमात्वात् सैव मोक्षफलाय वाक्यान्वयादित्यधिकारणैरपि 'आत्मा वाऽरे द्रष्टव्यः' (बृहदा० २।४।५) इत्यादिश्रुतेरभेदपरत्वनयनेनाऽखण्डाऽर्थस्यैव

मोक्षफलकत्वज्ञापनात्। एतेन जीवेभ्यः स्वभावतो भिन्नस्येश्वरस्य यदैश्वर्यं तस्याऽकाल्पनिकत्वात्तत्त्वसाक्षात्कारविषयत्वं युक्तम्। तथा च सगुणविषयमेव ज्ञानं मोक्षहेतुः। 'तमेव विदित्वा' (श्वेताश्व० ३।८) इत्यत्रैवकारेण तु प्रक्रान्तविशिष्टाऽतिरिक्तस्यैव व्यवच्छेद इति निरस्तम्। 'अथाऽत आदेशो नेति नेति' (बृहदा० २।३।६)' 'नेह नानास्ति किञ्चन' (बृहदा० ४।४।१९) इत्यादिवाक्यात्तदैश्वर्यस्यापि काल्पनिकत्वाऽवगमात्तत्त्वानुप्रवेशाऽभावेन तत्त्वसाक्षात्कारविषयत्वाऽयोगात्। अत एव 'तमेव' (श्वेताश्व० ३।८) इत्यादिश्रुतावपि साक्षात्कारस्य तदतिरिक्ताऽविषयत्वपर एवैवकार इत्याऽऽस्तां विस्तरः ॥ ४ ॥

काश्यपमतस्य दासोऽहमिति बुद्धौ पर्यवसानाद्बादरायणमतस्य सोऽहमिति बुद्धौ पर्यवसानात्, अत एव बुद्धिद्वयस्याऽपि फलतो भ्रमविरोधिविषयकत्वेन स्वाऽनर्थोच्छेदक्षमत्वात् प्रामाण्यमेवेति यथाऽधिकारं द्वयमपि युक्तमेवेति स्वमतमाह—

उभयपदां शाण्डिल्यः शब्दोपपत्तिभ्याम् ॥ ५ ॥

उभयेति। शाण्डिल्य आचार्य उभयपदां भेदविषयामभेदविषयां च मन्यते। कुतः शब्दोपपत्तिभ्याम्। उदाहृतभेदाऽभेदश्रुतिभिः फलतोऽनर्थोच्छेदक्षमत्वस्य तुल्यतायुक्तिभिश्चेत्यर्थः। भगवानपि तथाऽभिप्रेत्याऽऽह—

ज्ञानयज्ञेन चाऽप्यन्ये यजन्तो मामुपासते।
एकत्वेन पृथक्त्वेन बहुधा विश्वतोमुखम्॥

(गीता० ९।१५)

इति । ऋषिरप्याह—

सोऽहं दासोऽहमिति वा बुद्धिर्यस्य दृढाऽमला ।
कर्मभिर्न स बध्यते अकर्तृत्वाच्च देववत् ॥ इति ॥ ५ ॥

ननु भेदाऽभेदयोर्विरोधात् कथमुभयपदाऽर्थकश्रुतीनां प्रामाण्यं स्यादित्याशङ्क्य विशिष्टशुद्धवेशेन भेदाऽभेदयोरविरोधात्तादृशाऽर्थानामुपपद्यते प्रामाण्यमित्याशयवानाऽऽह—

वैषम्यादसिद्धमिति चेन्न प्रत्यभिज्ञावदवैशिष्ट्यात् ॥६॥

वैषम्यादिति । ननु श्रुतेरुभयाऽर्थे प्रामाण्यमसिद्धं बाधितम्, कुतः वैषम्यात् । भेदाऽभेदयोः प्रतियोगितदभावरूपतया विरोधेन परस्परविरुद्धतदुभयविषयकत्वादिति चेन्न । कुतः ? प्रत्यभिज्ञावदवैशिष्ट्यात् । सोऽहं देवदत्तः सोऽहमिति प्रत्यभिज्ञायामिव विशिष्टयोर्भेदेऽपि केवलयोरभेदसम्भवादित्यर्थः । न च विशिष्टभेदे मानाऽभावः, परोक्षत्वापरोक्षत्वादिकयोर्विरुद्धधर्मयोरसाङ्कर्याय तदभ्युपगमात् । एतेन जीवेशविशेषणयोरविद्याऽन्तःकरणयोर्मायाऽविद्ययोर्वा देशकालकृतविरोधे मानाऽभावादविरुद्धतद्विशिष्टयोर्भेदे मानाऽभाव इति निरस्तम् । विशिष्टयोरभेदेऽन्यतरविशेषणविशेष्ययोरन्यतरविशेषणविशेष्याभ्यामभेदापत्तेरन्यथा तयोर्विशेषणत्वाऽयोगात् । विशेष्यस्याऽन्वयिनाऽन्वयित्वे सति व्यावर्तकस्यैव विशेषणत्वात् । तस्माद्विशिष्टयोर्भेद एवेत्यन्यत्र विस्तरः ॥ ६ ॥

नन्वेकस्य भगवतो विभेदकविरुद्धधर्मसम्बन्ध एव कुतः ? न हि स्वतन्त्रस्य सर्वज्ञस्य तद्युक्तम् । ननूपाधिवशात्तथेति चेत् ।

तर्ह्युपाधेरेव प्राबल्यात् सदा बद्ध एव स्यादिति नित्यमुक्त ईश्वरो न स्यादित्याऽऽशङ्क्य यथा निर्मातृचित्तावऽच्छेदेन पूर्णो जानन्नपि सर्वं योगी कायव्यूहादौ स्वसङ्कल्पान्निर्माणचित्ताऽवच्छेदेन किञ्चिदज्ञ एव सन् तारतम्येन वर्तते, तथा ज्ञानादिशक्तिमान् स्वतः पूर्णोऽपि भगवान् स्वसङ्कल्पकृतचित्ताद्युपाध्यन्तरं स्वविहाराऽर्थमेव विरुद्धाऽनेकधर्मवान् भवति। अतो न कोऽपि दोष इत्यभिप्रायवानाह—

न च क्लिष्टः परः स्यादनन्तरं विशेषात् ॥ ७ ॥

न च क्लिष्ट इति। परो भगवान् क्लिष्टः जीवोपाधिक्लेशादिमानेव स्यादिति न च नैव शक्यं वक्तुम्। कुतः तदनन्तरं विशेषात्। स्वसङ्कल्पकृतोपाध्यनन्तरं तारतम्यात्। तथा च स्वसङ्कल्पसृष्टोपाध्यवच्छेदेनैव योगिन इवाऽपूर्णत्वं न तु स्रष्टुरुपाध्यवच्छेदेन। अतो न कोऽपि विरोध इति भावः। श्रीभागवतेऽपि—

भगवानेक एवैष सर्वक्षेत्रेष्ववस्थितः।
अमुष्य दुर्भगत्वं वा क्लेशो वा कर्मभिः कुतः ॥ इति।
(३।७।६)

विदुरप्रश्ने—

सैषा भगवतो माया यन्न येन विरुध्यते।
ईश्वरस्य विमुक्तस्य कार्पण्यमुत बन्धनम् ॥
(भाग० ३।७।९)

इत्याऽऽदिमैत्रेयसमाधाने महाभारते च पर एव जीवभावं प्राप्नोतीति न सम्यक्। परस्य नियोज्यब्रह्मत्वात्। सेव्यसेवकभावस्य भेद एवोपपत्तेश्चेत्यभिप्रायवतो धृतराष्ट्रस्य—

कोऽसौ नियुङ्क्ते तमजं पुराणं
स चेदिदं सर्वमिदं क्रमेण ।
किं वाऽस्य कार्यमथवा सुखञ्च
तन्मे विद्वन् ! ब्रूहि तत्त्वं यथावित् ॥
(उद्योग० ४२।१९)

इति प्रश्नेऽभेदपक्षेऽनिर्वाच्यसम्भवेऽपि वस्तुतो न सम्भवतीति दोषमात्रम्। भेदवादे तु जीवस्य ज्ञानेन ब्रह्मप्राप्तिरेव न स्यादिति महान् दोषः। अन्यस्याऽन्यात्मत्वाऽयोगादित्यभिप्रायवतः **सनत्कुमारस्य**—

दोषो महानत्र विभेदयोगे
ह्यनादियोगेन भवन्ति नित्याः ।
तथाऽस्य नाधिक्यमपैति किञ्चिद्
अनादियोगेन भवन्ति पुंसः ॥
(४२।२०)

य एतद्वा भगवान् स नित्यो
विकारयोगेन करोति सर्वम् ।
यथा च तच्छक्तिरिति स्म मन्यते
तथाऽर्थयोगे च भवन्ति वेदाः ॥
(४२।२१)

इति समाधाने चाऽयमेवाऽर्थः समर्थितः ।

यथा ह्ययं ज्योतिरात्मा विवस्वान्
अपो भिन्ना बहुधैकोऽनुगच्छन् ।
उपाधिना क्रियते भेदरूपो
देवः क्षेत्रेष्वेवमजोऽयमात्मा ॥

इत्यादिश्रुतिप्रमाणादित्यास्तां विस्तरः ॥ ७ ॥

श्रीमद्रामानुजाचार्यास्तु

पिबन्ति नानाऽविषयमसङ्ख्याताः कुमारकाः ।
एकस्तु पिबते देवः स्वच्छन्देन वशाऽनुगः ॥
(मन्त्रिकोप० ६)

इति श्रुतेर्जीवानां बहुत्वं भोक्तृत्वमीश्वरस्यैवैकत्वं प्रयोजकत्वं च वास्तवमिच्छन्तः सूत्रद्वयमिदमन्यथा योजयन्ति। तथाहि–उभयपदत्वं प्रज्ञाया असिद्धं बाधितम्। कुतः ? वैषम्यात्, भेदाऽभेदयोर्विरोधात्। भिन्नयोरभेदस्य अभिन्नयोश्चाऽभेदस्य बाधात्, प्रतियोग्यभावरूपत्वात्तयोरिति भावः। प्रतियोग्यभावरूपयोर्विरोधेऽपि न गौणमुख्ययोर्गुणगुणिभावस्थल इव विरोध इत्यभिप्रेत्य समाधत्ते नेति। प्रत्यभिज्ञावत् छान्दोग्योक्तलवणप्रत्यभिज्ञावत् अवैशिष्ट्याद् अविभागादित्यर्थः। छान्दोग्ये उद्दालक आरुणिः (६ अ०) श्वेतकेतुनामकपुत्रायाऽद्वैतं ग्राहयितुमुवाच लवणपिण्डं घटाऽऽदावुदके प्रक्षिप्य मत्सन्निधौ प्रातरागन्तव्यमिति। स च तथा चकार। तमुवाच पिता यद्रात्रौ लवणपिण्डमुदके प्रक्षिप्तं तदानयेति। पुत्रस्तदाजिहीर्षुस्तत्र विलीनलवणपिण्डं जलाऽविनाभूतं न विज्ञातवान्। तत आह पिता–तज्जलमाचामेति। ततस्तथा कृतवन्तं पुत्रं पुनरुवाच–कथमिति। पुत्र उवाच–लवणमिति। अस्यां प्रत्यभिज्ञायां जललवणयोरविभागकथनेन तत्त्वं पदार्थयोरप्यविभागस्यैव ज्ञापनादिति। तत्रैव मिलितानां नानावृक्षोद्भवानां रसानां नदीनां च समुद्रादौ मिलितानां विवेकाग्रहकथनदृष्टान्तैरविभागस्यैव दृढीकरणात्। अत एव—

अविभक्तं च भूतेषु विभक्तमिव च स्थितम्।
(गीता १८।२०)

इति भगवान्, 'अविभागो वचनात्' (ब्र० सू० ४।२।१६) इति बादरायणश्चाह। तथा च तयोर्न शुद्धाऽभेद इति सिद्धम्॥ ६॥

तर्हि जीवेनाऽविभागादीश्वरः क्लेशवान् स्यादित्याऽऽशङ्कां परिहरति—न चेति। शङ्का निगदव्याख्याता। परिहारे हेतुमाह—अनन्तरं विशेषादिति। तत्त्वज्ञानोत्तरं जीवस्य लिङ्गशरीरभङ्गरूपविशेषात् अविभाग इति शेषः। 'यथोदकं शुद्धे शुद्धमासिक्तं तादृगेव भवति, एवं मुनेर्विजानत आत्मा भवति' (कठ० १।४।१५) इत्यादिश्रुत्या 'उत्क्रमिष्यत एवं भावादित्यौडुलोमिः' (ब्र० सू० १।४।२१) इति **पारमर्षसूत्रेण** च तथा ज्ञापनात्। तत्त्वज्ञानजन्यत्वात्तत्त्वज्ञानादूर्ध्वमेवाऽविभागस्तदानीं च जीवे न क्लेशगन्धोऽपीति न तदविनाभूतयेशस्याऽपि तत्प्रसङ्ग इति भावः। वस्तुतस्तु तिलेषु तैलं दधिनीव सर्पिरित्यादिदृष्टान्तैरविभागं वदन्तीभिः श्रुतिभिरविभागस्य सार्वदिकत्वज्ञापनान्नोक्तः सूत्राऽर्थः किन्त्वन्यथा। तथा हि—अविभागस्य सार्वदिकत्वात् पर ईशः प्रापञ्चिकैः क्लिष्टः स्यात्, तद्वद् विविधविकारवान् स्यादिति। नैवं वाच्यम्: कुतः? अनन्तरं क्लेशापादकजीवादिलक्षणकार्याऽवस्थाऽनन्तरं विशेषात् फेनवुद्बुदाऽऽदीनामिव कथञ्चिद्वैधर्म्यवत्त्वात्। तथा च यथा परिणामानां फेनबुद्बुदादीनां नाशेऽपि न परिणामिनो जलस्य एवम् ईशपरिणामानां तदविनाभूतानां विकारवत्त्वेऽपि सदैकरूपस्येश्वरस्य न विकारवत्त्वमित्यन्यदेतत्। सर्वथाऽविभाग एवाऽभेदश्रुतीनां बाधिताऽर्थत्वाद्विप्रलम्भकत्वं

स्यात्। एवं सेव्यसेवकभावमर्यादा स्वर्गनरकादिव्यवस्था च पुराणाद्युक्ता व्याकुला स्यात्। वस्तुत ईशाऽभेदे तेषां तदसम्भवात्। न चोपाधिकृतपरिच्छेदात्तत्सम्भव इति वक्तुं युक्तम्। परिपूर्णस्य स्वतन्त्रस्योपाधिना तादृशपरिच्छेद इति वचसां निर्मूलत्वात्।

ननु 'सदेव सोम्येदमग्र आसीत्' (छान्दोग्य० ६।२।१) इत्युपक्रम्य 'एकमेवाऽद्वितीयम्' इत्यादिकया सजातीय-विजातीयस्वगतभेदराहित्यं बोधयन्त्या मध्ये 'अनेन जीवेनात्मनाऽनुप्रविश्य नामरूपे व्याकरवाणि' (छान्दोग्य० ६।३।२) इति तस्यैव जीवात्मत्वं च कथयन्त्या श्रुत्याऽन्ते 'तत्त्वमसि' (छान्दोग्य० ६।८।७) इति शुद्धाभेदमुक्त्वा तज्ज्ञानस्य 'तावदेव चिरं यावन्न विमोक्ष्येऽथ सम्पत्स्ये' (छान्दोग्य० ६।१४।२) इत्यादिना मोक्षफलकथनात् 'मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति' (कठ० २।४।१०) इत्यादिना भेदनिन्दनाच्च भेदश्रुतितोऽभेदश्रुतिरेव बलवती। भेदवाक्यानि त्वाऽऽरोपित-भेदाऽनुवादपराण्येव। कार्यकारणोपाधिविशिष्टयोश्च जीवत्वेश्वरत्वे विशिष्टैश्चाऽनुगतधर्मिणः सामान्यात्मनः शुद्धस्य भेदः प्रातिभासिकोऽभेदो वास्तव आकाशाऽऽदेरिवेति सर्वमेवोपपद्यते श्रुतियुक्तिप्रमाणादिति चेत्, सत्यम्। यद्यप्येवं वक्तुं शक्यं तथाऽपि विशिष्टस्याऽनतिरेके जीवत्वेश्वरत्वबन्धमोक्षादिसाङ्कर्यप्रसङ्गः, विशिष्टस्यातिरेके तु तस्य मिथ्यात्वेन विनाशितया बन्धमोक्ष-सामानाधिकरण्याऽनुपपत्तिः। भेदाऽभेदपक्षश्च परमतेनाऽविशिष्टः। परमतेऽपि तत्तदुपाधिविशिष्टयोर्वस्तुतो भेदेऽपि चित्त्वादिनाऽभेदाऽङ्गीकारात्। तस्माद्भेदश्रुतेः स्वरूपतो भेद एवाऽ-

न्योन्याऽभावलक्षणो वास्तवस्तयोः भेदनिन्दावाक्यानि तु वैधर्म्यलक्षणभेदस्यैव विभागाऽपरपर्यायस्य निन्दापराणि। फेन-बुद्बुदाऽऽदीनामिव कथञ्चित्प्रतीयमानस्याऽपारमार्थिकत्वात्।

नन्वन्योन्याऽभावोऽपि न पारमार्थिकः अप्रामाणिकत्वात्। तथा हि—न तत्र प्रत्यक्षं मानं भ्रमत्वशङ्काकलङ्कितत्वात्। नाऽप्यनु-मानं तन्मूलत्वात्। नाऽपि श्रुतिः नाहमीश्वर इत्याऽऽदिप्रत्य-क्षाऽऽदिनैव तस्य निश्चयादभेदस्यैवाज्ञातत्वाऽभावाद्भेदश्रुतेस्तत्र प्रामाण्याऽसम्भवात् इति चेत्, असाध्वेतत्। प्रत्यक्षादिना भेदस्य प्रविततेऽपि त्रिकालाऽबाध्यभेदस्य मानाऽन्तरतोऽप्राप्त्याऽ-पूर्वत्वेन षड्विंशति++ इति मन्त्रस्याऽश्वमेधे चोदकप्राप्तस्य 'चतुस्त्रिंशद्वाजिना देवबन्धो' इति वैशेषिकमन्त्रेणाऽपोदितस्य षड्विंशतिरित्येव ब्रूयादिति .वचनेनेव प्रत्यक्षाऽऽदिना प्राप्त-भेदस्याऽऽपाततोऽखण्डाऽभेदपरया श्रुत्याऽऽपादितस्य प्रतिप्रसवेन च तत्र प्रामाण्याऽसम्भवात् तद्विरोधेनाऽभेदश्रुतीनां गौणाऽभेद एवाऽर्थमिति मनसि निधायोक्तं भारते **मोक्षधर्मे**—

नानात्वैकत्वमेतावद् द्रष्टव्यं शास्त्रनिश्चयात्॥
मशकोदुम्बरे यद्वदन्यत्वं तद्वदेतयोः।

(शान्ति० ३०८।२२-२३)

इति प्राहुः। तच्चिन्त्यम्। 'तत्त्वमेव त्वमेव तत्' (कैवल्योप० १।१६) इत्याद्येवकारघटितकैवल्यवाक्यविरोधात् तत्राऽयोगाऽ-न्ययोग-व्यवच्छेदकैवकाराभ्यामविभागलक्षणाऽभेदबाधनेन शुद्धाऽ-भेदस्यैव ज्ञापनात्। **बृहदारण्यके** 'आत्मा वाऽरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः' (२।४।५) 'मैत्रेय्याऽऽत्मनि खल्वरे दृष्टे श्रुते मते विज्ञात इदं सर्वं विदितम्' इत्येकविज्ञानेन सर्वं

विज्ञानमुपक्रम्य 'सर्वं तं परादाद्योऽन्यत्रात्मनः सर्वं वेद (बृहदा० २।४।६) इति साक्षाद्भेददर्शननिन्दां मध्ये परामृश्य, सर्वं कथं तदात्मकं भेदग्राहिप्रथमप्रमाणविरोधादित्याऽऽशङ्कानिरासाय 'यत्र हि द्वैतमिव भवति तदितर इतरं पश्यति' (बृहदा० २।४।१४) इत्यादिनाऽऽविद्यकमेव द्वैतदर्शनमिति प्रतिपाद्य तस्य तथात्व-मेवात्मज्ञानबाध्यत्वादिति निर्णीय 'यत्र त्वस्य सर्वमात्मैवाऽभूत्' (बृहदा० २।४।१४) इत्यादिना ज्ञानबाध्यत्वमुक्त्वा 'स एष नेति नेतीत्यात्माऽगृह्यो न हि गृह्यतेऽशीर्यो न हि शीर्यतेऽसङ्गो न हि सज्जतेऽसितो न व्यथते न रिष्यति विज्ञातारमरे केन विजानीयात्' (बृहदा० ३।९।२६) इत्युक्त्वाऽनुशासनासिमैत्रेयि तावदरे खल्वमृतत्वमित्युपसंहारेणाऽद्वैतज्ञानस्यैव मोक्षजनकत्वं प्रतिपादयन्त्या श्रुत्या—

विभेदजनकेऽज्ञाने नाशमात्यन्तिकं गते ।
आत्मनो ब्रह्मणो भेदमसन्तं कः करिष्यति ॥

(विष्णु० ६।७।९६)

इत्यादिस्मृत्या च भेदस्याऽऽविद्यकत्वोक्त्या ज्ञाननाश्याज्ञानो-पाधित्वेन मिथ्याकथनात् । अत एव लवणोदकादिदृष्टान्ता अपि शुद्धाऽद्वैतपरा एव मन्तव्याः । तत्र 'सत्सोम्य न निभालयसेऽत्रैव किल' (छान्दोग्य०) इति वचोभिर्यथोदकादावनुपलभ्यमानं लवणादिकं विद्यमानमेवाचमनादियत्नैर्ज्ञातवानसि तथा विद्यमानमेवाऽखण्डार्थकं तर्कादिनाऽनुपलभ्यमानं सद्गुरुकृपा-द्युपायैर्ज्ञास्यसीति कथनेनाऽद्वैतस्य कष्टगम्यत्वबोधे तात्प-र्याऽवगमात् तत्त्वमर्थयोर्लवणोदकयोरिवाऽभेदस्य 'अनेन जीवे-नात्मनाऽनुप्रविश्य' इत्यादिवचनबोधिताऽभेदत एव निरासात् ।

एतेन वैधर्म्यमेव निन्दावाक्यैर्निन्द्यते नाऽन्योन्याऽभावस्तस्य 'द्वा सुपर्णा' (ऋग्वेद १।१६४।२०) इत्याऽऽदिश्रुतिप्रमितत्वादिति निरस्तम्। नाऽहमीश्वर इत्यादिनाऽपि तस्य प्रमिततया मानान्तरानधिगतत्वरूपाऽपूर्वत्वलिङ्गबाधेन तत्प्रमितत्वबाधात्। न च जीवे ईशभेदस्य प्रमितत्वेऽपि ईशे जीवभेदस्याऽथवा चातुर्मास्यमध्यपर्वणोर्द्वयोः प्रणयन्तीति वाक्येन चोदकप्राप्त्या प्रणयनविलक्षणाऽग्निप्रणयनस्यैव भेदवाक्येनैव प्रत्यक्षादिप्रमाणप्राप्तव्यावहारिकभेदविलक्षणत्रिकालाऽबाध्यभेदस्य प्राप्त्याऽन्यतोऽप्राप्तेरपूर्वत्वात् उक्तरीत्या प्रतिप्रसवाच्च स्याच्छ्रुतिप्रमितत्वमिति वाच्यम्। व्यावहारिकपारमार्थिकभेदेन भेदद्वैविध्ये मानाऽभावात्, श्रुतावबाध्यत्वबोधकशब्दाऽभावाच्चाऽपूर्वकत्वाऽभावात्। अभेदश्रुतेरज्ञातज्ञापकत्वेन प्रामाण्याऽवश्यकत्वाद्भेदप्रत्यक्षादिबाधकत्वाऽभ्युपगमे तद्विरोधेन भेदश्रुतेः प्रतिप्रसवस्याऽप्यसम्भवात्। न चोक्तरीत्याऽस्मिन्मते विशिष्टस्याऽतिरेकाऽनतिरेकविकल्पग्रासान् मोक्ष एव च दुर्वच इति वाच्यम्। विशिष्टस्याऽतिरेकेऽपि नित्यमुक्तस्याऽऽत्मनः सदा शुद्धस्य कार्यकारणोपाध्यवच्छेद्यत्वं स्वाऽऽभासद्वारकम्। बन्धः सकलतन्निवृत्तिश्च मोक्ष इत्यङ्गीकारादुक्तदोषाऽभावात् परम्परयोपाध्यवच्छेद्यस्य शुद्धस्य नित्यत्वात्।

अत एव न परैर्मताऽविशेषोऽपि, परैश्चित एकमात्रव्यक्तित्वस्य कार्यकारणोपाधीनां मिथ्यात्वेन विशिष्टमिथ्यात्वस्य चाऽनङ्गीकारात्। अतस्तन्मताऽविशेषाऽऽपादनमद्वैतमताऽज्ञानविजृम्भितमेव। तस्मादद्वैतपक्षीयमेव व्याख्यानं साधीयः। ईश्वरगीतायामपि—

नित्यः सर्वगतो ह्यात्मा कूटस्थो दोषवर्जितः ॥ २२ ॥

एकः स भिद्यते शक्त्या मायया न स्वभावतः ।
तस्मादद्वैतमेवाऽऽहुर्मुनयः　　　　पारदर्शिनः ॥ २३ ॥

भेदो व्यक्तस्वभावेन सा च मायात्मसंश्रया ।
यथा हि धूमसम्पर्कान्नाकाशो मलिनो भवेत् ॥ २४
अन्तःकरणजैर्भावैरात्मा तद्वन्न लिप्यते ॥ २५ ॥
ज्ञानस्वरूपमेवाहुर्जगदेतद्विचक्षणाः ॥ २६ ॥
अर्थस्वरूपं विज्ञानात् पश्यन्त्यन्ये कुदृष्टयः ॥
कूटस्थो निर्गुणो व्यापी चैतन्याऽऽत्मा स्वभावतः ॥ २७ ॥
दृश्यते ह्यर्थरूपेण पुरुषैर्भ्रान्तदृष्टिभिः ॥ २८

(कूर्म० २।२।२२-२८)

इत्यादिना प्रपञ्चमिथ्यात्वेन सदाशुद्धाद्वितीयस्याकाशादेरिवाऽनिर्वाच्योपाधितः सर्वव्यवहारस्य समर्थनात् ।

वस्तुतः परमात्मा नित्यज्ञानादिलक्षणो भगवान् सदैकरूपो भक्तवात्सल्याद्यनेकगुणोल्बणः ब्रह्मविष्णुशिवनारायणरामकृष्णादिशब्दैश्च व्यपदेश्यः सर्वजीवनियन्ता, जीवस्तु पितुः पुत्र इव तदंशोऽनाद्यज्ञानपाशनिबद्धः कथञ्चित्प्राक्तनाऽनेकशुभादृष्टबलाद्विविदिषया सद्गुर्वाऽऽश्रयणेनेशबुद्ध्या तद्भजनेन तत्कृपया स्वस्य साक्षात्कारादज्ञानपाशनिवृत्त्या तत्सायुज्यमाप्नोति, न तत्र प्रपञ्चगन्धोऽपीत्यत्र न कस्याऽपि विवाद इति भेदाऽभेदाऽन्यतराऽवलम्बनवादः प्रपञ्चसत्यत्वमिथ्यात्ववादश्च संज्ञाकलहमात्रम् । सर्वमतेऽपि प्रपञ्चस्याऽनित्यतया मुक्तस्य प्रपञ्चाऽभावादिति सुधीभिर्विभावनीयम् ॥ ७ ॥

ननु जीवानामाधुनिक एव बन्ध उपाधिकृतत्वात्, तथेश्वरस्याऽपि प्रसिद्धमैश्वर्यमाधुनिकमेव। अस्य व्यञ्जिका नित्यनिवृत्ताऽपि मूढैरात्मेव दृष्टाऽस्य सत्त्वमसत्त्वञ्च दर्शयति सिद्धत्वाऽसिद्धत्वाभ्यां स्वतन्त्राऽस्वतन्त्रत्वेन। सैषा वटबीजसामान्यवदनेकवटशक्तिरेकैव। तद्यथा—वटबीजसामान्यमेकमनेकान् स्वाऽव्यतिरिक्तान् वटान् सजीवानुत्पाद्य तत्र पूर्णं सन्तिष्ठत्येवमेवैषा माया स्वाऽव्यतिरिक्तानि परिपूर्णानि क्षेत्राणि दर्शयित्वा जीवेशावाभासेन करोति। सैषा चित्रा स्वयं गुणभिन्नाऽङ्कुरेष्वपि गुणभिन्ना सर्वत्र ब्रह्मविष्णुशिवरूपिणी चैतन्यदीप्तेत्यादिश्रुतिभिरुपाधीकृतत्वज्ञापनात्। तथा चौपाधिकत्वाद् दृश्यत्वाच्च कल्पितस्य बन्धस्येवैश्वर्यस्यापि ज्ञाने न बाधप्रसङ्ग इत्याशङ्क्याह—

ऐश्वर्यं तथेति चेन्न स्वाभाव्यात् ॥ ८ ॥

ऐश्वर्यमिति। ऐश्वर्यं भगवतस्तथा जीववदुपाधिकृतत्वादाधुनिकम्, तथा च तद्वद्बाध्येतेति चेन्न—कुतः स्वाभाव्यात्। विचित्राऽनेकशक्तिमत्त्वस्येश्वरपदार्थत्वात्। तस्य च 'पराऽस्य शक्तिर्विविधैव श्रूयते स्वाभाविकी' (श्वेताश्व० ६।८) इत्यादिश्रुत्या स्वाभाविकत्वकथनात् 'आनन्दादयः प्रधानस्य' (ब्र० सू० ३।३।११) इत्यधिकरणे च भावत्वलाभात् पारमार्थिकद्वितीयस्य च 'एकमेवाऽद्वितीयम्' (छान्दोग्य० ६।२।१) इत्यादिवचोभिर्बाधाद्विवक्षितविवेकतः स्वरूपेऽन्तर्भावतो वह्न्यादावौष्ण्यादेरिव स्वभावत्वादित्यर्थः। तथा च तन्नैव बाध्यते, नाऽपि तेन द्वैतम्, तस्य नित्येश्वरस्वरूपत्वादिति भावः। न च तर्हि पर-

मतेनाऽविशेषः। तन्मते धर्मधर्मिभावस्यापि वास्तवत्वेन विशेषात्। न चोक्तश्रुतिविरोधः। तस्या अपि विवक्षितविवेकेन जीवप्रपञ्चात्तत्त्वपरत्वात्। अन्यथा मोक्षो न स्यादिति। वस्तुतो राहोः शिर इत्यादाविवाऽभेदस्यैव धर्मधर्मिभावघटकतया तेन धर्मधर्मिभावस्य वास्तवत्वेनाऽविशेषेऽपीष्टापत्तेरिहाऽपि सङ्केतमात्रमिति मन्तव्यम्। विवक्षितविवेकेन सम्बन्धे केषाञ्चित्प्रौढ्याऽभेदांऽशस्तु बाध्यतान्नामेति तत्त्वम् ॥ ८ ॥

अप्रतिषिद्धं परमैश्वर्यं तद्भावाच्च नैवमितरेषाम् ॥ ९ ॥

अप्रतिषिद्धमिति। परमैश्वर्यं परमेश्वरस्यैश्वर्यम् अप्रतिषिद्धं कालत्रयेऽप्यबाधितमेवाऽस्ति बाधकाऽभावात्तदश्रवणाच्च। इतरेषां जीवानां नैवं नाऽबाधितोपाधिकत्वम्। कुतः 'परं ज्योतिरुपसम्पद्य स्वेन रूपेणाऽभिनिष्पद्यते' (छान्दोग्य० ८।३।४) इत्यादिश्रुतिभिस्तथा बोधनादिति भावः ॥ ९ ॥

ननु माऽस्तु जीवज्ञानेन परमेश्वरोपाधिबाधस्तथाऽपि परमेश्वरोपाधेस्तत्कृतैश्वर्यस्य च जीवोपकार एव प्रयोजनम्। इत्थञ्च क्रमेण युगपद्वा सर्वजीवमुक्तौ परमेश्वरोपाधेः स्थितौ प्रयोजनाऽभावात्तस्याऽप्यत्यन्तलये किंकृतमैश्वर्यं स्वभाव इत्याऽऽशङ्कां सर्वमुक्त्यभावपक्षाऽऽश्रयणेन निराकरोति—

सर्वाऽमृते किमिति चेन्नैवं बुद्ध्यानन्त्यात् ॥१०॥

सर्वाऽमृते इति। सर्वाऽमृते सर्वस्य जीवस्याऽमृते मोक्षे सति किमिति चेत् किंकृतं किंप्रयोजनकं किंस्वभावकं की-

दृशमैश्वर्य्यं वक्तुमशक्यत्वान्नास्त्येव तदा तदैश्वर्यमिति चेन्नैवम्। कुतः ? बुद्ध्याऽऽनन्त्यात् जीवोपाधीनां बुद्धीनामनन्तत्वादित्यर्थः। तथा च तादृशकाल एव नास्तीति युक्तं भगवतः स्वाभाविकमैश्वर्यमुक्तप्रकारमिति भावः॥ १०॥

ननु यदि जगत्कर्तृत्वलक्षणमैश्वर्यं परमेश्वरस्य साहजिकं तदा मृदाऽऽदिवद्विकारित्वं प्राप्तं तत्राह—

प्रकृत्यन्तरालादवैकार्यं चित्सत्त्वेनाऽनुवर्तनात्॥११॥

प्रकृतीति। प्रकृत्यन्तरालान्मायाशक्तिद्वारकत्वाद् अवैकार्यमविकारिता ब्रह्मण इति शेषः। कुतः चित्सत्त्वेनाऽनुवर्तनात् स्फुरणरूपसत्तया सर्वत्राऽनुगतत्वादित्यर्थः। साक्षित्वादविकारित्वमनुमेयम्; विकारित्वे विकारसाक्षिता न स्यात्। तथा दर्शनादिति भावः। तस्माद्विवर्तोपादानत्वमेव ब्रह्मणो न परिणाम्युपादानत्वमित्याऽऽस्तां विस्तरः॥ ११॥

अत एव तस्मिन् सर्वं प्रतिष्ठितमित्युपपद्यते इत्याह दृष्टान्तम्—

तत्प्रतिष्ठा गृहपीठवत्॥ १२॥

तत्प्रतिष्ठेति। तस्मिन् ब्रह्मणि प्रतिष्ठा विकारजातस्याऽवस्थितिरविरुद्धैवेत्यर्थः। तत्र दृष्टान्तः गृहपीठवदिति। यथा गृहमध्यस्थिते पीठे स्थितोऽपि गृहे तिष्ठति पीठे तिष्ठतीति व्यपदिश्यते तथा तत्परिणामिकारणे मायायां तिष्ठति, विवर्तोपादाने मायाऽऽश्रये ब्रह्मणि च सर्वं तिष्ठतीति च वक्तुं शक्यमिति न कोऽपि विरोध इति संक्षेपः॥ १२॥

ननु विचित्राऽनेकाऽर्थरचनासामर्थ्यं प्रकृतावेव वा ब्रह्मण्येव वा कल्पनीयम् । इत्थं च ब्रह्मणा प्रकृतिः प्रकृत्या ब्रह्मैव वाऽन्यथा-सिद्धं भवतु । नेत्याऽऽह—

मिथोऽपेक्षणादुभयम् ॥ १३ ॥

मिथोऽपेक्षणादिति । ब्रह्म प्रकृतिश्चोभयमपि कारणम् । कुतः मिथोऽपेक्षणात् । परस्परं चेतनाऽचेतनाभ्यां स्वज्ञानाय स्वसामर्थ्यव्यवहाराय चाऽपेक्षितत्वात् । अत एवाऽन्धपङ्गुन्यायमाश्रित्य श्रुतावपि द्वयोः कारणत्वं श्रूयते इत्यवसेयम् ॥ १३ ॥

स्वमते प्रकृतिपुरुषौ द्वावेव पदार्थावित्याह—

चेत्याचितोर्न तृतीयम् ॥ १४ ॥

चेत्येति । चेत्या प्रकृतिः चिद् ब्रह्म तयोर्न तृतीयं पदार्थान्तरमत्रेत्यर्थः । अत्र ब्रह्मभिन्ने ज्ञातृत्वस्य प्रकृतिभिन्ने ज्ञेयत्वस्य निषेधे तात्पर्यात् । तृतीयमस्ति न वेति न पूर्वपक्षाऽवतारः ॥ १४ ॥

ननु प्रकृतिपुरुषयोः सम्बन्धोऽस्ति न वा । अन्त्ये सर्वकार्यविलोपप्रसङ्गः । आद्ये तु स एव तृतीय इत्यत आह—

युक्तौ च सम्परायात् ॥ १५ ॥

युक्तौ चेति । मिथ इत्यनुवर्तते । तौ प्रकृतिपुरुषौ परस्परं प्रति सम्बन्धरूपौ, न त्वागन्तुकः सम्बन्धोऽस्ति । कस्मात् सम्परायाद् अनादित्वादेव । तथा च गीतासु—

प्रकृतिं पुरुषं चैव विद्ध्यनादी उभावपि ।

(१३।२)

इति । अथाऽनाद्येव सम्बन्धाऽन्तरमस्त्विति चेन्न—जडाऽजडविकल्पेन तयोरनन्यत्वादिति दिक् ॥ १५ ॥

नन्वेकमेवाऽद्वितीयमित्याऽऽदिश्रुतेः सद्वस्तु द्वितीयं नास्त्येव । यच्च प्रतीयते प्रकृतितत्कार्याऽऽदिकं तत्सर्वं दृश्यत्वाच्छुक्तिरजताऽऽदिवन्मिथ्यैव । अतः कथं प्रकृतिर्ब्रह्मेव पदार्थस्तत्राऽऽह—

शक्तित्वान्नाऽनृतं चेत्यम् ॥ १६ ॥

चेत्यं प्रधानं नाऽनृतं विकल्पख्यात्युल्लिखितशशश्रृङ्गादिवदलीकम् । कुतः शक्तित्वात् ब्रह्मनिष्ठसर्गकर्तृतासामर्थ्यरूपत्वात् । यथा वह्नेर्दाहाऽऽदिजननसामर्थ्यं वह्निस्वरूपमेव । अतो नाऽद्वैतवाक्यविरोधोऽपि । शक्तिशक्तिमद्भावनिबन्धनस्य कार्यकारणभावनिबन्धनस्य चाऽभेदस्य तत्राऽभिप्रेतत्वादित्याऽऽस्तां विस्तरः ॥ १६ ॥

वस्तुत उभयपदामित्याऽऽदिसूत्रैः शक्तित्वादिति पर्यन्तैर्बादरायणमतमेव स्फुटयति । तथा हि—उभयपदां जीवपरमात्मोभयतद्गोचराम् 'तत्त्वमसि' (छान्दोग्य० ६।८।७) 'अहं ब्रह्माऽस्मि' (बृहदा० १।४।१०) 'प्रज्ञानं ब्रह्म' (ऐ० उप० ५।३) 'अयमात्मा ब्रह्म' (माण्डूक्य २) इत्यादिशब्दादभेदज्ञानस्याऽनुभवात्तद्विरोधित्वेनाऽभेदज्ञानस्यैव प्रमाणाऽविरुद्धस्य प्रार्थनीयत्वमित्युपपत्तेश्च। वैषम्यादिति (२।१।६)। उभयविषयत्वमयुक्तं भक्ति-

वैषम्यापातात्। भक्तिर्हि ब्रह्मगोचरैवेति चेन्न—अभिज्ञावदेवाऽवैशिष्ट्यात् कल्पितविशेषाऽगोचरत्वात् 'मामेव ये प्रपद्यन्ते' (गीता ७।१४) इत्यादिवाक्यात्। तथा च ब्रह्मसाक्षात्कार इव एतावपि 'वासुदेवः सर्वम्' (गीता ७।१९) इत्यादिवाक्याऽनुसारादभेदो विषय इति भावः। ननु तर्हि संसर्गस्याऽविषयत्वात्कथं कल्पिताऽगोचरत्वं ज्ञानभक्त्योरिति चेत्। चित एव संसर्गत्वादित्यवेहि। अत एव चिन्मात्रविशेष्यकचिन्मात्रप्रकारकत्वेऽपि न हानिः। 'अयं घटः' इत्यादावभेदेऽपि तदभ्युपगमात्। अथवा भावाऽद्वैतस्वीकारेण भेदाऽभावव्यक्तिः स्वरूपेणैव संसर्गः न तु प्रतियोगी, भेदोऽपि संसर्गकोटौ भासत इत्यन्यत्र विस्तरः॥

जीवेश्वरयोरभेदे परब्रह्मणोऽपि क्लेशाऽऽदिमत्त्वमापतितमित्यत आह—न चेति। 'तद्यो यो देवानां प्रत्यबुध्यत स एव तदभवत्' (बृहदा० १।४।१०) इत्यादिश्रुतेः। अनन्तरं बुद्ध्यनन्तरं भेदनाशेनैश्वर्यरूपविशेषाऽभ्युपगमात् न भेदकाले जीवधर्मा ईश्वरे प्रसज्यन्त इति भावः। नैश्वर्यमपि रागद्वेषघटितत्वात् क्लेश एवेत्यत आह—ऐश्वर्यमिति। तथा न क्लेशाऽऽत्मकं स्वभाव्यात् स्वभावत्वादीश्वरधर्मत्वात्। तथा च सर्वत्रैश्वर्यस्य जैवविहित-निषिद्धकर्मद्वारभूताऽनुरागद्वेषघटितस्य परमेश्वरधर्मत्वप्रतिपादनात् कर्मसमानाऽधिकरणं विजातीयरागद्वेषघटितमैश्वर्यं क्लेशात्मकमिति भावः।

न चैश्वर्यं क्वचिज्जीवधर्मोऽप्यस्त्विति चेत्तत्राऽऽह—अप्रतिषिद्धमिति। इतरेषां जीवानां परैश्वर्यं तद्भावात् परभावात्

अप्रतिषिद्धम्। च हेतौ। यतो नैवं न जीवत्वेन रूपेणाऽप्रतिषिद्धम्।

पुण्यपापाऽऽवृता जीवा रागद्वेषमलाऽऽवृताः।
जन्मनाशाभिभूताश्च सदा संसारिणोऽवशाः॥

'अज्ञो जन्तुरनीशोऽयम्' (वनपर्व ३०।२८) इत्यादिवाक्येनैश्वर्यप्रतिक्षेपात्। सदेति पूर्वकालाऽभिप्रायेण ज्ञानपर्यन्ताऽभिप्रायेण वा। ननु यदि जीवस्य मुक्तावीश्वरभावस्तर्हि सर्वमुक्तौ कथमीश्वरभावस्तदैश्वर्यस्याऽप्युपसंहारादित्याऽऽशङ्क्याऽऽह — सर्वाऽमृतइति। सर्वाऽमृते सर्वमुक्तौ किं कुत ऐश्वर्यमिति चेन्न— बुद्धीनामानन्त्यात्। तथा चेदानीन्तनबुद्धचा अधुना मुक्तानामेवेश्वरभाव इति न कश्चिद्दोष इति तात्पर्यम्। न च नाऽस्त्येव सर्वमुक्तिरिति वाच्यम्।

सोऽयं जीवसमाऽऽख्यस्तु ब्रह्मैव परमाऽर्थतः।
व्यवहारदशायान्तु मायया परमेश्वरः॥
पृथक्त्वेन द्विजा भाति जलपात्रैर्यथा रविः।
आत्मनो बहवोऽनन्ताः श्रुतिरित्येवमब्रवीत्॥
संसाराऽऽदेरनित्यत्वात्सम्यग्ज्ञानोदयाऽवधि।

इत्यादिवाक्यैः सर्वजीवेष्वसङ्कोचेन प्रवृत्तौ बलवद्बाधकशून्यैः सर्वमुक्तिसिद्धेः तत्सिद्धौ चेशितव्याऽभावात्तदैश्वर्यस्याऽप्युपसंहारः। किञ्चाऽग्रे सूत्रकृदेव जगत्सृष्टौ कारुण्यमेव कारणं सूत्रयिष्यति। कारुण्यं च ज्ञानयोगप्रवर्तनेन परदुःखप्रहाणेच्छानियतो वृत्तिभेदः। तथा च य एव नित्यसंसारी तत्संसर्गे हेतुभूता करुणा मोघा स्यादिति सर्वमुक्तिसिद्धिः। न च भगवन्मा-

याऽऽदिविनाशे मानाऽभावान्न सर्वमुक्तिः सम्भवति मायाऽऽदीनां तन्नियामकानां सत्वादिति वाच्यम् 'भूयश्चान्ते विश्वमायानिवृत्तिः' (श्वेताश्व० १।१०) इति विश्वहेतुत्रिगुणमायानिवृत्तिबोधकवाक्येन—

एका शक्तिः शिवैकोऽपि शक्तिमानुच्यते शिवः ।
शक्तयः शक्तिमन्तोऽन्ये सर्वशक्तिसमुद्भवाः ॥
(कूर्म० १।१२।२७)

शक्तिशक्तिमतोर्भेदं वदन्त्यपरमार्थतः ।
अभेदं चानुपश्यन्ति योगिनस्तत्त्वचिन्तकाः ॥
(कूर्म० १।१२।२८)

इत्यादिवाक्यैश्च मायित्वचिच्छक्तिमत्त्वतत्कृतभेदनियामकप्राकृतसत्त्वादीनां सर्वेषामेव विनाशित्वकथनात् । ननु मायादेः किन्नाशकमिति चेत् । पूर्वोक्तब्रह्मज्ञानमेवेति वदामः ।

ननु को विरोध इति चेत्, न,
दैवी ह्येषा गुणमयी मम माया दुरत्यया ।
मामेव ये प्रपद्यन्ते मायामेतां तरन्ति ते ॥
(गीता ७।१४)

अनयैव जगत्सर्वं सदेवाऽसुरमानुषम् ।
मोहयामि द्विजश्रेष्ठा ग्रसामि विसृजामि च ॥
(कूर्म० १।१।३५)

उत्पत्तिं प्रलयं चैव भूतानामागतिं गतिम् ।
विज्ञायाऽन्वीक्ष्य चात्मानं तरन्ति विपुलामिमाम् ॥
(तु० विष्णु० ६।५।७८)

इत्यादिना च विरोधप्रतिपादनात् सर्वंशून्यजीवपरमेश्वरोभयाऽभेदचिन्मात्रविषयत्वेन ब्रह्मसाक्षात्कारस्याऽध्यासमात्रविरोधस्याऽतिस्पष्टत्वाच्च। यद्यपि ब्रह्मसाक्षात्कारत्वेनैव हेतुता, तथापि चरममोक्ष्यमाणज्ञानव्यक्तित्वेन फलोपहितततेति नेदानीं तन्नाशः। न चोपादाननाशाऽभावे कथमिदानीं मुच्यमानतत्तत्पुरुषाऽन्तःकरणाऽऽदेर्नाशः चरमवृत्तिप्राचीनचरमवृत्त्यभावरूपाऽज्ञानात्मकनिमित्तनाशादेव नाशस्य प्रमाणबलेनोपगमात्। चरमवृत्त्यभावरूपाऽज्ञानसत्त्वादेव जीवन्मुक्तस्याऽन्तःकरणादिसत्त्वं प्रारब्धाऽदृष्टाऽतिरिक्ताऽदृष्टं शुक्तिरजताऽविक्षेपेषु प्राथमिकब्रह्मसाक्षात्कारवृत्तिव्यक्त्यभावस्तादृशव्यक्तिप्राचीनो हेतुरिति तन्नाशादेव पूर्वोत्तरेषां तेषां नाशाऽनुत्पत्तेः। न च ब्रह्मसाक्षात्कारात् कथमन्यगताऽध्यासानां निवृत्तिः जीवन्मुक्तस्य सर्वज्ञश्रुतेर्ब्रह्मसाक्षात्काराऽनन्तरं ब्रह्मस्वरूपसर्वंतत्तदधिष्ठानसाक्षात्कारादेव तन्नाशाऽभ्युपगमात्। 'छिद्यन्ते सर्वसंशयाः' इतिश्रुतेर्ब्रह्मसाक्षात्काराऽनन्तरं तत्स्वरूपसर्वंतत्तद्वस्तुसाक्षात्कार इव तत्तद्गताऽध्यासनिवृत्तावप्यनुपपत्त्यभावाच्च। अन्यगताऽध्यासानां ब्रह्मण्यप्यध्यासाच्च। अन्यगताऽध्यासनिमित्ततत्तदधिष्ठानाऽज्ञानस्याऽऽत्मन्यध्यासस्याऽऽत्मज्ञानेन नाशे तत्तदध्यासनाशोपपत्तेश्चेत्यन्यत्र विस्तरः।

ननु ब्रह्मण उपादानकर्तृत्वलक्षणे ऐश्वर्ये विकारित्वाऽऽपत्तिस्तत्राऽऽह—प्रकृतीति। प्रकृतिरन्तरालपरम्परासम्बन्धघटकं वस्तु, तस्मादवैकार्यंपरिणामित्वम्। यदि हि तदभावाऽनधिकरणत्वे सति तदुपादानत्वं साक्षात् स्यादपि परिणामित्वम्। किन्तु तादृशोपादानत्वं स्वाश्रयप्रकृतिसम्बन्धेनैव ब्रह्मणि वर्तते। तत्र

हेतुः चित्त्वेन सत्त्वेन चाऽनुवर्तमानत्वादिति । जडेषु साक्षात्तादृशोपादानत्वे चित्सत्ताऽऽत्मकस्वरूपपरावृत्तिप्रसङ्गादिति भावः । तस्याः प्रकृतेः परस्मिन् प्रतिष्ठा स्थितिर्गृहे पीठस्येवेति । ननु तदुपादानत्वं साक्षान्नास्त्येवेत्यत आह–मिथोऽपेक्षणादिति । परस्पराऽपेक्षासत्त्वादुभयमपि ब्रह्म प्रकृतिश्चेत्युभयमप्युपादानम् । ब्रह्म विवर्तमानं प्रकृतिः परिणामिनीत्येतावानेव परं भेदः । विवर्तमानत्वञ्च तदभावाधिकरणत्वे सति तदुपादानत्वम् । व्यवहारलाघवाय प्रसङ्गात् पदार्थं विभजते—चेत्येति । चेत्यं जडं चिच्च ताभ्यां तृतीयं नास्तीत्यर्थः ।

ननु मिथोऽपेक्षणादुभयमित्ययुक्तम् । न ह्यपेक्षामात्रेणोपादानत्वं सम्भवति, दण्डादेर्घटाद्युपादानत्वापत्तेरिति चेत्तत्राह—युक्तौ चेति । चिज्जडौ द्वावपि पदार्थौ तादात्म्यापन्नौ च तत्रैव चेत्यस्य सम्परायात् । तथा च तादात्म्येन हेतुत्वादुपादानत्वं युक्तमिति भावः । चेत्यस्याऽलीकवादं निराकुरुते–शक्तित्वादिति । अनृतमलीकं न तत्तादात्म्ये सति तत्कार्यप्रयोजकत्वात् । न हि शशशृङ्गादावेवेतीदृशशक्तित्वमस्तीति भावः ॥ ५ ॥ ६ ॥ ७ ॥ ॥ ८ ॥ ९ ॥ १० ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥ १६ ॥

प्रासङ्गिकं परिसमाप्य प्रकृतमनुसरति—

तत्परिशुद्धिस्तु गम्या लोकवल्लिङ्गेभ्यः ॥ १७ ॥

तस्या भक्तेः परिशुद्धिः परिपाकरूपा शुद्धिः—

'न चलति भगवत्पदारविन्दाल्लवनिमिषार्द्धमपि स वैष्णवाग्रचः' (भाग० ११।२।५३) इत्यादिनोक्ता लिङ्गेभ्यो गम्याऽनुमेया ।

तत्र दृष्टान्तः—

लोकवद् । यथा लोके प्रकृष्टा नायकनायिकाद्यनुरक्तिस्तत्कथाश्रवणाश्रुपुलकाङ्कुरादिलिङ्गैरनुमीयते तद्वदित्यर्थः ॥ १७ ॥

स्मृतिसिद्धान्यपि लिङ्गानि संगृह्णाति—

सम्मानबहुमानप्रीतिविरहेतरविचिकित्सामहिमख्यातितदर्थप्राणस्थानतदीयतासर्वतद्भावाप्रातिकूल्यादीनि च स्मरणेभ्यो बाहुल्यात् ॥ १८ ॥

सम्मानादीन्यपि लिङ्गानीति विभक्तिविपरिणामः । कुतो लिङ्गत्वं तत्राह स्मरणेभ्यः स्मृतिभ्यो बाहुल्याद् बहुधावगतेः ।

तत्र सम्मानम्—

यो निर्हेतुक आदरः समतया सर्वास्ववस्थास्वयं
सर्वत्रास्ति सदैव चापि नियतः स्वोत्कृष्टगुर्वादिषु ।
प्राप्तो योऽव्यभिचारितामविरतं प्रीतेः समुत्कर्षतः
सम्मानः स निगद्यते सुकृतिभिर्मानादिदर्पापहः ॥

यथार्जुनस्य—

प्रत्युत्थानं तु कृष्णस्य सर्वावस्थो धनञ्जयः ।
न लङ्घयति धर्मात्मा भक्त्या प्रेम्णा च सर्वदा ॥

बहुमानो यथेक्ष्वाकोः—

पक्षपातेन तन्नाम्नि मृगे पद्मे च तादृशि ।
चकार सेवे तद्वर्णे बहुमानमतिं नृपः ॥ इति ॥

प्रीतिर्विदुरस्य—

या नः प्रीतिः पुष्कराक्ष त्वद्दर्शनसमुद्भवा ।
सा किमाख्यायते तुभ्यमन्तरात्मासि देहिनाम् ॥

(उद्योगपर्व ८९।२४)

विरहो यथा गोपीनाम्—

गुरूणामग्रतो वक्तुं किं ब्रवीषि न नः क्षमम् ।
गुरवः किं करिष्यन्ति दग्धानां विरहाग्निना ॥

इतरविचिकित्सा यथा श्वेतद्वीपनिवासिनां नारददर्शनेऽपि विघ्नबुद्धिः । यथा वोपमन्योः—

अपि कीटः पतङ्गो वा भवेयं शङ्कराज्ञया ।
न तु शक्र त्वया दत्तं त्रैलोक्यमपि कामये ॥

(अनुशा० १४।१८६)

महिमकथनं यथा यमस्य—

नरके पच्यमानस्तु यमेन परिभाषितः ।
किं त्वया नार्चितो देवः केशवः क्लेशनाशनः ॥

स्वपुरुषमभिवीक्ष्य पाशहस्तं
वदति यमः किल तस्य कर्णमूले ।
परिहर मधुसूदनप्रपन्नान्
प्रभुरहमन्यनृणां न वैष्णवानाम् ॥

तदर्थंप्राणस्थितिर्यथा हनुमतः—

यावद्रामकथा लोके तावत्प्राणान् बिभर्म्यहमिति ।

तदीयता यथा वसोरूपरिचरस्य—

आत्मा राज्यं धनं चैव कलत्रं वाहनं तथा ।
एतद्भगवतः सर्वमिति तत्प्रेक्षते सदेति ॥

(शान्ति० ३३५।२३)

सर्वभूतेषु तद्भावो यथा प्रह्लादस्य—

तस्मात्सर्वेषु भूतेषु भक्तिरव्यभिचारिणी ।
कर्तव्या पण्डितैर्ज्ञात्वा सर्वभूतमयो हरिः ॥ इति ।

(विष्णु० १।१९।९)

तस्मिन्नप्रातिकूल्यं यथा हन्तुमागतेऽपि भगवति भीष्मस्य—

एह्येहि देवेश जगन्निवास
नमोस्तु ते शार्ङ्गगदासिपाणे ।
प्रसह्य मां पातय लोकनाथ
रथादुदग्राद्भुतशौर्यसंख्ये ॥

(भीष्मपर्व ५९।९६-९७)

आदिशब्दादुद्धवाक्रूरादिचेष्टितान्यपि द्रष्टव्यानि ॥१८॥

ननु—

कामाद् द्वेषाद्भयात्स्नेहाद् यथा भक्त्येश्वरे मनः ।
आविश्य तदघं हित्वा बहवस्तद्गतिं गताः ॥
गोप्यः कामाद्भयात्कंसो द्वेषाच्चैद्यादयो नृपाः ।
सम्बन्धाद् वृष्णयः स्नेहाद्यूय भक्त्या वयं विभो ॥

(भाग० ७।१।२९-३०)

इत्यत्र प्रेम्णा गोपीनामिव सद्द्वेषादिना शिशुपालादीनामपि मुक्तिश्रवणात्तदकथनान्न्यूनता । तत्राह—

द्वेषादयस्तु नैवम् ॥ १९ ॥

तुकारोऽसंभवज्ञापकः यस्माद्भक्तानां द्वेषादयोऽसंभाविताः। अतो द्वेषभयच्छलादयस्तु नैवम्। न भक्तिलिङ्गानीत्यर्थः। भक्तानां द्वेषाद्यभाव उक्तो महाभारते—(आनुशा०, अ० १४९)।

न क्रोधो न च मात्सर्यं न लोभो नाशुभा मतिः।
भवन्ति कृतपुण्यानां भक्तानां पुरुषोत्तमे ॥

यद्वा, द्वेषप्रतिपक्षभावादित्यत्रोक्तं द्वेषविरोधं समर्थयितुमिदं सूत्रम्।

द्वेषादयस्तु नैवम्, न पूर्वोक्तलिङ्गानुमेया इत्यर्थः। तथा च द्वेषादयो न भक्तिरूपा इति सिद्धम्। शिशुपालस्य द्वेषानुबन्धादनवरतानुसन्धानादिना निखिलपापक्षये तत्प्रत्यक्षं ततो भक्त्या मुक्तिरिति मन्तव्यम्। अत एव विष्णुपुराणे—

पुनरप्यच्युतविनिपातमात्रफलमखिलभूमण्डलश्लाघ्यचेदिराजकुले जन्माव्याहतैश्वर्यं शिशुपालत्वेऽप्यवापि। तत्र त्वखिलानामेव भगवन्नाम्नां त्वंकारकारणमभवत्। ततश्च तत्कालकृतानामेषामशेषाणामेवाच्युतनाम्नामनवरतानेकजन्मसम्बर्द्धितविद्वेषानुबन्धिचित्तो विनिन्दनसंतर्जनादिषूच्चारणमकरोत्। तच्च रूपमुत्फुल्लपद्मदलाक्षमत्युज्ज्वलपीतवस्त्रधार्यमलकिरीटकेयूरकटकोपशोभितमुदारपीवरचतुर्बाहुशङ्खचक्रगदाधरमतिप्ररूढवैरानुभावादटनभोजनस्नानासनशयनादिष्वशेषावस्थान्तरेषु तमेवाक्रोशेषूच्चारयंस्तमेव हृदये धारयन्नात्मवधाय भगवद्धस्तचक्रांशुमालोज्ज्वलमक्षयतेजःस्वरूपं परमं ब्रह्मरूपमपगतरागद्वेषादिदोषं भगवन्तमद्राक्षीत्। तावच्च भगवच्चक्रेणाशु व्यापादितस्तेन तत्क्षणदग्धा-

खिलाघसंचयो भगवतैवान्तमुपनीतः तस्मिन्नेव लयमुपययाविति (४।१५।६-१०) दग्धाघसंचयः प्रत्यक्षसमय एवान्तं नीतस्तत्रैव लीन इति तात्पर्यार्थः ।

न च कथं सगुणाभिनिवेशेन निर्गुणब्रह्मसासाक्षात्कारो भवेदिति वाच्यं सगुणाभिनिवेशजन्यापूर्वेण प्राचीननिर्गुणोपासनसंस्कारोद्बोधाभ्युपगमात् । अन्ये तु शिशुपालादेः सालोक्यादिमुक्तिरेवाभ्युपेयते, न तु भगवद्भावलक्षणा मुक्तिः । अत एव सप्तमस्कन्धे 'वैरानुबन्धतीव्रेण ध्यानेनाच्युतसात्मतां । नीतौ पुनर्हरेः पार्श्वं जग्मतुर्विष्णुपार्षदा'वित्युक्तिः सङ्गच्छत इत्याहुः ॥ १९ ॥

ननु सन्त्वेतान्यवतारभक्तिलिङ्गानि तथापि सा न मुख्या परमेश्वरातिरिक्तविषयकत्वेन मुक्तिप्रयोजकत्वाभावादित्यंशावतारावतारिणोरहिकुण्डलन्यायेन भगवदवतारविषयापि भक्तिर्मुख्यैवेत्याशयवानाह—

तद्वाक्यशेषात् प्रादुर्भावेष्वपि सा ॥ २० ॥

प्रादुर्भावोऽवतारः । विषयसप्तमी अवतारविषयापीति यावत् । सा भक्तिः मुख्यैवेति शेषः । कुतस्तद्वाक्यशेषात् तत्र तेषु ब्रह्मकोटित्वग्राहकाणां वाक्यशेषाणां सत्त्वात् । तथा हि श्रुतौ—

(बृहदा०)

पूर्णमदः पूर्णमिदं पूर्णात् पूर्णमुदच्यते ।
पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते ॥

इत्यादि । पुराणे च

ब्रह्मविष्णुमहेशाख्याः शिवध्यानपरा अपि ।
परमात्मविभागस्था न जीवव्यूहसंस्थिताः ॥

ब्रह्मविष्णुमहेशानां तथा तेषां द्विजर्षभाः ।
आविर्भावविशेषाणां पुण्यपापादयो न हि ॥
समस्तशक्तिरूपाणि तत्करोति जनेश्वर ।
देवतिर्यङ्मनुष्यादिचेष्टावन्ति स्वलीलया ॥
जगतामुपकाराय न सा कर्मनिमित्तजा ॥

इत्यादि । तत्र श्रुतिवाक्यस्यायमर्थः । अदो मूलं अवतारिरूपं पूर्णं इदं अवताररूपं च पूर्णम् । सृष्टिकाले पूर्णान्मूलरूपादुद्रिच्यते । प्रलये च पूर्णस्य स्वस्य पूर्णमवताररूपं आदाय स्वीकृत्य एकीभूय पूर्णमेव मूलरूपमेवान्यन्नालीनं स्वयमवशिष्यत इति । गौणो ह्यपूर्णः अन्यस्मिंश्च लीयते, अयं तु न तथेति भावः ॥२०॥
भवतु सा मुख्या भवति कस्मात्तत्राह—

जन्मकर्मविदश्चाजन्मने शब्दात् ॥ २१ ॥

जन्म भगवतोऽवतारभावः । कर्म दैत्यवधभक्तोद्धारादिकम् । तज्ज्ञानवतश्चाकारात् परमात्मरूपताविदो मनोमालिन्यनिरासोल्लासद्वारा सा भवति । किंकृते अजन्मने जन्माभावलक्षणफलाय कुतः ? शब्दात् । गीतादौ ।

जन्म कर्म च मे दिव्यमेवं यो वेत्ति तत्त्वतः ।
त्यक्त्वा देहं पुनर्जन्म नैति मामेति सोऽर्जुनेति ॥
(४।९)

शब्दसत्त्वात् जन्मकर्मवेदनस्य साक्षादमृतफलत्वाभावात् भक्तिद्वारैव कारणतेति भावः ॥२१॥

जन्म न प्राकृतानामिव भौतिकादिदेहपरिग्रह इत्यभिप्रेत्याह—

तच्च दिव्यं स्वशक्तिमात्रोद्भवात् ॥ २२ ॥

अङ्गीकृतदेहरूपं जन्म चेत्यर्थः । दिव्यं स्वप्रकाशं न भौतिकं, कुतः स्वशक्तिमात्रोद्भवत्वात् । सम्यगप्रच्युतज्ञानबलवीर्यादिशक्तौ बह्वसङ्कल्परूपमाययैव चाविर्भावात् । अत एव मोक्षधर्मे—

मायैषा हि मया सृष्टा यन्मां पश्यसि नारद ।
सर्वभूतगुणैर्युक्तं न तु मां द्रष्टुमर्हसीति ॥
(शान्ति० ३३९।४५-४६)

तथा गीतायाम्—

अजोपि सन्नव्ययात्मा भूतानामीश्वरोपि सन् ।
प्रकृतिं स्वामधिष्ठाय सम्भवाम्यात्ममाययेति ॥
(४।६)

अयमर्थः । अजत्वादव्ययत्वादीश्वरत्वाच्च कर्मपारतन्त्र्याभावेन जन्मायोग्योपि स्वां प्रत्यगनन्यां प्रकृतिमधिष्ठाय स्वीयया मायया सम्भवामीति । अयं यथा कश्चिन्मायावी स्वयं स्थानादप्रच्युतस्वभावोप्यदृश्यो भूत्वा स्थूलसूक्ष्मभूतान्यनुपादाय केवलया मायया स्वदृशमेव द्वितीयं मायाविनं सूत्रादिमार्गेण गगनमारोहन्तं सृजति । एवं स्वयं कूटस्थानन्दसच्चिन्मात्रोहं स्वमायया स्वप्रकाशसच्चिदानन्दमाययात्मनः शरीरं बाल्याद्यवस्थाभिः क्रीडनकं सृजामीति यावत् । अत एव सम्भवोऽत्र प्राकट्यमात्रं, न तूत्पत्तिः सच्चिदात्मकानां तेषां नित्यतया तद्बाधात् । अत एवोक्तं वाराहे—

सर्वे नित्याः शाश्वताश्च देहास्तस्य महात्मनः ।
हानोपादानरहिता नैव प्रकृतिजाः क्वचित् ॥

परमानन्दसंदोहाः ज्ञानमात्राश्च सर्वतः।
सर्वे सर्वगुणैः पूर्णाः सर्वदोषविवर्जिता इति।

ननु तर्हि तत्र गर्भप्रवेशजननबाल्यपौगण्डकौमारादिप्रतीतीनां का गतिरिति चेत्, या गतिरुदाहृतमायाविनः। मायया सूत्रादिमार्गेण गगनाद्यारोहणप्रतीतेः। एतेन भगवच्छरीरस्य किमुपादानम्? अविद्येति चेत्? न, परमेश्वरे तदभावात्। जीवाविद्येति चेत् न। शुक्तिरजतादेरिव तुच्छत्वापत्तेः। चिन्मात्रमिति चेत् न। चितः साकारत्वापत्तेः। तथात्वेपि वा तस्यातीन्द्रियत्वापत्तेरित्यपि निरस्तम्। प्रत्यक्चैतन्यमात्रोपादानकस्य स्वमाययाविर्भावमात्राङ्गीकारात्। पुराणेष्वपि 'नित्यैव सा जगन्मूर्त्तिरिति' (मार्क० ८१।४७) सावधारणं प्रतिज्ञाय 'देवानां कार्यसिध्यर्थमाविर्भवति सा यदे'त्यादिना तथाबोधनात्। एतावांस्तु विशेषः। लौकिकमायावी मायामुपसंहरन् द्वितीयमायाविनमप्युपसंहरति। भगवांस्तु तामनुपसंहरन् स्वविग्रहमपि नोपसंहरतीति। एवं हि सति हिरण्यश्मश्रुत्वादिलक्षणविग्रहवत (छान्दोग्य० १।६।६) श्वेतनस्यान्तस्तद्धर्मोपदेशादिति (ब्र० सू० १।१।२०) न्यायसिद्धं सर्वेश्वरत्वं युज्यते नान्यथा। तस्मात्सिद्धं भगवतो मायामयं शरीरम्। न च तच्छरीरस्य कर्मजन्यत्वाभावे भोगायतनत्वाभावाल्लक्षणायोगः। मायापरिणामस्य ज्ञानेच्छादिवृत्तेरिव सुखवृत्तेरङ्गीकारे विरोधाभावेन सुखदुःखान्यतरावच्छेदकत्वरूपभोगायतनत्वसम्भवात्। अत एव भोगमात्रसाम्यलिंगाच्चेत्य- (ब्र० सू० ४।४।२१) धिकरणे भोग उक्तः। वस्तुतस्तु शरीरत्वं चेष्टावत्त्वमखण्डोपाधिर्जातिर्वेति न कोपि बाधावकाशः। चेष्टा तु

हिताहितप्राप्तिपरिहारार्थी क्रिया। सा च भक्तं प्रति भगवच्छरीरे प्रसिद्धैव श्रुतिस्मृतिपुराणेष्वित्यास्तां विस्तरः ॥२२॥

नन्वाप्तकामस्य भगवतः प्रयोजनाभावे कथं शरीरपरिग्रहादिस्तत्राह—

मुख्यं हि तस्य कारुण्यम् ॥ २३ ॥

मुख्यं कारणमित्यर्थः। यद्वा, हि यस्मात्तस्य मुख्यं निरुपाधि कारुण्यं ततो जन्मादीत्यर्थः। यस्य धनादिकमुद्दिश्य परदुःखनिवृत्तीच्छा तस्य तु नैव कारुण्यम्। यस्य तु पुण्यादिकमुद्दिश्य तस्य गौणम्। यस्य न किमप्युद्दिश्य किन्तु स्वभावादेव तस्य मुख्यं निरुपाधिपरदुःखनिवृत्तीच्छारूपम्। तादृशेच्छा नियतो वृत्तिविशेषो वा। तादृशकरुणाजन्येच्छायां तु फलेच्छा न हेतुः।

न मे पार्थास्ति कर्त्तव्यं त्रिषु लोकेषु किंचन।
नानवाप्तमवाप्तव्यं वर्त्त एव च कर्मणि॥
(गीता० ३।२२)

यदि ह्यहं न वर्त्तेयं जातु कर्मण्यतन्द्रितः।
मम वर्त्मानुवर्त्तन्ते मनुष्याः ! पार्थ सर्वशः॥
(गीता ३।२३)

उत्सीदेयुरिमे लोका न कुर्यां कर्म चेदहम्।
सङ्करस्य च कर्ता स्यामुपहन्यामिमाः प्रजाः॥
(गीता ३।२४)

इत्यादि प्रमाणानुरोधेनैव कार्यकारणभाव—कल्पनाया उचितत्वादिति भावः। भगवान् बादरायणस्तु 'लोकवत्तु लीला—कैवल्यम् (ब्र० सू० २।१।३३) इत्यत्र लीलामेव जगज्जन्मादिकारणमाह। तन्मतेपि आनन्दविशेषाधीना क्रिया

लीलेति कस्यांचिदानन्दविशेषाधीनेच्छायां फलेच्छा न हेतुः 'क्रीडतो बालकस्येव चेष्टां तस्य निशामये (विष्णु० १।२।१८) त्यादि वाक्यानुरोधात्। 'देवतिर्यङ्मनुष्यादिचेष्टावन्ति स्वलीलया' इत्यत्र तु लीलया तद्धेतुना आनन्दविशेषेणेत्यर्थः। न च क्रीडतोपि तस्य वैषम्यादिकं तत्तददृष्टापेक्षितत्वात्। ननु कारुणिकस्य निषिद्धकारयितृत्वमयुक्तमिति चेन्न। पूर्वपूर्ववासनापेक्षिततया तत्कारयितृत्वोपपत्तेः। परम्परयोद्दिधीर्षावत्त्वात्तु कारुण्यं भगवत इति भावः। एतेन—

यदा सर्वमिदं नासीत् क्वावस्था तत्र गम्यताम्।
प्रजापतेः क्व वा स्थानं किं रूपं च प्रतीयताम् ॥४५
ज्ञाता च कस्तदा तस्य जनं यो बोधयिष्यति।
उपलब्धेर्विना चैतत्कथमध्यवसीयताम् ॥४६
प्रवृत्तिः कथमाद्या च जगतः संप्रतीयते।
शरीरादेर्विना चास्य कथमिच्छापि सर्जने ॥४७
शरीराद्यथ तस्य स्यात्तस्योत्पत्तिर्न तत्कृता।
तद्वदन्यप्रसङ्गोऽपि नित्यं यदि तदिष्यते ॥४८
पृथिव्यादावनुत्पन्ने किम्मयं तु पुनर्भवेत्।
प्राणिनां प्रायदुःखा च सिसृक्षाऽस्य न युज्यते ॥४९
साधनं चास्य धर्मादि तदा किंचिन्न विद्यते।
न च निःसाधनः कर्त्ता क्वचित्सृजति किंचन ॥५०
नाधारेण विना सृष्टिरूर्णनाभेरपीष्यते।
प्राणिनां भक्षणाच्चापि लाला तस्य प्रवर्तते ॥५१
अभावाच्चानुकम्प्यानां नानुकम्पास्य जायते।
सृजेच्च सुखमेवैकमनुकम्पाप्रयोजितः ॥५२

अथाशुभाद्विना सृष्टिः स्थितिर्वा नोपजायते ।
आत्माधीनाभ्युपाये हि भवेत् किं नाम दुष्करम् ॥५३
तथा चापेक्षमाणस्य स्वातन्त्र्यं प्रतिहन्यते ।
जगच्चासृजतस्तस्य किं नामेष्टं न सिध्यति ॥५४
प्रयोजनमनुद्दिश्य न मन्दोऽपि प्रवर्तते ।
एवमेव प्रवृत्तिश्चेच्चैतन्येनास्य किं भवेत् ॥५५
क्रीडार्थायां प्रवृत्तौ तु विहन्येत कृतार्थता ।
बहुव्यापारतायां च क्लेशो बहुतरो भवेत् ॥५६
संहारेच्छापि चैतस्य भवेदप्रत्यया पुनः ॥५७
ईश्वरेच्छा यदीष्येत सैव स्याल्लोककारणम् ।
ईश्वरेच्छावशत्वे हि निष्फला कर्मकल्पना ॥७२
(श्लोकवार्तिके संबन्धाक्षेपपरिहारप्रकरणे)

इति मीमांसावार्तिककृदुक्तं निरस्तम् । प्रयोजनमनुदिश्यैव बुद्धिमतामपि लीलादौ प्रवृत्तिदर्शनात् । तदुक्तं वेदान्तसिद्धान्ते—

लीलाः श्वासं वृथा चेष्टा अनुदिश्य फलं यतः ।
अनुन्मत्तैर्विरच्यन्ते तस्मात्तृप्तस्तथा सृजेदिति ॥ २३ ॥

ननु "नराणां च नराधिपः" (गीता १०।२७) इत्यादिना विभूतीनामपि भगवद्रूपत्वकथनाद्राजादिभक्तेरपि मुक्तिः स्यात्तत्राह—

प्राणित्वान्न विभूतिषु ॥ २४ ॥

राजादिविभूतिषु भक्तिर्न मुक्तिफला । कुतः ? अज्ञानाधारतोपहितप्राणित्वात् जीवत्वादिति यावत् । "नराणां च नराधिपः"

(गीता १०।२७) इत्यादिकं तु नेश्वरकोटिस्थत्वाभिप्रायेण किन्तु भगवदनुगृहीततदभिमानत्वाभिप्रायेण, तस्मात् तद्भक्तिर्न मुक्तिफलेति भावः ॥ २४ ॥

हेत्वन्तरमप्याह—

द्यूतराजसेवयोः प्रतिषेधाच्च ॥ २५ ॥

धर्मशास्त्रेद्यूतराजसेवयोः प्रतिषेधः स्मर्यते परमेश्वरत्वे राज्ञस्तन्न स्यात्। द्यूतरागनिषेधोऽत्र दृष्टान्तार्थमुक्तः। तद्भागस्य भक्तित्वप्रसक्तेरेवाभिर्भावात् ॥ २५ ॥

अवतारेष्वतिप्रसङ्गमाशङ्क्य समाधत्ते—

वासुदेवेऽपीति चेन्नाकारमात्रत्वात् ॥ २६ ॥

वासुदेवेपि प्राणित्वमस्त्येव मनुष्यत्वेनोपलभ्यमानत्वादिति चेन्न। कुतः आकारमात्रत्वात्। आकारेत्यत्र 'अर्शाद्यच्' (अष्टा० ५।२।१२७) मात्रपदेनान्यथासिद्धजीवलिङ्गव्यवछेदः। तथा च मनुष्याकारवत्त्वेपि जीवत्वं नास्त्येव तदाकारवत्त्वमात्रस्य जीवत्वलिङ्गत्वेऽनुकूलतर्काभावात्। अत एव "आन्तरस्तद्धर्मोपदेशा"—(ब्र० सू० १।१।२०) दित्यधिकरणे आदित्यमण्डलान्तर्वर्तिनो नारायणस्य प्रथमश्रुतादपि लिङ्गादविवक्षिताच्चरमश्रुतमपि प्रयोजनवत् लिङ्गवलीयस्तात्पर्याधीनत्वात् प्रामाण्यस्येति न्यायेन प्रयोजनवत्सर्वप्राप्तोदयस्य ब्रह्माविनाभावलिङ्गस्यानुसारेण सामान्यप्रवृत्तां कर्मनिमित्तशरीरग्रहणश्रुतिमीश्वरविषयेऽपबाध्य कर्माभावेऽपि "य एषोन्तरादित्ये हिरण्मय," (छान्दोग्य १।६।६) इति रूपवत्त्वं ब्रह्मपरतया नीतम्, अन्यथा सिद्धात् जीवलिङ्गाद-

नन्यथासिद्धस्येश्वरलिङ्गस्य बलवत्त्वात्। तस्मादन्यथासिद्धादपि लिङ्गाज्जीवत्ववर्णनमज्ञानमूलमेव केषाञ्चिदिति मन्तव्यम्। तदुक्तं—

अवजानन्ति मां मूढा मानुषीं तनुमाश्रितमिति ॥ २६ ॥

(गीता ९।११)

हेत्वन्तरमप्याह—

प्रत्यभिज्ञानाच्च ॥ २७ ॥

यदोर्वंशं नरः श्रुत्वा सर्वपापैः प्रमुच्यते।
यत्रावतीर्णं विष्ण्वाख्यं परं ब्रह्म नराकृति ॥

(भाग० ९।२३।१९)

यः स देवो मया दृष्टः पुरा पद्मायतेक्षणः।
स एव पुरुषव्याघ्र संबध्नीते जनार्दनः ॥
तपसा योऽप्यदृश्यो हि भगवान् लोकपूजितः।
तं दृष्टवन्तस्ते साक्षात् श्रीवत्साङ्कविभूषणम् ॥

इति पुराणे। श्रुतौ च—"गोपवेशो मे पुरुषः पुरस्तादाविर्बभूव तमेकं गोविन्दं सच्चिदानन्दविग्रहं पञ्चपदं वृन्दावनसुरभूरुहतलासीनं सततं—

वने वृन्दावने क्रीडन् गोपगोपीजनैः सह।
गोपरूपो हरिः साक्षान्मायाविग्रहधारकः ॥
अर्धमात्रात्मकः कृष्णो यस्मिन्विश्वं प्रतिष्ठितम्।
ब्रह्मण्यो देवकीपुत्रो ब्रह्मण्यो मधुसूदनः ॥

सर्वभूतस्थमेकं नारायणं कारणरूपमकारणं परं ब्रह्मस्वरूप-(नारायणाथर्व ४) मिति भक्तिसंनिहितस्य भगवतो वेदान्तावगतपरब्रह्माभेदावगमात्। तस्मात्कृष्णः परमेश्वर इति सिद्धम्।

ननु यद्येवं, तर्हि तस्य संकल्पमात्रेण सकलसुखदस्य स्वतन्त्रस्य जीवलिङ्गैरज्ञत्वादिधर्मैः किमिति व्यवहरणमिति चेत् । प्रभोर्दुर्बोधवामस्वभावत्वादित्यवेहि । तदुक्तं श्रुतौ (?)

'दुर्बोधं कुरुकं तस्य मायया मोहितं जगत्' इति । एतेन तावन्मात्रेण जीवोत्पादनं केषांचिन्नरकायैवेत्यास्तां विस्तरः ॥२७॥

ननु कथं तर्हि 'वृष्णीनां वासुदेवोऽस्मीति' (गीता १०।३७) जीवेषु वृष्णिषु तत्कथनं तत्राह—

वृष्णिषु श्रैष्ठ्येन तत् ॥ २८ ॥

वृष्णिषु तत्प्रत्यभिज्ञानं श्रैष्ठ्येन श्रैष्ठ्यकथनस्यैव प्रस्तुतत्वात् । न तावता जीवत्वं प्रमाणाभावात् । ईश्वरत्वसाधकमानसत्त्वाच्चेति भावः ॥ २८ ॥

ब्रह्मनिष्ठेषु गुरुषु गुरुकल्पेषु च भक्तिरपि मुक्तिफलेत्याह—

एवं प्रसिद्धेषु च ॥ २९ ॥

प्रादुर्भावेष्वपि सेत्यतः सेत्यनुवर्तते । अत एव—

यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ ।
तस्यैते कथिता ह्यर्थाः प्रकाशन्ते महात्मनः ॥
(श्वेताश्व० ६।२३)

इति श्रुतिः ।

महत्सेवां द्वारमाहुर्विमुक्तेस्तमोद्वारं योषितां सङ्गिसङ्गम् ।
महान्तस्ते समचित्ताः प्रशान्ता विमन्यवः सुहृदः साधवो ये ॥
(भाग० ५।५।२)

इत्यादिस्मृतिश्च । वस्तुतोऽवतारत्वेन सर्वसम्मतेषु रामनृसिंहादिषु परब्रह्मत्वं 'रामः शस्त्रभृतामहम्' (गीता १०।३१) इत्या-

दिना विभूतिषु कथनस्य चान्यार्थत्वमतिदेशेन निर्दिशति एव-मिति। एवं अनेन प्रकारेण प्रत्यभिज्ञादिबलत एवं सिद्धेषु च अवतारत्वेन निश्चितेष्वपि रामादिष्वाकारमात्रत्वं विभूतिषु कथनं चोक्तार्थं मन्तव्यमिति शेषः।

चिन्मयेऽस्मिन्महाविष्णौ जाते दाशरथौ हरौ।
रघोः कुलेऽखिलं राति राजते यो महीस्थितः॥
(रामतापनी १।१।१)

इत्याद्युपक्रम्य—

ततः सिंहासनस्थः सन् द्विभुजो रघुनन्दनः।
धनुर्धरः प्रसन्नात्मा सर्वाभरणभूषितः॥

इत्यादिना मध्ये तस्य ध्येयाकारं मानुषरूपमुक्त्वा—

एवं भूतं जगदाधारभूतं रामं वन्दे सच्चिदानन्दरूपम्।
गदाधरं शङ्खाब्जधरं भवारिं स यो ध्यायेन्मोक्षमाप्नोति सर्वः॥

'अर्धमात्रात्मको रामो ब्रह्मानन्दैकविग्रहः' इत्यादिनान्ते तस्य 'नृसिंह आसीत्परेश्वरो जगद्धितं चारु तद्रूपम्' इत्यादि नृसिंहस्य—

चिन्मयस्याद्वितीयस्य निष्कलस्याशरीरिणः।
उपासकानां कार्यार्थं ब्रह्मणो रूपकल्पना।
(रामपूर्वतापनी १।१।७)

इत्यादिना सर्वेषामवतारिनारायणरूपत्वपरब्रह्मत्वयोः प्रत्य-भिज्ञानात्। एवं—

यदा तमस्तन्न दिवा न रात्रिर्न सन्न वासत् शिव एव केवलः।
तदक्षरं तत्सवितुर्वरेण्यं प्रज्ञा च तस्मात्प्रसृता पुराणी॥
(श्वेताश्व० ४।१८)

स कारणं करणाधिपाधिपो न चास्य कश्चिज्जनिता न चाधिपः ।
(श्वेताश्व० ६।९)

इत्यादिश्रुत्युक्तस्य हररुद्रेशानमहादेवादिपदबोध्यस्य शिवस्य पाराशरोपपुराणादौ—

तस्य साधारणी मूर्तिः साम्बा चन्द्रार्धशेखरा ।
तामेव सततं विष्णुब्रह्माद्याश्च सुरेश्वराः ॥
ध्यायन्ति बन्धनाशाय जगतां हितकाम्यया ।

इत्यादिना प्रत्यभिज्ञानात्परब्रह्मतैव । तथा भारतीश्रीभवानीधवामस्वभाप्रभृतीनामपि वक्ष्यमाणप्रमाणत ईश्वरावतारत्वप्रत्यभिज्ञानात् । अतस्तद्भक्तिरपि मुक्तिफलेति भावः । अत्र श्रीकृष्णे भगवति साक्षात्पूर्वपक्षमवतार्य ब्रह्मत्वसमर्थनमन्येषां त्वतिदेशेन तत्समर्थनमवतारान्तरतो लीलाविशेषादितः कृष्णस्याधिक्यमभिप्रेत्य ।

गोपालतापिन्याम् :—

"एको हि वै पूर्वं नारायणो देवो यस्मिन्लोका ओताश्च प्रोताश्च" इत्युपक्रम्यावताराणां मध्ये श्रेष्ठोऽवतारः को भवति येन लोकास्तुष्टा देवास्तुष्टा भवन्ति यं स्मृत्वा मुक्ता अस्मात्संसाराद्भवन्ति । कथं वास्यावतारस्य ब्रह्मता भवतीति नारायणं प्रति ब्रह्मणः प्रश्नेन तथा ज्ञापनात् । नन्वेतदेव कथं सर्वेषां तुल्यगुणवत्त्वात्, तदुक्तम्—

सत्यं ज्ञानमनन्तमध्यसुखं शान्तं परं निर्मलं
ब्रह्मेत्यादिमुखाः स्वरूपसचिवाः स्रष्टृत्वसंहर्तृते ।
सर्वेशित्वनियन्तृते च वशिता संकल्पसत्यात्मते
कारुण्यं च शरण्यता विवशता मूकेषु तेजोबलम् ॥

आत्मारामजनानुकृष्टिनिहतोद्धारौ महोदारता
शूरत्वं च समृद्धता परसुहृत्त्वाद्याश्च ताटस्थ्यतः ।
तेऽमी सन्ति सहस्रशो भगवति श्रीतत्त्वमूर्तौ हरौ
शंभौ चैव महेश्वरे परतरे कृष्णादिके नित्यशः ॥
इत्थं श्रीमति चिन्तिते भगवति भ्रान्त्यादयो दूरगा
दोषाः स्युर्यदि तत्र दोषधिषणां कुर्यात् कथं मानवः ।

इति चेत् । सत्यम्, तथापि—

सर्वाद्भुतचमत्कारी लीलाकल्लोलवारिधिः ।
अतुल्यमधुरप्रेममण्डितप्रियमण्डलः ॥३३॥
त्रिजगन्मानसाकर्षी मुरलीकलकूजितः ।
असमानोर्द्ध्वरूपश्रीविस्मापितचराचरः ॥३४॥
इत्यद्भुताः सदा कृष्णे किल सन्ति महात्मनि ।[१]
लीलाप्रेम्णा प्रियाधिक्यं माधुर्यं वेणुरूपयोः ।
इत्यसाधारणं प्रोक्तं गोविन्दस्य चतुष्टयम् ॥३५॥

(भक्तिरसामृतसिन्धुदक्षिणविभाग १।३३-३५)

इति विशेषाभिप्रायादिति मन्तव्यम् । स्वकृतमर्यादाया एव तत्र बीजत्वात् । तदुक्तम् "स्वकृतविचित्रयोनिषु विशन्निव हेतुतया तरतमश्चकास्त्यनलवत्स्वकृतानुकृतिः" (भाग० १०।८७।१९) इति । अतो न वस्तुनस्तारतम्यम्, उक्तश्रुतिस्मृतिविरोधादित्यास्तां विस्तरः । एतेन नैते परमेश्वरस्य लीलावताराः ।

अथाशरीरस्य ब्रह्मण "एतारतनवोऽग्निवायुरादित्यः कालोऽयं प्राणोऽन्नं ब्रह्मादि विष्णुरुद्र इत्येके अन्यमभिध्यायन्त्येकेऽन्यम्"(मैत्री. ४।५) इत्यादिमैत्रायणीयश्रुतावत्र च श्रुतौ ब्रह्मणो मायिकोऽपि देहो

---

१. वाक्यमिदं न मूलग्रन्थे पठ्यते ।

नास्ति। अग्न्यादिदेहा एव देहा इति निर्देशेन ब्रह्मणो मायिक-लीलाविग्रहस्याप्याविर्भावज्ञापनेन लीलावताराभावज्ञापनात्। अत एव कालीपुराणादौ नृसिंहवराहशरभाणां परस्परोपमर्द्दत्वम्। अन्यत्र च ब्रह्मविष्णुरुद्राणां मोहपारवश्यादिकं श्रूयते। तस्माज्जीव-विशेषा एव ते उपासनार्थं परमेश्वरा उच्यन्ते। परमात्मन्येवाहं-भावाच्च "अहं सर्वस्य प्रभवः" (गीता) इत्यादि स्वात्मोपदेशोऽपि तेषामिति केषांचित्प्रलापो निरस्तः। उदाहृतश्रुतिस्मृतिविरो-धान्मैत्रायणीयश्रुतौ स्वादृष्टारब्धभोगार्हशरीराभावस्यैव विवक्ष-णात्। विचित्रानेकशक्तिमत्त्वरूपेश्वरादेव 'लोकवत्तु लीलाकैवल्यम्' इति न्यायेन जीववद्व्यवहर्तृत्वस्य वक्तुं शक्यत्वाच्च। अत एव तेषां श्रौतपौराणभेदेन द्वैविध्यकल्पनमपि केषांचिद् वृथैवेति मन्तव्यम्, द्वैविध्ये मानाभावात् "वने वृन्दावने क्रीडन्"इत्यादि-श्रुतिमूलकत्वात्पुराणानां श्रुतिपुराणप्रतिपाद्ययोरेकत्वलाभाच्च। तस्मात्साक्षात्परमेश्वरस्यैव लीलावतारा इति मन्तव्यम्।

अत्रेयं व्यवस्था—सच्चिदानन्दघनोऽद्वितीयो निर्विशेषसर्व-कारणत्वाद्युपलक्षितः परमात्मा परब्रह्मादिपदाभिधेयो भगवान्। 'सत्यं ज्ञानमनन्तम्' (तै० उ० २।१) इत्यादिश्रुतेः।

शुद्धे महाविभूत्याख्ये परब्रह्मणि शक्यते।
मैत्रेय! भगवच्छब्दः सर्वकारणकारणे॥
—(विष्णु० ६।५।७२)

इति स्मृतेश्च। स एव त्रिगुणमायाविशिष्ट ईश्वर इति प्रोच्यते। 'मायिनं तु महेश्वरम्' (श्वे.उ.४।१०) इति श्रुतेः। एतस्यैवावतारा ब्रह्मविष्णुरुद्राः। 'अथ यो ह खलु वा वाऽस्य तामसोंऽशोऽसौ ब्रह्मचारिणो योऽयं रुद्रोऽथ यो ह खलु वा वाऽस्य राजसोंऽशोऽसौ

ब्रह्मचारिणो योऽयं ब्रह्माऽथ यो ह खलु वा वाऽस्य सात्विकोंऽशोऽसौ ब्रह्मचारिणो योऽयं विष्णुः स वा एष एकस्त्रिधाभूतः' इति मैत्रायणीयश्रुतेः (४।५)। एते च गुणमात्रोपाधिकत्वाद् गुणावतारा अप्याविर्भूतानेकशक्तिमत्त्वात्पूर्णा एवेत्युच्यन्ते। ननु स्वेच्छापरिगृहीतलीलाविग्रहोपाधिका अपि ते न गुणमात्रोपाधिका अतो नं कथं लीलाऽवतारा एवेति चेन्न। तथा सति प्रतिकल्पं लीलाविग्रहाणामानन्त्येन ब्रह्मादीनामप्यानन्त्यापत्तेः। न चेष्टापत्तिः। 'एको विष्णुरेको रुद्र' इत्यादिश्रुतिविरोधसङ्गात्। तस्माद् गुणावतारा एवेति सिद्धम्।

ये तु चतुर्भुजचतुर्मुखपञ्चमुखा नारायणविरिञ्चिमहेशाख्या मत्स्याद्यवताराश्च, ते तु सर्वे तस्यैव लीलाविग्रहोपहिता लीलावतारा एव। प्रतिकल्पं तेषामानन्त्यश्रवणात्। ननु कथमेते परमेश्वरस्यैवावताराः ? पुराणेषु चतुर्भुजाकारो विष्णोरवतारः, चतुर्मुखाकारो ब्रह्मणः, पञ्चमुखाकारो रुद्रस्येति श्रवणादिति चेत्सत्यम्। यद्यप्येवं श्रूयते तथापि चतुर्भुजशरीरिणः पालनकर्तृताप्रयोजकं विष्णुत्वमेवेति वक्तुमशक्यम्, दैत्यसंहारादिरूपरुद्रकार्यदर्शनात्। तस्य देवरक्षणफलकत्वेऽपि तमःकार्यत्वेन रुद्रकार्यत्वात्। एवं पञ्चमुखशरीरावच्छिन्नस्य त्रिपुरादिसंहर्तृत्वेऽपि न रुद्ररूपत्वनिर्णयः। संहारस्य जगत्पालनफलकत्वेन विष्णुकार्यत्वात्। 'शिव एको ध्येयः शिवङ्करः' (अथर्वशिख० ३) 'प्रज्ञा च तस्मात्प्रसृता पुराणी' (श्वेता० ४।१८) इत्यादिश्रुत्या मुक्तिज्ञानादिरूपविष्णुकार्यप्रतीतेश्च। एवं भवान्यादेर्दैत्यादिसंहर्तृत्वेऽपि पालनरूपविष्णुकार्यदर्शनात्।

सैषा प्रसन्ना वरदा नृणां भवति मुक्तये। (सप्तशती० १।५७)

इत्यादिना मुक्तिरूपविष्णुकार्यप्रतीतेश्च न रुद्ररूपत्वनिर्णयः। एवं पुराणतन्त्रादौ बहुशः सरस्वत्यादेरपि ज्ञानपालनादिरूपविष्णुकार्य-प्रतीतेर्न ब्रह्मरूपत्वनिर्णयसम्भवः। तस्मात्सर्वाणि शरीराणि सर्वेषामपि। चतुर्भुजादिशरीरावच्छिन्ने क्लृप्तकार्यस्य रुद्रादावपि प्रतीतेः।

एतदभिप्रायेणैव—

हरिरूपी महादेवो लिङ्गरूपी जनार्दनः।
ईषदप्यन्तरं नास्ति भेदकृन्नरकं व्रजेत्॥

इत्यादि बृहन्नारदीयानि,

विष्णोरन्यं तु पश्यन्ति ये मां ब्रह्माणमेव च।
कुतर्कमतयो मूढाः पच्यन्ते नरकेष्वधः॥
ये च मूढा दुरात्मानो भिन्नं पश्यन्ति मां हरेः।
ब्रह्माणं च तथा तेषां भ्रूणहत्यासमं त्वघम्॥

इति भविष्यत्पुराणस्थानि,

तपसा तोषयित्वा तु पितरं परमेश्वरम्।
ब्रह्मनारायणौ पूर्वं रुद्रः कल्पान्तरेऽसृजत्॥
कल्पान्तरेषु ब्रह्मा वै विष्णुरुद्रौ जजान ह।
विष्णुश्च भगवाँस्तद्वद्ब्रह्माणमसृजत्पुनः॥
नारायणं पुनर्ब्रह्माणश्च देवः पुनर्भवः।
एवं कल्पेषु कल्पेषु ब्रह्मविष्णुमहेश्वराः॥
परस्परस्माज्जायन्ते परस्परजयैषिणः।
तत्र कल्पान्तवृत्तान्तमधिकृत्य महर्षिभिः॥
प्रभावः कथ्यते तेषां परस्परसमुद्भवात्।
अयं परस्त्वयं नेति संरम्भाभिनिवेशिनः॥

यातुधाना भविष्यन्ति पिशाचाश्च न संशयः ।

इत्यादि वायुपुराणस्थानि च वचांसि समञ्जसानि । अन्यथा गुणभेदेन भेदसत्त्वाद्विष्णुशिवादिशब्दानां शिवविष्णुनामत्वाद्यसम्भवाच्चासङ्गतेरित्यास्तां विस्तरः ।

एवं रामकृष्णादयोऽपि न विष्णुचतुर्भुजादेरवताराः किन्तु परमेश्वरस्यैव । द्रोणपर्वणि—

'चतुर्मूर्तिरहं शश्वल्लोकत्राणार्थमुद्यतः ।
आत्मानं प्रविभज्येह लोकानां हितमादधे ॥
एका मूर्तिस्तपश्चर्यां कुरुते मे भुवि स्थिता ।
अपरा पश्यति जगत्कुर्वाणा साध्वसाधुनी ॥
अपरा कुरुते कर्म मानुषं लोकमाश्रिता ।
शेते चतुर्थी त्वपरा················ ॥

इत्यादिना तथा ज्ञापनात् । तत्रावताराणां लक्षणं व्यवस्था वोक्ता निबन्धेषु । तथाहि । अवतारो नाम स्वसङ्कल्पपूर्वकपराधीनव्यक्तीकृतदेहो भक्तवात्सल्याद्यनेकगुणोल्बणः ।

माया ह्येषा मया सृष्टा यन्मां पश्यसि नारद ।
सर्वभूतगुणैर्युक्तं न तु मां द्रष्टुमर्हसि ॥
(शान्ति० ३३९।४५–४६)

इत्यादि भगवदुक्तेः । स च विभवार्चाभेदेन द्विविधः । तत्र विभवावतारः—गमनागमनसंश्लेषविश्लेषयोग्यं यथा भवति तथा दिव्यं देहं प्रकटयन् स्थितः । सोऽपि स्वरूपावेशभेदेन द्विविधः ।

---

१. मार्कण्डेयपुराणे (४।४४—५२) एतादृशं किमपि विवरणमुपलभ्यते ।

तत्र स्वरूपावतारः सर्वेश्वरः स्वीयाप्राकृतरूपमितरसजातीयतया प्रकटयन् स्थितः। सोऽपि मनुजामनुजभेदेन द्विविधः। तत्र मनुजो रामकृष्णादिर्नराकृतिः। अमनुजस्तद्व्यतिरिक्तो देवतिर्यगादिः। यथोपेन्द्रमत्स्यादिः। यद्यप्येते पूर्णा एव,

धर्म्मा + + तुं बध्नामि चलिते चलिते युगे। ?
तास्ता योनीः प्रविश्याऽहं प्रजानां हितकाम्यया।
सर्वे सर्वगुणैः पूर्णाः सर्वदोषविवर्जिताः॥

इत्यादिवाक्येभ्य उदाहृतश्रुतिभ्यश्च। तथाऽपि तत्र कृष्णः पूर्णः, आविष्कृतानेकशक्तिमत्त्वात्। अन्ये त्वंशकला आविष्कृताल्पशक्तिमत्वादित्यभिप्रेत्योक्तं श्रीभागवते—

एते चांशकलाः पुंसः कृष्णस्तु भगवान्स्वयम्।
(भाग० १।३।२८)

इति विचारान्तरम्। आवेशावतारोऽपि स्वरूपशक्त्यावेशभेदेन द्विविधः। तत्र स्वरूपावेशावतारः—केषुचिच्चेतनेषु स्वेन सन्निधीभूय स्थितः। शक्त्यावेशावतारः—तथैव शक्त्या सन्निधीभूय स्थितः। तत्राद्यः—कपिलानन्तव्यासपरशुरामप्रभृतिः। द्वितीयः—पृथुधन्वन्तरिप्रभृतिः। 'स्वशक्तिलेशाऽऽदृतभूतसर्गः' इत्यादिस्मृतेः। एवम्—

यद्यद्विभूतिमत्सत्त्वं श्रीमदूर्जितमेव वा। (गी० १०।४१)

इत्यादिना भगवतोक्ता आधुनिका अपि। अर्चावतारस्तु मन्त्रादिसंस्कृता मूर्तिः शालग्रामादिश्च, तत्र भगवतो मन्त्रसङ्कल्पादिवशतः सन्निधानात्। अत एवेश्वरत्वेन पूजातस्तेभ्यः फलमपीत्यास्तां विस्तरः।

इति श्रीनारायणतीर्थविरचितायां शाण्डिल्यसूत्रवृत्तौ द्वितीयाध्यायस्य प्रथमाह्निकम्।

द्वितीयाध्याये

द्वितीयाह्निकम् ।

ननु भक्तिः फलमेव सर्वेषां ज्ञानान्तानामुपायानामित्युक्तम् । भक्तिशब्दश्च पुराणेषु 'श्रवणं कीर्तनं विष्णोः' (भा० ७।५।२३) इत्यादि प्रकृत्य 'इति पुंसाऽर्पिता विष्णौ भक्तिश्चेन्नवलक्षणा' (७।५।२४) इत्यादिवाक्यैः श्रवणकीर्तनादौ प्रयुज्यते, तत्र च भक्तेर्योगः श्रूयते—

सततं कीर्तयन्तो मां यतन्तश्च दृढव्रताः ।
नमस्यन्तश्च मां भक्त्या······॥ (गी० ९।१४) इति ।

एवं 'ये भजन्ति तु मां भक्त्या' इति (गी० ९।२९) भक्तिभजनयोर्भेदोऽवगम्यते । अतः का सा भक्तिः किं तद्भजनमिति जिज्ञासामपनिनीषुराह—

भक्त्या भजनोपसंहाराद्गौण्या परायै तद्धेतुत्वात् ॥१॥

भक्त्येति । परायै-परभक्त्यर्थं गौण्या-वृत्त्या जीवनशब्देन लाङ्गलस्येव, भक्तिनाम्ना भजनानां कीर्तनादीनामुपसंहरात्–सङ्गृह्याऽन्ते कथनाद्–भक्तिभजनश्रवणकीर्तनादीनामेकार्थत्वम् । साधनता च प्रतिबन्धकदुरितनिवृत्तिद्वारा परभक्तिप्रतीतिभावः । कुतः ? तद्धेतुत्वात् ।

ये भजन्ति तु मां भक्त्या मयि ते तेषु चाप्यहम् ।
(गी० ९।२९)

इत्यनेन सकलतदङ्गभजनरूपसाधनस्य तदनुरक्तिद्वारा तदनुग्रहं प्रति हेतुत्वलाभादिति भावः। तथा च 'चित्रया यजेत' (तै० सं० २।४।६।१) इतिवत् सामानाधिकरण्येन भक्तिनामकभजनेनेष्टं भावयेदित्येवार्थः। न तु भक्त्या भजनम्, तेन कीर्तनादि, तेन च मयि स्थितिरित्यादिः, वाक्यभेदापत्तेरित्यास्तां विस्तरः।

वस्तुतो गौण्या भक्त्या भजनोपसंहारादाराध्यत्वज्ञानरूपगौणभक्तिमतां कीर्तनादिभजनानां कर्तव्यताकथनात् 'सोमेन यजेत' (तै० सं० २।५।६।१) इत्यादौ सोमवता यागेनेष्टं भावयेदिति गुणविशिष्टविधानवदत्रापि तादृशभक्तिमद्भिः कीर्तनादिभजनैः परभक्तिमुत्पादयेदिति तादृशभक्तिविशिष्टविधानमेवेति भावः।

केचित्तु—

ये भजन्ति तु मां भक्त्या मयि ते तेषु चाप्यहम्। (गी० ९।२९)

इत्यत्र पदद्वयसार्थक्याय भक्त्या-कीर्तनादिरूपगौणभक्त्या भजन्ति-अनुरञ्जयन्तीत्यर्थः। तथा—

सततं कीर्तयन्तो मां यतन्तश्च दृढव्रताः। (गी० ९।१४)

जितेन्द्रियाः सततं कीर्तयन्तो नामग्रहणं कुर्वन्तः, तथा यतन्तो यतमाना अर्चनादिकं कुर्वन्तः, नमस्यन्तः कायवाङ्मनोभिर्नमस्कुर्वन्तः, मां भगवन्तमुपासते-चिन्तयन्ति, ते भक्त्या—प्रेम्णा नित्ययुक्ताः सदा संयुक्ता भवन्तीति शेषेणार्थः। दृढव्रताः—एवं तादृशकीर्तनादिपरा नित्यप्रेमयुक्ता भवन्तीति यावत्। 'माम्' इति द्वयं कीर्तननमस्कारयोः पृथक्प्राधान्यज्ञापनाय। इत्थं च—

भजन्त्यनन्यमनसो ज्ञात्वा भूतादिमव्ययम्। (गी० ९।१३) इत्यनेन परभक्तिमनूद्य 'सततं कीर्तयन्तो माम्' (गीता ९।१४) इत्यनेन कीर्तनादीनां तत्र सविनत्वमुक्त्वा 'ये भजन्ति तु मां भक्त्या' (गीता ९।२९) इत्युपसंहृतं भगवतेत्यभिप्रेत्याह–भक्त्या भजनेति। गौण्याः परायै इति पाठः। तथा चायमर्थः–भक्त्या भजन्तीति साधनभक्त्या फलभक्तेः कथनाद्गौण्याः कीर्तनाऽऽदि-रूपायाः परायै परभक्त्यर्थमेव, कुतो गौणत्वमासम् तत्राह–तद्धेतुत्वात् परभक्तिसाधनत्वात्। तथा च कीर्तनादिषु परभक्ति-साधनत्वेन 'आयुर्घृतम्' इतिवद्भक्तिशब्दो गौण एव। एतेन 'भज सेवायाम्' (भ्वादि ९८२) इति स्मरणकीर्तनादावपि मुख्य एव भक्तिशब्दोऽस्त्विति निरस्तम्। लाघवादनुराग एव धातोः शक्तेः। अत एव भक्त्या स्मरति कीर्तयति नमस्यतीत्यादि-प्रयोगाः। एतेन कीर्तनत्वादेरपि जातिविशेषतया तद्रूपेण शक्ति-रस्त्वित्यपि परास्तमित्याहुः॥ १॥

अनुरागार्थमेव कीर्तनादिभक्तिरिति कुतो निर्णीतं तत्राह–

रागाऽर्थप्रकीर्तिसाहचर्याच्चेतरेषाम्॥ २॥

रागार्थेति।

स्थाने हृषीकेश तव प्रकीर्त्या
जगत्प्रहृष्यत्यनुरज्यते च।
रक्षांसि भीतानि दिशो द्रवन्ति
सर्वे नमस्यन्ति च सिद्धसङ्घाः॥
(गीता ११।३६)

इत्यत्र तव प्रकृष्टयोपचितया कीर्त्या–कीर्तनेन कृतेन वा यशसा वा तेन जगत्–जनः प्रहृष्यति–प्रकर्षेण सुखीभवति,

अनुरज्यते च त्वय्यनुरागं प्राप्नोति। तत्र हर्षो द्वारम्। त्वय्यनुरागश्च फलभक्तिः फलम्। तथैवान्वयव्यतिरेकादित्यर्थेन स्पष्टमेव। कीर्तनस्यानुरागार्थत्वलाभः, तत्साहचर्यात्। 'सततं कीर्तयन्तो माम्' इत्याद्युक्तानामपि तदेव फलम्।

मच्चित्ता मद्गतप्राणा बोधयन्तः परस्परम्।
कथयन्तश्च मां नित्यं तुष्यन्ति च रमन्ति च॥
तेषां सततयुक्तानां भजतां प्रीतिपूर्वकम्।
ददामि बुद्धियोगं तं येन मामुपयान्ति ते॥
तेषामेवानुकम्पार्थमहमज्ञानजं तमः।
नाशयाम्यात्मभावस्थो ज्ञानदीपेन भास्वता॥
(भ० गी० १०।९-११)

इत्यादिवाक्यैरपि तथावगमादिति भावः। अत्र भजतामिति सामान्यत उक्तस्य विशेषोक्तिर्मच्चित्ता इति। स्मरणस्य मद्गतप्राणा इति मदर्थजीवना इत्यर्थः। अथवा चित्तोपादानात् मद्गतबहिरिन्द्रिया इत्यर्थः। ततश्च श्रवणार्चनादिपरिग्रहः। बोधयन्तः—स्मारयन्तः, कथयन्तः—संकीर्तयन्तः, तुष्यन्तीति भावभक्तिनिर्देशः। रमन्तीति प्रेमभक्तिनिर्देशः। तत्र भावः प्रथमावस्था प्रेमोत्तरावस्था इति तयोर्भेदेन निर्देशो बोध्यः। बुद्धियोगं स्वरूपाऽवबोधं भगवन्मूर्तिस्फूर्तिश्च। येन बोधेन कथितेन द्विविधेन मां निर्गुणं सगुणञ्चोपयान्ति प्रपद्यन्ते। प्रपत्तिश्चरमप्रेमरूपा प्रागेवोक्ता। तत्र स्वरूपावबोधतो निर्गुणे, मूर्तिस्फूर्तितः सगुण इति विवेकः। तेषां सगुणनिर्गुणनिष्ठानामनुकम्पाऽर्थं स्वरूपप्राप्तये, अहं ज्ञानदीपेन-स्वसङ्कल्पेन, अज्ञानं-प्रत्यगंशाभेदावरकं नाशयामीत्यर्थः। तथा च सिद्धं ज्ञानान्तानां सर्वेषामुपायानां

प्रेमभक्तिरेव फलम्। ततो भगवदनुग्रहतश्च कृतार्थतेति संक्षेपः ॥ २ ॥

ननु कीर्तनाऽऽदेः कः काल इत्यपेक्षायामाह—

अन्तराले तु शेषाः स्युरुपास्त्यादौ च काण्डत्वात् ॥३॥

अन्तराल इति। तुरवधारणे भिन्नक्रमः। अन्तराले—ज्ञानसाधनश्रवणमननाद्यन्तराल उपास्त्यादौ च क्रममुक्तिफलकोपासननिष्कामयज्ञाऽऽदिकर्माऽऽचरणादावपि, शेषा एव-गौण्यो भक्तय एव कार्या इति शेषः। कुतः? काण्डत्वात्-यथासम्भवमेकफलसाधनसमूहरूपत्वात्। कीर्तनाऽऽदीनां वक्ष्यमाणप्रमाणतः क्वचिदङ्गाङ्गिभावतः, कचिद्विकल्पतः, क्वचित्समुच्चयतस्तत्वज्ञानपरभक्तिमुक्तिसाधनत्वस्य वक्तव्यत्वात् ॥ ३ ॥

किम्द्वारा साधनत्वं? तत्राऽऽह—

ताभ्यः पावित्र्यमुपक्रमात् ॥ ४ ॥

ताभ्य इति। ताभ्यो-गौणभक्तिभ्य,: उपक्रमात्-आरम्भसमयमारभ्यैव, पावित्र्यं-पापक्षयः। अभ्यस्तानामेव पापक्षयहेतुत्वमिति न नियमः, सकृदुच्चारणमात्रेणाऽजामिलादेः समस्तपापक्षयस्य पुराणेषु—

अयन्तु कृतनिर्वेशो जन्मकोट्यंहसामपि।
यद्व्याजहार विवशो नाम स्वस्त्ययनं हरेः॥
(भाग० ६।२।७)

यद्व्यक्षरन्नाम गिरेरितं नृणां
सकृत्प्रसङ्गादघमाशु हन्ति।

पवित्रकीर्तिं तमलङ्घ्यशासनं
भवानहो द्वेष्टि शिवं शिवेतरः ॥
(भाग० ४।४।१४)

इत्यादिना कथनात्। तथा च समस्तदुरितक्षय एव द्वारमिति भावः ॥ ४ ॥

सर्वत्र भक्त्येति कथनस्याऽऽभिप्रायान्तरं वर्णयतां मतमाह—

तासु प्रधानयोगात् फलाऽऽधिक्यमेके ॥ ५ ॥

तास्विति। 'यो मे भक्त्या प्रयच्छति' (गी० ९।२६) 'नमस्यन्तश्च मां भक्त्या' (गी० ९।१४) इत्यादिवाक्यबलात्, तासु गौणीषु, प्रधानस्य-अनुरागस्य योगात्फलाऽऽधिक्यमेक-आचार्या मन्यन्ते। अनुरागाङ्गतया कृतकीर्तनाऽऽदिभिः कैवल्यमपि भवति। अन्यथा तु पापनिवृत्तिमात्रमिति भावः ॥ ५ ॥

मतान्तरमाह—

नाम्नेति जैमिनिः संभवात् ॥ ६ ॥

नाम्नेति। नाम्ना-तत्कीर्तनेन फलाऽऽधिक्यं जैमिनिराचार्यो मन्यते। नाम्नेत्युपलक्षणम्। एकविधगौणभक्तावन्यविधायास्तस्या अङ्गत्वसंभवात्। स्मर्यते हि पूजायां स्तुत्यादेरङ्गत्वम्। तथा च 'भक्त्या प्रयच्छति' (गी० ९।२६) इत्यादौ गौणभक्तिरेवार्थः।

परे तु भक्तिनाम्ना-नमस्कारेण परभक्तिं भावयेदित्यादिरूपेणान्वयं जैमिनिर्मन्यते 'श्येनेनाभिचरन् यजेत' (आप० श्रौत० २२।४।१३) इत्यादाविव संभवादित्यभिप्रायं वर्णयन्ति। तेषामयमभिप्रायः—कर्मभ्य उत्कर्षलाभाय नामकरणमावश्यक-

मिति । एतेन श्रवणकीर्तनाऽऽदिकमुद्दिश्य भक्त्येत्याराध्यत्वज्ञानानुरागाऽऽदिरूपसाधनभक्तिर्विधीयते श्रवणकीर्तनाऽऽदिकं यत्तत्र—नाराध्यबुद्ध्याऽनुरागेण वेति । अतोऽयं 'दध्ना जुहोति' इत्यादिवद् गुणविधिरेवेति निरस्तम् । वाजपेय इव विरुद्धत्रिकद्वयाऽऽपत्तिभिया तदभावात् । तथा हि 'वाजपेयेन स्वाराज्यकामो यजेत' (आप० श्रौत० १८।१।१) इत्यत्र गुणविधिः कर्मनामधेयं वेति सन्देहे-समाहितम्, यद्ययं गुणविधिः स्यात्तर्हि वाजशब्दस्यान्नवाचित्वेन स एव गुणो वाच्यः । तथा सति तस्य तृतीयया यजत्यर्थं प्रति गुणत्वम् । यागस्य च द्रव्यं प्रति प्रधानता, तस्यैव यागस्य फलं प्रति करणत्वेन गुणता । किमुद्दिश्य किं विधीयते इति विचारे यागमुद्दिश्य वाजपेयो विधीयत इति यागस्योद्देश्यत्वम्, द्रव्यं प्रति यागस्योद्देश्यत्वाज्ज्ञातत्वमज्ञातत्वञ्च विधेयत्वात्फलं प्रति, तथा च विरुद्धत्रिकद्वयमापद्येत । न चैतदेकस्यां प्रतीतावेकस्य युक्तम्, अतो वाजपेयशब्दः कर्मनामधेयमिति यथा, तथा प्रकृतेऽप्यनुरागाऽऽदिलक्षणभक्तिरूपगुणयुक्तायाः श्रवणाऽऽदिभक्तेः फलसाधनत्वे विवक्षिते तस्याऽऽनुरागाऽऽदिकं प्रति प्राधान्यात् फलं प्रति च गुणभावाद्विरुद्धत्रिकद्वयाऽऽपत्तिरनिवार्यैव स्यात् । तस्माद्भक्तिशब्दोऽत्र कीर्तनाऽऽदिभक्तिनामधेयमेव । 'दध्ना जुहोति' इत्यादौ तु होमप्रापकवाक्यान्तरस्यापि 'होत्रं जुहोति' इत्यस्य स्फुटत्वाद् गुणविधित्वमेव । नात्र तथेति संक्षेपः ॥ ६ ॥

श्रवणं कीर्तनं विष्णोः स्मरणं पादसेवनम् ।
अर्चनं वन्दनं दास्यं सख्यमात्मनिवेदनम् ॥
इति पुंसाऽर्पिता विष्णोर्भक्तिश्चेन्नवलक्षणा ।
क्रियेत भगवत्यद्धा तन्मन्येऽधीतमुत्तमम् ॥

(भाग० ७।५।२३–२४)

इत्यत्र समुच्चयासमुच्चयसन्देहे नवलक्षणेतिकथनात् समुच्चय एवेति प्राप्त आह—

अप्रयोगानां यथाकालसंभवो गृहाऽऽदिवत् ॥ ७ ॥

अप्रयोगानामिति । एकत्र प्रयोगानापन्नानां-श्रवणकीर्तनाऽऽदीनां यथाकालं संभव-उदयः, गृहाऽऽदिवत् । यथा गृहसाधन-तृणाऽऽद्याहरणं कदाचित्समुच्चितं कदाचिन्न, तथा श्रवण-कीर्तनाऽऽदिकं कदाचित्समुच्चितम् । यथाऽम्बरीषस्य—

स वै मनः कृष्णपदाऽरविन्दयो-
वंचांसि वैकुण्ठगुणाऽनुवर्णने ।
करौ हरेर्मन्दिरमार्जनाऽऽदिषु
श्रुतिं चकाराऽच्युतसत्कथोदये ॥
(भाग० ९।४।१८)

इत्यादि । कदाचिन्न समुच्चितम् । एकेनैव साध्याऽव्यभि-चारश्रवणात् । यथा—

श्रीविष्णोः श्रवणे परीक्षितभवद्वैयासकिः कीर्तने
प्रह्लादः स्मरणे तदङ्घ्रिभजने लक्ष्मीः पृथुः पूजने ।
अक्रूरस्त्वभिवन्दने च हनुमान् दास्ये च सख्येऽर्जुनः
सर्वस्वाऽऽत्मनिवेदने बलिरभूत् कैवल्यमेषां समम् ॥ इति

तस्मात्समुच्चयो नाऽऽवश्यकः । एकप्रयोगाऽऽपन्नानामेव समुच्चयेनानुष्ठानादिति भावः । श्रद्धा साक्षाद्रूपा न तु कर्माऽऽद्यर्पणरूपा पारम्परिकी-विष्णावर्पिता तदर्थमेवेदमिति भाविता न तु धर्माऽऽदिष्वर्पिता, एवं भूता चेत्क्रियेत, तदाऽनेन यदधीतं तदुत्तमं मन्य इत्यर्थः । तत्र श्रवणन्नाम सगुणस्य निर्गुणस्य वा

शब्दकरणकशाब्दबोधस्तत्प्रतिपादकशब्दस्य श्रोत्रेण ग्रहणञ्च। कीर्तनम्—सगुणस्य निर्गुणस्य च बोधकशब्दस्योच्चारणम्। स्मरणम्—स एवंविधगुण इत्याद्याकारा स्मृतिः। पादसेवनम्—परिचर्या विष्णुप्रतिमापादसम्बन्धिगृहलेपनाऽऽदिरूपा गुरोरपि परमेश्वररूपत्वात्तस्य, भगवद्भक्तस्य वा पादसंवाहनरूपा च। अर्चनम्—श्रवणाऽऽदिभिन्नो विष्णुप्रीतिहेतुर्व्यापारः प्रतिमाऽऽदौ गन्धपुष्पाऽऽद्यर्पणरूपः। वन्दनम्—पूजाबहिर्भूतनमस्कारो गुरु-शालग्रामप्रतिमाभगवद्भक्तानाम्। दास्यम्—दासस्येव परमेश्वर-प्रीतिफलकं सकलकर्माऽर्पणम्।

यत्करोषि यदश्नासि यज्जुहोषि ददासि यत्।
यत्तपस्यसि कौन्तेय तत्कुरुष्व मदर्पणम्॥

(गीता ९।२७)

इत्यादिना लौकिकवैदिकसकलकर्मार्पणस्य भगवति कर्तव्यत्वे-नोक्तत्वात्। क्रियाया भगवत्प्रीतिमात्रफलकतापर्यवसानमेव हि परमेश्वरे परमगुरौ समर्पणम्। सख्यम्—विश्वासो मित्रवृत्तिश्चेति द्विविधम्। तत्राऽऽद्यं यथा महाभारते—

प्रतिज्ञा तव गोविन्द न मे भक्तः प्रणश्यति।
इति संस्मृत्य संस्मृत्य प्राणान्सन्धारयाम्यहम्॥ इति।

द्वितीयं बन्धुभावेन हिताऽऽशंसनम्। यथा अगस्त्य-संहितायाम्—

परिचर्यापराः केचित्प्रसादेषु च शेरते।
मनुष्यमिव तन्द्रष्टुं व्यवहर्तुं च बन्धुवत्॥ इति।

आत्मनिवेदनम्—गवाश्वाऽऽदिस्थानीयस्य स्वस्य देहाऽऽदि-सङ्घातस्य तदेकभजनाऽर्थं विक्रयस्थानीयं तस्मिन्नर्पणम्। यत्र

तद्भरणपालनचिन्ताऽपि स्वयन्न क्रियते। एतदेवाऽर्पणपूर्वकं करणम्। यथा कस्मैचिद् दुग्धे देये गवां दानमिति। एवं—

अहमेव परो विष्णुर्मयि सर्वमिदञ्जगत्।
इति यः सततं पश्येत् तं विद्यादुत्तमोत्तमम्॥
(विष्णु०　　)

एकः समस्तं यदिहाऽस्ति किञ्चित्
तदच्युतो नाऽस्ति परं ततोऽन्यत्।
सोऽहं स च त्वं स च सर्वमेत-
दात्मस्वरूपं त्यज भेदमोहम्॥
(विष्णु०　　)

इत्यादि बोध्यम्। सर्वस्य पृथक्सत्त्वनिरासादात्मनि विष्णौ समर्पणात्। अस्मिन् पक्षे स्त्रीपुत्रादिरूपे विष्णावर्पिता कृतैव भक्तिरधीयते, न शास्त्रेण; यद्वा साक्षाद्विष्णुत्वेन क्रियते। तदोत्तममधीतं मन्य इति श्लोकाऽर्थः। अत एव—

सर्वेषामेव भक्तानामिष्टः प्रियतमो मम।
यो हि ज्ञानेन मां नित्यमाराधयति नाऽन्यथा॥

इत्यादिवचनबलतः कर्ममिश्रादिभेदेन भक्तिविभागेषु ज्ञानमिश्रामेवोत्तमामाहुर्भागवताः। द्वैतभ्रमतिरस्कारतो मुक्तिपर्यवसायित्वात्। तथा हि—भक्तिर्द्वेधा विहिताऽविहिता च। तत्राऽविहिता रागाऽनुगा। रागात्मिका कामानुसृता या परमेश्वरेष्वारसिकी परमाविष्टता रागस्तन्मयो रागात्मिका व्रजवासिजनेष्वभिव्यक्ता। सेयं द्विविधा—कामरूपा सम्बन्धरूपा चेति। कामरूपा गोपीषु, सम्बन्धरूपा नन्दादिषु पितृत्वाद्यभिमानमूला। अस्यां न शास्त्रविस्तरः। अथ विहिता श्रवण-

कीर्तनादिरूपोक्ता। सा च त्रेधा—कर्ममिश्रा, कर्मज्ञानमिश्रा, ज्ञानमात्रमिश्रा च। तत्र कर्ममिश्रा सात्विकी, राजसी, तामसी चेति त्रेधा। तत्र सात्विकी त्रेधा—पापनाशार्था, भगवत्प्रीत्यर्था विधिसिद्ध्यर्था च।

कर्मनिर्हारमुद्दिश्य परस्मिन् वा तदर्पणम्।
यजेद्यष्टव्यमिति वा पृथग्भावः स सात्विकः॥
(भाग० ४।२९।१०)

इति स्मृतेः। एतस्याश्च दास्यभक्तावन्तर्भावः। भगवदाज्ञा-परिपालनरूपत्वेन भगवत्प्रीतिमात्रफलकतायां पर्यवसनात्। ननु कर्मनिर्हारः—पापक्षयः स्वगतं फलम्। तदर्थं क्रियमाणस्य कर्मणो दास्यरूपत्वे स्वगतस्वर्गकामनया क्रियमाणमपि दास्यं स्यादिति चेन्न; पापस्येश्वरं प्रत्याज्ञालङ्घनरूपापराधजन्यत्वेन तत्क्षयकाम-नया क्रियमाणस्य कर्मणो दासत्वसंभवात्। अपराधिनो हि प्रभुं प्रति दास्यमाचरन्तोऽपराधान्मुच्यन्त इति लोके दृष्टम्। तथा च स्वगतसुखमनुद्दिश्य विहितं कर्म कुर्वतां दासत्वं नेतरेषाम्। अत एवोक्तम्—

यस्ते आशिष आशास्ते न स भृत्यः स वै वणिक्। इति।

राजसी त्रेधा—विषयाऽर्था, यशोऽर्था, ऐश्वर्याऽर्था चेति।

विषयानभिसन्धाय यश ऐश्वर्यमेव च।
अर्चादावर्चयेद्यो मां पृथग्भावः स राजसः॥
(भाग० ३।२९।९)

इति स्मृतेः। एवं तामसी त्रेधा—हिंसाऽर्था, दम्भाऽर्था, मात्सर्याऽर्था च।

दास्यभक्तौ राजसतामसभक्त्योस्तु योग्यतयाऽर्चनभक्तावेव निवेशो बोध्यः, कर्तृगतसुखफलकत्वात्। इत्यास्तां विस्तरः।

कर्मज्ञानमिश्रा त्रेधा—उत्तमा, मध्यमा, प्राकृता च, सत्त्वतारतम्यात्। तत्रोत्तमः—

सर्वभूतेषु यः पश्येद्भगवद्भावमात्मनः।
भूतानि भगवत्यात्मन्येष भागवतोत्तमः॥

(भा० ११।२।४५)

इति सर्वभूतग्रहणसमयेऽपि द्रवावस्थाप्रविष्टभगवदाकारताया एव प्रकाशमानत्वाद् जतुरङ्गवत्सर्वभूतेषु भगवद्भावनोपपत्तेरयं भागवतोत्तमः। तादृशसंस्कारस्यानपायादिति भावः। एतादृशभानान्यथानुपपत्त्या प्राक् पूर्णा द्रवाऽवस्था प्रतीयते। ईषद्द्रवाऽवस्थायां तु मध्यमः।

ईश्वरे तदधीनेषु बालिशेषु द्विषत्सु च।
प्रेम मैत्री कृपोपेक्षा यः करोति स मध्यमः॥

(भा० ११।२।४६)

इत्युक्तः। एतादृगवस्थातोऽग्रे पूर्णद्रवावस्थाया उत्पत्स्यमानत्वादिति भावः। यस्य तु चित्ते न द्रवावस्था पुष्टा, नापीषदुत्पन्ना, किन्तु तदर्थं भागवतधर्मान् श्रद्धयाऽनुतिष्ठति स काठिन्यावस्थाविनाशसामग्र्या विशिष्टः प्राकृतः।

अर्चायामेव हरये पूजां यः श्रद्धयेहते।
न तद्भक्तेषु चान्येषु स भक्तः प्राकृतः स्मृतः॥

(भा० ११।२।४७)

इत्युक्तः। प्रकृतिश्चारम्भस्तस्यां वर्तमानः प्राकृतः। प्रारब्धभक्तिसाधनानुष्ठान इत्यर्थः। अत्रोत्तमाया आत्मनिवेदने, मध्यमाया दास्ये, प्राकृताया अर्चनेऽन्तर्भावो बोध्य इति सङ्क्षेपः। ज्ञानमात्रमिश्रा—

मद्गुणश्रुतिमात्रेण मयि सर्वगुहाशये ।
मनोगतिरविच्छिन्ना यथा गङ्गाऽम्भसोऽम्बुधौ ॥ इति ।
(भाग० ३।२९।११)

अत्राऽवच्छिन्नेति धारावाहिकता दर्शिता, यथा गङ्गाऽम्भस इति दृष्टान्तेन मनस्यपि धारावाहिकी द्रवावस्था । मयि सर्वगुहाशये मनोगतिरिति सर्वेशाकारता । तेनाद्रवाऽवस्थायां धारावाहिक्यपि वृत्तिर्द्रवाऽवस्थायामप्याशु विनाशिनी सा, द्रवत्व-धारावाहिकत्वयुक्ताऽपि सर्वेशाविषया न भक्तिरित्युक्तम् । सोऽयं द्रवावस्थाप्रविष्टभगवत्स्वरूपभानस्य त्रिविधत्वात् त्रिविधः । तत्राऽऽद्यः प्रपञ्चसत्यत्वभानसहितः । यथा—

खं वायुमग्निं सलिलं महीं च
ज्योतींषि सर्वाणि दिशो द्रुमादीन् ।
सरित्समुद्रांश्च हरेः शरीरं
यत्किञ्च भूतं प्रणमेदनन्यः ॥ इत्यादि ।
(भाग० ११।२।४१)

अनेन प्राकृतो भागवतोत्तम उक्तः । द्वितीयः प्रपञ्चमिथ्यात्व-भानसहितः । यथा—

तस्मादिदञ्जगदशेषमसत्स्वरूपं
स्वप्नाभमस्तधिषणं पुरुदुःखदुःखम् ॥
त्वय्येव नित्यसुखबोधतनावनन्ते
मायात उद्यदपि यत्सदिवावभाति ॥
(भाग० १०।१४।२२)

अनेन मध्यमो भागवतोत्तम उक्तः । तृतीयः प्रकारद्वयेनापि प्रपञ्चभानविरहितः । यथा—

ध्यायतश्चरणाऽम्भोजं भावनिर्जितचेतसा ।
औत्कण्ठ्याऽश्रुकलाऽक्षस्य हृद्यासीन्मे शनैर्हरिः ॥
प्रेमाऽतिभरनिर्भिन्नपुलकाङ्गोऽतिनिर्भरः ।
आनन्दसम्प्लवे लीनो नाऽपश्यमुभयं मुने ॥ इति ।
(भाग० १।६।१७-१८)

अनेनोत्तमो भागवतोत्तम उक्तः । एवं मध्यमादिभेदाः स्वयमुदाहार्याः । तथा च साधनपरिपाकेनोत्तरोत्तरभूमिलाभः । तत्र कर्ममिश्रा गृहस्थानाम्, कर्मज्ञानमिश्रा वानप्रस्थानाम्, ज्ञानमात्रमिश्रा भिक्षूणाम् ।

निर्विण्णानां ज्ञानयोगो न्यासिनामिह कर्मसु ।
तेष्वनिर्विण्णयोगानां कर्मयोगस्तु कामिनाम् ॥
यदृच्छया मत्कथादौ जातश्रद्धस्तु यः पुमान् ।
न निर्विण्णो नाऽतिसक्तो भक्तियोगोऽस्य सिद्धिदः ॥
(भाग० ११।२०।७-८)

इति स्मृतेः । अत्रानिर्विण्णानां न्यासिनां कर्मसु सत्सु ज्ञानयोगः । कर्मज्ञानयोग इत्यर्थः । तादृशस्य भक्तिः कर्मज्ञानमिश्रा, निर्विण्णस्य तु कर्मपरित्यागतो ज्ञानम् । तादृशस्य ज्ञानमात्रमिश्रा सर्वोत्तमा, परमोत्कृष्टसाध्यसाधनकत्वात् । सेयं वैधी भक्तिरेकाङ्गाऽनेकाऽङ्गा वा परतत्त्ववैमुख्यपरिहारेण परभक्त्येऽवश्यमेव सम्पादनीयेति ग्रन्थतात्पर्यार्थः ॥ ७ ॥

तेष्विदमेवाऽऽवश्यकमित्यपि नियमो नाऽस्तीत्यभिप्रेत्याह—

ईश्वरतुष्टेरेकोऽपि बली ॥ ८ ॥

ईश्वरेति । कीर्तनादिषु यः कश्चिदेकोऽप्यभ्यासानुरागादिगुणयुक्ततयेश्वरतुष्टिविशेषजनकश्चेत् स एव बली सर्वार्थदः ।

'मच्चित्तः सर्वदुर्गाणि मत्प्रसादात् तरिष्यसि' (गी. १८।५८) इत्यादिप्रमाणादिति भावः। न च प्रत्येकं व्यभिचारः, तृणारणिमणिन्यायेन कारणत्वस्य विवक्षितत्वादित्यास्तां विस्तरः। एवमत्र बलित्वकथनेन क्लेशघ्नत्वं सुखदत्वं च ज्ञापितम्। तथा हि क्लेशः कर्माशयस्तद्बीजमविद्याऽस्मितारागद्वेषाभिनिवेशाश्च। तत्र कर्माशयः प्रारब्धाऽभेदेन द्विविधः। तत्र प्रारब्धहरत्वं यथा तृतीये—

यन्नामधेयश्रवणाऽनुकीर्तनाद्
यत्प्रह्वणाद्यत्स्मरणादपि क्वचित्।
श्वादोऽपि सद्यः सवनाय कल्पते
कुतः पुनस्ते भगवन्नु दर्शनात्॥ इति।
(भाग० ३।३३।६)

दुर्जातिरेव सवनायोग्यत्वे हेतुः।
दुर्जात्यारम्भकं पापं भवेत् प्रारब्धमेव तत्।

अप्रारब्धहरत्वं यथैकादशस्कन्धे—

यथाऽग्निः सुसमिद्धार्चिः करोत्येधांसि भस्मसात्।
तथा मद्विषया भक्तिरुद्धवैनांसि कृत्स्नशः॥ इति।
(११।१४।१९)

अविद्याहरत्वं यथा चतुर्थे—

यत्पादपङ्कजपलाशविलासभक्त्या
कर्माशयं ग्रथितमुद्ग्रथयन्ति सन्तः।
तद्वन्न रिक्तमतयो यतयो निरुद्ध-
श्रोतोगणास्तमरणं भज वासुदेवम्॥
(४।२२।३९)

बीजहरत्वं यथा षष्ठे—

तैस्तान्यघानि पूयन्ते तपोदानव्रतादिभिः ।
नाधर्मजं तद्धृदयं तदपीशाङ्घ्रिसेवया ॥ इति ।
(६।२।१७)

सुखदत्वं यथा तन्त्रे—

सिद्धयः परमाश्चर्या भुक्तिर्मुक्तिश्च शाश्वती ।
नित्यं च परमानन्दं भवेद् गोविन्दभक्तितः ॥

एवं सद्गुणादिप्रदत्वमपि बोध्यम् । यथा पञ्चमे—

यस्याऽस्ति भक्तिर्भगवत्यकिञ्चना
सर्वैर्गुणैस्तत्र समासते सुराः ।
हरावभक्तस्य कुतो महद्गुणा
मनोरथेनासति धावतो बहिः ॥ इति ।
(५।१८।१२)

तथा भगवदाकर्पकत्वमपि, यथा एकादशे—

न साधयति मां योगो न साङ्ख्यं धर्म उद्धव ।
न स्वाध्यायस्तपस्त्यागो यथा भक्तिर्ममोर्जिता ॥
(११।१४।२०)

इति दिक् ॥ ८ ॥

कदा क्लेशघ्नत्वलक्षणं बलमित्याशङ्क्य 'स्वल्पमप्यस्य धर्मस्य त्रायते महतो भयात्' । (गी० २।४०) इति प्रमाणाद्यदा परमेश्वरप्रीत्युद्देशेन क्रियते तदैवेत्यभिप्रेत्याऽऽह—

अबन्धोऽर्पणस्य मुखम् ॥ ९ ॥

अबन्ध इति ।

प्रीणातु भगवानीशः कर्मणाऽनेन शाश्वतः ।
करोति सततं बुद्धया ब्रह्मार्पणमिदं परम् ॥ इति ।
(कूर्म० १।३।१७)

यथोक्ताऽर्पणघटितस्यैवाबन्धो बन्धाऽभावोऽखिलक्लेशाविध्वंसरूपो मुखं द्वारं ब्रह्मावाप्तिलक्षणकैवल्य इति शेषेणाऽर्थः ।

ब्रह्मार्पणं ब्रह्म हविर्ब्रह्माऽग्नौ ब्रह्मणा हुतम् ।
ब्रह्मैव तेन गन्तव्यं ब्रह्मकर्मसमाधिना ॥
(गी० ४।२४)

इत्यपि ब्रह्मार्पणं बोध्यम् । वस्तुत एतादृशस्यैव ब्रह्मप्रापकत्वश्रवणात् ॥ ९ ॥

गीतायां द्वादशाऽध्याये—

मय्यावेश्य मनो ये मां नित्ययुक्ता उपासते ।
श्रद्धया परयोपेतास्ते मे युक्ततमा मताः ॥
ये त्वक्षरमनिर्देश्यमव्यक्तं पर्युपासते ।
सर्वत्रगमचिन्त्यं च कूटस्थमचलं ध्रुवम् ॥
सन्नियम्येन्द्रियग्रामं सर्वत्र समबुद्धयः ।
ते प्राप्नुवन्ति मामेव सर्वभूतहिते रताः ॥
(१२, २-४)

इत्युपक्रम्य—

ये तु सर्वाणि कर्माणि मयि सन्न्यस्य मत्पराः ।
अनन्येनैव योगेन मां ध्यायन्त उपासते ॥
(१२।६)

इत्युक्त्या ध्यानमप्यङ्गं भक्तौ लभ्यते । तत्र 'य एषोऽन्तरादित्ये हिरण्मयः पुरुषो दृश्यते हिरण्यश्मश्रुर्हिरण्यकेशः' ।
(छां० १।६।६)

ध्येयः सदा सवितृमण्डलमध्यवर्ती
नारायणः सरसिजासनसन्निविष्टः ॥
केयूरवान् मकरकुण्डलवान् किरीटी
हारी हिरण्मयवपुर्धृतशङ्खचक्रः ॥
(नारदपु० ११।७१)

इत्येवं रूपमेव किं ध्येयं सगुणम्, उत रूपाऽन्तरमेव। यथा—

सौरमण्डलमध्यस्थं साम्बं संसारभेषजम्।
नीलग्रीवं विरूपाऽक्षं नमामि शिवमव्ययम्॥ इत्यादि।

अथवा निर्गुणमेव। यथा—

एकं ज्योतिर्मयं शुद्धं सर्वगं व्योमवद्दृढम्।
अव्यक्तममलं नित्यमादिमध्यान्तवर्जितम्॥
स्थूलसूक्ष्ममनाकाशमसंस्पर्शमचाक्षुषम्।
न रसं न च गन्धाढ्यमप्रमेयमनूपमम्॥
आनन्दमजरं नित्यं सदसत्सर्वकारणम्।
सर्वाधारं जगद्रूपममूर्तमजमव्ययम्॥
अदृश्यं दृश्यमध्यस्थं बहिःस्थं सर्वतोमुखम्।
सर्वदृक् सर्वतः पादं सर्वस्पृक् सर्वतः शिरः॥
ब्रह्म ब्रह्ममयोऽहं स्यामिति तत्त्वस्य वेदनम्॥ इति।

तत्राह—

ध्याननियमस्तु दृष्टसौकर्यात्॥ १०॥

ध्यानेति। तुशब्दो नकारार्थः। इदमेव ध्येयमिति ध्येयनियमो ध्याने नास्तीत्यर्थः। कुतः? दृष्टसौकर्यात्। यथाऽभिमतध्यानादेव चित्तप्रसादरूपदृष्टसौकर्यसम्भवात्। तथा च यस्य

यद्रूपध्यानादेवाऽऽनन्द आविर्भवति तेन तदेव रूपमभिमतं ध्यातव्यमिति भावः। एतदभिप्रेत्यैव भगवान् पतञ्जलिरप्याह—"यथाऽभिमतध्यानाद्वा" इति (यो० सू० १।३९)। अथवा 'ब्रह्मयज्ञेन यक्ष्यमाणः प्राच्यां दिशि' इति दिङ्नियमः। प्राचीनप्रवणेन वैश्वदेवेन यजेत' (मै० सं० १।१०।७) इति देशनियमः। 'अपराह्णे पितृयज्ञेन चरन्ति' इति कालनियमस्तदेतत्त्रयं यथा कर्मणि दृश्यते, तथा ध्यानेऽप्यस्ति न वेति सन्देहेऽस्तीति प्राप्तम्, वैदिकत्वस्याविशेषात्। इत्थं च तत्साध्यायां भक्तावपि देशकालनियमः प्राप्त इत्यत आह—ध्यानेति। दिग्देशकालनियमो ध्याने नास्ति। कुतः ? दृष्टसौकर्यात्। मनोऽनुकूलदेशकालादिकं दृष्टसौकर्यम्। तस्माद्ध्यानस्य सम्भवादित्यर्थः।

अयं भावः—ऐकाग्र्यं हि ध्यानस्य प्रधानसाधनम्, न च तस्य दिगादिनियतत्या कश्चिदतिशयो विद्यते, अतो नास्ति नियमः। अत एव श्रुतिर्योगाऽभ्यासाय प्रदेशं निर्दिशन्ती मनोऽनुकूल इत्येवाऽऽह—'यस्मिन् देशकालादौ मनस ऐकाग्र्यम्, तत्रैव युञ्ज्यात्'। न तु शास्त्रेण नियमतः कश्चिद्देशकालादिरस्तीत्यर्थः। 'समे शुचौ वह्निवालुकाविवर्जिते' (श्वेताश्व० २।१०) इत्यादिदेशविशेषः श्रूयत इति चेत्, सत्यम्। प्राणायामार्थं तदिति बोध्यम्। अन्यथा रोगप्रसङ्गादिति। तस्मान्नास्ति ध्याने देशकालादिनियमः। आह चैवं भगवान् बादरायणोऽपि—'यत्रैकाऽग्रता तत्राऽविशेषात्' (ब्र० सू० ४।१।११) इति। अतो ध्याननिर्वर्त्यायां भक्तावपि न दिवादिनियम इति भावः॥ १०॥

तद्यजिः पूजायामितरेषां तु नैवम्॥ ११॥

तद्यजिरिति। 'मद्याजी मां नमस्कुरु' (गी० ९।३४)

'यान्ति मद्याजिनोऽपि माम्' (गी० ९।२५) इत्यादौ परमेश्वर-यजिः पूजायां प्रयुक्तो मन्तव्यः। यजदेवपूजासङ्गतिकरणदानेष्विति भ्वादिपाठात्। इतरेषाम्—गौणभजनानाम्, नैवम्—न पूजा-तुल्यतया यजिव्यपदेश्यत्वम्। मुख्यपूजायागस्योपादानसम्भवेऽमुख्यग्रहणमन्याय्यम्, नमस्कारादिसाहचर्यमपि,अत एव सुतरामुपपन्नं भवतीति भावः। उपलक्षणं चैतदन्येषामपि यागानाम्। तेषामपि प्रीतिफलकवद्दानत्वेन यज्यर्थत्वात्। न च तेषां प्रीति-फलकत्वे मानाऽभावः।

दानव्रततपोहोमजपस्वाध्यायसंयमैः।
श्रेयोभिर्विविधैश्चान्यैः कृष्णे भक्तिर्हि साध्यते ॥
(भाग० १०।४७।२४)

वर्णाऽऽश्रमाचारवता पुरुषेण परः पुमान्।
विष्णुराराध्यते नाऽन्यः पन्थास्तत्तोषकारणम् ॥
(विष्णुपु० ३.८।९)

इत्यादिवाक्यस्यैव मानत्वात् ॥ ११ ॥

पूजाप्रसङ्गादधिकरणचतुष्कम्—

पादोदकन्तु पाद्यमव्याप्ते ॥ १२ ॥

पादोदकमिति।

गङ्गाप्रयागगयपुष्करनैमिषाणि
पुण्यानि यानि कुरुजाङ्गलयामुनानि।
कालेन तीर्थसलिलानि पुनन्ति पापात्
पादोदकं भगवतः प्रपुनाति सद्यः ॥
(नृसिंहपु० ५९।४६)

यद्रूपध्यानादेवाऽऽनन्द आविर्भवति तेन तदेव रूपमभिमतं ध्यातव्यमिति भावः। एतदभिप्रेत्यैव भगवान् पतञ्जलिरप्याह–"यथाऽभिमतध्यानाद्वा" इति (यो० सू० १।३९)। अथवा 'ब्रह्मयज्ञेन यक्ष्यमाणः प्राच्यां दिशि' इति दिङ्नियमः। प्राचीनप्रवणेन वैश्वदेवेन यजेत' (मै० सं० १।१०।७) इति देशनियमः। 'अपराह्णे पितृयज्ञेन चरन्ति' इति कालनियमस्तदेतत्त्रयं यथा कर्मणि दृश्यते, तथा ध्यानेऽप्यस्ति न वेति सन्देहेऽस्तीति प्राप्तम्, वैदिकत्वस्याविशेषात्। इत्थं च तत्साध्यायां भक्तावपि देशकालनियमः प्राप्त इत्यत आह—ध्यानेति। दिग्देशकालनियमो ध्याने नास्ति। कुतः ? दृष्टसौकर्यात्। मनोऽनुकूलदेशकालादिकं दृष्टसौकर्यम्। तस्माद्ध्यानस्य सम्भवादित्यर्थः।

अयं भावः—ऐकाग्र्यं हि ध्यानस्य प्रधानसाधनम्, न च तस्य दिगादिनियत्या कश्चिदतिशयो विद्यते, अतो नास्ति नियमः। अत एव श्रुतिर्योगाऽभ्यासाय प्रदेशं निर्दिशन्ती मनोऽनुकूल इत्येवाऽऽह–'यस्मिन् देशकालादौ मनस ऐकाग्र्यम्, तत्रैव युञ्ज्यात्'। न तु शास्त्रेण नियमतः कश्चिद्देशकालादिरस्तीत्यर्थः। 'समे शुचौ वह्निवालुकाविवर्जिते' (श्वेताश्व० २।१०) इत्यादिदेशविशेषः श्रूयत इति चेत्, सत्यम्। प्राणायामार्थं तदिति बोध्यम्। अन्यथा रोगप्रसङ्गादिति। तस्मान्नास्ति ध्याने देशकालादिनियमः। आह चैवं भगवान् बादरायणोऽपि—'यत्रैकाग्रता तत्राऽविशेषात्' (ब्र० सू० ४।१।११) इति। अतो ध्याननिर्वर्त्यायां भक्तावपि न दिवादिनियम इति भावः ॥ १० ॥

तद्यजिः पूजायामितरेषां तु नैवम् ॥ ११ ॥

तद्यजिरिति। 'मद्याजी मां नमस्कुरु' (गी० ९।३४)

'यान्ति मद्याजिनोऽपि माम्' (गी० ९।२५) इत्यादौ परमेश्वर-यजिः पूजायां प्रयुक्तो मन्तव्यः। यजदेवपूजासङ्गतिकरणदाने-ष्विति भ्वादिपाठात्। इतरेषाम्—गौणभजनानाम्, नैवम्—न पूजा-तुल्यतया यजिव्यपदेश्यत्वम्। मुख्यपूजायागस्योपादानसम्भवेऽ-मुख्यग्रहणमन्याय्यम्, नमस्कारादिसाहचर्यमपि,अत एव सुतरा-मुपपन्नं भवतीति भावः। उपलक्षणं चैतदन्येषामपि यागानाम्। तेषामपि प्रीतिफलकवद्दानत्वेन यज्यर्थत्वात्। न च तेषां प्रीति-फलकत्वे मानाऽभावः।

दानव्रततपोहोमजपस्वाध्यायसंयमैः।
श्रेयोभिर्विविधैश्चान्यैः कृष्णे भक्तिर्हि साध्यते॥
(भाग० १०।४७।२४)

वर्णाऽऽश्रमाचारवता पुरुषेण परः पुमान्।
विष्णुराराध्यते नाऽन्यः पन्थास्तत्तोषकारणम्॥
(विष्णुपु० ३।८।९)

इत्यादिवाक्यस्यैव मानत्वात्॥ ११॥

पूजाप्रसङ्गादधिकरणचतुष्कम्—

पादोदकन्तु पाद्यमव्याप्ते॥ १२॥

पादोदकमिति।

गङ्गाप्रयागगयपुष्करनैमिषाणि
पुण्यानि यानि कुरुजाङ्गलयामुनानि।
कालेन तीर्थसलिलानि पुनन्ति पापात्
पादोदकं भगवतः प्रपुनाति सद्यः॥
(नृसिंहपु० ५९।४६)

इत्यादिना पावनत्वेनोक्तं पादोदकं पाद्यरूपमेव। पादसंयुक्त-जलस्य पादोदकत्वे शालग्रामपूजायां पादोदके तत्पाद्ये (च) पादोदकव्यवहारानापत्तेश्चेति भावः ॥ १२ ॥

भगवते स्वयमर्पितं नैवेद्यं ग्राह्यं न वेति सन्देहेन ग्राह्यम्। दत्ताऽपहारिताप्रसङ्गादिति प्राप्त आह—

स्वयमप्यर्पितं ग्राह्यमविशेषात् ॥ १३ ॥

स्वयमपीति। पूजायां भगवते दत्तं नैवेद्यं निर्माल्यादिकं स्वयमपि ग्राह्यमेव। कुतः? अविशेषात्—भागवद्-भागवत्तत्वाऽविशेषादित्यर्थः। तथा—

विप्रेभ्यस्त्वथ तद्देयं ब्रह्मणे यन्निवेदितम्।
वैष्णवं सात्वतेभ्यश्च भस्माङ्गेभ्यश्च शाम्भवम् ॥

इत्यादिना भागवतेभ्यो नैवेद्यनिर्माल्यादिप्रतिपत्तेर्विधाना-दस्याऽपि तद्वदेव भागवत्तत्त्वान्नैवेद्यादिग्रहणमुचितमेवेति भावः। अत एवानिवेदितान्ननिन्दा तद्भोजने निषेधश्च श्रूयते—

अन्नं विष्ठा पयो मूत्रं यद्विष्णोरनिवेदितम्।
न तत्स्वयं समश्नीयाद्यद्विष्णोर्न निवेदितम् ॥

'यन्न दद्यान्न तदश्नीयात्' इत्यादि। न च दत्तापहारिताप्रसङ्गः। इदं ममेत्यादिना। देवतोद्देशेन त्यक्तद्रव्यपरिग्रहण एव दत्तापहारित्वप्रसक्तेः। 'भवदीयमेवेदमनुजानातु' भवान् इत्यादिरूपं चेतोवृत्तिविशेषं निवेदनं कृत्वा ग्रहणे तु न तत्प्रसक्तिः—

गन्धान्नवरभक्ष्यांश्च स्रजो वासांसि भूषणम्।
दत्वा तु देवदेवाय तच्छेषाण्युपभुञ्जत ॥

इत्यादिवाक्यपर्यालोचनतस्तथावगमात्। अत एव दत्तजातीयमेकराश्यवशिष्टमपि भुञ्जीतेति यतोऽन्योद्देशेन त्यक्तस्यापि- 'उत्तराऽर्धास्त्विष्टकृतेवद्यति' (आप० श्रौत० २।२१।३) 'यजमानपञ्चमाः पुरोडाशं भक्षयन्ति' इत्यादिवाक्यैः प्रतिपत्तिपरैरविशेषात्। 'नोपयुञ्ज्यान्निवेदितम्' इत्यादीनां तु यावद् देवोपयोगं तद्ग्रहणरूपप्रतिपत्तिनिषेधकत्वान्न तैर्विरोध इति मन्तव्यम्। ननु प्रतिपत्तिः स्वस्वत्वापादिका, न वा। अन्त्ये परस्वग्रहणनिबन्धनमिष्टं स्यात्। आद्ये स्वसत्त्वानुकूलव्यापारत्वात् 'सात्वतेभ्यो ददाति' इतिवत् स्वस्मै ददातीत्यपि स्यात्। तथा च सर्वत्र 'ब्राह्मणेभ्यो दद्यात्' इत्यादिना ब्राह्मणत्वादात्मनेऽपि दानप्रसङ्ग इति चेन्नैवम्; दानस्य स्वस्वत्वध्वंसेन परस्वत्वापादनरूपत्वात्। प्रतिपत्तौ तु नैवम्, स्वस्वत्वापादनमात्रत्वात् । तस्मात् स्वयं ग्रहणेऽपि न दोष इत्यास्तां विस्तरः ॥ १३ ॥

पूजायामपराधवर्जनतत्प्रायश्चित्तयोरपि विहितत्वात् तत्र व्यवस्थामाह—

निमित्तगुणव्यपेक्षणादपराधेषु व्यवस्था ॥ १४ ॥

निमित्तेति। अपराधाः केचिद्विहितकर्मसम्बन्धेनाऽधीताः, केचिदन्यथाऽधीताः, तेष्वाद्यानां क्रत्वपकारकत्वम्। तद्वाक्यशेषे नरकादिफलश्रुतिस्तु निन्दाऽर्थवादमात्रम्। अन्त्यानां पुरुषानर्थापादकत्वम्। तथा तत्तत्प्रायश्चित्तानामपि क्रत्वर्थत्वं पुरुषार्थत्वं मन्तव्यम्। अक्षरार्थस्तु—निमित्तं—ज्ञापकं शास्त्रम्, तस्य गुणः पूर्वोक्तं द्विविधमधीतत्वम्। तदनुसारादपराधेषु—निषिद्धेषु क्रत्वपकारकत्वपुरुषापकारकत्वव्यवस्थेति।

तत्र—'देवपूजाऽपराधास्ते द्वात्रिंशत्परिकीर्तिताः' इत्यादयः प्रथमाः। 'सतां निन्दा नाम्नः परममपराधं वितनुते'। इत्येवमादयो द्वितीयाः। तत्र द्वात्रिंशदपराधाः, यथा—

यानैर्वा पादुकैर्वाऽपि गमनं भगवद्गृहे।
देवोत्सवाद्यसेवा च अप्रणामस्तदग्रतः॥
एकहस्तप्रणामश्च तत्पुरस्तात् स्वदक्षिणम्।
उच्छिष्टे च तथाशौचे भगवद्वन्दनाऽऽदिकम्॥

पादप्रसारणं चाऽग्रे तथा पर्यङ्कबन्धनम्।
शयनं भाषणं चैव मिथ्याभाषणमेव च॥
उच्चैर्भाषा वृथा जल्पो रोदनादि च विग्रहः।
निग्रहानुग्रहौ चैव स्त्रीष्वसकृद्भाषणम्॥

अश्लीलकथनं चैव अधोवायुविमोचनम्।
कम्बलास्तरणं चैव परनिन्दा परस्तुतिः॥
शक्तौ गौणोपचारश्च अनिवेदितभक्षणम्।
तत्तत्कालोद्भवानां च फलादीनामनर्पणम्॥

तथा दानं च कर्मण्यपुष्पादीनां विपर्ययात्।
दानं च देवतानिन्दा गुरौ मौनं निजस्तुतिः[१]॥ इति।

विपर्ययाद् दानगन्धमाल्यान्यदत्वा धूपाद्यर्पणरूपम्। एवमन्येऽपराधा देवर्षीणामभिमुखे जृम्भणाक्रोशनप्रभृतयो द्रष्टव्याः॥ १४॥

---

१. वाराहे (अ० ११७) ३२ अपराधा रीत्यन्तरेण वर्णिताः।

पूजायां पत्रादेरपि दानं श्रूयते। तत्किं पुष्पदानादिना तुल्यफलं न वेति सन्देहे 'पत्रं पुष्पं फलं तोयं यो मे भक्त्या प्रयच्छति' (गी० ९।२६) इति श्रवणात् तुल्यफलमिति प्राप्त आह—

पत्रादेर्दानमन्यथा हि वैशिष्ट्यम् ॥ १५ ॥

पत्रादेरिति। अन्यथाऽशक्तौ पत्रादेर्दानं पुष्पादिस्थान इति शेषः। हि—यतः, वैशिष्ट्यम्—मुख्यता। पुष्पादिदानस्येति शेषः। तथा च शक्तस्य न पुष्पादिदानतुल्यं पत्रादिदानम्, अशक्तस्य तु भवति। मुख्यानुकल्पयोस्तथैवान्यत्र व्यवस्थापनादित्यास्तां विस्तरः।

परे त्वत्र—

यद्यदिष्टतमं लोके यच्चान्यदपि ते गृहे।
तत्तद्धि देयं प्रीत्यर्थं देवदेवाय चक्रिणे॥

इत्यादिना प्राप्तस्य भगवदुद्देश्यकसर्वदानस्य भक्त्यङ्गत्वविधिः। अन्यथा पत्रादिचतुष्टयविशिष्टविधानं स्यात्। प्रत्येकविधौ वाक्यभेदात्। तस्मात् पत्रादिशब्देन प्राप्तं दानमनूद्य 'उपव्ययते' (तै० सं० ५।११।१) इत्यनेनोपवीतस्य दर्शाङ्गत्ववद् भक्त्यङ्गत्वविधिरेव युक्त इत्यभिप्रायं वर्णयन्ति। तत्सुधीभिः परिशीलनीयम् ॥ १५ ॥

ननु स्वस्ववर्णाश्रमोचितकर्माचरणमपि पुमर्थहेतु भवति। किमिति श्रवणकीर्तनादिष्वेवाग्रहस्तत्राह—

सुकृतजत्वात् परहेतुभावाच्च क्रियासु ताः
श्रेयस्यः ॥ १६ ॥

सुकृतेति । ताः—श्रवणकीर्तनादिभक्तयः, क्रियासु—स्वस्व-वर्णाश्रमोचितशुक्लकृष्णक्रियाऽपेक्षया श्रेयस्य इति श्रेष्ठाः केवलं शुक्लतयैकान्तिकात्यन्तिकपुमर्थहेतुत्वात् । एतदभिप्रेत्यैवोक्तं श्रीभागवते—

त्यक्त्वा स्वधर्मं चरणाऽम्बुजं हरे-
भंजन्नपक्वोऽथ पतेत् ततो यदि ।
यत्र क्व वा भद्रमभूदमुष्य किं
कोवाऽर्थं आप्तो भजतां स्वधर्मतः ॥ इति ।
(१।५।१७)

अत्र हित्वैवेति न सावधारणम् ।

वर्णाश्रमाचारवता पुरुषेण परः पुमान् ।
विष्णुराराध्यते पन्था नान्यत्तत्तोषकारणम् ॥
(विष्णु० ३।८।९)

इत्यादिवाक्यनिकरेण वर्णाश्रमाचारपूर्वकभजनस्येशप्रसाद-हेतुत्वकथनात्, किन्तु स्वधर्मं हित्वाऽपि भजताम्, नाभद्रम् । स्वधर्ममात्रतो भजतां को वाधिकार्थं इति । स्वधर्मं हित्वाऽपि भजताम्, गोपीप्रभृतीनाम्—

तमेव परमात्मानं जारबुद्ध्याऽपि सङ्गताः ।
जहुर्विरहजं तापं सद्यः प्रक्षीणबन्धनाः ॥
(भाग० १०।२९।११)

इति कृतार्थताश्रवणात् । अत एवोत्कटप्रेमवतां न साधना-वृत्तिः । यथोक्तं तत्रैव—

सकृन्मनः कृष्णपदाऽरविन्दयो—
निवेशितं तद्गुणरागि यैरिह ।
न ते यमं पाशभृतश्च तद्भटान्
स्वप्नेऽपि पश्यन्ति हि चीर्णनिष्कृताः ॥ इति ।
(भाग० ६।१।१९)

ननु तर्हि स्वधर्माऽऽचरणं व्यर्थम्, तत्राऽऽह—सुकृतजत्वादिति । बहुतरसुकृतस्यैवेदं फलं यद्धरिभजनम् । तदुक्तं पुराणेषु—

येन जन्मशतैः पूर्वं वासुदेवः समर्चितः ।
तन्मुखे हरिनामानि सदा तिष्ठन्ति भारत ॥
नह्यपुण्यवतां लोके मूढानां कुटिलाऽऽत्मनाम् ।
भक्तिर्भवति गोविन्दे स्मरणं कीर्तनन्तथा ॥

इत्यादि । सुकृतजत्वं स्वर्गाऽऽदावप्यस्ति तेन किं तत्राऽऽह—परहेतुभावाच्चेति प्रागुक्तदिशा तासां परभक्तिहेतुत्वात् । वक्ष्यमाणयुक्त्या ज्ञानद्वारा कैवल्यहेतुत्वाच्च श्रेष्ठत्वमिति भावः ॥१६॥

ननु भक्तीनां गौणमुख्यभावोऽयुक्तः । 'चतुर्विधा भजन्ते माम्' (गी० ७।१६) इत्यादिना भगवता तुल्यवदभिधानादित्यत आह—

गौणत्रैविध्यमितरेण स्तुत्यर्थत्वात्साहचर्यम् ॥ १७ ॥

गौणेति । गौणत्रैविध्यमेव तासां पापक्षयाऽऽद्यर्थं विधानात् । तर्हि ज्ञानी चेति मुख्यसाहचर्यं कुतस्तत्राऽऽह—स्तुत्यर्थत्वादिति । स्तुतेरर्थत्वात् प्रयोजनत्वात् साहचर्येण तुल्यताबोधद्वारा प्राशस्त्यप्रत्यायनम्; यथा राजसमभिव्याहारेणामात्यानामिति भावः । तत्र पापक्षयविपदुद्धाराऽऽदि निमित्तम्, श्रवणकीर्तनाऽऽद्यार्तभक्तिः । ज्ञानाऽर्थं वेदाऽऽभ्यसनाऽऽदिकं जिज्ञासोर्भक्तिः । राज्यस्वर्गाऽऽद्यर्थं

क्रियमाणा कीर्तनजपाऽऽदिरूपाऽर्थाऽर्थिनो भक्तिः। प्रेमोत्पत्तये ज्ञानलक्षणा ज्ञानिनो भक्तिः सर्वाभ्यस्ताभ्यो मुख्या। साक्षात्प्रेमहेतुत्वस्य स्वरूपज्ञानेऽन्वयव्यतिरेकाभ्यां लोके ग्रहादिति संक्षेपः ॥ १७ ॥

ननु कीर्तनाऽऽदीनां मुक्तिहेतुविलक्षणपरभक्त्यङ्गत्वे कथं स्वतन्त्रफलार्थत्वं तत्राऽऽह—

बहिरन्तस्थमुभयमवेष्टिसववत् ॥ १८ ॥

बहिरन्तस्थमिति। कीर्तनाऽऽदिकं बहिःस्थं पापक्षयाऽऽदिलक्षणस्वतन्त्रफलाऽर्थम्। अन्तस्थं परं भक्तिलक्षणप्रधानाऽङ्गञ्चेत्युभयमपि भवति। यथा राजसूयाऽन्तर्गताऽप्यवेष्टिर्वर्णत्रयसंयोगात्स्वतन्त्रफलार्था। यथा वा बृहस्पतिसवः क्वचित्प्रधानमपि वाजपेयाङ्गं तद्वदित्यर्थः। एतेन—

प्रमादात्कुर्वतां कर्म प्रच्यवेताध्वरेषु च।
स्मरणादेव तद्विष्णोः संपूर्णं स्यादिति श्रुतिः ॥

इत्याद्युक्तं सर्वकर्माङ्गत्वमपि स्मरणकीर्तनाऽऽदेर्व्याख्यातम्। तत्तत्प्रकरणपठितानामपि फलाऽन्तरश्रवणाद्बहिर्भावेनोत्कर्षस्य प्रमाणसिद्धत्वात्। तत्र—

व्रजंस्तिष्ठन्स्वपन्नश्नन्श्वसन् वाक्यप्रपूरणे।
नामसङ्कीर्तनं विष्णोर्हेलया कलिबन्धनम् ॥
कृत्वा सरूपतां याति भक्तियुक्तः परं व्रजेत्।

इत्यन्तःस्थत्वज्ञापकम्।

सर्वमङ्गलमाङ्गल्यमायुष्यं व्याधिनाशनम्।
भुक्तिमुक्तिप्रदं दिव्यं वासुदेवस्य कीर्तनम् ॥

इति बहिःस्थत्वज्ञापकम् । एवम्—

अकामः सर्वकामो वा मोक्षकाम उदारधीः ।
तीव्रेण भक्तियोगेन यजेत पुरुषं परम् ॥
(भाग० २।३।१०)

इत्युभयज्ञापकं बोध्यम् ॥ १८ ॥

बहिःस्थत्वे हेत्वन्तरमाह—

स्मृतिकीर्त्योः कथाऽऽदेश्चार्त्तौ प्रायश्चित्तभावात् ॥१९॥

स्मृतिकीर्त्योरिति । कथाऽऽदेरित्यादिना नमस्कारपरिचर्याऽऽदिपरिग्रहः । तथा च स्मरणकीर्तनकथानमस्कारप्रभृतीनामार्तौ महापातकाऽऽदिविषयकाऽनुतापे सति प्रायश्चित्तरूपतया विधानादपि बहिःस्थत्वं सिध्यतीत्यर्थः । तथा हि—

पापे गुरुणि गुरूणि लघूनि च लघुन्यपि ।
प्रायश्चित्तानि मैत्रेय जगुः स्वायम्भुवाऽऽदयः ॥
प्रायश्चित्तान्यशेषाणि तपःकर्माऽत्मकानि वै ।
यानि तेषामशेषाणां कृष्णाऽनुस्मरणं परम् ॥
कृते पापेऽनुतापो वै यस्य पुंसः प्रजायते ।
प्रायश्चित्तं तु तस्यैकं हरिसंस्मरणं परम् ॥
(विष्णुपु० २।६।३४-३६)

सर्वेषामप्यघवतामिदमेव सुनिष्कृतम् ।
नामव्याहरणं विष्णोर्यतस्तद्विषया मतिः ॥
(भाग० ६।२।१०)

सर्वाऽऽश्रमाऽभिगमनं सर्वतीर्थाऽवगाहनम् ।
तथा न फलदं तत्ते नारायणकथा यथा ॥
पाविताङ्गाः सुसंवृत्ताः श्रुत्वेमामादितः कथाम् ।
नारायणाऽऽश्रयां पुण्यां सर्वपापप्रणाशिनीम् ॥

इत्यादिवाक्यानि प्रायश्चित्तभावबोधकानि। वस्तुतः स्मृतिकीर्तनकथाऽऽदिभक्तेः कस्यां भक्तौ सन्निवेश इत्याशङ्कायामाह—स्मृतिकीर्त्योरिरिति। उक्तवाक्यैः पापकृतां नरकाऽऽर्तिमतां पापक्षयसाधनत्वेन स्मृत्यादेरुक्तत्वादार्तभक्तावेव सन्निवेश इति सूत्रकृदभिप्राय इत्यास्तां विस्तरः॥ १९॥

प्रायश्चित्ताऽन्तरवैफल्यमाशङ्क्य परिहरति—

भूयसामनुष्ठितिरिति चेदाप्रायणमुपसंहारान्महत्स्वपि॥ २०॥

भूयसामिति। ननु स्मृतिकीर्तनाऽऽदीनामल्पपापविषयत्वं युक्तम्। अन्यथा भूयसां बहुवित्तव्ययाऽऽयाससाध्यानां कर्मणामननुष्ठानाऽऽपत्तिरिति चेत्। आप्रायणमामरणं स्मृतिकीर्तनाऽऽदेः कर्तव्यतयोपसंहारान्महत्स्वपि पापेषु निमित्तेषु प्रायश्चित्ताभावः। तथा चोक्तम्—

तस्मादहर्निशं विष्णुं संस्मरन्पुरुषो मुने।
न याति नरकं शुद्धः संक्षीणाऽखिलकल्मषः॥
मा ऋचो मा यजुस्तात! मा साम पठ किञ्चन।
गोविन्देति हरेर्नाम गेयं गायस्व नित्यशः॥
आयासः स्मरणे कोऽस्य स्मृतो यच्छति शोभनम्।
पापक्षयश्च भवति स्मरतां तमहर्निशम्॥
गोविन्देति सदा युक्तः कीर्तयेद्यस्त्वनन्यधीः।
पावनेन च धन्येन तेनेयं पृथिवी धृता॥
हरे! केशव! गोविन्द! वासुदेव! जगत्पते।
इतीरयन्ति ये नित्यं न हि तान् बाधते कलिः॥

येऽहर्निशं जगद्धातुर्वासुदेवस्य कीर्तनम् ।
कुर्वन्ति तान् नरव्याघ्र न कलिर्बाधते नरान् ॥
मम नामानि लोकेऽस्मिञ्छ्रद्धया यस्तु कीर्तयेत् ।
तस्याऽपराधकोटीस्तु क्षमाम्येव न संशयः ॥
भक्तिमान्यः सदोत्थाय शुचिस्तद्गतमानसः ।
सहस्रं वासुदेवस्य नाम्नामेतत्प्रकीर्तयेत् ॥

इत्यादि । एवं च क्लेशाऽधिकमत्राऽप्यस्तीति भावः । यत्तु—

पराकचान्द्रायणतप्तकृच्छ्रै-
र्न देहशुद्धिर्भवतीह तादृक् ।
कलौ सकृन्माधवकीर्तनेन
गोविन्दनाम्ना भवतीह यादृक् ॥
हत्यायुतं पानसहस्रमुग्रं
गुर्वङ्गनाकोटिनिषेवणं च ।
स्तेयान्यनेकानि हरेः प्रियेण
गोविन्दनाम्ना निहतानि सद्यः ॥
साङ्केत्यं पारिहास्यं वा स्तोभं हेलनमेव च ।
वैकुण्ठनामग्रहणमशेषाघहरं विदुः ॥
(भाग० ६।२।१४)

इत्यादिना यथाकथञ्चिद्यत्र क्वाऽपि च यादृशतादृशेनाऽपि कृतेन कीर्तनेन सद्यः सकलपापक्षयः श्रूयते । तदपि—

कृते पापेऽनुतापो वै यस्य पुंसः प्रजायते ।
प्रायश्चित्तं तु तस्यैकं हरिसंस्मरणं परम् ॥

इत्यादिवाक्याऽनुसारादन्तर्मुखस्य, बहिर्मुखस्य तु म्रियमाणस्यैव न सर्वस्य—

विक्रुश्य पुत्रमघवान्यदजामिलोऽपि
नारायणेति म्रियमाण...।

इत्यादिवाक्यतात्पर्यपर्यालोचनतस्तथाऽवधारणात् । युक्तश्चैतत् । अन्यथा—

नामैकं वाचि यस्य स्मरणपथगतं श्रोत्रमूलं गतं वा
शुद्धं वाऽशुद्धवर्णं व्यवहितरहितं तारयत्येव सत्यम् ।
तद्वै देवप्रवणजनतालोभपाखण्डमध्ये
निक्षिप्तं स्यान्न फलजनकं शीघ्रमेवाऽत्र विप्र ॥

इत्यादिवचनविरोधाऽऽपत्तेरिति वदन्ति, परे तु साङ्केत्यपारिहास्येत्याद्युक्तं सर्वान् प्रति सममेव । धर्मशास्त्रोक्तप्रायश्चित्तं तु विभीषिकामात्रं पापे यथेष्टप्रवृत्तिवारणाय । तदुक्तं स्कान्दे—

अल्पसाध्येऽपि दुःसाध्यं श्रावयेत्सततं जने ।
यथा न पापे वर्तेरन् प्रायश्चित्तभयादिति ॥
न निर्दिशेदल्पसाध्यं प्रायश्चित्ताऽन्तरं बुधः ।
तस्मिन्सङ्क्रमते पापं कर्ता तत्र विमुच्यते ॥

इत्यादि । एतेन महदल्पपापभेदेन ज्ञानाऽज्ञानकृतभेदेन वा प्रकाशरहस्यभेदेन वा स्मार्तं पौराणं च प्रायश्चित्तं व्यवस्थापनीयमित्यपि न सम्यक् ।

स्तेनः सुरापो मित्रध्रुग्ब्रह्महा गुरुतल्पगः ।
स्त्रीराजपितृगोहन्ता ये च पातकिनोऽपरे ॥
सर्वेषामप्यघवतामिदमेव सुनिष्कृतम् ।
नामव्याहरणं विष्णोर्यतस्तद्विषया मतिः ॥

प्रायश्चित्तान्यशेषाणि तपःकर्माऽऽत्मकानि वै ।
यानि तेषामशेषाणां कृष्णाऽनुस्मरणं परम् ॥

इत्यादिना गुरुलघुसर्वपापानामविशेषेण कृष्णाऽनुस्मरणस्य मुख्यप्रायश्चित्तत्वाऽभिधानात् । न च

अथ पातकभीतस्त्वं सर्वभावेन भारत ।
विमुक्ताऽन्यसमारम्भो नारायणपरो भव ॥

इत्यादिविष्णुधर्मोत्तरवाक्यैर्भगवत्परायणस्यैव तदिति शङ्क्यम् । वस्तुमहिम्नः,

हरिर्हरति पापानि दुष्टचित्तैरपि स्मृतः ।
अनिच्छयाऽपि संस्पृष्टो दहत्येव हि पावकः ॥
(बृहन्नारद १।११।१००)

इत्यादिवचनेन च सर्वस्यैव तदवगमात् । न चाऽस्त्वेवम्, परन्तु बहिर्मुखस्य म्रियमाणस्य भगवन्नामोच्चारणतः लघुपापनिवृत्तिर्भविष्यति । अन्यथाऽतिप्रसङ्गादिति वाच्यम् ।

यस्मिन्न्यस्तमतिर्न याति नरकं स्वर्गोऽपि यच्चिन्तने ।
विघ्नो यत्र निवेशिताऽऽत्ममनसो ब्राह्मोऽपि लोकोऽल्पकः ।
मुक्तिं चेतसि यः स्थितोऽमलधियां पुंसां ददात्यव्ययः ।
किं चित्रं तदघं प्रयाति विलयं यत्राऽच्युते कीर्तिते ॥

इत्यादिना कीर्तनतः सर्वस्य पापनिवृत्तिज्ञापनात् । 'सततं कीर्तयन्तो माम्' (गीता ९।१४) इति सततस्मरणकीर्तनाऽभिधानन्तूत्तरपापनिवृत्त्याऽन्तकाले स्मृतिसंभावयेति मन्तव्यम् ! अपि च म्रियमाणत्वाऽऽदीनां दुर्वचत्वेन नाऽधिकारिविशेषणत्वम् । तथा हि । म्रियमाणत्वं मरणक्षणसम्बन्धो वा, मरणाऽव्यवहितप्राक्कालसम्बन्धो वा, मरणपूर्वकालसम्बन्धो वा । नाऽऽद्य-

द्वितीयौ। तदानीं नामोच्चारणाऽसंभवात्। न तृतीयः। जीवतोऽपि नामोच्चारणं पापक्षयहेतु इति प्रसज्येत। तस्मान्नाऽजामिलवद् म्रियमाणत्वं नामोच्चारणस्य पापक्षयसाधनत्वेऽधिकारिविशेषणम्। एवम्—

अवशेनाऽपि यन्नाम्नि कीर्तिते सर्वपातकैः।
पुमान् विमुच्यते सद्यः सिंहत्रस्तैर्मृगैरिव॥
(भाग०)

इत्यादिवचनानुरोधान्न श्रद्धादिसापेक्षत्वमपि। तथा च नाऽऽत्राऽर्थवादत्वं शङ्क्यम्।

श्रुतिस्मृतिपुराणेषु नाममाहात्म्यवाचिषु।
येऽर्थवाद इति ब्रूयुर्न तेषां निरयक्षयः॥

इत्यादिना तादृशशङ्कापङ्कमग्नानां महानिरयश्रवणादिति वदन्ति। तच्चिन्त्यम्। एतादृशनिरयवाक्यानां पूर्वोक्ताऽनुसारादविरुद्धाऽर्थे प्रामाण्याऽभावकथननिन्दापरत्वात्। अन्यथा—

पुराणेष्वर्थवादत्वं ये वदन्ति नराऽधमाः।
तैरर्जितानि पुण्यानि तद्वदेव भवन्ति वै॥
पुराणेषु द्विजश्रेष्ठाः सर्वधर्मप्रवक्तृषु।
प्रवदन्त्यर्थवादत्वं ये ते नरकभाजनाः॥

इत्यादिवचनात् पुराणवचनमात्रस्य सुतरां श्रुत्यक्षरस्य च यथा श्रुतार्थित्वं स्यादिति मीमांसावैयर्थ्याऽऽपत्तेः। तस्मादुक्तव्यवस्थैव ज्यायसीति मन्तव्यम्। मीमांसकास्तु सन्त्वेतानि पुराणवाक्यानि, परन्त्वर्थवादत्वादविवक्षितस्वार्थानीति भजनीयदेवतास्तुतिमेवाऽऽश्रयन्ते। यस्याः सकृत्कीर्तनमप्येतादृक् सा पुन-

राप्रायणमुपासिता किं न करोतीति । एवं चानुष्ठेयाऽर्थपराणां मन्वाऽऽदिस्मृतीनामविरोधोऽप्युपपद्यत इति वदन्ति । तन्न सम्यक्, अर्थवादस्वरूपाऽपर्यालोचनात् । तथा हि—किमिदमर्थवादत्वमविधित्वं विधिशेषत्वं वा अतत्परत्वं वा । तत्राऽविधायकत्वरूपाऽविधित्वमपि किं लिङादिप्रत्ययविरहात्, तद्वाच्यविरहाद्वा । 'हरिरित्यवशेनाऽऽह पुमान् नाऽर्हति यातनाम्' इति वर्तमानोपदेशाद्वा । नाऽऽद्यः, "यदाग्नेयोऽष्टाकपाल" (तै० सं० २।६।३) इत्यादीनामविधित्वप्रसङ्गात् । अत्र लिङादिप्रत्ययस्याऽसत्वात् । न द्वितीयः, असिद्धेः । "आग्नेयोऽष्टाकपाल" (तै० सं० २।२।३) इत्यादौ लिङाद्यसत्वेऽपि अष्टाकपालपुरोडाशो द्रव्यमग्निर्देवतेति द्रव्यदेवतासम्बन्धेनेव प्रकृते 'प्रायश्चित्तं तु तस्यैकं हरिसंस्मरणं परम्' इत्यादौ साध्यसाधनसम्बन्धेन कालत्रयाऽवच्छिन्नेन पापक्षयकामो हरिस्मरणं कुर्यादिति विधेः कल्पनात् । लिङ्वाच्यस्य विधेः शब्दभावनायाः कार्यस्य वाऽसत्वात् । नापि तृतीयः, "तरति ब्रह्महत्यां योऽश्वमेधेन यजते" (शतपथ० १३।३।१।१) "अग्निहोत्रं जुहोति" (तै० सं० १।५।९) इत्यादीनामप्यविधायकत्वप्रसङ्गात् । अथ तत्र ब्रह्महत्यातरणाऽश्वमेधयोः साध्यसाधनभावस्य लोकाऽनधिगतत्वाद् यजते इत्यादौ पञ्चमलकाराऽऽश्रयणेन यजेतेत्यादिविधित्वम्, तर्हि प्रकृतेऽपि हरिनामोच्चारणपापनिर्हरणयोः साध्यसाधनभावस्याऽपूर्वत्वाद्विधित्वं भविष्यति । एवं पराऽर्थत्वलक्षणं विधिशेषत्वमपि किन्नामकीर्तनविषयो यो विधिस्तच्छेषत्वम्, उताऽन्यविधिशेषत्वम् । नान्त्यः, अन्यस्य विधेरसन्निधानात्, नामकीर्तनस्यैवाऽन्यविधिनिरपेक्षत्वेनोपसंहाराच्च । आद्ये तु नामकीर्तनविधेः फलाऽऽकाङ्क्षाया-

मार्थवादिकमेव फलं पापक्षयरूपं कल्प्यते । यथा "प्रतितिष्ठन्ति ह वा य एता रात्रीरुपयन्ति" इति रात्रिसत्रविधेः फलाऽऽकाङ्क्षायां प्रतितिष्ठन्तीत्यर्थवादोपस्थितौ प्रतिष्ठाफलं कल्प्यते मीमांसा-चतुर्थे । इत्थं च विधिशेषत्वेऽपि नामसंकीर्तनपराणां पौराणाऽ-र्थवादानां न काऽपि हानिरिति मन्तव्यम् ।

ननु नाऽत्र विधिः कल्प्यते, किन्त्वव्यभिचरितोपासनासम्ब-न्धिदेवताद्वारान्यविहितक्रतुविधेरुपासनाविधेर्वाऽङ्गं नामसङ्की-र्तनम्, नामसङ्कीर्तनप्रतिपादकतत्तद्वाक्यात्। यथा "यस्य पर्णमयी जुहूर्भवति" इति वाक्यात् पर्णमयीत्वमव्यभिचरितक्रतुसम्बन्धि जुहूद्वारा क्रत्वङ्गम् । तत्र च फलश्रवणमर्थवाद इति चेत्, अत्र वदन्ति—किं सर्वं नामकीर्तनवाक्यं पर्णतान्यायेन नामकीर्तन-स्याङ्गत्वं बोधयेत्, कतिपयं वा । नाऽऽद्यः—

ध्यायन् कृते यजन् यज्ञैस्त्रेतायां द्वापरेऽर्चयन् ।
यदाप्नोति तदाप्नोति कलौ संकीर्त्य केशवम् ॥
(विष्णु० ६।२।१७)

इत्यादेरङ्गत्वबोधकत्वाऽनुपपत्तेः । ध्यानयज्ञाऽर्चनफले संकी-र्तनस्य युगभेदेन व्यवस्थापरत्वात् । उभयपरत्वे वाक्यभेद-प्रसङ्गात्। ननु यथा "यस्य पर्णमयी जुहूः" (तै० सं० ३।५।७।२) इति क्रत्वङ्गतया पर्णताविधानम्, "न स पापं श्लोकं शृणोति" इत्यर्थवादस्तथा संकीर्त्य केशवम् इत्युपासनाऽङ्गतया नाम-कीर्तनविधानम्, इतरत् 'ध्यायन् कृते' इत्याद्यर्थवादः । ततश्च नाऽस्य व्यवस्थापरत्वं येन वाक्यभेदः स्यादिति चेत्, उच्यते—ध्यायन् यजन्नर्चयन् यदाप्नोतीत्येवंरूपः फलांशस्तावदास्तामर्थ-वादः । "न स पापं श्लोकं शृणोति" इतिवदर्थवादस्य सम्भा-वितत्वात् । 'कृते ध्यायन् त्रेतायां यजन् द्वापरेऽर्चयन्' इत्येवं

युगभेदेन श्रेयोहेतुत्वव्यवस्थाऽनुवादस्तु कथमर्थवादः स्यात्। स्तुतावनुपयोगात्। स्तुतिर्हि न देशकालव्यवस्थामालम्बते। 'अस्मिन्नेव ग्रामेऽयं समीचीनोऽस्मिन्नेव काले' इत्यादौ स्तुत्यपकर्षात्। अपि तु स्तुतिर्देशकालव्यवस्थाराहित्येऽपि स्तुत्यस्य पुरुषाऽर्थपर्यवसन्नत्वमालम्बते। तस्मादपूर्वत्वाद्व्यवस्थाविधिरेवाऽस्मिन्वाक्ये न पर्णतान्याय इति मन्तव्यम्। अत एव न कलिस्तुतिपरत्वमपि। कलिस्तुतेरनुपयोगात्, व्यवस्थायाश्चाऽपूर्वत्वात्। ननु कृते ध्यायन् यच्छ्रेय आप्नोति, तत्त्रेतायां यजन्नाप्नोति, यत्त्रेतायां यजन्नाप्नोति, तद्द्वापरेऽर्चयन्नाप्नोति, यद्द्वापरेऽर्चयन्नाप्नोति तत्कलौ संकीर्त्य केशवमाप्नोतीतिपूर्वपूर्वयुगाऽपेक्षयोत्तरोत्तरयुगस्याऽल्पप्रयाससाध्यश्रेयोहेतुत्वप्रतिपादनेनोत्कर्षमुखेन सर्वयुगोत्कर्षः कलेर्विवक्षित इति चेन्मैवम्। वाक्यावृत्तिदोषप्रसङ्गात्। तस्मान्न स्तुतिपरमिदम्। अपि तु श्रेयोहेतुत्वव्यवस्थाविधिपरमिति। नाऽपि द्वितीयः। वाक्याऽन्तरेभ्यो नामसंकीर्तनस्योपासनाऽङ्गत्वेऽपि व्यवस्थावाक्यात्पुरुषाऽर्थत्वस्याऽपि संभवात्।

एवम्—

> यस्य स्मृत्या च नामोक्त्या तपोयज्ञक्रियाऽऽदिषु।
> न्यूनं संपूर्णतां याति सद्यो वन्दे तमच्युतम्॥

इत्यादिना क्रत्वङ्गत्वेऽपि नामकीर्तनस्य तद्बोध्यम्। अपि च संकीर्तनं द्विविधम्। गुणकीर्तनं नामकीर्तनं च। तत्र नामकीर्तनस्य क्रत्वङ्गत्वेऽपि गुणकीर्तनस्य तदभावात्फलाऽऽकाङ्क्षायामार्थवादिकं फलं संबध्यत एव। नामकीर्तनस्याऽपि सत्यप्युक्तवाक्यात्क्रत्वङ्गत्वे—

> सर्वाऽर्थशक्तियुक्तस्य देवदेवस्य चक्रिणः।
> यद्वाऽभिरोचते नाम तत्सर्वाऽर्थेषु योजयेत्॥

इतिवाक्येन पुरुषाऽर्थताऽस्त्येव । यथा खादिरतायाः "खादिरो यूपो भवति" (शत० ब्र० ३।६।२।१२) इति क्रत्वङ्गत्वेऽपि "खादिरं वीर्यकामस्य" इति (आदि) वाक्येभ्यः पुरुषाऽर्थताऽपि । ततश्च 'कलौ संकीर्त्य केशवम्' इत्यत्र संकीर्तनत्वेनोभयोः फलाऽऽकाङ्क्षायां यदाप्नोति तदाप्नोतीति फलाऽन्वयो घटत एव । इत्थं च सर्वेषामेव नामकीर्तनाऽऽदिपराणां वाक्यानां फलपरत्वमेव ज्ञेयम् । एवमतत्परत्वमपि प्रतीयमानाऽर्थतात्पर्यराहित्यरूपं न, बाधकसत्वात्, नाऽपि साधकाऽभावात्, अर्थाऽन्तरपरत्वरूपस्य बाधकस्य निरासात् । अर्थाऽन्तरपरत्वे निराकृते स्वाध्यायाऽध्ययनविधेरेव साधकस्य सत्वाच्च । अपि च स्पष्टमुपलभ्यन्त एव कीर्तनविषया विधयः—

तस्मादेकेन मनसा भगवान् सात्वतां पतिः ।
श्रोतव्यः कीर्तितव्यश्च ध्येयः पूज्यश्च सर्वदा ॥

(भाग० १।२।१४)

गोविन्देति सदा वाच्यम् ।
नामानि तद्रतिकराणि पठेदलज्जः ।

इत्येवं जातीयका बहवः । तत्र चाऽऽर्थवादिकमुक्तफलमेवेति न काऽप्यनुपपत्तिः । तस्मादर्थवादत्ववर्णनं नरकायैव केषाञ्चिदिति मन्तव्यम् । तदुक्तम्—

अहो हि वाक्ये चतुरक्षरे द्वे
पुण्यस्य पापस्य निदानभूते ।
उच्चारणादेव नृणां मुनीन्द्रा
नारायणश्चेति न चार्थवादः ॥ इत्यादि ।

अथ महाफलं कथमल्पेन लभ्येतेति चेत्। वचनबलादेवेत्यवेहि, दृश्यते हि "सत्रायावगूर्य विश्वजिता यजेत" (आप० श्रौत० १४।२३।१) इति सत्रफलोद्देशेन विश्वजिद्विधानम्। एवं ज्योतिष्टोमफलोद्देशेन सर्वेभ्यः कामेभ्यो दर्शपूर्णमासविधानम्। ततश्च तुल्यं फलम्। कस्तर्हि महत्सु कर्मसु प्रवर्तेतेति चेत्—श्रूयताम्। तच्चिकीर्षुरेव तत्र प्रवर्तताम्। दृश्यते हि कस्मैचिन्महदेव रोचते कस्मैचिदल्पमेवेति शक्त्यशक्त्यपेक्षया व्यवस्था कल्प्यतामिति प्रागेवोक्तप्रायम्॥ २०॥

ननु भक्तिः सुगमोपायः, अज्ञानं त्वभक्तिबीजं परमेश्वरविषयमनादिकालप्राप्तमतिदृढं कथमतिसुकरेण भक्तियोगेन नाशनीयम् अत आह—

लघ्वपि भक्त्यधिकारे महत्क्षेपकमपरसर्वहानात्॥ २१॥

लघ्वपीति। सुकरमपि भक्त्याख्यं साधनं महत्क्षेपकम्—महतो दृढभूमेरज्ञानस्य, क्षेपकं—नाशकम्। कुतः भक्त्यधिकारेऽपरसर्वहानात् भक्तस्य शरणापन्नस्याधिकारे ज्ञानवैराग्यादीनामपरेषां सर्वेषाम्—

सर्वधर्मान् परित्यज्य मामेकं शरणं व्रज। (गी० १८।६६)

ज्ञाने प्रयासमुदपास्य नमन्त एव
　　जीवन्ति सन्मुखरितां भवदीयवार्ताम्।
स्थानस्थिताः श्रुतिगतां तनुवाङ्मनोभिः
　　ये प्रायशोऽजित जितोऽप्यसि तैस्त्रिलोक्याम्॥

तस्मान्मद्भक्तियुक्तस्य योगिनो वै मदात्मनः ।
न ज्ञानं न च वैराग्यं प्रायः श्रेयो भवेदिह ॥
यत्कर्मभिर्यत्तपसा ज्ञानवैराग्यतश्च यत् ।
योगेन दानधर्मेण श्रेयोभिरितरैरपि ॥
सर्वं मद्भक्तियोगेन मद्भक्तो लभतेऽञ्जसा ॥

(भाग० ११।२०।३१-३२)

इत्यादिना त्यागकथनादिति वदन्ति । तच्चिन्त्यम् ।

ज्ञानं प्लावयते नित्यं यो ज्ञानमनुवर्तते ।
ज्ञानादपेत्य या वृत्तिः सा विनाशयति प्रजाः ॥
'सर्वं ज्ञानप्लवेनैव वृजिनं सन्तरिष्यसि'

(गी० ४।३६)

इत्यादिवचनविरोधात् । तस्मान्नोक्ताभिप्रायः । किन्तु लघ्वपीषत्कीर्तनाऽऽदि महतः पापस्य क्षेपकं नाशकम् । अपरस्य सर्वस्य कर्मणो हानाद् हानमभ्युपेत्य भक्तस्य शरणापन्नस्याऽधिकारे द्वादशाऽब्दादीनामभक्ताधिकारिकत्वमिति भावः । श्रीभागवते—

कर्मणा कर्मनिर्हारो न ह्यात्यन्तिक इष्यते ।
अविद्वदधिकारित्वात् प्रायश्चित्तं विमर्शनम् ॥

(६।१।११)

इत्यनेन कर्मात्मकप्रायश्चित्तस्य भक्ताधिकारित्वमुक्त्वा

केचित्केवलया भक्त्या वासुदेवपरायणाः ।
अघं धुन्वन्ति कात्स्न्येंन नीहारमिव भास्करः ॥

(६।१।१५)

इत्यादिना शरणापन्नस्य भक्तेः प्रायश्चित्तत्वेनाऽवतारितत्वात् । तथा गीतायाम्—

मन्मना भव मद्भक्तो मद्याजी मां नमस्कुरु ।
(९।३४)

इति श्लोके प्रशस्ततमनिष्कामकर्मोक्तेः । ततोऽपि रहस्यपरे

सर्वधर्मान् परित्यज्य मामेकं शरणं व्रज ।
अहं त्वा सर्वपापेभ्यो मोक्षयिष्यामि मा शुचः ॥
(१८।६६)

इतिवाक्ये

नैष्कर्म्यसिद्धिं परमां संन्यासेनाधिगच्छति ।
(गीता० १८।४९)

इतिपद्योक्तनिष्कामकर्मत्यागविशिष्टपरमेश्वरशरणापत्तिरूपभक्तिकथनं पूर्वार्धेनोत्तरार्धस्य तादृशाधिकारिणः सकृत्कीर्तनस्मरणाद्युत्पादनेन सर्वपापक्षयं जनयिष्यामीति तात्पर्यं भगवत इति वदन्ति । एतदपि चिन्त्यम् । गीतावाक्यस्य ज्ञानजननेन सर्वपापं नाशयिष्यामीत्यत्रैव तात्पर्यात् पूर्वापरपर्यालोचनतस्तथैवावगमात् । तस्मादयमर्थः सूत्रस्य । लघ्वपि कीर्तनादिकं महद्भवति । यतः शरणाऽऽपन्नस्य सर्वहानात् । ऋणित्वाद्यभावं प्राप्य क्षेपकं समस्तपापनाशकं भवतीति । तथा च स्वरूपलाघवेऽपि फलद्वारके महत्त्वमस्त्येवेति भावः । भगवच्छरणस्यानृणित्वमुक्तं श्रीभागवते—

देवर्षिभूतात्मनृणां पितॄणां
न किङ्करो नायमृणी च राजन् ।
सर्वात्मना यः शरणं शरण्यं
गतो मुकुन्दं परिहृत्य कृत्यम् ॥ इति ॥ २१ ॥
(भाग० ११।५।४१)

श्रवणकीर्तनादेः पापनिवर्तकत्वात् 'प्रायश्चित्तं तु तस्यैकम्' (विष्णुपु० २।६।३४) इत्यादिना प्रायश्चित्तरूपत्वोक्तावपि प्रायश्चित्तान्तरधर्मास्तु नायान्तीत्यत आह—

तत्स्थानत्वादनन्यधर्मः खलेवालीवत् ॥ २२ ॥

तत्स्थानत्वादिति । श्रवणकीर्तनाऽऽदिकमनन्यधर्म एव प्रायश्चित्ताऽन्तरविहितधर्मरहितमेव । कुतः तत्स्थानत्वात् ? प्रायश्चित्तस्थानत्वात्, प्रायश्चित्तस्थाने तद्विधानादिति यावत् । तत्र दृष्टान्तः—खलेवालीवत् । यथा 'खलेवाली यूपो भवति' इत्यत्र पशुयोजने यूपकार्ये खलेवाली विधिरिति न यूपधर्मास्वीकरणादिप्रसङ्गः । तद्वदत्र नखलोमादिवपनानां प्रायश्चित्तधर्माणामप्राप्तिरिति । ननु किं विनिगमकम्, 'प्रायश्चित्तं तु तस्यैकम्' (विष्णु० २।६।३४) इत्यादौ प्रायश्चित्तधर्मप्राप्तये । न तत्संज्ञाविधिः । किन्तु हरिस्मरणादेः प्रायश्चित्तकार्ये विधिरिति चेत्—पापक्षयरूपफलसंयोगलाभस्यैव विनिगमकत्वात् । संज्ञाविधौ तु तन्न स्यात् । न च कीर्तनादेरपि पापक्षयहेतुत्वात्प्रायश्चित्तत्वमेवेति वाच्यम् ।

प्रायो नाम तपः प्रोक्तं चित्तं निश्चय उच्यते ।
तपोनिश्चयसंयुक्तं प्रायश्चित्तमिति स्मृतम् ॥
(गौतमधर्मसू० २२।१ धृतम् अङ्गिरोवाक्यम्)

इत्यनेन तपसि प्रायश्चित्तशब्दो मुख्योऽन्यत्र गौण इति मन्तव्यम् ।

प्रायश्चित्तान्यशेषाणि तपःकर्मात्मकानि वै ।
यानि तेषामशेषाणां कृष्णानुस्मरणं परम् ॥
(विष्णुपु० २।६।३५)

इत्यत्र षष्ठी तु पञ्चम्यर्थे बोध्या ॥ २२ ॥

स्यादेतत्। परन्तु भक्तावधिकारी कः प्राणी किं कर्मणीव स्वाध्यायाध्ययनादिसम्पन्नो द्विज एव, उत ब्रह्मविद्यायामिव साधनचतुष्टयसंपन्न एवोत्तमस्तत्राह—

आनिन्द्ययोन्यधिक्रियते पारम्पर्यात् सामान्यवत् ॥ २३ ॥

आनिन्द्येति। निन्दितचाण्डालादियोनिपर्यन्तो जन्तुः सर्वोऽपि भक्तावधिक्रियते 'अपि वा चाण्डालः शिव इति वाचं वदेत् तेन सह संवसेत्'।

अहो बत श्वपचोऽतो गरीयान्
यज्जिह्वाऽग्रे वर्तते नाम तुभ्यम् ॥
(भाग० ३।३३।७)

यन्नामधेयश्रवणानुकीर्तनात्
यत्प्रह्वणाद्यत्स्मरणादपि क्वचित्।
श्वादोऽपि सद्यः सवनाय कल्पते ॥
(भाग० ३।३३।६)

किरातहूणान्ध्रपुलिन्दपुल्कसा
आभीरकङ्का यवनाः खशादयः।
येऽन्ये च पापा यदपाश्रयाश्रयाः
शुध्यन्ति तस्मै प्रभविष्णवे नमः ॥
(भाग० २।४।१८)

ब्राह्मणाः क्षत्रिया वैश्याः स्त्रियः शूद्रान्त्यजादयः।
यत्र तत्रानुकुर्वन्तो विष्णोर्नामानुकीर्तनम् ॥

सर्वपापविनिर्मुक्तास्ते यान्ति परमां गतिम्।
चण्डालादयोऽपि श्रेष्ठाः स्युर्विष्णुभक्तिपरायणाः ॥
तप्तमुद्रा ह्यन्त्यजाय हरिणा निर्मिता पुरा।
स्तेनः सुरापो मित्रध्रुक् ब्रह्महा गुरुतल्पगः।
स्त्रीराजपितृगोहन्ता ये च पातकिनोऽपरे ॥

(भाग० ६।२।९)

सर्वेषामप्यघवतामिदमेव सुनिष्कृतम्।
नामव्याहरणं विष्णोर्यतस्तद्विषया मतिः ॥

(भाग० ६।२।१०)

इत्यादिश्रुतिस्मृतिवाक्येषु सर्वाधिकारलाभात्। ननु चण्डालादीनां वेदाऽध्ययनाभावात् कथं तदर्थज्ञानं विना भक्तिसिद्धिरत आह—पारम्पर्यादिति। उपदेशपारम्पर्यसंभवादित्यर्थः। तथा च तेषामपि स्यात्।

न वेदः प्रणवं त्यक्त्वा मन्त्रो वेदसमुत्थितः।
तस्माद्वेदः परो मन्त्रो वेदाङ्गश्चागमः स्मृतः ॥
वेदेन साध्यते सर्वं ग्रहयज्ञादिभिः किल।
न वेदेन विना यज्ञा न वेदा यज्ञवर्जिताः ॥
तस्माद्वेदः परो मन्त्रो न मन्त्रो वेद उद्गतः।
न मन्त्रे चाधिकारोऽस्ति शूद्राणां नियमः परः ॥

'मन्त्राभावादमन्त्रेण भाषितं सर्वकर्म हि' इति कापिलपञ्चरात्रोक्तेः।

यावद्वर्णानि मन्त्राणां शूद्राय प्रतिपादयेत्।
तावत्यो ब्रह्महत्याः स्युः स्वयमाह प्रजापतिः ॥

इति शातातपोक्तेश्च । शूद्रेभ्यो मन्त्रदाननिषेधेन दीक्षानधिकारतुल्यन्यायेन हीनानां सर्वेषां भक्तावनधिकारज्ञापनाच्चेत्यवेदमूलकज्ञानसंभवात् । दीक्षानिषेधवचनानाम्—

ब्राह्मणाः क्षत्रिया वैश्याः शूद्रा ये शुद्धयोऽमलाः ।
तेषां मन्त्राः प्रदेया वै न तु संकीर्णधर्मिणाम् ॥

—इतिभविष्योत्तरवचनानुसारादसच्छूद्रादिनिषेधपरत्वात् ।

स्वाहाप्रणवसंयुक्तं मन्त्रं शूद्रे ददद् द्विजः ।
शूद्रो निरयगामी स्याद्विप्रः शूद्रत्वमाप्नुयात् ॥

इति पद्मपुराणादिवाक्यानुसाराद् मन्त्रविशेषप्रदानानधिकारपरत्वात् ।

न वैदिकं जपेच्छूद्रः स्त्रियश्चैव कदाचन ।
नमोऽन्तं शिवमन्त्रं वा वैष्णवं नेष्यते बुधैः ॥
स्त्रीशूद्राणामयं मन्त्रो नमोऽन्तश्च शुभावहः ।
एतज्ज्ञाता महासेन चण्डालानपि दीक्षयेत् ॥

इति याज्ञवल्क्ययामलादिवचनैर्नमोऽन्तादिष्वधिकारात् तत्तुल्यन्यायेन सर्वत्र भक्तावधिकारोऽस्त्येव सामान्यवत् ।

यथा—

क्षमा सत्यं दया शौचं दानमिन्द्रियनिग्रहः ।
अहिंसा गुरुशुश्रूषा तीर्थानुसरणं सदा ॥
आर्जवं लोभशून्यत्वं देवब्राह्मणपूजनम् ।
अनसूया तथा धर्मः सामान्यः परिकीर्तितः ॥

इतिमन्वाद्युक्तसामान्यधर्मे सर्वस्याधिकारस्तद्वदिति भावः । केचित्तु मोक्षधर्मे शुकस्य व्यासाश्रमप्राप्तौ वेदं प्रकृत्य—

सर्वस्तरतु दुर्गाणि सर्वो भद्राणि पश्यतु । इत्युक्त्वा—

(शान्ति० ३२७।४८)

श्रावयेच्चतुरो वर्णान् कृत्वा ब्राह्मणमग्रतः ।
वेदस्याध्ययनं हीदं तत्त्वार्थसहितं स्मृतम् ॥
(शान्ति० ३२७।४९)

इति ब्राह्मणाग्रकरणेन सर्वस्यापि सार्थवेदश्रवणेऽधिकारकथनात्।

वस्तुतो ब्राह्मणत्वादिजाते र्दुर्वचत्वाद् दुर्ज्ञेयत्वाच्च न सा तत्राधिकारिविशेषणम्। किन्तु सत्यादिगुणवत्वलक्षणमेव ब्राह्मणत्वम्। वनपर्वणि सर्पयुधिष्ठिरसंवादेन तथावगमात्। तथाहि अगस्त्यशापान्नहुषो राजा सर्पयोनिं प्राप्तो युधिष्ठिरमुखाद् ब्रह्मविद्याधिकारिणं ब्राह्मणं निर्णेतुं युधिष्ठिरमुवाच—

ब्राह्मणः को भवेद्राजन् वेद्यं किं च युधिष्ठिर ।
ब्रवीह्यासमतिं त्वां हि वाक्यैरनुमिमीमहे ॥
(वन० १८०।२०)

तमाह युधिष्ठिरः—

सत्यं दानं क्षमा शीलमार्जवञ्च तपो घृणा ।
दृश्यन्ते यत्र राजेन्द्र स ब्राह्मण इति स्मृतः ॥ इति ।
(वनपर्व १८०।२१)

सर्पः—

चातुर्वर्ण्यं प्रमाणं च सत्यं च ब्रह्म चैव हि ।
शूद्रेष्वपि च सत्यं च दानमक्रोध एव च ॥ इति ॥२३॥

युधिष्ठिरः—

शूद्रे चैतद्भवेल्लक्ष्म द्विजे तच्च न विद्यते ।
न वै शूद्रो भवेच्छूद्रो ब्राह्मणो न च ब्राह्मणः ॥२५॥
यत्रैतल्लक्ष्यते सर्प वृत्तं स ब्राह्मणः स्मृतः ।
यत्रैतन्न भवेत्सर्प तं शूद्रमिति निर्दिशेत् ॥२६॥

जातिवैयर्थ्यमाशङ्कते सर्पः—

यदि वै वृत्ततो राजन् ब्राह्मणः प्रसमीक्षितः ।
वृथा जातिस्तथायुष्मन् कृती यावन्न विद्यते ॥ इति ॥३०॥

दुर्ज्ञेयत्वाद् दुर्वचत्वाज्जातिर्व्यर्थैवेत्याह—

युधिष्ठिरः—

जातिरत्र महासर्प मनुष्यत्वे महामते ।
संकरात्सर्ववर्णानां दुष्परीक्ष्येति मे मतिः ॥ ३१ ॥
सर्वे सर्वास्वपत्यानि जनयन्ति सदा नराः ।
वाङ् मैथुनमथो जन्म मरणं च समं नृणाम् ॥ ३२ ॥
इदमार्षं प्रमाणं च ये यजामह इत्यपि ।
तस्माच्छीलं प्रधानेष्टं विदुर्ये तत्त्वदर्शिनः ॥ ३३ ॥
प्राङ् नाभिवर्धनात्पुंसो जातकर्म विधीयते ।
तत्रास्य माता सावित्री पिता त्वाचार्य उच्यते ॥ ३४ ॥
तावच्छूद्रसमो ह्येष यावद्वेदे न जायते ।
तस्मिन्नेवं मतिद्वैधे मनुः स्वायंभुवोऽब्रवीत् ॥ ३५ ॥
कृतकृत्याः पुनर्वर्णा यदि वृत्तं न विद्यते ।
संस्कारस्त्वत्र नागेन्द्र बलवान् प्रसमीक्षितः ॥ ३६ ॥
यत्रेदानीं महासर्प संस्कृतं वृत्तमिष्यते ।
तं ब्राह्मणमहं पूर्वमुक्तवान् भुजगोत्तम ॥ इति ॥ ३७ ॥

(वनपर्व १८० अध्याये)

तादृशमेव ब्राह्मणत्वं "ब्राह्मणो निर्वेदमायात्" (मुण्डक० १।२।१२) इत्यत्राभिप्रेतम्, न जातिरूपम् । अत एव शौनकादिभिर्महर्षिभिः प्रतिलोमोऽपि सूतो धर्मान् श्रोतुं पौराणिकः कृत इति प्राहुः । तन्न युक्तम् । 'अथ हास्य वेदमुपश्रृण्वतस्त्रपुजतुभ्यां

श्रोत्रप्रपूरणम्, अध्ययने जिह्वाच्छेदः, अर्थावधारणे हृदयविदारणम्। (गौतमधर्म सूत्र० १२।४)

नाग्निर्न यज्ञः शूद्रस्य तथैवाध्ययनं कुतः।
केवलैव तु शुश्रूषा त्रिवर्णानां विधीयते॥

इत्यादिस्मृत्या शूद्रोपलक्षितनीचजातेर्ब्राह्मणाग्रकरणेनापि वेदवेदान्ताध्ययनपूर्वकार्थग्रहणेऽधिकारवर्जनात्। वेदान्तसूत्रेष्वपि शूद्राधिकरणेनापि तथैव प्रतिपादनात्। तस्माज्जातिर्नाधिकारिविशेषणम्, किन्तु गुणवत्त्वमेवेति रिक्तं वचनम्। नीचादपि गुणोत्पन्नस्य संस्काराल्लब्धजातिकस्य गुणवत्त्वमात्रेण विद्यायामधिकारो भवतीत्यर्थे दर्शितवाक्यानां तात्पर्यात्। महाभारते मतङ्गोपाख्यानादेस्तथावधारणात्। तत्र नीचाद्ब्राह्मण्यामुत्पन्नस्य मतङ्गस्याप्राकट्ये ब्राह्मणस्य प्राकट्ये च ब्राह्मण्यहानेः श्रवणादित्यास्तां विस्तरः। तस्माच्छूद्रादिना नीचेन पुराणश्रवणभाषाप्रबन्धाध्ययनत एव ज्ञानमुत्पाद्य भक्तिः संपादनीयेति सिद्धम्।

स्यादेतत् कथं संकीर्तनलक्षणायां भक्तौ तु द्विजोऽधिक्रियते।

स्त्रीशूद्रद्विजबन्धूनां त्रयी न श्रुतिगोचरा।
इति भारतमाख्यानं कृपया मुनिना कृतम्॥
(भाग० १।४।२५)

इति स्त्रीशूद्रादीनामर्थे भारतनिर्माणात्, भारतशब्दस्य च पुराणमात्रोपलक्षणत्वात्, संकीर्तनस्य च पौराणत्वात्स्त्रीशूद्रमात्राधिकारत्वनिर्णयात्। न हि केशवसंकीर्तनं कुर्यादिति क्वचिद्वेदे श्रूयते। ननु "अस्य महतो भूतस्य निःश्वसितमेतद्यदृग्वेदो यजुर्वेदः सामवेदोऽथर्वाङ्गिरस इतिहासः पुराणं विद्या उपनिषदः श्लोकाः सूत्राण्यनुव्याख्यानानि" (बृहदा० २।४।१०) इति श्रुतेः।

पुराणन्यायमीमांसाधर्मशास्त्राङ्गमिश्रिताः ।
वेदाः स्थानानि विद्यानां धर्मस्य च चतुर्दश ॥
(याज्ञ० स्मृ० १।३)

इति स्मृतेश्च वेदानामिव पुराणेतिहासादीनामपि व्यासतः प्रकटानां नित्यसिद्धत्वाद्वेदार्थे स्वतः प्रमाणत्वाच्च कथं तदर्थस्य स्त्रीशूद्रमात्राधिकारत्वम्, न द्विजाधिकारत्वमिति चेत्, न। कथञ्चित् समप्रमाणत्वेऽपि श्येनादिवाक्यानां सकामपरतावत्पुराणवचसां 'स्त्रीशूद्रद्विजबन्धूनाम्' (भाग० १।४।२५) इत्यादिवाक्यतः स्त्रीशूद्रादिपरत्वेन तथा कल्पनात् । किंच क्षत्रियादीनामध्यापनादिव्यापाराभावात् स्यात्कथञ्चित्संकीर्तनाधिकारः । ब्राह्मणानां त्वध्यापनादिव्यापृतानां न कथञ्चित्संकीर्तनकालो लभ्यत इति ब्राह्मणेतराधिकारं भजनम् । नित्यकर्मव्यापृतानां संकीर्तने कालाऽभावात् । किंच—

ऋग्वेदोऽथ यजुर्वेदः सामवेदो ह्यथर्वणः ।
अधीतास्तेन येनोक्तं हरिरित्यक्षरद्वयम् ॥

इत्यनधीतस्य नामसंकीर्तनेनाधीतसंपत्तिश्रवणादनधीतशूद्राधिकारत्वं निर्णीयत इति चेत्, अत्र वदन्ति—एवं हि ज्योतिष्टोमाऽऽद्यनुष्ठानं काम्यकर्माऽनुष्ठानं च न स्यात् । ब्राह्ममुहूर्तमारभ्य नित्यकर्माऽवरुद्धत्वात्कालस्य । यदि च कथञ्चित्सोढ्वा ज्योतिष्टोमाऽऽद्यनुष्ठानं तुल्यमिदं संकीर्तनेऽपि, तस्याऽपि विहितत्वात् । यच्चोक्तम् "ऋग्वेद" (बृहदा० २।४।१०) इत्यादिवाक्याच्छूद्राऽधिकारत्वमिति तच्चानिष्टम्, सर्वाऽधिकारत्वात् । न चैतदेकान्तिकं शूद्राऽधिकारत्वसूचकं लिङ्गम् । तथाहि— येनोक्तं हरिरित्यक्षरद्वयं तेनाऽधीता इति प्रत्यक्षबाधितम् । अथ

प्रशंसा क्रियते। ब्राह्मणस्यापि सा संभवतीति नासाधारणं शूद्रलिङ्गम्। अधीतवतापि येन ब्राह्मणेन हरिरित्युक्तं तेनाधीता इति। यच्चोक्तम् 'स्त्रीशूद्रद्विजबन्धूनाम्' (भाग० १।४।२५) इत्यादिवाक्यावष्टम्भेन संकीर्तनस्य शूद्राधिकारत्वम्। तत्रोच्यते— सत्यं स्त्रीशूद्राऽऽदीनामर्थे भारताऽऽदिनिर्माणम्, न तु तन्मात्राऽर्थे, तत्र ब्राह्मणाऽदीनामपि धर्मनिरूपणात्। 'इतिहासपुराणाभ्यां वेदं समुपबृंहयेत्' (महाभा० आदि १।२६७-२६८) इति ब्राह्मणादिकर्तृवेदार्थनिर्णायकत्वेनोपादानाच्च। वस्तुतस्तु वेदानामिव पुराणानामपि नित्यसिद्धत्वात्स्वाध्यायाध्ययनविधिपरिगृहीतमध्ययनं दृष्टार्थम्, त्रैवर्णिकानां तदर्थेषु ज्ञानयज्ञादिष्विव कीर्तनेऽप्यधिकारमाक्षिपति, श्रवणद्वारा च तुरीयादेरिति न कोऽपि दोषः। यच्चोक्तं संकीर्तनं न वैदिकमिति, तदपि न युक्तम्। "तमु स्तोतारं" (ऋ०१।१५६।३) इत्यादिश्रुतिबोधितत्वात्। तस्मात् संकीर्तनस्य पौराणत्वात् स्त्रीशूद्राधिकारत्वमेव इति, रिक्तं वचः। यदप्युक्तं ब्राह्मणानामध्यापनादिव्यापृतत्वेन संकीर्तनकालाभावादब्राह्मणाधिकारं संकीर्तनमिति भाव इति, तदपि न युक्तम्। अध्यापनादेरावश्यकत्वाभावात्।

षण्णां तु कर्मणामस्य त्रीणि कर्माणि जीविका।
याजनाध्यापने चैव विशुद्धाच्च प्रतिग्रहः॥

(मनु० १०।७६)

इति वृत्त्यर्थत्वेन विध्यभावाच्च ज्योतिष्टोमाद्यननुष्ठानप्रसङ्गाच्च। वस्तुतस्तु 'श्रावयेच्चतुरो वर्णान्' (शान्ति०३२७।४९) इत्यस्य "एतया निषादस्थपतिं याजयेत्" (मै० सं० २।२।४)

इतिवत् प्रयोज्यव्यापारपरत्वेन श्रवणविधिपरत्वात्तस्य चाऽध्यापनविधिवद् दृष्टार्थत्वात् पुराणार्थज्ञानकामाश्चत्वारो वर्णाः पुराणानि शृणुयुरित्यर्थोऽवसीयते। ततश्चोत्तरत्र क्रतुष्वध्ययनविधिसिद्धार्थज्ञानवतामिव पौराणेषु कर्मसु श्रवणविधिसिद्धार्थज्ञानवतां चतुर्णां वर्णानामधिकारो निश्चीयते।

'श्वादः शुद्धयेरन् यस्य कीर्तनात्' इत्यादिवचनात्तु चाण्डालादीनामप्यधिकारः। तेषां हि पुराणश्रवणाऽभावेन शूद्रस्येवाध्ययनाभावेन वैदिकेसु कर्मसु पौराणिकेषु संकीर्तनादिषु न्यायेनाधिकाराभावेऽपि "एतया निषादस्थपतिं याजयेत्" इति निषादेष्टाविव निषादस्योक्तवचनाददधिकारो निर्णीयते। तस्मात् सिद्धं गुणनामकीर्तनं सर्वाधिकारमिति।

लिङ्गपुराणे—ऋषय ऊचुः—

कृष्णस्तुष्यति केनेह सर्वदेवेश्वरेश्वरः।
वक्तुमर्हसि चाऽस्माकं सूत सर्वार्थविद्भवान्॥
(लिङ्ग० २।१।१)

सूत उवाच—

पुरा पृष्टो महातेजा मार्कण्डेयो महामुनिः।
अम्बरीषेण विप्रेन्द्रास्तद्वदामि यथातथम्॥ २॥

इत्यम्बरीषमार्कण्डेयसंवादं प्रक्रम्य—

पुरा त्रेतायुगे कश्चित्कौशिको नाम वै द्विजः।
वासुदेवपरो नित्यं सामगानरतः सदा॥ ९॥
भोजनासनशय्यासु सदा तद्गतमानसः।
उदारचरितं विष्णोर्गायमानः पुनः पुनः॥ १०॥

विष्णुस्थलं समासाद्य हरेः क्षेत्रमनुत्तमम् ।
अगायत हरिं तत्र लयतालसमन्वितम् ॥ ११ ॥
(लिङ्ग० २।१ अ०)

इत्यादिना भगवद्गुणगायकस्य कौशिकस्य तदन्नदातुश्च पद्माक्षस्य नित्यं तद्गानं शृण्वतः तच्छिष्याणां च राजन्य-वैश्यविप्राणां गानविद्याधिकारिणां वासुदेवपरायणानां गालव-नामकस्य वैश्यस्य च विष्णुपरायणस्य सभार्यस्य तद्गानं शृण्व-तोऽन्येषां च ब्राह्मणानां शृण्वतां स्वगुणगानार्थं कलिङ्गराजेन कृतेऽपि निग्रहे विष्णुगुणव्यतिरिक्तगाननिवृत्ता ना मेतेषां सर्वेषां कालगतिं गतानाम्—

वेष्टितः स्वगणै राजन् ब्रह्मा प्राह च तान् सुतान् ।
कौशिकादीन् द्विजानद्य वासुदेवपरायणान् ॥ ३६ ॥
गानयोगेन ये नित्यं पूजयन्ति जनार्दनम् ।
तानानयत भद्रं वो यदि देवत्वमिच्छथ ॥ ३७ ॥
(लिङ्ग० २।१ अ०)

इत्यादिना विष्णुलोकनयनं भगवदनुग्रहश्च श्रूयते—

ततोऽवलोक्य भगवान् हरिर्नारायणः प्रभुः ।
कौशिकेत्याह संप्रीत्या तांश्च सर्वान् यथाक्रमम् ॥ ५० ॥
जयघोषो महानासीन्महाश्चर्ये समागते ।
ब्रह्माणमाह विश्वाऽऽत्मा शृणु ब्रह्मन् यथोचितम् ॥ ५१ ॥
कौशिकस्य तु ये विप्राः साध्यसाधनतत्पराः ।
हिताय संप्रवृत्ता ये कुशस्थलनिवासिनः ॥ ५२ ॥
मत्कीर्तिश्रवणे युक्ता गानतत्वार्थकोविदाः ।
अनन्यदेवताभक्ताः साध्या देवा भवन्त्विमे ॥ ५३ ॥

मत्समीपे तथाऽन्यत्र प्रवेशं देहि सर्वदा ।
एवमुक्त्वा पुनर्देवः कौशिकं प्राह माधवः ॥ ५४ ॥
स्वशिष्यैस्त्वं महाप्राज्ञ संसक्तो मम वै सदा ।
गणाधिपत्यमापन्नो यत्राहं त्वं समास्स्व वै ॥ ५५ ॥
गालवं मालतीश्चैव प्राह दामोदरो हरिः ।
मम लोके यथाकामं भार्यया सह गालव ॥ ५६ ॥
दिव्यरूपधरः श्रीमान् शृण्वन्गानमिहाधिपैः ।
आस्स्व नित्यं यथाकामं यावल्लोका भवन्ति वै ॥ ५७ ॥
पद्माक्षमाह भगवान् धनदो भव मानद ।
धनानामीश्वरो भूत्वा यथाकालं हि मां पुनः ॥ ५८ ॥
(लिङ्ग० २।१ अ०)

अम्बरीषं प्रति—

आगम्य दृष्ट्वा नत्वा च कुरुष्व च यथासुखम् । इत्यादि ।
तस्मात्त्वया महाराज विष्णुक्षेत्रे विशेषतः ॥ ४ ॥
अर्चाद्यं गाननृत्यादि वाद्योत्सवसमन्वितम् ।
कर्तव्यं विष्णुभक्तैर्हि पुरुषैरनिशन्नृप ॥ ५ ॥
श्रोतव्यं च त्वया नित्यं स्तोतव्योऽसौ हरिस्त्वया ।
विष्णुस्तोत्रं ततो विद्वान् कारयेद्भक्तिसंयुतः ॥ ६ ॥
गाननृत्यादिकं चैव विष्ण्वाख्यानकथां तथा ।
जातिस्मृतिं च मेधां च तथैव परमोन्नतिम् ॥ ७ ॥
प्राप्नोति विष्णुसालोक्यं सत्यमेतन्नराधिप ॥ ८ ॥
(लिङ्ग० २।२ अ०)

इति । ततोऽग्रिमाऽध्याये कौशिकादीनां गानयोगेन भगवदनुग्रहमवलोक्याऽनुतप्तो नारदस्तपस्तप्त्वाऽऽकाशवाचा नियुक्तो गानबन्धुमुलूकेन्द्रं प्रति गत उलूकेन्द्रमाह—'शृणु सर्वं यथातथम्' इत्युपक्रम्य—

यद्दत्तं यद्धुतं चैव यद्वाचा श्रुतमेव च ।
यदधीतं मया सर्वं कलां नाऽर्हति षोडशीम् ॥ १८ ॥
विष्णोर्माहात्म्ययुक्तस्य गानयोगस्य वै ततः ॥ १९ ॥

इत्यादिना गानयोगविषये तं प्रार्थितवान् । गानबन्धुरपि भुवनेशं नाम राजानं प्रकृत्य—

तस्य राज्ञः पुराऽभ्याशे हरिमित्र इति स्मृतः ॥ २९ ॥
ब्राह्मणो विष्णुभक्तश्च सर्वद्वन्द्वविवर्जितः ।
नदीपुलिनमासाद्य प्रतिमां स हरेः शुभाम् ॥ ३० ॥
अभ्यर्च्य च यथाशास्त्रं घृतदध्युत्तरं बहु ।
मिष्टान्नं पायसं दत्वा हरेरावेद्य पूर्वकम् ॥ ३१ ॥
प्रणिपत्य यथान्यायं तत्र विन्यस्तमानसः ।
अगायत हरिं साक्षात्तालवर्णलयान्वितम् ॥ ३२ ॥
(लिङ्ग० २।३ अ०)

इत्यादिना भगवद्गुणगायकं हरिमित्रं प्रशस्य तत्प्रतिबन्धकर्तुश्च राज्ञो यमयातनां निरूपितवान् । न चैतदब्राह्मणविषयम् ।

ब्राह्मणो वासुदेवाख्यं गायमानोऽनिशं नृप ।
हरेः सालोक्यमाप्नोति रुद्रज्ञानाधिको भवेत् ॥११०॥
अन्यथा नरकं गच्छेद् गायमानोऽन्यदेव हि ॥१११॥
(लिङ्ग० २।३ अ०)

इति तत्रैव । याज्ञवल्क्ये च—

गीतज्ञो यदि गीतेन नाप्नोति परमं पदम् ।
रुद्रस्याऽनुचरो भूत्वा सह तेनैव मोदते ॥
तालज्ञश्चाप्रयासेन मोक्षमार्गं स गच्छति ॥
(या० स्मृ० ३।११६)

इत्यादिना ब्राह्मणाऽऽदिसाधारणसर्वजनकर्तव्यताप्रतिपादनात्। तत् सिद्धं ब्राह्मणेनाऽपि विष्णोर्गुणगानं कर्तव्यमिति, श्रोतव्यं च तदिति। तच्छ्रोतॄणां पद्माक्षप्रभृतीनामुत्तमगतिश्रवणात्, भगवति चित्ताऽनुरागहेतुत्वाच्च।

स्यादेतत्। परन्तु साधुशब्देनैव तच्छ्रोतव्यं कर्तव्यं च, न भाषाप्रबन्धाऽऽदिना श्रोतव्यं कर्तव्यं वा "न म्लेच्छितवै नाऽपभाषितवै म्लेच्छो वा एष यदपशब्दः" (महाभाष्यपस्पशाह्निकधृतब्राह्मणवाक्यम्) इति निषिद्धत्वादिति चेत्। असाध्वेतत्, तस्य विहितत्वेन निषेधाप्रवृत्तेः। न च भगवद्गुणनामकीर्तनकर्तव्यताविधेरुक्तनिषेधानुरोधेन सङ्कोचो युक्तः, साधुशब्देनैव भगवद्गुणनामकीर्तनं कर्तव्यमिति वाच्यम्। निषेधस्य रागप्राप्तविषयत्वेनाप्युपपत्तेः। नचैवं साक्षाच्छ्रूयते साधुशब्देनैव भगवद्गुणनामकीर्तनं कर्तव्यमिति अपि च निषेधो हि प्राप्तिमपेक्षते। प्राप्तिश्च रागतो विधितो वा। तत्र प्राकृतवाक्यैर्भगवद्गुणानुवादो न रागतः प्राप्तः, भोजनवद्दृष्टफलत्वाऽभावात्। विधितः प्राप्तत्वेन सिद्धं समीहितम्, तत्र निषेधाऽप्रवृत्तेः, विहितनिषिद्धत्वे विकल्पाऽऽपत्तेः। षोडशिग्रहणवत्पक्षे विहितत्वसिद्धेः। न च यथाकथञ्चिद्भगवद्गुणानुवादो लोकपूज्यताहेतुरिति रागतः प्राप्तमिति वाच्यम्। तथा सति संस्कृतवाक्यैरपि भगवद्गुणानुवादस्याविहितत्वापत्तेः, अग्निहोत्राद्यनुष्ठानस्याऽपि तथात्वाच्च। तस्माद्भगवद्गुणानुवादकर्तव्यताविधौ सामर्थ्यात् करणत्वेन जिह्वेवाधिकारित्वेन मनुष्यमात्रमिव सामर्थ्यात् संस्कृतप्राकृतसाधारणवाक्यमन्वेतीत्यवश्यमभ्युपेयम्। ततः सिद्धं भाषयाऽपि गुणनामकीर्तनं कर्तव्यमिति।

तस्मात्केनाप्युपायेन मनः कृष्णे निवेशयेत् ।

(भाग० ७।१।३१)

स्तवैरुच्चावचैः स्तोत्रैः पौराणैः प्राकृतैरपि ।

(भाग० ११।२७।४५)

इत्यादिनाऽपि तथा बोधनादिति दिक् । स्तवोगुणकीर्तनानि । स्तोत्रैरिति ग्रन्थनामधेयंन्तेषामुच्चावचत्वं दर्शयति-पौराणैः प्राकृतैरिति । एवं नीचकर्तृकभगवद्गुणगानादिश्रवणेऽपि दोषाभावः । "अपि वाऽयं चाण्डालः शिव इति वाचं वदेत् तेन सह संवसेत् तेन सह भुञ्जीत" 'यद्द्व्यक्षरं नाम गिरेरितं नृणाम्' इत्यादिश्रुतिपुराणवचनेभ्यः सकृद्नामसङ्कीर्तनेऽपि दुरितनिकर-भञ्जनतो नीचानामपि व्यवहार्यत्वोक्त्या तदवगमादिति ।

ननु तथाऽपि कथं कीर्तनं सर्वाधिकारम् । मुमुक्षूणां तत्रा-धिकाराभावात् । तेषाम्—

नैव तस्य कृतेनार्थो नाकृतेनेह कश्चन ।

न चास्य सर्वभूतेषु कश्चिदर्थव्यपाश्रयः ॥ (भ० गी० ३।१८)

इत्यादिना कर्मकरणसाध्यफलाऽऽद्यभावश्रवणादिति चेत्, सत्यम् । यद्यपि तेषां सकलपापक्षयस्य ज्ञानेनैव वृत्तत्वान्न तदुद्देशेन प्रवृत्तिः नाऽपि फलाऽन्तरोद्देशेन, निष्कामत्वात् । तथाऽपि भोजना-दाविव चित्तविश्रान्तिरूपदृष्टसुखार्थं तेषां तत्र प्रवृत्तिः । शुका-दीनां तथा श्रवणात् । सङ्कीर्तनं कुर्वतां सद्यश्चित्तविश्रान्तेरनुभवाच्च ।

ननु यदि कीर्तनं दृष्टार्थं तर्हि भोजनादिवद्विध्यभावप्रसङ्ग इति चेत्, उच्यते । सङ्कीर्तनं यद्यप्यदृष्टार्थम् । सर्वत्र बहुभिर्वाक्यैः फलार्थत्वेन विधानात् । तथाप्यवघातादिवद् दृष्टार्थमपि भवति । न च तावता विध्यभावः । तथा सत्यवहननादावपि विधिर्न स्यात् ।

तस्मात्सुखातिशयार्थमेव तेषां भगवत्कीर्तनमिति सिद्धं कीर्तनं सर्वाधिकारमिति ।

स्यादेतत् । तथापि विदुषां बहिर्व्यापारसाध्यं कीर्तनं कथं घटते "यत्र त्वस्य सर्वमात्मैवाभूत् तत्केन कं पश्येत्" (बृहदा० २।४।१४) इत्यादिश्रुत्या विद्यावतां सर्वद्वैतबाधबोधनादिति चेत्। अभिप्रायमनवगतवानसि । यतो ब्रह्मलोकं गतस्य विदुषो विविधैश्वर्यसम्भावकस्य स्वभवनस्य युगपदनेकमनस्तत्सम्बन्धाद्यसम्भवैरनुपपत्तिमाशङ्क्य "प्रदीपवदावेशस्तथाहि दर्शयति" (ब्र० सू० ४।४।१५) इति सूत्रेण तत् संभवं समर्थ्य तस्याप्यसंभवं वदन्त्यास्तादृशश्रुतेः स्वाप्ययसम्पत्योरन्यतरापेक्षमाविष्कृतं तथा हीति वदता भगवता व्यासेन सुषुप्तिमुक्त्याऽन्यतरपरत्ववर्णनात् युक्तं चैतत् । अन्यथा याज्ञवल्क्यप्रभृतीनामाचार्यत्वं श्रूयमाणमनुपपन्नं स्यात् । द्वैतदृष्टत्वे तत्वज्ञत्वाऽभावात् । द्वैताऽदृष्टत्वे तु शिष्याऽनुपलम्भादेव तदयोगादिति । अस्मन्मते तु—

नाप्रतीतिस्तयोर्बाधः किन्तु मिथ्यात्वनिश्चयः ।
न चेत् सुषुप्तिमूर्छादौ मुच्येतायत्नतो जनः ॥
परमात्मावशेषोऽपि तत् सत्यत्वविनिश्चयः ।
न जगद्विस्मृतिर्नोचेज्जीवन्मुक्तिर्न संभवेत् ॥

इतिप्रमाणात्तत्त्वधियां द्वैतमिथ्यात्व एव पक्षपातो न द्वैतलोप इति नानुपपत्तिगन्धोऽपि । अत एतस्य "तावदेव चिरं यावन्न विमोक्ष्येऽथ संपत्स्ये" (छान्दोग्य० ६।१४।२) इत्यादिश्रुतिभिरुक्तः प्रारब्धभोगोऽपि सङ्गच्छते । ननु कथं सङ्गच्छते—

यदा पञ्चाऽवतिष्ठन्ते ज्ञानानि मनसा सह ।
बुद्धिश्च न विचेष्टेत तामाहुः परमां गतिम् ॥
(कठ० ६।१०)

इत्यादिश्रुतौ, वासिष्ठे च—

इमां सप्तपदां भूमिं त्वं समाकर्णयानघ ।
नानया ज्ञातया भूयो मोहपङ्के निमज्जसि ॥ १ ॥

वदन्ति बहुभेदेन वादिनो योगभूमिकाः ।
मम त्वभिमता नूनमिमा एव सुखप्रदाः ॥ २ ॥

अवबोधं विदुर्ज्ञानं तदिदं साप्तभूमिकम् ।
मुक्तिस्तु ज्ञेयमित्यास्ते भूमिका भूमिकाऽन्तरे ॥ ३ ॥

ज्ञानभूमिः शुभेच्छाख्या प्रथमा समुदाहृता ।
विचारणा द्वितीया स्यात्तृतीया तनुमानसा ॥ ५ ॥

सत्त्वापत्तिश्चतुर्थी स्यात्ततोऽसंसक्तिनामिका ।
पदार्थभाविनी षष्ठी सप्तमी तुर्यगा स्मृता ॥६॥

आसामन्तस्थिता मुक्तिर्यस्यां भूयान्न शोचति ।
एतासां भूमिकानां त्वमिदं निर्वचनं शृणु ॥७॥

किं मूढ इव तिष्ठामि प्रेक्षेऽहं शास्त्रसज्जनैः ।
वैराग्यपूर्वमिच्छेति शुभेच्छेत्युच्यते बुधैः ॥८॥

शास्त्रसज्जनसंपर्कैर्वैराग्याऽभ्यासपूर्वकम् ।
सदाचारप्रवृत्तिर्या प्रोच्यते सा विचारणा ॥९॥

विचारणाशुभेच्छाभ्यामिन्द्रियार्थेष्वरक्तता ।
यत्र सा तनुताभावाऽत्मोच्यते तनुमानसा ॥१०॥

भूमिकात्रितयाऽभ्यासाच्चित्तेऽर्थविरतेर्वशात् ।
सत्यात्मनि स्थिते शुद्धे सत्त्वापत्तिरुदाहृता ॥११॥

दशाचतुष्टयाभ्यासादसंसर्गफला भृशम् ।
आभ्यन्तराणां बाह्यानां पदार्थानां च भावनात् ॥१२॥

परप्रयुक्तेन चिरं प्रयत्नेनाऽवबोधनम् ।
पदार्थभाविनी नाम षष्ठी संजायते गतिः ॥१४
भूमिषट्कचिराऽभ्यासाद्भेदस्यानुपलम्भतः ।
यत्स्वभावैकनिष्ठत्वं सा ज्ञेया तुर्यगा स्मृतिः ॥१५
एषा हि जीवन्मुक्तेषु तुर्याऽवस्थेह विद्यते ।
विदेहमुक्तविषये तुर्यातीतमतः परम् ॥१६

(योगवा० ३।११८ अ०)

इत्यादिवाक्यनिकरेण भूमिकाजयलब्धाद्वितीयात्मापरोक्षप्रमाया द्वैतादर्शन एव पक्षपातकथनात् । इतरवृत्तिनिरोधेच्छासहकृतेन समाधिनैव तदानीं द्वैतादर्शनस्योपपत्तेरिति "प्रसंख्यानेऽप्यकुसीदस्य सर्वथा विवेकख्यातेर्धर्ममेघः समाधिः" (यो० सू० ४।२९) इतिसूत्रयता पतञ्जलिनापि तथाबोधनात् । तथा चास्य कथं भोगः कथं वा सेव्यसेवकभावनिबन्धना भक्तिः स्यादिति चेत्, माऽस्तु भोगः; तदीयक्लेशनिचयस्य विवेकज्ञानवह्निदग्धबीजभावत्वाद् विषयसौन्दर्यधीपूर्वा रतिविशेषरूपा भक्तिस्तु स्यादेव । यतः—

यत्रोपरमते चित्तं निरुद्धं योगसेवया ।
यत्र चैवात्मनात्मानं पश्यन्नात्मनि तुष्यति ॥

(गी० ६।२०)

इतिवाक्यनिकरेण भगवता श्रवणादिपरिपाके च साक्षात्कृतात्मतत्त्वस्य समाधौ कूटस्थस्वाभिन्ने ब्रह्मणि सच्चिदानन्दघनेऽनवच्छिन्ने रतिविशेषरूपं प्रेम, व्युत्थाने तु दग्धघटवत्प्रमातत्वादिव्यवहारमनुसृत्य कीर्तनाऽऽदिभक्तिः "सततं कीर्तयन्तो माम्" (गीता ९।१४) इत्यादिना प्रतिपाद्यते । अत एव श्रीभागवते—

त्वदवगमी न वेत्ति भवदुत्थशुभाशुभयो-
गुंणविगुणान्वयांस्तर्हि देहभृतां च गिरः ।
अनुयुगमन्वहं सगुणगीतपरम्परया
श्रवणभृतो यतस्त्वमपवर्गगतिर्मनुजैः ॥
(१०।८७।४०)

इति पूर्वोत्तरार्धाभ्यां समाधिव्युत्थानावस्थाभेदेन सगुण-निर्गुणभक्तिभेदो वर्णितः । तथाहि, तत्रायमर्थः—हे भगवन् त्वदवगमी—श्रवणाद्यभ्यासबलेन त्वत्स्वरूपज्ञानवान्, भवतः—विदितात्सकाशात्, उत्थे—उत्थिते, दूरीभूते शुभाशुभे तयोः सुख-दुःखयोः कर्मणि षष्ठी, तेन जानाति, अपि च तर्हि तदानीं देहभृतां प्राणिनाम्, गुणविगुणान्वयान्—उत्तमत्वाधमत्वसम्बन्धान्। न वेत्ति इत्यनुषज्यते। तथा गिरः—शब्दादीन् विषयांश्च न वेत्ति। अत्रानात्मादर्शनेनैव तद्भक्तिर्लब्धा, इतरादर्शनेनैव तद्दर्शनस्य तद्भक्तिपर्यवसायित्वात्। यथा रासपञ्चाध्याय्याम्—

अपरानिमिषदृग्भ्यां तुषाण तन्मुखाम्बुजम् ।
आपीतमपि नातृप्यत्सन्तस्तच्चरणं यथा ॥
तं काचिन्नेत्ररन्ध्रेण हृदि कृत्य निमील्य च ।
पुलकाङ्ग्युपगूह्यास्ते योगीवानन्दसंप्लुता ॥
सर्वास्ताः केशवालोकपरमोत्सवनिर्वृताः ।
जहुर्विरहजं तापं प्राज्ञं प्राप्य यथा जनाः ॥
(१०।३२।७–९)

इति समाध्यवस्थामुक्त्वा व्युत्थानाऽवस्थामाह—अनुयुगमिति। युगं मिथुनं चिज्जडैक्यं प्रमातृत्वं दग्धपटवदनुवर्तमानमनुसृत्येत्यर्थः। अन्वहम् अहङ्कारममकारावनुसृत्य सगुणस्य श्रीकृष्णादेर्गीतं गुण-

कर्मजन्मवर्णनं तस्य परम्परया सातत्येन पूर्वोक्तं नवेतीत्यनुषज्यते। समाधौ विद्वान् स्वाऽभिन्नभगवत्स्वरूपप्रेमाऽऽनन्दनिमग्नत्वात् तत्सर्वं नवेत्ति, व्युत्थिते तु भगवद्गुणगानानन्दनिमग्नत्वादिति। अत उत्तमाधमजातिव्यवस्था कर्मकाण्डादिप्रामाण्यं च तत्पूर्वमेव, न तदूर्ध्वमिति भावः।

ननु विद्वदविदुषोर्व्यवहारः समानः 'पश्वादिभिश्चाविशेषात्' (शारीरिकभाष्याध्यासभाष्ये) इति न्यायात्। तथा च व्युत्थाने विद्वान् कर्म वा पुत्राद्यभिमानं वा कुतो नानुसरति? तत्राह— श्रवणेति। यतोऽपवर्गगतिस्त्वं मोहलक्षणः प्राप्याऽऽत्मा त्वं मनुजैः—अधिकारिभिः श्रवणेन—भगवत्कथाश्रवणादिप्रणाड्या भृतो—धृतः साधकदशायाम्, अतः सिद्धदशायामपि ते संस्कार-दार्ढ्यात् तदेवाऽनुष्ठन्ति, न कर्माऽऽदीत्यर्थः। जनकादिवत्कथञ्चिदनु-तिष्ठन्तोऽपि न तैः संश्लिष्यन्ते, अभिमानभावादिति भावः। ननु समाधाविवाद्वितीयात्मदर्शनतो व्युत्थानेऽपि स्वरूपानन्द-मग्नास्ते मातृमानादिभेदव्यवहारं स्वप्नवत्पश्यन्तः कुतो न त्यजन्तीति प्रारब्धस्यावश्यंभाविफलत्वाद्भोगेन तत्क्षयायैव तन्न त्यजन्तीत्यवेहि। तत्रापि संसारासारतां जानतां भगवद्भक्तावेव, परेच्छया त्वन्यत्रापि प्रवृत्तिरिति विवेकः। ननु कथं भगवद्भक्तौ प्रवृत्तिः? भक्तेर्धर्मार्थकाममोक्षेषु पुरुषार्थेष्वनन्तर्भावादिति चेन्नैवम्; धर्मार्थकामानां स्वतः पुरुषार्थत्वे गौरवादननुगमाच्च धर्मजन्य-त्वादिविशेषणं परित्यज्य सुखमात्रं पुरुषार्थ इति स्थिते समाधि-सुखस्येव भक्तिसुखस्यापि स्वतन्त्रपुरुषार्थत्वात्। तस्य मोक्ष-समीपवर्तितया मोक्षान्तर्भूतत्वं योगजधर्मजन्यतया धर्मान्तर्भूतत्वं वा यथा, तथा भक्तिसुखस्यापि भागवतधर्मजन्यतया धर्मान्त-

भावस्य श्रद्धाजडान् प्रति वक्तुं शक्यत्वात्, भक्तस्य संसारमोक्षावश्यकत्वान्मोक्षान्तर्गतो वा भक्तियोगः। तस्मात् पुरुषार्थचतुष्टयान्तर्गतत्वेन स्वातन्त्र्येण वा भक्तियोगः पुरुषार्थः परमानन्दरूपत्वादिति स्थिते तमुद्दिश्य विवेकिनां प्रवृत्तिरुचितैर्वेत्यास्तां विस्तरः॥ २३ ॥

अथ सर्वाधिकारत्वादेव मलिनान्तःकरणानामपि राजसतामसानां सत्सङ्गे सति तत्राधिकारः संपद्यत इत्यभिप्रेत्य तत्राधिकारोऽस्तीत्याह—

अतो ह्यविपक्वभावानामपि तल्लोके॥ २४ ॥

अत इति। यतः सर्वेषामधिकारोऽतो हेतोः, अविपक्वभावनामपि—निन्द्यजातिस्वभावात् प्राक्सञ्चितदुष्कृतनिचयाद्वा अशुद्धान्तःकरणानामपि, तल्लोके भगवद्भक्ते सत्यधिकारः संपद्यते भक्ताविति विशेषेणार्थः।

यत्पादसंश्रयाः सूत मुनयः प्रशमाऽयनाः।
सद्यः पुनन्त्युपस्पृष्टाः स्वर्धुन्यापोऽनुसेवया॥
(भाग० १।१।१५)

तुलयाम लवेनापि न स्वर्गं नाऽपुनर्भवम्।
भगवत्सङ्गिसङ्गस्य मर्त्यानां किमुताऽऽशिषः॥
(भाग० १।१८।१३)

न रोधयति मां योगो न साङ्ख्यं धर्म एव च।
न स्वाध्यायस्तपस्त्यागो नेष्टापूर्तं न दक्षिणाः॥१
व्रतानि यज्ञाश्छन्दांसि तीर्थानि नियमा यमाः।
यथाऽवरुन्धे सत्सङ्गः सर्वसङ्गाऽपहो हि माम्॥२

सत्सङ्गेन हि दैतेया यातुधाना मृगाः खगाः।
गन्धर्वाऽप्सरसो नागाः सिद्धाश्चारणगुह्यकाः ॥३
विद्याधरा मनुष्येषु वैश्याः शूद्राः स्त्रियोऽन्त्यजाः ।४
रजस्तमःप्रकृतयस्तस्मिंस्तस्मिन् युगे युगे ॥
बहवो मत्पदं प्राप्तास्त्वाष्ट्रकायाधवाऽऽदयः ॥५

(भाग० ११।१२।१-५)

इत्यादिना सत्सङ्गमात्रेण कृतार्थताया उक्तत्वात्। अत एवात्र 'सत्कर्मस्विति विहाय तल्लोक' इत्युक्तम्। सेवितानामपि सत्कर्मणां भगवत्परत्वाहेतुत्वात् ॥२४॥

ननु मलिनाऽमलिनयोः समानशुद्धत्वे भगवत्प्राप्तिरपि तुल्यैव स्यात्तत्राह—

क्रमैकगत्युपपत्तेस्तु ॥ २५ ॥

क्रमैकेति। तुशब्दः शङ्काव्यवच्छेदाऽर्थः। उपपत्तिः—प्रमाणम्, गतिः—प्राप्तिः, क्रमेणैकस्य—परमात्मनः प्राप्तौ प्रमाणसद्भावान्न भगवत्प्राप्तिस्तुल्या, किन्तु मलिनानान्तु व्यवधानेनेति भावः। प्रमाणन्तु—

अन्येऽपि ये विकर्मस्थाः शूद्राऽऽद्या नीचजातयः।
भक्तिमन्तः प्रमुच्यन्ते कालेन मयि सङ्गताः॥

(कूर्म० २।४।११)

इतीश्वरगीताऽऽदिवाक्यमित्यास्तां विस्तरः।

अथवा भजनस्य सर्वाऽधिकारित्वे भगवल्लोकगमनव्यवस्था कीदृशी? तत्राऽऽह—अतो ह्यविपक्वेति। यतः सर्वाऽधिकारोऽत औत्सर्गिकं निन्द्यजातिस्वभावाद् ब्रह्मसाक्षात्काराऽनुदयादपरि-

पक्वाऽनुरागाणां जीवानामपि । अपिना तल्लोककामानां कीर्तनाऽऽद्यवैयर्थ्याय तल्लोके—भगवल्लोके गमनमित्यर्थः ॥२४॥

ननु तल्लोके परिपक्वाऽनुरागाणामकामानामपि गमनमस्तु तत्राऽऽह—क्रमैकेति । तुशब्दः शङ्कानिरासाऽर्थः । न सर्वेषां गमनम्—

ये तु निष्कलुषा लोके पुण्यपापविवर्जिताः ।

(शान्ति० अ० ३४६)

इत्युपक्रम्यादित्यमण्डलद्वाराऽनिरुद्धप्रद्युम्नसंकर्षणेन व्यूहक्रमेण गतिमभिधाय—

समाहितमनस्कास्तु नियताः संयतेन्द्रियाः ।
एकान्तभावोपगता वासुदेवं विशन्ति ते ॥

(शान्ति० अ० ३४६)

इति क्रमेण वासुदेवगत्यभिधानात् । ततः पश्चात्—

ये तु दग्धेन्धना लोके पुण्यपापविवर्जिताः ।
तेषां त्वया विनिर्दिष्टा पारम्पर्यंक्रमाद्गतिः ॥
चतुर्थ्यां चैव ते गत्यां गच्छन्ति परमं पदम् ।
नूनमेकान्तधर्मोऽयं श्रेष्ठो नारायणप्रियः ॥
अगत्वा गतयस्तिस्रो यद्गच्छन्त्यव्ययं हरिम् ।

(शान्ति० अ० ३५०)

इति तत्रैव भगवत्प्राप्त्यैकगत्यभिधानाच्च । तथा च वाक्यद्वयाविरोधाय पक्वाऽपक्वाऽनुरागभेदेन गतिभेद इत्येव कल्पनीयम् । परिपक्वाऽनुरागाणाम् "न तस्य प्राणा उत्क्रामन्ति" (बृहदा० ४।४।६) इति श्रुतेर्मार्गगत्यभावेन भगवदभेदरूपा भगवत्प्राप्तिः, अपरिपक्वाऽनुरागाणान्तु साधनभक्त्या तल्लोकप्राप्तिरिति ।

ननु कथमविपक्वानां साधनभक्त्या तल्लोकप्राप्तिरुच्यते ? तत्त्वज्ञानद्वारैव तस्यास्तत्साधनत्वस्य प्राग्व्यवस्थापनात्। तत्त्वज्ञाने च वेदान्तविचारस्याऽपि हेतुत्वात्तस्य ज्ञानोद्देशेन "श्रोतव्य" (बृहदा० २।४।५) इत्यादिविधिविहितत्वात्, विचारे च "शान्तो दान्त" इत्यादिश्रुत्युक्तशमाऽऽदिसाधनचतुष्टयस्यैवाऽधिकारान्मलिनानां तत्राऽधिकाराऽभावादिति चेद्, मैवम्; वेदान्तविचारेऽधिकाराभावेऽपि तत्त्वज्ञानं प्रति साधनभक्तिवेदान्तविचारयोर्वैकल्पिकहेतुत्वेन वेदान्तविचारं विनाऽपि साधनभक्त्यैव तत्त्वज्ञानद्वारा तत्प्राप्तिसंभवात्। न चाल्पायाससाध्याया भक्तेः कष्टसाध्येन विचारेण कथं विकल्प इति वाच्यम्। विचारस्येव श्रवणादिभक्तेरपि स्वफलजनने वस्तुतो यज्ञाऽऽद्यनुष्ठानसाध्यश्रद्धासापेक्षत्वादायासाविशेषेण विकल्पसंभवात्। यद्यपि पापनिवृत्तिरूपफलं प्रति भक्तेः श्रद्धानिरपेक्षत्वमुक्तम्, तथापि—

जातश्रद्धो मत्कथादौ निर्विण्णः सर्वकर्मसु।
वेद दुःखाऽऽत्मकान् धर्मान् परित्यागेऽप्यनीश्वरः॥
ततो भजेत मां भक्त्या श्रद्धालुर्दृढनिश्चयः।

(भाग० ११।२०।२७-२८)

इत्यादिवाक्यान्मोक्षं प्रति श्रद्धासापेक्षत्वमस्त्येवेति स्वयं बोध्यम्। नन्वथापि विकल्पो न संभवति, विचारस्येव भक्तेस्तात्पर्याऽवधारणहेतुत्वाभावेन द्वारैक्याभावात्। व्रीहियवयोर्द्वारैक्यादेव विकल्पाऽभ्युपगमादिति चेत्, सत्यम्। यद्यप्यत्र द्वारभेद एव। यथा वेदान्तविचारे ब्रह्मणि तात्पर्याऽवधारणेन प्रमाणाऽसंभावनानिवृत्तौ मननादिना प्रमेयासंभावनाद्यपसारिते तत्त्वसाक्षात्कारोदये मुक्तिः। श्रवणाऽऽदिभक्त्या तु भगवदनुग्रहेण

तत्त्वसाक्षात्कारपरवैराग्यप्रेमभक्त्युदये मुक्तिरिति । यथोक्तं श्रीभागवते—

भक्तिः परेशाऽनुभवो विरक्ति-
रन्यत्र चैष त्रिक एककालः ।
प्रपद्यमानस्य यथाऽश्नतः स्यु-
स्तुष्टिः पुष्टिः क्षुदपायोऽनुघासम् ॥
(११।२।४२)

इत्यच्युताङ्घ्रिं भजतोऽनुवृत्त्या
भक्तिर्विरक्तिर्भगवत्प्रबोधः ।
भवन्ति वै भागवतस्य राजन्
ततः परां शान्तिमुपैति साक्षात् ॥ इति ।
(११।२।४३)

अत्र प्रपद्यमानस्येति साधनभक्त्युपन्यासः । भक्तिः—प्रेमलक्षणा, परेशाऽनुभवः—भगवन्मूर्तिस्फूर्तिः, अन्यत्र—गृहाऽऽदौ विरक्तिः, एष त्रिक एकस्मिन् काले भगवदनुग्रहतो भवति । 'ददामि बुद्धियोगं तम्' (गी० १०।१०) इति वाक्यान्तरस्वारस्यादिति भावः । यथाऽश्नतो—भुञ्जानस्य, तुष्टिः—सन्तोषः, पुष्टिःधातुजा (शरीरजा), क्षुधाध्वंसश्चेत्येष त्रिक एककाले भवति, अनुघासम्—घासं घासम्, एवं प्रतिभजनं प्रेमाऽऽदित्रिके जायमाने, अनुवृत्त्या—नैरन्तर्येणाच्युताङ्घ्रिं भजतो भगवति भक्तिः—परमं प्रेम, यथा प्रह्लादाऽऽदेः, विरक्तिरपि पूर्णा वान्तकर्तुरिव वान्ते, भगवत्प्रबोधः पूर्णा भगवन्मूर्तिस्फूर्तिः स्वरूपाऽवबोधश्च । एते त्रयोऽपि भागवतस्याऽनन्यरतस्य भवन्ति, ततः पूर्णा भगवत्कृपा,

ततः परां शान्तिम्—मोक्षं प्राप्नोतीति। तस्मादत्र द्वारभेदादविकल्प एव। द्वारभेदे प्रयाजाऽवघातयोर्विकल्पाऽदर्शनात्। तथाप्यत्र हरिभक्तिवेदान्तविचारयोरेकप्रयोगविधिपरिगृहीतत्वाऽभावाद् द्वारभेदेऽप्युद्भिद्वलभिद्यागयोरिव विकल्पोऽभ्युपेयत इत्यास्तां विस्तरः।

ननु कथं विकल्पः? तस्याऽष्टदोषदुष्टत्वात्। तथा हि—यदि हरिभक्तिर्ज्ञानसाधनं तर्हि वेदान्तविचारबोधकवाक्यस्य प्राप्तं प्रामाण्यं परित्यक्तं स्यात्, अप्राप्तं चाप्रामाण्यं स्वीक्रियेत। यदा पुनर्वेदान्तविचारः साधनम्, तदा वेदान्तविचारबोधकवाक्यस्य पूर्वत्यक्तं प्रामाण्यं स्वीक्रियेत, पूर्वस्वीकृतं चाप्रामाण्यं परित्यज्येत। प्राप्तपरित्यागोऽप्राप्तस्वीकारः त्यक्तस्वीकारः स्वीकृतपरित्यागश्चेति दोषचतुष्टयं वेदान्तविचारावेदकवाक्ये। तथा हरिभक्त्यावेदकवाक्येऽपि दोषचतुष्टये योजिते सत्यष्टौ दोषाः सम्पद्यन्ते। तस्मान्न विकल्पो युक्तः, किन्तु कथञ्चिदङ्गाङ्गिभावेन समुच्चय एवोचितः; हरिभक्त्याऽन्तःकरणशुद्ध्या वेदान्तविचारेण ज्ञानप्राप्त्या मोक्षमाप्नोतीति चेत्, असाध्वेवैतत्। विकल्पस्याऽष्टदोषदुष्टत्वेऽपि व्रीहियवयोरिव प्रमाणसिद्धस्याऽवश्यमभ्युपेयत्वात्। अन्यथा भक्तेः सर्वाऽधिकारिकत्वबोधकवाक्यानां प्रत्युत तव मतेऽप्रामाण्यम्, हरिभक्तिवेदान्तविचारयोर्निरपेक्षसाधनत्वबाधश्च प्रसज्येत, न चैतद्युक्तम्। तस्माद्विकल्प एव। अपि च समुच्चयोऽङ्गप्रधानभावेन वा, समप्राधान्येन वा। नाऽऽद्यः, एकतरस्याऽङ्गत्वबोधकमानाऽभावात्; नाऽन्त्यः, तुल्याधिकारिकत्वप्रसङ्गादित्यादिकं स्वयं बोध्यमिति संक्षेपः॥ २५॥

सुषुम्णामार्गेण प्राणोत्क्रान्त्या ब्रह्मलोकाऽऽदिगमनमप्यपरिपक्वाऽनुरागाणामेव साधनभक्तिमात्रवतामित्यत्र साधकाऽन्तरमाह—

उत्क्रान्तिवाक्यशेषाच्च ॥ २६ ॥

उत्क्रान्तीति । भगवद्गीतायाम्—

प्रयाणकाले मनसाऽचलेन
भक्त्या युक्तो योगबलेन चैव ।
भ्रुवोर्मध्ये प्राणमावेश्य सम्यक्
स तं परं पुरुषमुपैति दिव्यम् ॥
(८।१०)

इत्युपक्रम्य—

ओमित्येकाऽक्षरं ब्रह्म व्याहरन्मामनुस्मरन् ।
यः प्रयाति त्यजन् देहं स याति परमां गतिम् ॥
(८।१३)

इत्यनेनोक्तायामुत्क्रान्तौ—

अग्निर्ज्योतिरहः शुक्लः षण्मासा उत्तरायणम् ।
तत्र प्रयाता गच्छन्ति ब्रह्म ब्रह्मविदो जनाः ॥
(८।२४)

इति क्रमगत्याभिधायकवाक्यशेषात् । एवं श्रुतावपि—"तयोर्ध्वमायन्नमृतत्वमेति" (कठ० ६।१६) इत्यादिनोक्तायामुत्क्रान्तौ । "यस्त्वेतं त्रिमात्रेणोमित्येतेनैवाक्षरेण परं पुरुषमभिध्यायीत, स तेजसि सूर्ये सपन्नः सामभिरुन्नीयते ब्रह्मलोकम्" इत्यादिवाक्याऽन्तरात्तल्लोकेऽविपक्वानां गमनमित्यनुषङ्गेणाऽर्थः । अयं भावः—परिपक्वाऽनुरागाणामपि तल्लोकगमने तत्र गौणभक्त्यनुष्ठानं न स्यात् । ब्रह्मसाक्षात्कारपरमानुरागाभ्यामेवोक्तदिशा मुक्तिसंभ-

वात् । ननु तच्छ्रवणमर्थवादो लोकसंग्रहाऽर्थं वा तेषामनुष्ठानम्। अन्यथा—

यतो विधिनिषेधेषु मनुष्याणामधिक्रिया ।
अतः पशुपिशाचाद्या धर्माऽधर्मेऽवरा मताः ॥
न खल्वन्यत्र मर्त्यानां भूमौ कर्म विधीयते ।

इत्यादिवाक्यविरोधाऽऽपत्तेरिति चेन्न; तेषामसंभवद्देवाऽऽद्यधिकारज्योतिष्टोमाऽऽदिबहुतरकर्माभावविषयत्वात् । अत एव "तदुपर्यपि बादरायणः संभवात्" (ब्र० सू०–१।३।२६) इत्युपासनाऽधिकारे संभवमेव हेतुमाह स्म द्वैपायनः। एवं चाऽश्वमेधाऽऽदिकरणमेव तेषां लोकसंग्रहाऽर्थं ज्ञानिनामिव भगवदवताराणामिव वेति दिक् ।

अथ प्रसङ्गादुत्क्रान्तिर्गमनमागमनं च विचार्यते । तथाहि—प्रथमं वागिन्द्रियवृत्तिर्मनस्येकीभवति, मनोवृत्तिश्च प्राणेषु, प्राणाश्च विद्याकर्माद्युपाधिके जीवे, जीवस्तु देहबीजभूतेषु भूतसूक्ष्मेषु, ततो हृदयाऽग्रदीप्त्या प्रकाशितद्वारवान् सर्वोऽप्युत्क्रामति, तत्राऽविद्वान् लोकाऽन्तरप्राप्तये चक्षुरादिस्थानेभ्य उत्क्रामति, विद्वांस्तूपासनामाहात्म्याद्भगवताऽनुग्रहीतः सुषुम्णाऽऽख्यया मूर्धन्यनाड्योत्क्रामति, "तयोर्ध्वमायन्नमृतत्वमेति" इति श्रुतेः (कठ० ६।१६)। एवमुत्क्रामत उत्तरमार्गेण गमनम्। स च मार्ग इत्थम्—आदौ अर्चिदेवताम्, ततो दिनदेवताम्, ततः शुक्लपक्षदेवताम्, तत उत्तरायणदेवताम्, ततः संवत्सरदेवताम्, ततो देवलोकम्, ततो वायुम्, वायोरादित्यम्, आदित्याच्चन्द्रमसम्, चन्द्रमसो विद्युतम् , विद्युल्लोकाद्वरुणलोकम् , तत इन्द्रलोकम् , ततः प्रजापतिलोकं प्रतिपद्यते, ततस्तं पुरुषं ब्रह्मलोकादागतोऽमानवः पुरुषो ब्रह्मलोके ब्रह्मपुरुषं प्रापयति । अयमेव मार्गो

देवपथ इत्युच्यते। श्रुतौ देवैरर्चिरादिभिर्गमयितृत्वेनोपलक्षितत्वात्। अयमेव ब्रह्मपथ इत्युच्यते। प्राप्तव्यत्वेन ब्रह्मणोपलक्षितत्वात्। एतेन गच्छन्तः पुनर्नावर्तन्ते पुरुषाः। सोऽयं मार्गः परमेश्वरोपासकानामेव। कर्मिणान्तु दक्षिणो मार्गः पितृयानाऽऽख्य उक्तः श्रुतावेव। स यथा—प्रथमं धूमाऽभिमानिनीं देवताम्, ततो रात्रिदेवताम्, ततः कृष्णपक्षदेवताम्, ततो दक्षिणाऽयनदेवताम्, ततः पितृलोकम्, ततश्चन्द्रम्, ततस्तत्र देवसेवाकर्मणि नियोज्यन्ते। ततः कर्मसु क्षीणेषु मर्त्यलोकमाजिगमिषवः प्रथममाकाशेनैकीभूय, ततो वायुनैकीभूय, वृष्टिद्वारा भुवि समागता अन्नरूपेण पुंसि रेतोरूपेण सन्तो योषिति योनौ सिक्ता योन्यनुसारिणो जायन्ते। ते च नवमे मासि सर्वलक्षणसंपूर्णे गर्भे विविधदुःखान्यनुभवन्तः पूर्वकृतं कर्म स्मरन्ति भगवद्भजनं चाभिलषन्ति, ततो गर्भान्निःसृता वैष्णवेन वायुना स्पृष्टा लुप्तधियो भाव्यनुसारि कर्म पुनः कुर्वन्ति, कर्माऽनुसारेण च पुनर्यथालोकभोगम्। पापिनां तु नाऽयमारोहाऽवरोहक्रमः, किन्तु तृतीयः कष्टतरो मार्गो यमाऽऽलये। तत्र विविधनरकदुःखभोगोत्तरमत्र दन्दशूकाऽऽदिजन्मप्रतिपादनात्। अत्र साधकबाधकोपन्यासस्तु वेदान्तसूत्रे तद्भाष्य इतीह संक्षेपः।

ननु शुभमनुतिष्ठतां शुभा गतिरशुभमनुतिष्ठतां चाऽशुभा गतिर्भवतीत्युक्तम्। तत्र सञ्चितविविधकर्मवतां तज्जन्मनि शुभमनुतिष्ठतामन्तकाले पापकर्मजा वा यद्यशुभा गतिः, तादृग्विधानामेवाऽशुभमनुतिष्ठतां च तादृशी शुभा गतिस्तदोत्क्रान्तिनां का वा गतिर्भवेदिति चेत्, उत्क्रान्त्यव्यवहितकाले मत्यनुगुणैव गतिर्भवितुमर्हतीत्यवेहि। अथ "पापः पापेन कर्मणा पुण्यः

पुण्येन तु०" (बृहदा० ३।२।१३) इत्यादिश्रुतेस्तत्राऽपि तज्जन्मकृतकर्माऽनुसारत एव गतिर्भवेत्, न मत्यनुसारेणेति चेत् "तदेव सक्तः सह कर्मणैति लिङ्गं मनो यत्र निषिक्तमस्य" (बृहदा० ४।४।६) इति श्रुतेरासक्तिविषय एव गतिप्रतिपादकत्वात्। या मतिरन्ते सा गतिरस्येति—

यं यं वाऽपि स्मरन् भावं त्यजत्यन्ते कलेवरम्।
तं तमेवेति कौन्तेय सदा तद्भावभावितः॥
(गीता० ८।६)

इति भगवदुक्तेरपि शरीराऽवसानसमयोद्बुद्धवासनात एव तदानीं फललाभ इति प्रतिपादकत्वात्। भरताऽऽदेस्तथैव फलदर्शनाच्चाऽन्तकालभवमत्यनुगुणैव गतिर्भवेत्, न कर्माऽनुसारिणी। अथाऽस्तु मत्यनुगुणैव गतिरिति। साऽपि मतिः फलोन्मुखकर्माधीनैव, न तु सन्ततस्मरणाऽऽदिलक्षणदृष्टसामग्रीमात्राऽऽयत्ताऽपि। तथाहि—बहुविधकर्मसु यस्य कर्मणो यादृशो विपाको भावी तदनुगुणवासनाया एवोद्गमो भवितुमर्हति। "ततस्तद्विपाकाऽनुगुणानामेवाऽभिव्यक्तिर्वासनानाम्" (योगसूत्र० ४।८) इत्यादिना सूत्रनिकरेण शास्त्रकृद्भिस्तथैव व्यवस्थापनात्।

सदृशं चेष्टते स्वस्याः प्रकृतेर्ज्ञानवानपि।
प्रकृतिं यान्ति भूतानि निग्रहः किं करिष्यति॥
(गी० ३।३३)

इति भगवद्वचनस्य च पुरुषस्वतन्त्रयत्ननिवर्तनेन कर्ममयप्रकृत्यधीनताबोधकत्वादिति चेत् सत्यम्; फलोन्मुखकर्मणैव सन्ततस्मरणाऽऽसक्त्यादिना तन्मात्रहेतुभूतादृष्टलेशेन च वासनोद्गमो भवितुमर्हत्येव। 'तस्मात् सर्वेषु कालेषु मामनुस्मर युध्य च'

(गी० ७।८) इति वचसो 'यं यं वापि स्मरन्' (गी० ८।६) इत्यादिवचसः—

इन्द्रियस्येन्द्रियस्यार्थे रागद्वेषौ व्यवस्थितौ ।
तयोर्न वशमागच्छेत् तौ ह्यस्य परिपन्थिनौ ॥
(गी० ३।३४)

इति वचसश्च कर्माऽनधीनपुरुषप्रयत्नमात्रसाध्यसन्ततस्मरणासक्त्यादिसूचकत्वात् फलोन्मुखकर्मव्यतिरेकेणाऽपि वासनोद्गमाऽभ्युपगमे बाधकाऽभावात् । श्रीरामसंग्रामे फलोन्मुखतादृशकर्माभावेऽपि शरीराऽवसानसमयभवभयजनितरामानुसन्धानेन दृष्टसामग्रीभवेन रक्षसां समुद्धारस्य मानसिद्धत्वात् । यथाकथञ्चिदप्यवसानसमयभगवदनुसन्धानस्य पुरुषार्थहेतुत्वेनावश्याभ्युपेयत्वात् ।

हरिर्हरति पापानि दुष्टचित्तैरपि स्मृतः ।
अनिच्छयाऽपि संस्पृष्टो दहत्येव हि पावकः ॥
(बृ० नार० १।११।१००)

इत्यादिस्मृतेरिति दिक् ।

नन्वेवं तर्हि सन्ततानुष्ठितभगवद्भजनस्यापि पुरुषस्य दृष्टसामग्र्या इव दुष्टप्रारब्धस्यापि दुर्वासनोद्बोधकत्वस्य संभवात् तदुद्बुद्धदुर्वासनामाहात्म्यादनुद्धारप्रसङ्गो दुर्वारः । श्रूयते च भरतस्य राजर्षेः । तथा चावसानसमयभवस्मरणस्य प्रारब्धायत्तत्वसंभवेनेदानीन्तनानामन्तकालभवदुर्वासनोद्गमशङ्कयानाश्वासप्रसङ्गो दुर्वार इति चेत्; बहुतरोपदेशेऽपि सदसदभ्यासाऽप्रवृत्तेरनुपदेशेऽपि तत्र प्रवृत्तेर्विलक्षणे एव केचित् सञ्चितसदसत्कर्मणी वासनाप्रवर्तके भवतः । बहुतरोपदेशेऽपि सदसदभ्या-

साप्रवृत्तिर्बलवत्तरप्रतिबन्धकाद्वा भवतीति निर्णयम् । एवञ्च प्रतिबन्धकाभावे सति प्रवर्तककर्मौन्मुख्याभावेऽपि बहुतरोपदेशादिभेदेन सदसदभ्यासो भवेत् । तथा च प्रतिबन्धकाऽभावे सति सत्पुरुषोपदेशभगवदनुचिन्तनेन सन्ततभवेन बलवत्तरविरुद्धकर्मणामप्यभिभवादवसानकालभवेन सर्वविरुद्धकर्मणां विनाशादवसानकालात् पूर्वं विरुद्धप्रारब्धस्याभिभवेन विरुद्धवासनानुन्मेषादन्तकाले सत्स्मरणं भवेन्न वेति नैवानाश्वासः कार्यः । प्रतिबन्धकाभावे सति जायमानं भगवदनुचिन्तनमसत्सङ्गत्यादिदृष्टसामग्रीसंभवा दुर्वासना तु नाभिभावयति, न वा नाशयति । अत एव भरतस्य विपरीतफलमसत्सङ्गत्यधीनासद्वासनायत्तं श्रूयते । एवञ्च भरतादावसद्वासना सङ्गत्यधीना न प्रारब्धाऽधीनेति प्रारब्धायत्तासद्वासनोद्गममाशङ्क्य नैवानाश्वासो विधेयः । तथा च पुरुषेण भगवच्चिन्तनपरेण दृष्टद्वारा प्राप्यमाणासत्सङ्गतिः परिहार्यैव, असत्सङ्गतिर्बलवत्तरप्रारब्धेन संभाव्यमानाऽपि सत्सङ्गत्यान्ते सदसद्विवेचनेन भगवच्चिन्तनरूपेण दृष्टप्रयत्नबाहुल्ये सति विरुद्धकर्माभिभवात् तत एव सुपरिहारा भवेत् । एवञ्च दृष्टप्रयत्नः सद्विषयोऽवश्यं सत्संगत्या संपादनीय एव, सत्कर्मपक्षपातिसत्वांशस्य प्रबलत्वेन दृष्टविधया संपाद्यमानसत्सङ्गत्यधीनसत्त्वोत्कर्षेण भगवच्चिन्तनाभिवृद्ध्या निरुक्तदिशा सदितरसङ्गत्यादेरपि निवारणसंभवात् ।

अत्राऽयं विभागः । स्वत्वं स्वभावत एवेच्छापूर्वकमनिच्छापूर्वकं वा बलवत्, इच्छाधीनं तु सुतरामेव बलवत् । अनिच्छाऽऽयत्तभगवन्नामाऽऽदिवशेनाऽप्यजामिलादेः समुद्धारदर्शनेनेच्छाधीनसत्त्वे बलोत्कर्षौचित्यात् । दुष्कर्म तु सत्वाधीनभगव-

च्चिन्तनादिना यथायोगमभिभाव्यं नाश्यञ्च। तमोरूपत्वाद् दुष्कर्मणः। यथा हि इच्छाऽनिच्छाभ्यामासक्त्यनासक्तिभ्यां च सुकृतदुष्कृतयोस्तारतम्यमस्त्येव, "यदेव विद्यया करोति श्रद्धयोपनिषदा तदेव वीर्यवत्तरं भवति" (छान्दोग्य० १।१।१०) इति वचनात्। इच्छानिच्छाकृतपापप्रायश्चित्तगौरवलाघवदर्शनाच्च। एवं सुकृतदुष्कृतयोर्दुष्कृतमतिदुर्बलम्, सुकृतं तु प्रबलमेव। दुष्कृतस्यापरोक्षज्ञानमात्रनाश्यतया सुकृतस्यापरोक्षज्ञानासंश्लेषयता "तदधिगम उत्तरपूर्वाघयोरश्लेषविनाशौ तद्दर्शनात्", "इतरस्याप्येवमसंश्लेषपाते तु" (ब्र० सू० ४।१।१३-१४) इत्यादिसूत्रतो बोधनात्। दुष्कृतस्य सद्वासनासमुद्भूतभगवन्नामाऽऽदिस्मरणनाश्यतयाजामिलोपाख्यानादिना सुकृतस्यासद्वासनासंभृतस्मरणाभिभाव्यत्वेन 'न हि कल्याणकृत्कश्चित्' (गी० ६।४०) इत्यादिवचनेन भरतोपाख्यानेन च स्पष्टं बोधनात्। एवं सदसद्वासनयोः समुन्मेषेण सदसदनुस्मरणे सुकृतदुष्कृतकर्मविशेषफलौन्मुख्यायत्ते अत्यभ्यासायत्ते वा दत्तफलकर्मलेशायत्ते वा। तत्र दृष्टसामग्रीतो मुहुर्मुहुरभ्यासेन दृढतरवासनासमर्जने तु सदसद्वा कर्म फलोन्मुखमपि न स्वानुकूलवासनामुन्मेषयेत्। दृढतराभ्यासायत्तवासनायाः फलोन्मुखसदसत्कर्म प्रतिकूलायास्तत्प्रतिबन्धकस्वरूपत्वात्। एवं चायासाधीनासद्वासना चरमसमयगता फलोन्मुखमप्यसत्कर्म यथायोगमभिभावयेन्नाशयेद्वा। तथाहि षड्विधं कर्म—केवलसात्त्विकम्, सात्त्विकराजसम्, सात्त्विकतामसम्, राजसम्, राजसतामसम्, तामसं चेति। तत्र केवलसात्त्विकं भगवद्ध्यानादि निःशेषं सकलपापहरम्। सात्त्विकराजसं हिंसारहितकायक्लेशाऽऽदि सन्ध्यादिकर्म प्रायेण

दुष्कर्मविशेषहरम् । सात्त्विकतामसम्—हिंसासहितनित्यकर्मपापसंवलितं पापविशेषहरम् । राजसम्—हिंसारहितं काम्यम्, कर्मफलभोगानुकूलचित्तनैर्मल्यकरं न पापहरम् । राजसतामसम्—हिंसासमेतं काम्यम्, भोगानुकूलचित्तनैर्मल्याधायकमपि दुःखसंवलितसुखाधायकम् । केवलं तामसम्—शास्त्रनिषेधलक्षणं हिंसारहितं हिंसासमेतं च दुःखैकसाधनं चित्तकालुष्यकरम् । प्रायश्चित्तं च त्रिविधम्—सात्त्विकराजसम्, सात्त्विकतामसं केवलसात्त्विकं चेति । सात्त्विकराजसम्—हिंसारहितं कायक्लेशादिमत्पूर्वोपात्तद्वितीयकर्मण्यन्तर्भूतम् । सात्त्विकतामसम्—हिंसासमेतं पापहरं तृतीये कर्मण्यन्तर्भूतम् । केवलसात्त्विकम्—भगवद्ध्यानादिलक्षणं प्रथमे कर्मण्यन्तर्भूतमिति नातिरेकशङ्का । एवञ्चाऽभ्यासाऽधीना तावदसद्वासना फलोन्मुखमपि सत्कर्माभिभावयितुमिष्टे, न नाशयितुम्; 'सदा तद्भावभावितः' (गी० ८।६) 'न हि कल्याणकृत्कश्चित्' (गी० ६।४०) इत्यादिवचनेनासद्वासनायाः सत्कर्मनाशकत्वाभावावधारणात् । एवं सत्संगतिकरासत्संगतित्यागपरवचनमहिम्ना दृढतराभ्यासजनिते सदसद्वासने अवसानसमयाप्रभवे अपि स्वविरुद्धे कर्मणी फलोन्मुखे अपि यथायोगमभिभावयत एव । तत्रापि भगवदनुचिन्तनजनितवासना त्ववसानसमयभवाप्यसत्कर्म स्वगतदाढ्यंतारतम्येनाभिभावयेन्नाशयेच्च । तथैव प्रमाणनिकरैरवगमात् । एवं यद्यवसानकाले सत्कर्म फलोन्मुखं सत्स्मरणेन संवलितम्, यदि वाऽसत्कर्म फलोन्मुखं सदसत्स्मरणसंवलितं तर्हि तत्र सत्फलमसत्फलं चातिपुष्टमेव । यदा तु कर्मस्मरणे विजातीये तर्हि तत्रासत्स्मरणमवसानकालभवं सत्कर्माऽभिभाव्य स्वीयं फलमेव दद्यात् । अवसानकालभवसत्स्मरणन्तु

भगवदनुचिन्तनदार्ढ्यंभवं यथाकथञ्चिदपि वा जातमसत्कर्म सर्वमपि नाशयत्स्वयं फलदं सत्सत्कर्माप्यपरमभिव्यञ्जयेत्। इन्द्रादिस्मरणं तु फलोन्मुखमप्यसत्कर्माभिभाव्य सत्कर्म व्यञ्जयेत् स्वयं च स्वशक्त्यनुरूपं फलदं भवेत्, न तु तत्राऽसत्कर्म विनाशयेत्। असत्कर्माभिभूतं कालान्तरे फलदं तत्रेति विवेकः। तत्रावसानसमये सदृशादृष्टचिन्तादिजनितं सदसदर्थस्मरणं समयस्वाभाव्यादतिप्रबलं सत्सत्वरं स्वानुरूपमेव फलं प्रयच्छेत्। फलोन्मुखकर्मान्तरं तु स्वयमनष्टं चेत्पश्चादेव फलदमिति तत्त्वम्। अत्र 'सदा तद्भावभावितः' (गी० ८।६) 'तस्मात्सर्वेषु कालेषु' (गी० ८।७) इति निर्देशाद् वासनादार्ढ्यमदृष्टसदृशदर्शनाद्यायत्तस्मरणं मनसि दृढमनुपेक्षाऽऽत्मकं निवारयेदिति सूचितम्। एवं च सद्वासनादार्ढ्यं दृष्टसामग्रीतो यत्नविशेषेण संपादनीयमेव, शुभमात्मन इच्छतो मनुष्ययत्नस्य प्रारब्धापेक्षयाऽपि परिणतौ बलवत्त्वात्। केवलादृष्ट एव भारनिक्षेपानौचित्यात्; 'दैवं पुरुषकारश्च' इति वचनात्। इतरथा कर्मवशादेव फलं भवतीति लौकिकयत्नबोधकशास्त्रस्य पित्रादीनामाचार्याणां च बालकशिक्षणादौ हिताहितविभागेनोपदेशप्रवृत्तेश्चानर्थक्यमेव स्यात्। एवं मनुजस्य प्रवृत्तौ ज्ञानायत्तं स्वातन्त्र्यमपि कर्मानधीनं स्वीकरणीयमेव। इतरथा प्रारब्धायत्तमेव पश्वादिवन्मनुष्यप्रवर्तनमिति पश्वादिवदेवानधिकारात् पापपुण्यास्पर्शप्रसङ्गात्, पापपुण्यप्रायश्चित्तादि शास्त्रं निष्फलमेव स्यादिति सर्वव्यवहारव्याकोपेन वर्णाश्रमादिनिखिलव्यवहारो लुप्येत। तस्मात् पुरुषस्य कर्मानायत्तमपि स्वातन्त्र्यं लेशतो ज्ञानद्वारा परमेश्वरवदङ्गीकरणीयम्। एवं च कर्माधीनप्रवृत्तिसंभवात् पुरुषप्रयत्नेन सत्संगत्या सत्कर्मादि-

प्रवृत्तिरसत्कर्मादेर्निवृत्तिश्च घटत एव। मनुष्यादौ ज्ञानद्वारेश्वरेण स्वातन्त्र्यनियमनात्।

"ईश्वरप्रेरितो गच्छेत् स्वर्गं वा श्वभ्रमेव वा" (वनपर्व ३०।२८), "एष एव साधु कर्म कारयति" इत्यादिवचनं तु साध्वसाधुकर्मद्वारा परमेश्वरायत्तत्वबोधकम्। ज्ञानद्वारा पुरुषाधीनप्रवृत्त्यतिरिक्तविषये कर्मेश्वरप्राधान्यपरं धर्माधर्मप्रायश्चित्तादिपरशास्त्रस्य कर्मेश्वरायत्तत्वपरवचसश्च प्रामाण्येन व्यवस्थाकरणौचित्यात्। तत्र पुरुषस्य ज्ञानद्वारा कर्मान्तरार्थं प्रवृत्तस्य मध्येऽकस्मादिष्टानिष्टप्राप्तिदर्शनेन तत्र कर्मेश्वरप्राधान्यमभ्युपेयम्। एवं च ज्ञानायत्तप्रवृत्त्यंशे पुरुषस्वातन्त्र्यफललाभालाभविपरीतफललाभादिकं सर्वमपि कर्मेश्वरायत्तम्। एवं च ज्ञानद्वारकप्रवृत्त्याश्रयणेन धर्माधर्मप्रायश्चित्तादिशास्त्रप्रामाण्यं सिद्धं भवति। अत्रैवं सति प्रयोजनान्तरार्थं प्रवृत्तस्य पुरुषस्य मध्य आन्तरालिकक्रियाविशेषेण महापुण्यपापलाभपरं प्रमाणं तत्पापप्रायश्चित्तपरं वचनं च पुण्यपापविभागज्ञानद्वारकप्रवृत्तिस्वातन्त्र्याधिकारायत्तम्। अत एव ज्ञानद्वारकप्रवृत्तिस्थल इव न फलाधिक्यम्। अत एव च तत्र पापप्रायश्चित्तमत्र स्वल्पमेवाम्नातं संगतं भवतीति दिक्॥ २६॥

महापातकिनामपि भगवत्परायणतायां कथिता दिव्यमार्गगतिः संभवति न वेति सन्देहे, नेति प्राप्तम्। "यमेवैष वृणुते तेन लभ्यस्तस्यैष आत्मा विवृणुते तनूं स्वाम्" (कठ० १।२।२३) इत्यनेन भक्तानुपक्रम्य—

नाविरतो दुश्चरितान्नाशान्तो न समाहितः।
नाशान्तमानसो वापि प्रज्ञानेनैनमाप्नुयात्॥
(कठ० १।२।२४)

इत्यादिश्रुत्या

श्रुतिस्मृती ममैवाज्ञे यस्ते उल्लङ्घ्य वर्तते ।
आज्ञोच्छेदी मम द्वेषी मद्भक्तोऽपि न मे प्रियः ॥

इत्यादिस्मृत्या च शुद्धात्मनामेव भगवत्परायणानां तथागतिज्ञापनादित्यत आह–

महापातकिनां त्वार्तौ ॥ २७ ॥

महापातकिनां त्विति । तुशब्दः शङ्कानिरासार्थः । महापातकिनाम्–आत्यन्तिकपतनहेत्वगम्यागमनाऽदिपापपराणाम्, आर्तौ अनुतापोऽयत्नसिद्धेः । नामश्रवणकीर्तनादिरूपभक्तौ सत्यां कथिता दिव्यगतिर्भवत्येवेति शेषः ।

कृते पापेऽनुतापो वै यस्य पुंसः प्रजायते ।
प्रायश्चित्तं तु तस्यैकं हरिसंस्मरणं परम् ॥

अपि चेत्सुदुराचारो भजते मामनन्यभाक् ।
साधुरेव स मन्तव्यः सम्यग्व्यवसितो हि सः ॥ ३० ॥

क्षिप्रं भवति धर्माऽऽत्मा शश्वच्छान्ति निगच्छति ।
कौन्तेय प्रतिजानीहि न मे भक्तः प्रणश्यति ॥ ३१ ॥
(भ० गी० ९।३०-३१)

महापातकयुक्तोऽपि ध्यायन्निमिषमच्युतम् ।
भूयस्तपस्वी भवति पङ्क्तिपावनपावनः ॥

इत्यादिप्रमाणादिति भावः । 'नाविरतः' (कठ० १।२।२४) इति वाक्यं त्वननुतप्तविषयं बोध्यम् । अनुतापस्तु पुनः पुनः पापचिकीर्षाप्रतिबन्धको ग्राह्यः ।

नैकान्तिकं तद्विहितेऽपि निष्कृते
मनः पुनर्धावति चेदसत्पथे ।

(भाग० ६।२।१२)

इत्यादिना तथाऽवगमादित्यास्तां विस्तरः । पातकिनामिति विहाय महापातकिनामिति कथनन्तु उपपातकिनामनुतप्तानां कैमुतिकन्यायेन तद्गतिलाभाय । भगवतो बादरायणस्यापीद-मेवाभिप्रेतम्, "उपपूर्वमपि त्वेके भावमशनवत्तदुक्तम्" (ब्र० सू० ३।४।४२) इति सूत्रेण परमते स्वधर्मप्रव्रज्याऽऽदि-च्युतस्य यतिप्रभृतेरुपपातकित्वमङ्गीकृत्य प्रायश्चित्तमिच्छता स्वमते महापातकित्वेऽपि भजनाऽऽदिना शुद्धिज्ञापनात् । अन्यथो-दाहृतशुद्धिवाक्यविरोधः स्यादित्यास्तां विस्तरः । केचित्तु आर्तिनिमित्तप्रायश्चित्तस्थानीय एव कीर्तनादावेवाधिकारो महापातकिनां न ज्ञानादावित्यर्थं इत्याहुः ॥ २७ ॥

किमार्तिभक्तिमात्रेणैव सा गतिः, उत परभक्तौ सत्यामेव सेति सन्देहे—आर्तिभक्त्यैव सेति प्राप्तम् । 'ध्यायन् कृते यजन् यज्ञैस्त्रेतायां द्वापरेऽर्चयन् । यदाप्नोति तदाप्नोति' (विष्णु० ६।२।१७) इत्यादिना ध्यानाऽऽदिलभ्यफलस्य नामकीर्तनादितोऽपि प्रति-पादनादिति प्राप्त आह—

सैकान्तभावे गीताऽर्थप्रत्यभिज्ञानात् ॥ २८ ॥

सेति । सा—दिव्यगतिः, एकान्तभावे—एकान्तभक्तौ परभक्तौ सत्यामेव संभवति, कुतः ? गीताऽर्थप्रत्यभिज्ञानात्—गीताऽर्थस्य "ब्रह्मसंस्थोऽमृतत्वमेति" (छान्दोग्य० २।२३।१) इत्यादिना कथिताऽर्थस्य गीतायाम्—

तद्‌बुद्धयस्तदात्मानस्तन्निष्ठास्तत्परायणाः ।
गच्छन्त्यपुनरावृत्तिं ज्ञाननिर्धूतकल्मषाः ॥
(गी० ५।१७)

इत्यादिना प्रत्यभिज्ञानात् । तद्वदेव ज्ञानपूर्वकप्रेम्णामृतत्व-कथनात् । यथा चैतत्तथोक्तमधस्तात् । 'सैकान्तभावः' इति प्रथमान्तपाठे तु ननु ज्ञानेनैव सकलपापनिवृत्तौ श्रुतिस्मृतिसूत्र-सिद्धायामार्तेरपेक्षायां मानाभावात् कथमार्ताविव्युक्तम् ? तत्राऽऽह—सैकान्तेति । भवेदिति शेषः । अयमर्थः—मुमुक्षुर्ज्ञान्येव न भवेत् सैकान्तभावोऽपि "आप्रायणात् तत्रापि हि दृष्टम्" (ब्र० सू० ४।१।१२) इति सूचितेनैकान्तेनाव्यभिचरितेन भावेनापि सहितो भवेत्। कुतः? गीतार्थप्रत्यभिज्ञानात्। गीतार्थस्यैवं-विधस्य 'सर्वधर्मान् परित्यज्य' (भ० गी० १८।६६) इत्युक्तस्य प्रत्यभिज्ञानश्रवणात् । यथा नारायणीये—

महोपनिषदो वेदास्ते विप्राः सम्यगास्थिताः ।
यजन्ति विधिमास्थाय ये चापि यतिधर्मिणः ॥
ततो विशिष्टं जानामि गतिमेकान्तिनां नृणाम् ।
केनैष धर्मः कथितो देवेन ऋषिणाऽथवा ॥

इति प्रश्ने प्रत्युत्तरम्—

समुपोढेष्वनीकेषु कुरुपाण्डवसेनयोः ।
अर्जुने विमनस्के वै गीता भगवता स्वयम् ॥ इति ।
(शान्ति० ३४८।६-८)

तस्माद्भक्तेरेव मुख्यत्वात्तदपेक्षाया आवश्यकत्वम् । तत्राऽपि प्राप्ताप्राप्तविवेकरीत्या प्रेम्णः फलत्वान्नामग्रहादिलक्षणार्तभक्तेरेव तत्रोपयोग इत्यभिप्रेत्यात्र तथोक्तमिति संक्षेपः ।

परे तु एकान्तभाव इति पूर्वोक्त एकान्तभावः, सा पराभक्तिरेव; कुतः ? गीतार्थस्य प्रत्यभिज्ञानात्। एकान्तिनां विशिष्टगतिरूपो धर्मः केन कथित इति प्रश्ने गीतायां भगवता कथितमिति कथनात्, एकान्तिनां भक्तानां दिव्या गतिरित्यर्थोऽवगतः, गीतायां परभक्तेरेव बहुधोक्तेः। तस्माद्भक्तिरेव एकान्तभाव इति भाव इत्यर्थमाहुः ॥ २८ ॥

अतस्तामुत्पाद्यैव सर्वेषामुपायानां श्रैष्ठ्यम्, अन्यथा व्यर्थत्वमेवेत्याशयवानाह—

परां कृत्वैव सर्वेषां तथा ह्याह ॥ २९ ॥

परामिति। सर्वेषां—ज्ञानान्तानां धर्माणाम्, परां कृत्वैव परमेश्वरे परानुरक्तिरूपां परां भक्तिमुत्पाद्यैव, श्रैष्ठ्यं नान्यथेति शेषः। कुतः ? हि-यस्मात्, तथाऽऽह भगवान् बादरायणः—

धर्मः स्वनुष्ठितः पुंसां विष्वक्सेनकथासु यः।
नोत्पादयेद्यदि रतिं श्रम एव हि केवलम् ॥
(भाग० १।२।८)

दानव्रततपोहोमजपस्वाध्यायसंयमैः ।
श्रेयोभिर्विविधैश्चान्यैः कृष्णे भक्तिर्हि साध्यते ॥
(भाग० १२।४७।२४)

न ह्यतोऽन्यः शिवः पन्था विशतः संसृताविह।
वासुदेवे भगवति भक्तियोगो यतो भवेत् ॥ इत्यादि।
(भाग० २।२।३३)

केचित्तु परां कृत्वैव मोक्ष उपयोग इत्यर्थमाहुः, तन्न सम्यक्; फलभक्त्यवस्थायां मोक्षाकाङ्क्षाविरहात्। उपपन्नश्च

प्रेमभक्तानां मोक्षाकाङ्क्षाविरहः, भगवत्येवासक्तत्वात् । एतावती कुतो भगवत्यासक्तिरिति चेत्, परमानन्दरूपत्वादिति कलय । ननु यद्यपि निर्गुणस्येव सगुणस्याऽपि परमानन्दरूपता प्राङ्निरूपिता, तथापि सा माययावृतेति कथं स्फुरेत् ? अस्फुरणे च कथं भगवत्यासक्तिरिति चेत्, शृणु—श्रवणकीर्तनादिभक्तिपरिपाके च भगवदनुग्रहतस्तत्त्वबोधादावरणनाशस्तथेति । कथमन्यथा भगवन्निष्ठस्य प्रेमभक्तस्य मोक्षेऽप्याकाङ्क्षाविरहः—

न पारमेष्ठ्यं न महेन्द्रधिष्ण्यं
न सार्वभौमं न रसाऽऽधिपत्यम् ।
न योगसिद्धीरपुनर्भवं वा
मय्यर्पितात्मेच्छति मद्विनाऽन्यत् ॥
(भाग० ११।१४।१४)

इत्यादिना श्रूयमाणः संपद्येत । ननु तथाऽपि प्रत्यगभेदांशावरणशक्तिनाशः कथम् ? रागरूपप्रेमभक्तेर्मूर्तिपरिच्छेदस्फूर्तेश्च सत्त्वादिति चेत्, भगवदनुग्रहतस्तस्या अपि नाशसंभवादित्यवेहि । 'न वासुदेवभक्तानामशुभं विद्यते क्वचित्' इति स्मृतेः । अत एव ज्ञानमार्गो भक्तिमार्गश्चेति मोक्षमार्गद्वयम् । अत एव च होमप्रकरणे अनुदितहोमनिन्दावद् गीतासु भक्तिप्रस्तावे निर्गुणनिष्ठा निन्द्यते ।

मय्यावेश्य मनो ये मां नित्ययुक्ता उपासते ।
श्रद्धया परयोपेतास्ते मे युक्ततमा मताः ॥ २ ॥
ये त्वक्षरमनिर्देश्यमव्यक्तं पर्युपासते ।
सर्वत्रगमचिन्त्यं च कूटस्थमचलं ध्रुवम् ॥ ३ ॥
सन्नियम्येन्द्रियग्रामं सर्वत्र समबुद्धयः ।
ते प्राप्नुवन्ति मामेव सर्वभूतहिते रताः ॥ ४ ॥

क्लेशोऽधिकतरस्तेषामव्यक्तासक्तचेतसाम् ।
अव्यक्ता हि गतिर्दुःखं देहवद्भिरवाप्यते ॥ ५ ॥ इति।
(गी० १२ अध्याये)

ननु कथं मार्गद्वयमेव—

साङ्ख्येन सर्वभावानां प्रतिलोमाऽनुलोमतः ।
भवाप्ययावनुध्यायेन्मनो यावत्प्रसीदति ॥ २२ ॥
निर्विण्णस्य विरक्तस्य पुरुषस्योक्तवेदिनः ।
मनस्त्यज्यति दौरात्म्यं चिन्तितस्याऽनुचिन्तया ॥ २३ ॥
यमादिभिर्योगपथैरान्वीक्षिक्या च विद्यया ।
ममाऽर्चोपासनाभिर्वा नान्यैर्योग्यं स्मरेन्मनः ॥ २४ ॥
(भाग० ११।२०।२२-२४)

इत्यादौ सर्वत्र रतत्वस्य वैमुख्यपरिहाराय यथाकथञ्चित् साम्मुख्यमात्रं कर्तव्यत्वेनावगम्यते । तच्च त्रिधा—निर्विशेषरूपस्य तदीयब्रह्माख्याविर्भावस्य ज्ञानरूपम्, सविशेषरूपस्य च तदीयभगवदाद्याख्याविर्भावस्य भक्तिरूपमिति द्वयम्, तृतीयश्च तस्य द्वयस्यैव द्वारं कर्मार्पणरूपमिति । तदेतत्त्रयं पुरुषयोग्यताभेदेन व्यवस्थापयितुं सामान्यतो ज्ञानकर्मभक्तीनामेवोपायत्वम्, नान्येषामित्यनुवदति भगवानेकादशे—

योगास्त्रयो मया प्रोक्ता नृणां श्रेयो विधित्सया ।
ज्ञानं कर्म च भक्तिश्च नोपायोऽन्योऽस्ति कर्हिचित् ॥
(भाग० ११।२०।६)

मन एकत्र संयुज्याज्जितश्वासो जितासनः ।
वैराग्याभ्यासयोगेन ध्रियमाणमतन्द्रितः ॥
(भाग० ११।७।११)

इति चतुर्थोऽपि मार्गोऽष्टाङ्गयोगाख्योऽवगम्यत इति चेत्, सत्यम्; तथापि कर्मयोगमार्गयोरन्तःकरणप्रसादद्वारा ज्ञानभक्त्योरेवोपयोगाज्ज्ञानं भक्तिश्चेति द्वावेव मोक्षमार्गौ, विभिन्नस्वरूपफलसाधनाधिकारिकत्वात्। तथाहि—बुद्ध्यवान्तरजातिर्ज्ञानम्। रागाऽवान्तरजातिर्भक्तिः; सकलानर्थमूलाज्ञाननिवृत्तिर्ज्ञानफलम्; ब्रह्मावाप्तिर्भक्तिफलम्; तत्त्वमस्यादिवाक्यं ज्ञानसाधनम्; भगवद्गुणगरिमग्रथनरूपग्रन्थश्रवणादिकं भक्तिसाधनम्। ब्रह्मविद्यायां साधनचतुष्टयसम्पन्नस्त्यक्तसंसारोऽधिकारी, भक्तावतादृशोऽपीति प्रागेवोक्तम्। तस्मात् सिद्धं मोक्षे मार्गद्वयमेवेत्यस्माकीनः पन्थाः। यत्तु—द्रवीभावानपेक्षाद्वितीयात्ममात्रगोचरा निर्विकल्पकमनोवृत्तिर्ब्रह्मविद्या ज्ञानम्, द्रवीभावपूर्विका मनसो भगवदाकारता सविकल्पकवृत्तिरूपा भक्तिः; तथा च भक्तिज्ञानावान्तरजातिरेव। तत्र ज्ञानफलं मोक्षः, भक्तिफलं तु विचारयोगयोरिव ज्ञानमेव। इयांस्तु विशेषः। विचारे साधनचतुष्टयसम्पन्न एवाधिकारी, भक्तियोगयोस्तु सर्वोऽपि जन इति। अत एव गीतायाम्—

अमानित्वमदम्भित्वमहिंसा क्षान्तिरार्जवम्।
आचार्योपासनं शौचं स्थैर्यमात्मविनिग्रहः ॥ ७ ॥

इन्द्रियार्थेषु वैराग्यमनहङ्कार एव च।
जन्ममृत्युजराव्याधिदुःखदोषानुदर्शनम् ॥ ८ ॥

असक्तिरनभिष्वङ्गः पुत्रदारगृहादिषु।
नित्यं च समचित्तत्वमिष्टानिष्टोपपत्तिषु ॥ ९ ॥

मयि चाऽनन्ययोगेन भक्तिरव्यभिचारिणी।
विविक्तदेशसेवित्वमरतिर्जनसंसदि ॥ १० ॥

अध्यात्मज्ञाननित्यत्वं तत्त्वज्ञानार्थदर्शनम् ।
एतज्ज्ञानमिति प्रोक्तमज्ञानं यदतोऽन्यथा ॥ ११ ॥
(गी० १३।७।११)

इत्यादिना भक्तियोगादिमार्गं ज्ञानमार्गेऽन्तर्भावयता भगवता—
"मद्भक्त एतद्विज्ञाय मद्भावायोपपद्यते ।" (गी० १३।१८)

इत्युत्तरत्र ज्ञानस्यैव मोक्षसाधनत्वमुक्तम् । तस्माद् ज्ञानयोग एवैको मोक्षमार्ग इति । तच्चिन्त्यम् । साध्यसाधनभक्तिभेदेन व्यवस्थाया उपपादितत्वात् फलभक्ते रागावान्तरजातित्वव्यवस्थापनादस्मदुक्तेरेव प्रामाणिकत्वात् । सूत्रकृन्मते तु भक्तियोग एवैको मोक्षमार्गः, ज्ञानं तु भक्तिसाधनमेव, न मार्गान्तरम्; अङ्गाङ्गिनोर्विभिन्नमार्गत्वासम्भवादिति । वस्तुतः फलभक्तिर्न साधनम्, किन्तु स्वतः पुमर्थरूपैव मोक्षमपि तृणीकरोति । तदुक्तं तन्त्रे—

हरिभक्तेर्महादेव्याः सर्वा मुक्त्यादिसिद्धयः ।
भुक्तयश्चाद्भुतास्तस्याश्चेष्रिकावदनुव्रताः ॥ इति ।

अत एवाहुर्वृद्धा अपि—

मनागेव प्ररूढायां हृदये भगवद्रतौ ।
पुरुषार्थास्तु चत्वारस्तृणायन्ते समन्ततः ॥ इति ।
(भक्तिरसामृत० १।१।१७-१८)

अत एवात्र तस्याः परत्वमुपवर्णितम् । तत्राङ्गानि कथितानि निबन्धे यथा—

गुरुपादाश्रयस्तस्मादीशदीक्षादिशिक्षणम् ।
विश्रम्भेण गुरोः सेवा साधुवर्त्मानुवर्तनम् ॥ २४ ॥
सद्धर्मपृच्छा भोगादित्यागो भगवतः कृते ।
तत्तत्क्षेत्रे निवासोऽथ गङ्गादेरपि सन्निधौ ॥ २५ ॥

व्यवहारेषु सर्वेषु यावदर्थानुवर्तनम् । २६ ॥
एकादश्यादिसन्मानो देवव्रतनिषेवणम् ॥तु. २६ख.॥
सङ्गत्यागो विदुरेण भगवद्विमुखैर्जनैः ॥ २७ ॥
बहुग्रन्थमहारम्भशिष्यादीनामसङ्ग्रहः ॥ तु. २८ ॥
अन्यदेवानवज्ञा च भूतानुद्वेगदायिता । तु. २९ ख.॥
ईशतद्भक्तविद्वेषविनिन्दाद्यसहिष्णुता ॥ ३० ख ॥
धृतिस्तद्देवचिह्नानां तदीयानां च सेवनम् । तु. ३२. ख. ॥
व्यवहारेऽप्यकार्पण्यं शोकाद्यवशवर्तिता ॥ २९ क. ॥
अपराधवर्जनं तद्भक्तनामश्रवणादिकम् । ३० क. तु० ॥
सर्वथा शरणाऽऽपत्तिरङ्गान्येतानि पालयेत् ॥ तु. ३७ क. ॥
(भक्तिरसामृत० १।२।लहरी)

(१) तत्र गुरुपादाश्रयो यथा[1]—

तस्माद् गुरुं प्रपद्येत जिज्ञासुः श्रेय उत्तमम् ।
शाब्दे परे च निष्णातं ब्रह्मण्युपशमाऽऽश्रतम् ॥
(भाग० ११।३।२१)

(२) ईशदीक्षाशिक्षणं यथा—

तत्र भागवतान् धर्माञ्छिक्षेद् गुर्वात्मदैवतः ।
अमाययाऽनुवृत्त्या यैस्तुष्येदात्मात्मदो हरिः ॥
(भाग० ११।३।२२)

(३) विश्रम्भेण गुरोः सेवा यथा—

आचार्यं मां विजानीयान्नावमन्येत कर्हिचित् ।
न मर्त्यबुद्ध्याऽसूयेत सर्वदेवमयो गुरुः ॥
(भाग० १७।१७।२७)

---

१. प्रकरणमिदं भक्तिरसामृतग्रन्थमनुकरोतीति दृश्यते ।

(४) साधुवर्त्मानुवर्तनं यथा स्कान्दे—

स मृग्यः श्रेयसां हेतुः पन्थाः सन्तापवर्जितः ।
अनवाप्तश्रमं पूर्वे येन सन्तः प्रतस्थिरे ॥

(५) सद्धर्मपृच्छा यथा नारदीये—

अचिरादेव सर्वार्थः सिध्यत्येषामभीप्सितः ।
सद्धर्मस्यावबोधाय येषां निर्बन्धिनी मतिः ॥

(६) भगवतः कृते भोगादित्यागो यथा पाद्मे—

हरिमुद्दिश्य भोग्यानि काले त्यक्तवतस्तव ।
विष्णुलोकस्थिता सम्पदलोला सा प्रतीयते ॥

(७) तत्तत्क्षेत्रनिवासो यथा—

वैष्णवेष्वथ क्षेत्रेषु द्वारकामथुरादिषु ।
निवासो हरिभक्तानां हरिसायुज्यदो मतः ॥ इति ।

तथा कौर्म्ये—

वसेदामरणं विप्रो वाराणस्यां समाहितः ।
सोऽपीश्वरप्रसादेन याति तत्परमं पदम् ॥ इति ।

गङ्गानिवासो यथा महाभारते—

यत्र गङ्गा महाभाग स देशस्तत्तपोवनम् ।
सिद्धक्षेत्रं च तज्ज्ञेयं गङ्गातीरसमाश्रितम् ॥
(वनपर्व ८५।९७)

तत्तीर्थसेवाधर्मात्मा मोक्षं प्राप्नोति मानवः ।
मरणे स्मरणं विष्णोर्यद्यप्यत्यन्तदुर्लभम् ॥
तदप्यल्पेन कालेन गङ्गां संसेव्य लभ्यते ॥ इति ।

(८) यावदर्थानुवर्तनं भगवद्गीतायाम्—

शारीरं केवलं कर्म कुर्वन्नाप्नोति किल्बिषम् ।
(४।२१)

(९) एकादश्यादिसन्मानो यथा स्कान्दे—

सर्वंपापक्षयकरं सर्वंपुण्यविवर्धनम् ।
गोविन्दस्मृतिदं नृणां यदेकादश्युपोषणम् ॥

एवं शैवानां शिवरात्रिव्रतादिकमपि यथा लैङ्गे—

शिवरात्रिव्रतं तत्र शिवप्रीतिकरं स्मृतम् ।
यत्कृत्वा पापराशिभ्यो मुक्त्वा शिवपुरं व्रजेत् ॥ इति ।

(१०) देवव्रतनिषेवणं यथा श्रुतौ—

"शान्ता दान्ता उपरतास्तितिक्षवः समाहिता आत्मरतयः"
(तु० बृहदा० १४।४।२३)

इत्युपक्रम्य "तस्माद्देवानां व्रतमाचरन्नोङ्कारे परे ब्रह्मणि पर्यवसितो भवेत्" इति ।

(११) भगवद्विमुखसङ्गत्यागो यथा कात्यायनसंहितायाम्—

वरं हुतवहज्वालापञ्जरान्तव्यवस्थितिः ।
न शौरिचित्तविमुखजनसंवादवैशसम् ॥

तथा लैङ्गे—

ईशभक्तिविहीना ये वञ्चयन्त्यखिलाञ्जनान् ।
वर्जयेत् तान् प्रयत्नेन शिवसेवापरो मुनिः ॥

(१२) शिष्यग्रन्थाद्यसंग्रहो यथा सप्तमे—

शिष्यान्नैवानुबध्नीयाद्ग्रन्थान्नैवाभ्यसेद् बहून् ।
न व्याख्यामुपयुञ्जीत नारम्भानारभेत् क्वचित् ॥
(भाग ७।१३।८)

(१३) अन्यदेवानवज्ञा यथा पाद्मे—

हरिरेव सदा ध्येयः सर्वदेवेश्वरेश्वरः ।
इतरे ब्रह्मरुद्राद्या नावज्ञेयाः कदाचन ॥ इति ।

(१४) भूतानुद्वेगदायिता यथा भारते—

पितेव पुत्रं करुणो नोद्वेजयति यो जनम् ।
विशुद्धस्य हृषीकेशस्तूर्णं तस्य प्रसीदति ॥ इति ।

(१५) ईशतद्भक्तविनिन्दाद्यसहिष्णुता यथा दशमे—

निन्दां भगवतः शृण्वंस्तत्परस्य जनस्य वा ।
ततो नाऽपैति यः सोऽपि यात्यधः सुकृताच्च्युतः ॥ इति ।
(भाग० १०।७४।४०)

(१६) धृतिस्तद्देवचिह्नानां यथा पाद्मे—

ये कण्ठलग्नतुलसीनलिनाक्षमाला
ये बाहुमूलपरिचिह्नितशङ्खचक्राः ।
ये वा ललाटफलके लसदूर्ध्वपुण्ड्रा-
स्ते वैष्णवा भवनमाशु पवित्रयन्ति ॥

यथा वा लैङ्गे—

रुद्राक्षधारिणो ये च भस्मोद्धूलितविग्रहाः ।
नमः शिवायशब्दाश्च ते जगत्पावनाः स्मृताः ॥ इति ।

(१७) तदीयानां सेवनं यथैकादशे—

सात्त्विकान्येव सेवेत पुमान् सत्त्वविवृद्धये । इति ।
(११।१३।६)

सात्त्विकानि भगवत्प्रतिपादकशास्त्राचारादीनि ।

(१८) व्यवहारेऽप्यकार्पण्यं यथा पाद्मे—

अलभ्ये वा विनष्टे वा भक्ष्याच्छादनसाधने ।
अविक्लवमतिर्भूत्वा हरिमेव धिया स्मरेत् ॥

(१९) शोकाद्यवशवर्तिता यथा तत्रैव—

शोकामर्षाऽदिभिर्भावैराक्रान्तं यस्य मानसम् ।
कथं तत्र मुकुन्दस्य स्फूर्तिसंभावना भवेत् ॥

(२०) अपराधवर्जनं यथा वाराहे—

ममार्चनापराधा ये कीर्त्यन्ते बहुधेच्छया ।
वैष्णवेन सदा ते तु वर्जनीयाः प्रयत्नतः ॥ इति ।
तन्नामश्रवणादिकं व्याख्यातं प्राक् ।

(२१) सर्वथा शरणापत्तिर्यथा भगवद्गीतायाम्—

सर्वधर्मान् परित्यज्य मामेकं शरणं व्रज ।
अहं त्वा सर्वपापेभ्यो मोक्षयिष्यामि मा शुचः ॥ इति ।
(१८।६६)

अस्याऽर्थः—सर्वेषां वर्णानामाश्रमाणां देहेन्द्रियमनोबुद्धीनां च, धर्मान्—ब्राह्मणत्वाद्यभ्यासनिबन्धनानग्निहोत्रादीन् सुखदुःखाऽऽदींश्च, परित्यज्य—निर्वेदाद्युपायैस्त्यक्त्वा, मां सर्वेश्वरं सर्वशक्ति सर्वनियन्तारं सोपाधि निरुपाधि वा परमात्मानमखण्डैकरसमानन्दघनम्, एकम्—केवलम्, शरणम्—शृणाति हिनस्त्यविद्याऽऽदीन् क्लेशानिति शरणमाश्रयः परायणम्, व्रज—प्राप्नुहि मदेकाऽऽश्रितो भवेत्यर्थः। तदेकाऽऽश्रितत्वम्—तल्लीनत्वं तत्प्रणिधानं वा। अथवा—सर्वान् धर्मान् श्रौतस्मार्तान्, परित्यज्य—शरणत्वेन रक्षकत्वेनाऽऽदृत्य, माम्-भगवन्तम्, एकम्-रक्षितारं जानीहि इत्यर्थः। कर्माणि विधिसिद्ध्यर्थं कार्याणि, विश्वासो भगवति कार्य इति भावः। अथवा—सर्वान् धर्मान् "त्रयो धर्मस्कन्धाः" (छान्दोग्य० २।२३।१) इत्याद्युक्तान् यज्ञाध्ययनब्रह्मचर्यतपआदीन्—परित्यज्य विधितस्त्यक्त्वा, माम्—पुरुषोत्तमं क्षराक्षराऽतीतम्, एकम्-

केवलम्, शरणं-सर्वाऽधिष्ठानं जानीहि इत्यर्थः। संन्यासपूर्वकस्यैव तादृशतज्ज्ञानस्य श्रुतिषु पुमर्थहेतुत्वलाभात्। यथा—

वेदान्तविज्ञानसुनिश्चितार्थाः
संन्यासयोगाद्यतयः शुद्धसत्वाः।
ते ब्रह्मलोकेषु परान्तकाले
परामृतात् परिमुच्यन्ति सर्वे ॥
(मुण्डक० ३।२।६) इति।

अथवा सर्वान् धर्मान्-वैधान् प्रवृत्तिनिवृत्तिलक्षणान्, परित्यज्यगोप्यादिवत्स्वरूपतस्त्यक्त्वा, मां-परमप्रेमास्पदं लीलानन्तविग्रहम्, एकं-'ब्रह्मणो हि प्रतिष्ठाऽहं' (गीता १४।२७) इतिन्यायेन मुख्यं, शरणं-आश्रयं, व्रज प्राप्नुहि। शरीरेण बुद्ध्या प्रेम्णा वा। तत्र शरीरेण प्राप्तिस्तत्समर्पणतः, बुद्ध्या तत्स्वरूपगुणचिन्तनतः, प्रेम्णा वर्णितयासदानन्दलब्ध्येति विवेकः। विधिमतिक्रम्याप्येवं तत्परायणानां भगवदनुग्रहतः कृतार्थता गोपीप्रभृतीनां पुराणेषु स्पष्टैव। "पृथगात्मानं प्रेरितारं च मत्वा जुष्टस्ततस्तेनामृतत्वमेति" (श्वेताश्व० १।६)। "लीना ब्रह्मणि तत्परा योनिमुक्ताः" (श्वेताश्व० ११।७) श्रुतिभिश्च ज्ञापितेति संक्षेपः। अथवा मयीत्यर्थे मामिति द्वितीयाऽऽदरणान्मयि शरणं याहीत्यर्थः। शरणमित्यस्य क्रियाविशेषणत्वाच्छरणं यथा स्यात्तथा मां व्रजेति वार्थः। शरणाभिन्नां प्रपत्तिं कुर्विति यावत्। 'शरणं त्वात्मनिक्षेपकार्पण्यम्' इति वचनादात्मनिवेदनं दीनता च। आत्मशब्देन चात्र जीवः स्थूलसूक्ष्मशरीरं वा। तत्र जीवस्य समर्पणं जीवत्वपरित्यागेन तस्मिन्नेकीकरणम्। "तमेतमात्मानमोमिति ब्रह्मणैकीकृत्य ब्रह्म चात्मनोमित्येकीकृत्य

तदेकमजरममृतमोमित्यनुभूय तस्मिन्निदं सर्वं त्रिशरीरमारोप्य तन्मयं हि तदेवेति संहरेदोम्" (नृसिंहोत्तर० १।२) इत्यादि-श्रुत्या तस्य प्रणिधानत्वेनोक्तत्वात्। शरीरसमर्पणं गवादिसमर्पणस्वत्स्वसत्तात्यागो व्याख्यातः प्रागेव। दीनता कदाचित्कृपया तत्सन्निधौ तन्मूर्तिसन्निधौ वा स्वस्यानुग्राह्यत्वज्ञापनमित्यास्तां विस्तरः।

अत्रोपदेशस्य सर्वसाधारणत्वाद् व्रजेदिति वक्तव्ये व्रजेति कथनमर्जुनस्योपस्थितत्वनिबन्धनम्। अत्र च 'अन्नं भुक्त्वैव तृप्यति' इत्यत्रेव हेतुत्वं क्त्वाप्रत्ययार्थः। सर्वधर्मपरित्यागेन शरणं व्रजेत्यर्थः। तत्र सगुणशरणतोक्ता नारसिंहे—

त्वां प्रपन्नोऽस्मि शरणं देवदेव जनार्दन।
इति यः शरणं प्राप्तस्तं क्लेशादुद्धराम्यहम्॥ इति।

व्याख्याता निबन्धे—

तवाऽस्मीति वदन् वाचा तथैव मनसा विदन्।
तत्स्थानमाश्रितस्तन्वा मोदते शरणागतः॥ इति।
(हरिभक्तिविलासभक्तिरसामृत० १।२ लहरी धृत)

निर्गुणशरणता तु प्रपञ्चाभावेन स्वस्मिस्तज्ज्ञानतस्तद्रतिशालिता। यथोक्तम्—

अनात्माऽदर्शनेनैव परात्मानमुपास्महे।

इति प्रागेवोक्तप्रायमिदम्। एवंभूतभगवच्छरणस्य सर्वाऽनर्थनिदाननिवृत्तिर्वर्णाश्रमादिधर्मपरित्यागेऽपि भगवत्सङ्कल्पमात्रतो भवतीत्याशयेनाह—अहन्त्वेति। अहं—परमेश्वरः, त्वा त्वां, सर्वपापेभ्यः—सञ्चितक्रियमाणेभ्योऽवध्यवधाऽऽदिभ्योऽपि मोक्षयिष्यामि, मा शुच—शोकं मा कार्षीरित्यर्थः। इतरप्रायश्चि-

त्तेभ्यो मत्सङ्कल्पस्याधिकत्वादिति भावः । अत्र सर्वपदस्वारस्या-त्पापसाधनत्वेन पापरूपाया अविद्याया निःशेषतो निवृत्तिर-पीशसङ्कल्पमात्रतो भवतीति लब्धम् ।

तदुक्तं श्वेताश्वेतरोपनिषदि—

तस्याऽभिध्यायाद्योजनात्तत्वभावा-
द्भूयश्चान्ते विश्वमायानिवृत्तिः ॥ (१।१०) इति ।

अत्राऽभिध्यानात्—निदिध्यासनात्, तत्पूर्वकाद्योजनात्—एकीक-रणरूपाभेदज्ञानात्, तत्पूर्वकात्तत्वभावात्-परभक्तितः, अन्ते—वसाने, भूयश्च—पुनरपि, भगवत्कृपातो वैजात्यशालितत्वभावा-द्विश्वमाययोर्निवृत्तिरित्यर्थः । तन्निवृत्तिश्च तद्विरोधिरूपस्तादृश-तत्वभाव एव । नाशस्य नाशकरूपताया उक्तत्वात् । इत्थं च—वैजा-त्यशालितत्वभावोपलक्षितस्वाभिन्नभगवत्स्वरूपावाप्तिलक्षणमुक्ति प्रति स्वरूपावगाहिज्ञानपूर्वकतत्वभावस्य हेतुत्वे पर्यवसानाद् ज्ञानकैवल्ये कैवल्यरूपत्वं च भक्तौ लब्धम् । अत एव "ज्ञात्वा देवं सर्वपाशापहानिः" (श्वेताश्व० १।१०) इति प्रमाणाज्ज्ञाता-ज्ञातपापादिपाशनिवर्तकज्ञानादप्याधिक्यमभिप्रेत्य भक्त्यैवात्रोप-संहारः कृत इत्यास्तां विस्तरः ॥ ६ ॥

इति श्रीनारायणतीर्थविरचितायां भक्तिचन्द्रिकायां
द्वितीयाध्यायस्य द्वितीयाह्निकम् ॥
समाप्तश्च द्वितीयोऽध्यायः ॥

अथ तृतीयोऽध्यायः

प्रथमाह्निकम्

भजनीयस्य पूर्णत्वं समर्थयितुं सर्वस्य भजनीयस्वरूपतामाह—

भजनीयेनाद्वितीयमिदं कृत्स्नस्य तत्स्वरूपत्वात् ॥१॥

भजनीयेनेति। भजनीयेन-परमेश्वरेण, अद्वितीयम्—अभिन्नम्, इदं—सेव्यसेवकसेवातत्साधनगुरुमन्त्रादिकम्। कुतः? कृत्स्नस्य तत्स्वरूपत्वात्—सर्वस्यापि पदार्थस्य तद्विवर्तत्वेन तदात्मकत्वात्। पूर्वरूपापरित्यागेनोत्तरावस्थारूपस्य विवर्तस्य घटादेरिव स्वकारणतः पृथगसत्वात्। सत्वहीनस्यालीकत्वात्। तस्य केवलं सत्वे सत्वरस्य च विषयिज्ञानरूपत्वात्। ज्ञानस्य च लाघवादेकस्य स्वप्रकाशब्रह्मरूपत्वादस्ति-भाति प्रियात्मकमिदं सर्वं नामरूपात्मकम्। नामरूपत्वबाधे ब्रह्मैव। राधेयत्वबाधे कौन्तेय एव यथा कर्णः। अत एव "इदं सर्वं यदयमात्मा" (बृहदा० ४।५।७) "ब्रह्मैवेदं सर्वम्" (नृसिहोत्तर० ७।३) इत्याद्याः सर्वाभेदम्, "सर्वं तं पराद्योऽन्यत्रात्मनः सर्वं वेद" (बृहदा० ४।५।७) इत्यादयो जगदर्थिनां पुरुषार्थाद् भ्रंशं च वदन्ति श्रुतयः। अत एव "योऽन्यां देवतामुपास्तेऽन्योऽसावन्योऽहमस्मीति न स वेद" (बृहदा० १।४।१०) इत्यादिश्रुतिनिन्दितद्वैतिभक्तापेक्षया—

वासुदेवः सर्वमिति स महात्मा सुदुर्लभः। (भ०गी० ७।१९)

इत्यनेनाद्वैतज्ञानिनो भक्तस्यैवोत्कर्षः प्रतिपादितो भगवद्गीतायाम्।

त्रिविधपरिच्छेदशून्यत्वलक्षणपूर्णत्वादिकमाहात्म्यज्ञानवतस्तस्य व्यवहृतावपि सर्वस्य तत्स्वरूपतावगमेन ब्रह्मण्येव निरतिशयप्रीतिसंभवादित्यभिप्रेत्यात्राद्वैतमुक्तम्। एतेन अद्वितीयं पारमार्थिकं द्वितीयं न भवति कृत्स्नस्योपादेयतया तत्स्वरूपत्वात्। नह्युपादेयस्याविनाशित्वलक्षणं पारमार्थिकत्वं संभवति, तत्स्वरूत्वं तु समावायस्थानाभिषिक्तमन्योन्याभावाविरुद्धमभेदाविभागापरपर्यायं तादात्म्यम्। तत्र प्रमाणन्तु "सर्वं खल्विदं ब्रह्म तज्जलान्" (छान्दोग्य० ३।१४।१) इति।

ततो जगज्जगत्तस्मिन्सदसच्चाखिलं मुने। इति।

नचाऽत्र बाधायां सामानाधिकरण्यम्, ज्ञेयप्रकरणाऽभावे तादृशसामानाधिकरण्याभ्युपगमस्य निर्मूलत्वात्। बाधायां सामानाधिकरण्येऽपि बाध्यमानस्याभेदस्य सिद्ध्याऽभिमतसिद्धेश्चेति कस्यचिद्व्याख्यानं निरस्तम्। गुण्यादिभावस्थल एव तादृशभेदस्य संभवात्। ब्रह्मप्रपञ्चयोर्ब्रह्मजीवयोर्वा गुणगुण्यादिभावः संभवतीत्यन्यत्र विस्तरः। तस्माच्छुद्धाद्वैतमेव सूत्रकृदभिप्रेतमिति नहि मन्तव्यम्। तदुपपत्तिप्रकारश्चाभिहितोऽभियुक्तैः—

आदित्यादेरभावे विलसति पुरतो यः पदार्थप्रकाशो
दृष्टोऽसौ स्वस्वरूपः सुखमपि नियतं सत्वमेषां स एव।
आदित्यादेरपीत्थं स च भवति ततः सच्चिदानन्द आत्माऽ-
सत्स्यात्तस्मात्ततोऽन्यज्जगदिति सुधियां दृश्यमाणन्तदेव॥

प्रेम द्वैतविदां यतोऽस्ति गलितं तत्सत्क्रियाकारका-
पेक्षाणां परमात्मनैक्यविदुषामद्वैतिनां चाऽधिकम्।
सन्तृप्ताख्यमतो यतो भगवता ज्ञानी ममात्मा महा-
नात्मा दुर्लभ इत्यनारतमयं ब्रह्मात्मवित्स्तूयते॥

पुमर्थः प्रेमाख्यं विदित इह संतृप्तपदतः
स च प्राप्यः खल्वप्रयतनवशेनापि मनुजैः ।
स चायं संसाध्यः सगुणमहिमज्ञानसुलभाद्
निराकाराज्ञानात्कथितमपि धात्रा स्तुतिपदैः ॥

तथाऽपि भूमन् महिमाऽगुणस्य ते
विबोद्धुमर्हत्यमलान्तराऽऽत्मभिः ।
अविक्रियात्स्वानुभवादरूपतो
ह्यनन्यबोध्यात्मतया न चान्यथा ॥ इति ।
(भाग० १०।१४।६)

अस्यार्थः । भो भूमन्—सर्वबाधाऽवधित्वाऽऽदिरूपैश्वर्य-शालिन् । अगुणस्य-निखिलगुणातीतस्याखण्डवीर्यरूपस्य ते, महिमा-स्वरूपं सत्यज्ञानानन्ताऽऽनन्दैकरसरूपम्, अमलान्त-रात्मभिः-विशुद्धाऽन्तःकरणैः, विबोद्धुं-साक्षात्कर्तुं योग्यो भवति, कस्मात् स्वानुभावात् तत्वमस्यादिवाक्यजन्याखण्डाकाराऽन्तः-करणवृत्तेः । नन्वन्तः करणस्य कथं निराकाराकारिवृतिस्त-त्राऽऽह—अविक्रियादिति । न विद्यते क्रियाविशेषाकारः संस्थान-विशेषो यस्य तादृशादित्यर्थः । तथाच न सर्वत्र मूषानिषिक्त-द्रुतताम्रादिवत्संस्थानविशेषत्वमाकारत्वम्, निराकाररूपघटत्वा-दिवृत्तावव्याप्तेः । किन्त्वावरणनिवर्त्तनयोग्यम्, तद्योग्यत्वं च तज्जनकतावच्छेदकीभूतधर्मत्वम्, स च धर्मोऽण्डोपाधिः । स चाखण्डाकारवृत्तावस्त्येवेत्युपपद्यते ब्रह्माकाराकारित्वमपि वृत्ते-रिति भावः । अविक्रियत्वमेव कुतस्तत्राह—अरूपत इति रूप्यते साक्षिणा विषयीक्रियत इति रूपम्, तन्न विद्यते यत्र तादृशाद् दृश्यातीतस्वरूपादिति यावत् । दृश्यातीते विशेषाऽसंभव इति

भावः । दृश्यातीतत्वं कुतस्तत्राऽऽह—अनन्येति । स्वप्रकाशसंविद्रूपत्वादित्यर्थः । दृश्यवत्त्वेन तादृक्त्वमित्याह—न चेति । अत्र भक्तिप्रस्तावेऽमलान्तरात्मभिरित्यनेन निर्गुणमहिमज्ञानस्योत्तमाधिकारिलभ्यत्वकथनेन भक्ति प्रत्यन्तरङ्गसाधनत्वं लब्धम् । युक्तश्चैतत् । महिमज्ञानं विना स्थायिभावस्याऽसम्भवात् । अतो ज्ञानस्य भक्तिप्रतिबन्धकत्ववर्णनं केषांचिदाग्रहमात्रमिति मन्तव्यम् ॥ १ ॥

द्वैतन्तु भासमानं तत्स्वरूपतच्छक्तिकृतम् । सा च ततो भिन्नाभिन्नत्वादिनानिर्वाच्यत्वान्मायाप्रकृतिश्च भवति गुणत्रयात्मिकायाः प्रकाशवृत्त्यावरणैर्धर्मैर्जडेष्वनुगतिदर्शनादित्यभिप्रायवानाह—

तच्छक्तिर्माया जडसामान्यात् ॥ २ ॥

तच्छक्तिरिति "देवाऽऽत्मशक्तिं स्वगुणैर्निगूढाम्" (श्वेताश्व० १।३) इत्यादिश्रुतेः ।

दैवी ह्येषा गुणमयी मम माया दुरत्यया । (गी० ७–१४) इत्यादिभगवद्वाक्यैश्च तच्छक्तिः—मायाऽऽख्या सर्वस्य कारणमित्यर्थः । कुतः ? जडसामान्यात्—जडेषु दृश्यमात्रेषु कारणतयाऽन्वयादित्यर्थः । कार्याणां सामान्यमनुगतं कारणमेवेति भावः । अथवा—कार्यानुकूला तच्छक्तिर्मायापि बाधायामभेदवती, कुतः ? जडत्वादित्यर्थः । जडानां बाधायामेव सामानाधिकरण्यव्युत्पादनादितिभावः ॥ २ ॥

तस्य भजनीयस्य शक्तिर्ज्ञानादिकमपि श्रूयते "परास्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च" (श्वेताश्व० ६।८) इत्यादिश्रुत्या, तत्कथं मायैवोक्ता, तत्राऽऽह—

व्यापकत्वाद्व्याप्यानाम् ॥ ३ ॥

व्यापकत्वादिति । व्याप्यानां—कार्यतया स्वापेक्षया न्यूनकालस्थितिकानां वियदादीनामपेक्षया व्यापकत्वात् शक्तेरितिशेषः । कार्यानुयोगिकतादात्म्यसम्बन्धप्रतियोगित्वादिति यावत् । ब्रह्मणोऽपि कार्यापेक्षिकं तादृशव्यापकत्वं तत एव संभवतीति सैवोक्तेति भावः ॥ ३ ॥

नन्वदृष्टद्वारा जीवज्ञानेच्छाकृतिभ्यः संसारोऽस्तु, अलं भगवन्मायया, तत्राह—

न प्राणबुद्धिभ्योऽसंभवात् ॥ ४ ॥

नेति । प्राणबुद्धिभ्यः—अदृष्टद्वारा जीवज्ञानादिभ्यो न संभवति, कुतः ? असंभवात् । सर्वत्र कार्यतावच्छेदकसम्बन्धेन कार्याधिकरणे विषयतया जीवज्ञानादीनामसंभवात् । सूक्ष्मार्थाद्रष्टृत्वाज्जीवस्येति भावः ॥ ४ ॥

न केवलं शक्तिरेव कारणम्, अपि तु शक्तिमत्त्वेन स्वयमेव सर्वं करोति, शक्तिस्तु कारणतावच्छेदिकैवेत्यभिप्रायवानाह—

निर्मायोच्चावचं श्रुतीश्च निर्मिमीते पितृवत् ॥ ५ ॥

निर्मायेति । उच्चावचं—न्यूनाधिकं दृश्यजातम्, निर्माय-विरच्य प्राणिहितकाम्यया श्रुतीश्च-वेदांश्च, निर्मिमीते—रचयति, चकारात् इतिहासाऽऽदीन् "अस्य महतो भूतस्य निश्वसितमेतद्यदृग्वेदो यजुर्वेदः सामवेदोऽथर्ववेद इतिहासः पुराणम्" (बृहदा० २।४।१०) 'तस्मै वेदान्पुराणानि दत्तवानग्रजन्मने' इत्यादि-

श्रुतिस्मृतिवाक्यात् । व्यासस्य तु विभज्य संक्षेपकत्वमात्रमेव । मात्स्ये—(५३ अ०)

पुराणं सर्वशास्त्राणां प्रथमं ब्रह्मणा स्मृतम् ।
अनन्तरन्तु वक्त्रेभ्यो वेदास्तस्य विनिर्गताः ॥ ३ ॥
पुराणमेकमेवासीच्छतकोटिप्रविस्तरम् । तु० ४ इत्यारभ्य—
तदर्थोऽत्र चतुर्लक्षः संक्षेपेण निवेशतः ॥

इत्यन्तेन ग्रन्थेन तथा प्रतिपादनात् । पितृवदिति । यथा पिता पुत्रानुत्पाद्य हिताऽहितप्राप्तिपरिहारवाक्यमभिधत्ते तद्वदित्यर्थः । अत्रानेन दृष्टान्तेन निमित्तत्वमभेदकथनेनोपादानत्वं ब्रह्मणः प्राप्तम्, तेन ब्रह्म जगदभिन्ननिमित्तोपादानमिति भावः । अत्र सूत्रकृता 'निर्मायोच्चावचम्' इति जगत्कारणत्वाक्षिप्तं सर्वज्ञत्वं 'श्रुतीश्च निर्मिमीते' इति वेदकारणत्वेन परमेश्वरस्य दृढीकृतम् । ननु न तावद्वेदकर्तृत्वेन तस्य तत्संभवति, वेदस्य पौरुषेयत्वापातात् । नाऽपि वेदोपादानत्वेन, कार्योपादानयोरेकशक्तिमत्त्वनियमस्य मृत्पिण्डघटादिब्रह्मतत्कार्यान्तरेषु च व्यभिचारदर्शनेनाप्रामाणिकतया वेदस्य सर्वार्थप्रकाशनसामर्थ्यमात्रेण ब्रह्मणि तदसिद्धेः । तत्सिद्धौ वा वेदः स्वयमज्ञ एव जीवानां सर्वाऽर्थगोचरप्रकाशजनक इति ब्रह्मणोऽप्यज्ञस्यैव प्रकाशकत्वापत्तेश्च । एवमपि ब्रह्मणो वेदाविषयनदीवालुकासङ्ख्यप्रकाशजनकत्वालाभाच्चेति । मैवम् । कर्तृत्वमिह नार्थमुपलभ्य रचयितृत्वम् । येन वेदस्य सापेक्षत्वलक्षणं पौरुषेयत्वमापद्येत । नाप्युच्चारयितृत्वम्, अध्यापकसाधारण्येन तावता वेदे ब्रह्मकर्तृत्वविशेषासिद्धेः । सर्ववेदोच्चारणेन महोपाध्यायतामात्रं हि तदा ब्रह्मणः स्यात् । नापि पूर्वक्रमानपेक्षया स्वतन्त्रक्रमेणोच्चारयितृत्वम् । क्रमान्यत्वे वाग्व-

ज्ञत्वेन दुरितप्रसङ्गात्। किन्तु ब्रह्म स्वतन्त्रमप्यध्येतॄणां पुरुषार्थसिद्धये नियतक्रमस्वराद्यपेक्षमाणं पूर्वकल्पेषु स्वकृतेनैव नियतेन क्रमादिना विशिष्टान्वर्णान्करोति। सर्गादौ भगवान् 'धाता यथापूर्वमकल्पयत्' (ऋग्वेद १०।१९०।३) इति श्रुतेः। एतदेवाऽध्यापकविलक्षणं ब्रह्मणो वेदकर्तृत्वम्। यदन्यदीयक्रमाद्यनपेक्षणेन पूर्वमपि स्वकृतेनैव क्रमेण विशिष्टेषु वैदिकवर्णेषु कर्तृत्वम्। तथाचातीतानन्तकल्पस्थवैदिककर्मस्वरादिप्रतिसन्धानमनन्तवैदिकवर्णपदवाक्यप्रतिसन्धानं च ब्रह्मणो वक्तव्यम्। अन्यथा तत्कर्तृत्वाऽयोगात्। तस्य सकलस्य प्रतिसन्धानं च ब्रह्मणो न मानान्तरात्, तस्याऽन्तःकरणाद्यभावेन मानान्तराप्रवृत्तेः। किन्त्वनावृतरूपचैतन्यबलादितिसंकोचकाभावाद्यावत्स्वसृष्टप्रकाशवत्सर्वज्ञं ब्रह्म सिध्यतीत्यास्तां विस्तरः॥ ५॥

ननु कथं पितृवद्धितः, अनिष्टसाधनहिंसादिनिषिद्धमिश्रकर्मोपदेष्टृत्वादित्याशङ्क्य नाऽनिष्टमुद्दिश्योपदिशति, किन्तु तदभिलषितविशिष्टसुखमुद्दिश्य। तत्साधनन्तु तादृशङ्कर्म नान्तरीयकानिष्टजनककर्मघटितमपि भवत्येव, शुभकर्मण इष्टजननस्वभावत्वात्। अतस्तादृशं कर्म ज्योतिष्टोमादिकमुपदिशन्नीश्वरः पितृवद्धित एवेत्यभिप्रायेण समाधत्ते—

मिश्रोपदेशान्नेति चेन्न स्वल्पत्वात्॥ ६॥

मिश्रेति। पापसाधनहिंसादिमिश्रितकर्मोपदेशान्न हित इति न शङ्क्यम्। कुतः स्वल्पत्वात्। शुभफलकप्रधानकर्मापेक्षयाङ्गहिंसाया अल्पानिष्टफलत्वादित्यर्थः। अत एवाह पञ्चशिखाचार्योऽपि 'स्वल्पः सङ्करः सपरिहारः सप्रत्यवमर्शः' इति। ननु

"अग्नीषोमीयं पशुमालभेत" (तै० १ सं० ६।१।११।६) इति साक्षाद्वेदे विहितहिंसायाः कथमधर्मसाधनत्वमुच्यते, धर्माधर्मयोर्वेदैकसमधिगम्यत्वादिति चेत्। मन्त्रार्थवादपुराणेभ्योऽनर्थसाधनत्वाऽवगमादित्यवेहि। तथा हि मन्त्रो "यत्पशुर्मायुमकृतोरो वापद्भिराहत अग्निर्मा तस्मादेनसो विश्वान्मुञ्चत्व" हसः" इति संज्ञपनादेनो दर्शयति। एवं भगवद्गीताऽऽदौ—

श्रेयान्द्रव्यमयाद्यज्ञाज्ज्ञानयज्ञः परन्तप (४।३३) इत्यादिना हिंसायोगेन विधियज्ञस्य निन्दा ज्ञाप्यते। केचित्त्वस्य सूत्रस्यान्यादृशमभिप्रायं वर्णयन्ति। तथाहि निषिद्धहिंसादिमिश्रितोपदेशात्पितृतुल्यो नेति न, कुतः तस्योपदेशस्य स्वल्पविषयत्वात्। तथा च हिंसाविधेर्निरवकाशतया निषेधरूपस्य सावकाशतया सामान्यं हिंसानिषेधं प्रत्यपवादकत्वमेवेति भावः। यत्तु क्रत्वर्थहिंसायां क्रतूपकारकत्वपुरुषापकारत्वयोर्द्वयोरप्यविरोध इति। तन्न। 'त्याज्यं दोषवदित्येके' (गी०१८।३) इत्यादिमतभेदमुपन्यस्य भगवता—

त्यागो हि पुरुषव्याघ्र त्रिविधः संप्रकीर्तितः।
यज्ञदानतपःकर्म न त्याज्यं कार्यमेव तत्।
यज्ञोदानंतपश्चैव पावनानि मनीषिणाम्॥ (गी०१८।५)

इति प्रकाराऽन्तरेण त्यागप्रतिज्ञया पूर्वमतदूषणात्, 'तस्माद्यज्ञे वधोऽवधः' इत्यादिवाक्याच्च। एवं च विधेः पापजनकत्वमप्यर्थ इति विशेषविधिसामान्यनिषेधरूपतयैव विरोधपरिहारः। यत्तु भारतादौ हिंसायुक्तयज्ञनिन्दास्मरणम्, तत्वहिंसायुक्तकर्मस्तुत्यर्थम्। 'न हि निन्दा निन्दितुं प्रवर्तते, अपि तर्हि स्तुत्यं स्तोतुम्' इति न्यायात्। अपि चाऽङ्गविधिपर्यालोचनायां

नास्ति यद्यपि विरोधस्तथाऽपि ज्योतिष्टोमविधिः साङ्गं प्रधानं पुरुषस्य विदधत्पुरुषार्थंहिंसानिषेधमग्नीषोमीयहिंसायामवतरन् निरुणद्धि, नह्यग्नीषोमीयहिंसां वर्जयित्वा ज्योतिष्टोमः शक्यतेऽनुष्ठातुम्। तत्र च निषेधप्रवृत्तौ प्रधानविधिरेव बाध्येत, निषिद्धाङ्गेन प्रधानेन फलजननेऽनिष्टस्यावश्यपतनीयत्वेन तस्यैवानिष्ट साधनत्वलाभात्। न शुद्धमपि प्रधानं केवलं कारणम्, साऽङ्गस्यैव फलसाधनत्वश्रवणात्। तस्मादस्ति विरोध इति सामान्यबाधोऽतो हिंसाया अदुष्टत्वमेवेति। तच्चिन्त्यम्। हिंसानिषेधशास्त्रेण हिंसामात्रस्यानर्थसाधनत्वावगतावपि वैधहिंसायां क्रतूपकारकत्वस्य तद्घटितप्रधाने च स्वर्गादिफलसाधनत्वस्यावगतौ बाधकाभावात्। न ह्यनर्थसाधनत्वावगतौ प्रधानस्य प्रवर्तनाविषयत्वं विरुध्यते येन प्रवर्तना स्वविषयस्यानिष्टसाधनत्वमाक्षिप्येत। बलवद्द्वेषाभावदशायां स्वर्गादौ रागौत्कट्यमात्रेण प्रवृत्त्युपपत्तेः। अत एव लौकिकहिंसाद्यनेकार्थेऽपि तज्जन्यानर्थे बलवद्द्वेषाभावदशायां तात्कालिकेष्टे रागौत्कटचमात्रेण दृश्यते प्रवृत्तिः। तस्मात् "न हिंस्यात्" इति निषेधशास्त्रं हिंसाविधायकविशेषशास्त्रेण न बाध्यत इत्यास्तां विस्तरः॥ ६॥

यतः पितृवत्सर्वान्निर्मिमीते, उपदिशति च भगवान्, अत एव शुभाशुभे फले प्रसादरोषाभ्यां स एव ददाति। पापपुण्ये तु तस्य प्रसादकोपौ प्रत्येव हेतू न फलं प्रतीत्याशयवानाह—

फलमस्मादिति बादरायणो दृष्टत्वात्॥ ७॥

फलमिति। विहितनिषिद्धफलम्, अस्मात्-परमेश्वरात्तुष्टाद्रुष्टाच्च, बादरायणो मन्यते वेदान्तशास्त्रे 'फलमत उपपत्तेः'

(३।२।३७) इत्यादिसूत्रैः । कुतः ? दृष्टत्वात्-राजादितोषरोषाभ्यामिष्टानिष्टफलयोर्दृष्टत्वात् । तथा च दृष्टानुसारेण "स वा एष महानज आत्मा अन्नादो वसुदानः परमात्मा मे शुध्यताम्" (तु० बृहदा० ४।४।२४) 'क्षमस्व परमेश्वर' इत्यादिवाक्यस्वरससूचिततया सिद्धावसिद्धौ तोषरोषावेव कर्मणां व्यापारौ, न तु पदार्थविशेषौ धर्माधर्मरूपौ द्वारभूतौ कल्पनीयौ, गौरवात् । देवतान्तरप्रीतेस्तु व्यभिचारादननुगमाच्च (न) तद्द्वारत्वम् । तोषरोषौ च रागद्वेषरूपतया सविषयाविति विषयतासम्बन्धेन जीवनिष्ठौ फलहेतू । यथा च रागद्वेषवत्त्वेऽपि न वैषम्याद्यापत्तिस्तथोक्तं कारुण्यसूत्रे । ननु जीवनिष्ठौ गुणविशेषरूपौ धर्माधर्मावेवेश्वराख्ययुक्त्यन्तराकल्पनलाघवात् फलहेतू, "पापः पापेन कर्मणा भवति पुण्यः पुण्येन" इत्यादिश्रुतेश्च । (तु० बृहदा० ३।२।१३) । ननु जडात्कर्मणः केवलात्कथं फलसिद्धिरिति चेत्, भ्रान्तोऽसि । वाचनिकेऽर्थे कथमिति शङ्काऽनुदयात् । ननु तथापि प्रवर्तकं विना कथं कर्मणः प्रवृत्तिः स्यादिति चेत् । प्राक्तनसंस्कारादित्यवेहि । पयोऽम्बुप्रभृतिप्रवृत्तावदृष्टस्यैव कारणत्वदर्शनात्, ईश्वरप्रवर्तकत्वपक्षेऽपि वैषम्याद्यापत्तिवारणाय संस्कारहेतुताया आवश्यकत्वेन तस्यान्यथासिद्धेरुक्तत्वात् । अत एवोक्तं श्रीभागवते—

कर्मणा जायते जन्तुः कर्मणैव हि लीयते ।
सुखदुःखं भयक्षेमं कर्मणैवाऽभिपद्यते ॥

अस्ति चेदीश्वरः कर्ता फलरूप्यन्यकर्मणाम् ।
कर्तारं भजते सोऽपि न ह्यकर्तुः प्रभुर्हि सः ॥

किमिन्द्रेणेह भूतानां स्वस्वकर्मानुवर्तिनाम् ।
अनीशेनान्यथा कर्तुं स्वभावमनुवर्तते ॥
स्वभावस्थमिदं सर्वं सदेवासुरमानुषम् ॥
(१०।२४।१३-१६)

इति चेत् । अत्र वदन्ति । जीवफलं प्रति न कर्मणां करणत्वम्, प्राचीनशुभवासनाभिर्जन्मप्रयाणयोरन्तराले धर्ममनुतिष्ठतां युधिष्ठिरादीनामसुखदर्शनात्, तथा पापमनुतिष्ठतां दुर्योधनादीनान्त्वदुःखदर्शनाद्व्यभिचारात्प्राक्तनकर्मभिस्तथा फलमिति चेत्, भ्रान्तोऽसि । तथा सति तेषां तद्विपाकानुगुणानामेव वासनानामभिव्यक्त्यापत्तेः । न चैवमभवत् । अत ईश्वर एव स्वतन्त्रः स्वेच्छया विचित्रार्थानां हेतुः । लोकेऽपि राजादीच्छया मान्यसेवकानामपि फलवैषम्यदर्शनात् । ननु लोकवदेव वैषम्यनैर्घृण्ये स्याताम् । न स्याताम् । ईश्वरस्य शक्तिमत्त्वेनैव कारणतया कारणतावच्छेदकाऽनन्तशक्तिकृतत्वेन तयोरीश्वरेऽप्रसक्तेः । मुख्यशक्तीनां नित्यत्वेऽपीच्छावृत्तिरूपावस्थाशक्तयोऽनित्या एवेति न सुखदुःखादेः प्रतिजीवं प्रतिक्षणं च व्यवस्थाया अप्यनुपपत्तिः । न चेदं गौरवं दोषाय, प्रामाणिकत्वात् । एतेन ताः शक्तयः शक्तिमतोऽभिन्ना भिन्ना वा । आद्ये कथं शक्तिवैजात्यम् । अन्त्ये ताः कारणतावच्छेदिका उत कारणानि । आद्ये कार्यवैचित्र्याद्यनुपपत्तिः, कारणभेदस्यैव कार्यभेदप्रयोजकत्वात् । अन्त्ये नैककारणकत्वं कार्यजातस्य स्याद् ब्रह्मणोऽन्यथासिद्धिश्च स्यात् । न च तद्द्वारम् । तथा च द्वारेण द्वारिणो नान्यथासिद्धिरिति वाच्यम् । तथा सत्येकस्यैकदा स्वाधीनविरुद्धानेकद्वारकत्वे युगपत्सर्वाणि कार्याण्यापद्येरन्, स्वभावस्याऽनतिक्रमणीयत्वादिति परास्तम् । अनिर्वचनीयख्यातिपक्षे विभिन्नसत्ताकयोर्भेदा-

भेदयोरङ्गीकारेण दोषाभावात्। वस्तुतो वैषम्यादावपीष्टापत्तिः। न च जीवसाम्यम्। स्वातन्त्र्यपारतन्त्र्याभ्यां विशेषात्। न ह्यस्मदादिवद्वैषम्यमनुतिष्ठतोऽपि राज्ञो राजत्वहानिः संभाव्यते। न च कर्मवैयर्थ्यम्, मर्यादामात्रार्थत्वात्। परमेश्वरस्य रोषतोषौ प्रति वा कारणत्वात्। एतत्सर्वमभिप्रेत्यैव वनपर्वणि युधिष्ठिरं प्रति द्रौपदी प्राह—

धातैव खलु भूतानां सुखदुःखे प्रियाऽप्रिये।
ददाति सर्वमीशानः पुरस्ताच्छुक्रमुच्चरन्॥ २२॥
यथा दारुमयी योषा नरधीरसमाहृता।
चेष्टयत्यङ्गकर्माणि तथा राजन्निमाः प्रजाः॥ २३॥
अज्ञो जन्तुरनीशोऽयमात्मनः सुखदुःखयोः।
ईश्वरप्रेरितो गच्छेत्स्वर्गं नरकमेव च॥ २८॥
हेतुमात्रमिदं धातुः शरीरं क्षेत्रसंज्ञितम्।
येन कारयते कर्म शुभाशुभफलं विदुः॥ ३१॥
अन्यथैव हि मन्यन्ते पुरुषास्तानि तानि च।
अन्यथैव प्रभुस्तानि करोति विकरोति च॥ ३४॥
यथा काष्ठेन वा काष्ठमश्मानं चाश्मना पुनः।
अयसा वाऽप्ययश्छिन्द्यान्निर्विचेष्टमचेतनम्॥ ३५॥
एवं स भगवान्देवः स्वयंभूः प्रपितामहः।
हिनस्ति भूतैर्भूतानि छद्म कृत्वा युधिष्ठिर॥ ३६॥
संप्रयोज्य वियोज्याऽयं कामकारकरः प्रभुः।
क्रीडते भगवान्भूतैर्बालः क्रीडनकैरिव॥ ३७॥
न मातृपितृवद्राजन् धाता भूतेषु वर्तते।
रोषादिव प्रवृत्तोऽयं यथाऽयमितरो जनः॥ ३८॥

आर्याञ्छीलवतो दृष्ट्वा ह्रीमतो वृत्तिकर्षितान् ।
अनार्यान्सुखिनश्चैव(अ)विह्वला(न्द्रव्य)चिन्तया ॥ ३९ ॥
तवेमामापदं दृष्ट्वा समृद्धि च सुयोधने ।
धातारं गर्हयेयार्थविषमं योऽनुपश्यति ॥ ४० ॥
अनार्यशास्त्रातिक्रूरे लुब्धे धर्मापवादिनि ।
धार्तराष्ट्रे श्रियं दृष्ट्वा धाता किं फलमश्नुते ॥ ४१ ॥
कर्म चेत्कृतमन्वेति कर्तारं नान्यमृच्छति ।
कर्मणा तेन पापेन लिप्यते नूनमीश्वरः ॥ ४२ ॥
अथ कर्म कृतं यच्च न चेत्कर्तारमृच्छति ।
कारणं बलमेवेह जनाञ्छोचामि दुर्बलान् ॥ ४३ ॥ इति
(वनपर्व अ० ३०)

न च तर्हि तत्र युधिष्ठिरस्य फलं प्रति कर्मणां कारणत्वप्रतिपादनं विरुध्येतेति वाच्यम् । उक्ताभिप्रायेण तस्य तथात्वोक्तेः । तथा हि तत्र (अ० ३१)—

अस्तु वात्र फलं मा वा कर्तव्यं पुरुषेण यत् ।
गृहे वा वसता कृष्णे यथाशक्ति करोमि तत् ॥ ३ ॥
धर्मं चरामि सुश्रोणि न कर्म फलकारणात् ।
आगमाननतिक्रम्य सतां वृत्तमवेक्ष्य च ॥ ४ ॥

इत्युपक्रम्य

धर्म एव प्लवो नाऽन्यः स्वर्गं द्रौपदि गच्छताम् ।
स वै नौः सागरस्येव वणिजः पारमिच्छतः ॥ २४ ॥
तपश्च ब्रह्मचर्यं च यज्ञः स्वाध्यायशीलता ।
दानमार्जवमेतानि यदि स्युरफलानि वै ॥ २७ ॥
नाचरिष्यन्परे धर्मं परैः परतरे च ये ।
विप्रलम्भोऽयमत्यन्तं यदि स्युरफलाः क्रियाः ॥ २८ ॥

दृश्यन्ते ह्यपि विद्यानां फलानि तपसस्तथा ।
कृशाशाः सुव्यवायाश्च तपसा दग्धकिल्बिषाः ॥ ३१ ॥
प्रसादैर्मानसैर्युक्ताः पश्यन्त्वेतानि वै द्विजाः ॥ ३७ ॥
(वनपर्व अ० ३१)

इत्यादिना धर्मस्यावश्यकर्तव्यत्वज्ञापनायाविगीतशिष्टाचार-विषयत्वेनैव सफलत्वं साधितम् । वस्तुतस्तु सर्वस्यापीश्वराधी-नत्वमेवेत्यभिप्रेत्य—

यस्य प्रसादात्संभूतो मर्त्यो गच्छत्यमर्त्यताम् ।
इत्युक्तमिति संक्षेपः ॥ ७ ॥

अस्मादुत्पन्नस्य कुत्र कथं वा लय इत्याशङ्कायामाह—

व्युत्क्रमादप्ययस्तथा हि दृष्टम् ॥ ८ ॥

व्युत्क्रमादिति । फलमस्मादित्यतोऽस्मच्छब्दो विभक्ति-विपरिणामेनानुवर्ततेऽस्मिन्निति—ईश्वर एव, व्याप्यस्य पृथिव्यादे-र्व्यापके जलाऽदौ लय इति क्रमेण जीवतत्वानां लयः, हि—यतः, तथा दृष्टम्—कारणे कार्यस्य लयो दृष्टः, अत एव—

पृथिव्यामथ लीलायामप्सु चैकार्णवे पुरा ।
ज्योतिर्भूते जले चापि लीने ज्योतिषि चानिले ॥
वायौ चाकाशसंलीन आकाशे च मनोऽनुगे ।
व्यक्ते मनसि संलीने व्यक्ते चाव्यक्ततां गते ॥
अव्यक्ते पुरुषं याते पुंसि सर्वंगतेऽपि च ।
इति भारते उक्तम् (शान्ति० ३४७।१४।१६)

ज्योतिर्भूते—एकीभूत इत्यर्थः। सर्वगते—परमेश्वर इत्यर्थः। विस्तरस्तु 'विपर्ययेण क्रमोऽत उपपद्यते च' (२।३।१४) इति वेदान्तसूत्रव्याख्यास्ववसेयः॥ ८॥

इति नारायणतीर्थकृतायां शाण्डिल्यसूत्रवृत्तौ भक्तिचन्द्रिकायां तृतीयाध्यायस्य प्रथमाह्निकम्।

तृतीयाध्याये

द्वितीयाह्निकम्

भगवद्भावरूपो मोक्षोऽत्यन्तैक्ये संभवति न नानात्व इत्यभिप्रेत्योक्तमैक्यं द्रढयति—

तदैक्यं नानात्वैकत्वमुपाधियोगहानादादित्यवत् ॥ १ ॥

तदैक्यमिति । तस्य—भजनीयस्य भक्तेरैक्यम्—वास्तवम्, "तत्त्वमसि" (छान्दोग्य० ६।८।७), "अहं ब्रह्माऽस्मि" (बृहदा० १।४।१०), "तत्त्वमेव त्वमेव तत्", "तद्ब्रह्माऽद्वयमस्म्यहम्" (कैवल्योप० १।१९) इत्यादिश्रुतेः । नानात्वम्—भेदः, उपाधेः—मायाऽऽदेर्योगात्, एकत्वम्—भेदनाशश्चोपाधिहानादादित्यस्येव ।

सोऽयं जीवसमाख्यस्तु ब्रह्मैव परमार्थतः ।
व्यवहारदशायान्तु मायया परमेश्वरः ॥
पृथक्त्वेन द्विजा भाति जलपात्रैर्यथा रविः ।
यथैकमाकाशमहाऽर्कबिम्बं
क्षुद्रेषु पात्रेषु जलाऽन्वितेषु ।
भजत्यनेकप्रतिबिम्बभावं
तथात्वमन्तःकरणेषु देवः ॥

विभेदजनकेऽज्ञाने नाशमात्यन्तिकं गते ।
आत्मनो ब्रह्मणो भेदमसन्तं कः करिष्यति ॥

(विष्णु० ६।७।९४)

इत्यादिप्रमाणादिति भावः। एतेन समुद्रनद्यादिदृष्टान्तघटित-वाक्यानुसारात् "तत्त्वमसि" इति वाक्यानामुक्ताविभागपरत्वम्। "ब्रह्मविद् ब्रह्मैव भवति" (मुण्डक० ३।२।९) इत्यादिवाक्यानां लयात्मकाविभागपरत्वम्। भेदनाशकवाक्यानां लयात्मकाविभाग-विरुद्धविभागनाशपरत्वमिति निरस्तम्। विभागनाशादेरपुरु-षार्थत्वाद् दुःखाभावविशिष्टस्वरूपस्यैव त्वन्मते पुरुषार्थत्वौचि-त्यात्। मन्मते तु ब्रह्मैव पुरुषार्थस्तत्र विशेषणीभूतो भेदनाशः। किञ्चाविभागपक्षे प्रतिबिम्बदृष्टान्तानुपपत्तिः, तेन ह्यन्योन्याभाव-सम्बन्धतन्नाशावेव स्वरसती लभ्येते। किञ्च, प्रबलतरबाधका-भावे सामानाधिकरण्यप्रतिपाद्यस्वरूपैक्यत्यागोऽनुचितः, 'भेद एव विभग्नः, "भेदमसन्तं कः करिष्यति" (विष्णु० ६।७।९४) इत्यादावन्योन्याभावरूपमुख्यार्थत्यागश्चान्याय्यः। एवं ब्रह्मैव भवतीत्यत्र भेदनाशावच्छिन्नस्वरूपैक्यमर्थ एवकारानुरोधात्। एकात्मव्यक्तौ लाघवाच्च ब्रह्माभेदो जीवस्य। समुद्रनद्यादिघटित-दृष्टान्तवाक्ये तु विभागनाश एवार्थः, न त्वविभागरूपधर्म्मान्त-रोदयः। न ह्येतावता भेदनाशाभावः सिद्ध्यति, द्वयोरपि नाशयोरविरोधादित्याद्यन्यत्र विस्तरः॥ १ ॥

ननु सर्वज्ञान्तर्यामित्वाद्युपपत्तिलिङ्गात्, "द्वा सुपर्णा" (ऋग्वेद १।१६४।२०) इत्यादिवेदश्रुतेश्च भेद एव परमेश्वरस्य जीवादित्याशङ्क्य प्रतिषेधति—

पृथगिति चेन्न परेणासम्बन्धात् प्रकाशानाम् ॥२॥

पृथगिति चेन्नेति । ब्रह्म जीवेभ्यः पृथक् सर्वज्ञत्वादिहेतुभिरितिचेत्—एवं यदि, तन्न, कुतः ? परेण—ब्रह्मणा, प्रकाशानाम्—चेतनानां जीवानाम्, असम्बन्धात्—भेदोपपादकपारमार्थिकसम्बन्धाभावात्। भेदेन मिलितयोर्घटभूतलयोरिव जातिव्यक्त्यादेरिव वा संयोगः समवायस्तादात्म्यं वा सम्बन्ध आपद्येत । न च सोऽस्ति मानाऽभावाद् दुर्वचत्वाच्च । तस्मादभेद एव, भेदस्तु काल्पनिक इति भावः ॥ २ ॥

कथं विकारिणां जीवानां ब्रह्मणाऽभेद इत्याह—

न विकारिणस्तु करणविकारात् ॥ ३ ॥

न विकारिण इति । प्रकाशजीवा ज्ञानसुखदुःखादिविकारवन्तो न भवन्ति । कुतः ? करणविकारात्—अन्तःकरणस्यैव सकलतादृशपरिणामाऽभ्युपगमात् । कामसङ्कल्पाऽऽदीन् प्रकृत्य "एतत्सर्वं मन एव" इत्यादिश्रुतेरन्वयव्यतिरेकाभ्यां कारणत्वेन गृहीतस्य मनस एव तत्परिणामित्वकल्पनौचित्याच्च । जीवानामन्तःकरणसम्बन्धादेव सुखाऽऽदिकम् । तदेवं विवर्ताऽधिष्ठानत्वमेव तेषाम् । इदन्तु बोध्यम् । एकस्या एवाऽन्तःकरणवृत्तेरन्तःकरणपरिणामरूपत्वम्, जीवं प्रति विवर्तरूपत्वं चेति संक्षेपः ॥ ३ ॥

ननु यदि स्फटिकवत्स्वच्छस्याप्युपाधिबलादनर्थस्तदा कथं मोक्षस्तत्राह—

अनन्यभक्त्या तद्बुद्धिलयादत्यन्तम् ॥ ४ ॥

अनन्येति। अनन्यभक्त्या—केवलनिष्कामब्रह्मभक्त्या, तस्य जीवस्य, बुद्धेः—अन्तःकरणस्यात्यन्तं लयात्—निरन्वयनाशाद् ब्रह्माऽऽनन्दावाप्तिरूपा मुक्तिर्भवतीत्यर्थः। ननु स्वरूपसम्बन्धरूपब्रह्माऽवाप्तेः स्वत एव सिद्धत्वात् कथं तदुद्देशेन प्रवृत्त्यादिरिति चेन्न; उपाधिलयविशिष्टरूपेणोद्देश्यतया तत्संभवादित्याद्यन्यत्र विस्तरः, सूत्रे 'अत्यन्तम्' इत्यनेनेदं सूचितम्।

यदा तमस्तत्र दिवा न रात्रि-
र्न सन्न चासच्छिव एव केवलः ॥
(श्वेताश्व० ४।१८)

"नासदासीन्नो सदासीत्" (ऋग्वेद १०।१२९।१), "तम आसीत्" (ऋग्वेद १०।१२९।३) इत्यादिश्रुतिभिः प्रलयादावभावप्रतिपादनात्। "एतस्माज्जायते प्राणो मनः सर्वेन्द्रियाणि च" (मुण्डक० २।१।३) इत्यादिभिः सृष्ट्यादावुत्पत्तिवर्णनाच्चान्तःकरणस्य प्रलयादावतीतावस्थाख्यनिवृत्तसत्त्वेऽपि तदवस्थस्यान्तःकरणस्य सत्ताङ्गीक्रियत एव, अन्यथा पुनः संसारानापत्तेः। 'यावदात्मभावित्वाच्च न दोषस्तद्दर्शनात्' (ब्र० सू० २।३।३०), 'स एव तु कर्मानुस्मृतिविधिभ्यः' (ब्र० सू० ३।२।९) इति शारीरकमीमांसासूत्रविरोधाच्चेति दिक् ॥४॥

अनन्यभक्तस्य मोक्षे कियान्विलम्बस्तत्राह—

आयुश्चिरमितरेषान्तु हानिरनास्पदत्वात् ॥५॥

आयुश्चिरमिति। अनन्यभक्तस्य जीवन्मुक्त्यवस्थान्यथानुपपत्त्या आयुः—जीवनादृष्टं चिरमास्ते। उपलक्षणमिदं विपाकत्रया-

रम्भोपहितादृष्टानाम्। इतरेषाम्—सञ्चितानागतानां तु, हानिः—अश्लेषविनाशौ, तत्रानागतस्याश्लेषः संचितस्य विनाशः। कुतः? अनास्पदत्वात्—आस्पदं फलरूपलक्षणम्, तद्रहितत्वादित्यर्थः। तथाचानिर्मोक्षापत्त्या तत्फलानुत्पत्त्यभ्युगममेनोत्तरादृष्टानुदयस्येव निष्फलपूर्वादृष्टनाशस्यापि भक्तिबीजप्राथमिकज्ञानव्यक्त्यभावरूपनिमित्तनाशवशात् संभव इति भावः। एतदभिप्रायेणैव भगवान् बादरायणोऽपि 'तदधिगम उत्तरपूर्वाऽर्धयोरश्लेषविनाशौ तद्व्युपदेशात् (ब्र० सू० ४।१।१३) इति। अश्लेषविनाशौ स्वसमानाधिकरणफलाजनकत्वम्। अन्यथा "तस्य पुत्रा दायमुपयन्ति सुहृदः साधुकृत्यां द्विषन्तः पापकृत्याम्" इत्यनेन ग्रहणानुपपत्तेः। स्वरूपतो नष्टस्यानेन ग्रहणानुपपत्तेः, प्रारब्धन्तु स्वसमानाधिकरणफलजनकत्वान्न नष्टमित्युच्यते शास्त्रकृद्भिः।

'ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुते'(गी० ४।३७) इत्यादौ सर्वकर्मपदं तु प्रारब्धेतरार्जितकर्मपरम्। "तस्य तावदेव चिरं यावन्न विमोक्ष्येऽथ संपत्स्ये", "भोगेन त्वितरे क्षपयित्वाऽथ संपद्यते" (ब्र० सू० ४।१।१९) इत्यादिश्रुतिसूत्रैकवाक्यतानुसारात्। तथा च प्रारब्धाऽपरिसमाप्तिरेव भक्तस्य कैवल्ये विलम्बः, नान्यः।

धर्मार्थकामैः किं तस्य मुक्तिस्तस्य करे स्थिता।
समस्तजगतां मूले यस्य भक्तिः परे स्थिता॥

इत्यादिवाक्यैर्भक्तस्य मोक्षातिशयादित्यास्तां विस्तरः ॥५॥

ननु मोक्षहेतुर्भक्तिश्चेत् संसृतिहेतुरभक्तिरप्यस्त्वित्यत्रेष्टापत्तिमाह—

संसृतिरेषामभक्तेः स्यान्नाज्ञानात् करणत्वासिद्धेः ॥ ६ ॥

संसृतिरेषामिति। एषाम्-जीवानाम्, अभक्तेरपि संसारो नाज्ञानमात्रात् केवलस्य करणत्वासिद्धेः। "इन्द्रो मायाभिः पुरुरूप ईयते" (ऋग्वेद ६।४७।१८)।

विभेदजनकेऽज्ञाने नाशमात्यन्तिकं गते।
अविद्यामोहितात्मानः पुरुषा भिन्नदर्शिनः॥
अज्ञानकल्पितं विश्वं ज्ञानेनैव विलीयते।
तथाऽप्यविद्याभेदेन भिन्नं पश्यामहे जगत्॥

इत्यादिवाक्यानामिव

तावदार्तिस्तृषा शान्ता तावन्मोहस्तथा सुखम्।
यावन्नायाति शरणं त्वामशेषाऽघनाशनम्॥
युञ्जानानामभक्तानां प्राणायामादिभिर्नरः।
अक्षीणवासनं राजन् दृश्यते क्वचिदुत्थितम्॥

इत्यादिवाक्यानामपि सत्त्वात्। यत्त्वज्ञानान्न कुत्राऽप्यर्थसृष्टिर्दृष्टेति कथमिदमिति तन्न। अभक्तेरप्यर्थसृष्टेरदर्शनात्। वस्तुतस्तु दृष्टैव शुक्तिरजतादिसृष्टिः स्वप्नसृष्टिश्च। न च तत्रान्यथाख्यातिरेव।

यथा हि रज्जुरुरगः शुक्तिका रजतं यथा।
मृगतृष्णा यथा चाम्भः क्लृप्तं विष्णौ जगत्तथा॥

"न तत्र रथा न रथयोगा न पन्थानो भवन्त्यथ रथान् रथयोगान् पथः सृजते" (बृहदा० ४।३।१०) इत्यादिवाक्यविरोधात्। किञ्चाऽरजतं शुक्तिरित्यस्य रजतभिन्ना शुक्तिरिति तावन्नार्थः, तत्पुरुषस्योत्तरपदार्थप्राधान्यस्यौत्सर्गिकस्य त्यागा-

पत्तेः। तस्मादारोपितत्वं नञर्थ इत्यारोपितरजतं शुक्तिरिति वाक्यार्थस्यावश्याभ्युपगन्तव्यत्वादनिर्वचनीयशुक्तिरजतसिद्धिः च। न तत्र रजतावयवादिरूपकारणासंभवादनुपपत्तिः; प्रमाणबलात्सिद्धे कार्ये दोषादेरेव कारणत्वकल्पनात्, अन्यथान्यथाख्यातेरपि क्लृप्तसन्निकर्षादिकारणबाधादनभ्युपगमापत्तेः। इदन्तु बोध्यम्। शुक्तिरजतादिव्यावहारिकरजताद्योः परस्परवैलक्षण्याङ्गीकारात्तत्तद्व्यक्तित्वेन कार्यकारणभावाभ्युपगमाद्वा प्रायिकसकलाऽर्थक्रियाव्यवस्थासिद्धिः। या तु क्वचित्समानैवार्थक्रिया, तत्र प्रातिभासिकस्यापि हेतुत्वम्। फलानुसारेणैव कार्यकारणभावकल्पनाया उचितत्वादित्यास्तां विस्तरः॥ ६॥

भक्तिश्च ज्ञानसाध्येत्युक्तम्, ज्ञानसाधनानि च कति? तत्राह-

त्रीण्येषां नेत्राणि शब्दलिङ्गाक्षभेदाद्रुद्रवत् ॥७॥

त्रीण्येषामिति। एषाम्—जीवानाम्, त्रीण्येव नेत्राणि—अर्थप्रमापकानि प्रमाणानि, नाऽधिकानि न न्यूनानीत्यर्थः। कानि तानि? तत्राह—शब्दलिङ्गाऽक्षभेदादिति। शब्दाऽनुमानप्रत्यक्षभेदादित्यर्थः। शब्दस्य श्रुतिरूपस्याधिकप्रमाणत्वादादौ, तदनुसारिण एवानुमानस्य प्रमाणत्वात्तदनन्तरम्, अनुमानस्य तर्कशुद्धस्यैव प्रत्यक्षप्रमाणत्वादनुमानानन्तरं प्रत्यक्षनिर्देशः। उपमानादिकन्त्वनुमानादावेवान्तर्भूतमिति भावः। नेत्रत्रयं क्व दृष्टं तत्राह—रुद्रवदिति। यथा रुद्रस्य त्रीण्येव नेत्राणि तद्वदित्यर्थः॥ ७॥

अत्यन्तलयप्रसङ्गात् साऽन्वयनाशमुत्पत्तिं च व्युत्पादयति—

आविस्तिरोभावविकाशाः स्युः क्रियाफलसंयोगात् ॥ ८ ॥

आविरिति। जन्यानां पदार्थानामुत्पादकेन पूर्वंसत एवाऽऽविर्भावस्तदानीं सत एव ज्ञानातिरिक्तनाशकेन तिरोभावलक्षणो नाशः क्रियते, न तार्किकोक्तौ जनिनाशौ, कुतः? क्रियाफलं संयोगात् करोति घटम्, नाशयति घटमित्यादिना धात्वर्थक्रियाफलयोरुत्पत्तिनिवृत्त्योः सम्बन्धप्रतिपादनात्। न हि पूर्वमसतो जायमानधर्मान्तरसम्बन्धः क्वापि दृष्टः संभवति वा। तथा चोक्तं भगवता—

नाऽसतो विद्यते भावो नाऽभावो विद्यते सतः। इति।
(गी० २।१६)

एवं भवति नश्यतीत्यादावपि क्रियाऽऽश्रयत्वं प्रतीयते। तच्च सत एव संभवति। न चाऽऽद्यक्षणसम्बन्धो नाशप्रतियोगित्वं च तदर्थः, आद्यत्वस्याऽनिरुक्तेः। न च स्वाऽधिकरणक्षणवृत्तिप्रागभावप्रतियोगित्वं तदिति वाच्यम्; अनागतादिकाले घटाद्यभावेन तस्य प्रागभावप्रतियोगित्वाऽऽदिधर्मकत्वविरोधात्, सदसतोरसम्बन्धात्। प्रतियोगित्वस्य प्रतियोगिस्वरूपत्वे तद्दोषतादवस्थ्यम्। अभावमात्रस्वरूपत्वे घटाद्यभावोऽपि पटाद्यभावः स्यात्; अभावत्वाविशेषात्। अभावेष्वपि स्वरूपतो विशेषाङ्गीकारेऽभावत्वं परिभाषामात्रं स्यात्। न च प्रतियोगी वाऽभावं विशेषयति, असतो विशेषकत्वासंभवात्। तस्मात् सत एव कार्यस्य प्रागभावप्रतियोगित्वादयो धर्मा वक्तव्याः। ध्वंसप्रागभावौ चातीतानागतावस्थे एव। ते च वर्तमानावस्थावद्भावात्मिके एव। घटोऽतीतो घटो वर्तमानो घटो भविष्यतीति प्रत्ययानां तुल्यरूपतौचित्यात्। न त्वेकस्य भावविषयकत्वमन्ययोश्चाभावविषयकत्व-

मित्यस्यौचित्यम्, मानाभावात्। एवमन्योन्याभावात्यन्ताभावावपि प्रतियोग्यविशिष्टाऽधिकरणस्वरूपावेव लाघवात्।

नन्वस्मिन् मते वर्तमानावस्थालक्षणाभिव्यक्तिरपि कार्यस्य सती असती वा। आद्ये कारणव्यापारवैफल्यम्; कारणव्यापारात् प्रागपि कार्यस्याभिव्यक्त्या स्वकार्यजनकत्वापत्तिश्च। अन्त्येऽभिव्यक्तावेव सत्कार्यवादक्षतिरिति चेन्न; अभिव्यक्तेरपि वर्तमानावस्थया प्रागसत्त्वेन तदसत्तानिवृत्त्यर्थं कारणव्यापारापेक्षणात्। सर्वकार्याणां च कारणव्यापारात् प्राक् प्रकारभेदेन सदसत्त्वम्, अवस्थानामेव परस्परं परस्पराऽभावरूपत्वमिति तस्या अप्यभिव्यक्तिस्वीकारात्। न चैवमनवस्था गौरवं च; घटसामग्र्या एवाऽऽविर्भावादस्याऽऽविर्भावित्वात्। अन्यथा उत्पत्तेरुत्पत्तावपि तत्प्रसङ्गादित्याद्यन्यत्र विस्तरः। नन्वेवं कार्यस्य वियदादेः प्रागसत्त्वमेवेष्यताम्। कार्यताऽवच्छेदकलाघवात् किमभिव्यक्त्याख्याऽवस्थाकल्पनेन गौरवादिति चेत् "तद्धीदं तर्ह्यव्याकृतमासीत्" (बृहदा० १।४।७) इत्यादिश्रुत्याऽव्यक्तावस्थया सतामेव कार्याणामभिव्यक्तिसिद्धेः। न चैवमभिव्यक्तेः प्रागभावादिस्वीकारापत्तिः; तिसृणामनागताद्यवस्थानामन्योन्यस्याभावरूपत्वात्। ताश्चावस्था घटाऽऽदेर्व्यतिरिक्ताः। तस्यावस्थात्रयवत्त्वानुभवात्। एवं च घटस्य वर्तमानावस्थैवाभिव्यक्तिः, तदभावश्च घटस्यानागताद्यवस्थैवेति दिक्। तत्र सूक्ष्मतया कारणेष्वविभागः कार्यस्यातीतावस्थाऽऽख्यो लयः। स यदात्यन्तिकस्तदा पुनर्लीनस्य नोत्पत्तिरित्याद्यन्यत्र विस्तरः। एतत्सर्वकथनं कारणेनेश्वरेण कार्यस्याऽभेदसंपत्तये, तस्मिन् सत्येव ब्रह्मज्ञानात् सर्वज्ञानेन वैराग्यादनन्यभक्त्या भगवत्प्राप्तिसंभवादित्यास्तां विस्तरः ॥ ८ ॥

सच्चित्सत्यसुखाऽद्वयं सुविमलं ज्ञात्वा धिया निर्भिया
प्रेम्णि प्राप्तरसोऽभवद्भगवतस्तृप्ताऽन्त इत्थं मुनिः ॥
शाण्डिल्यः परमाऽनुरक्तिमधिपे संसूत्रयामास तद्
व्यातेने हरितुष्टये मुनिवरो नारायणाऽऽख्यो यतिः ॥१॥
अधीत्य सर्वशास्त्राणि वासुदेवदयानिधेः ।
तीर्थश्रीरामगोविन्दकृपयैषा कृतिर्मम ॥ २ ॥
रामगोविन्दतीर्थानां गुरूणामन्वहं मम ।
तीर्थश्रीवासुदेवानां चरणौ शरणं सदा ॥ ३ ॥

इति श्रीमत्परमहंसपरिव्राजकाऽऽचार्यवर्यश्रीनारायणतीर्थकृतायां भक्तिचन्द्रिकायां तृतीयाध्याये द्वितीयाह्निकम् ।

समाप्ता चेयं भक्तिचन्द्रिका

परिशिष्टम्

(१)

शाण्डिल्य भक्तिसूत्राणि

(२)

भक्तितत्त्व-विवरणम्

(१) पुराणे त्रिविध-भक्ति-विवरणम्

(२) नारद-भक्तिसूत्रम्

(३) भक्ति-मीमांसा

(४) परभक्ति-सूत्रम्

परिशिष्टम्–१

शाण्डिल्यशतसूत्रीयं भाष्यम्

परमेश्वरो जयति

प्रपद्य परमं देवं श्रीस्वप्नेश्वरसूरिणा ।
शाण्डिल्यशतसूत्रीयं भाष्यमाभाष्यतेऽधुना ॥ १ ॥
गोविन्दचरणद्वन्द्वमधुनो महदद्भुतम् ।
यत्पायिनो न मुह्यन्ति मुह्यन्ति यदपायिनः ॥ २ ॥

जीवानां ब्रह्मभावापत्तिर्मुक्तिरिति वक्ष्यते । जीवाश्च ब्रह्मणोऽत्यन्तमभिन्ना इति तेषां संसारस्त्रिगुणात्मकान्तःकरणोपाधिकृतो न साहजिकः स्फटिकस्येव जपादिसन्निधिकृतं लौहित्यादिकम् । स चौपाधिकत्वादेव न ज्ञानेन निवर्त्तनीयः, किन्तूपाध्युपधेययोरन्यतरहानेन तत्सम्बन्धहानेन वा । नहि निपुणतरदर्शनेनाप्युपाधियोगे स्फटिकलौहित्यभ्रमनिवृत्तिरस्ति । तथेह न सर्वसत्तास्फुरणात्मनो हानिः सम्भवति, न वा सम्बन्धस्य तस्य तदुभयस्वरूपानतिरेकात् परिशेषादुपाधिहानादेव भ्रमनिवृत्तिर्नात्मज्ञानात् ; उपाधिहाने च करणान्तरमन्वेष्टव्यम् , तच्चेश्वरभक्तिरेवालौकिकत्वाच्छ्रुतिस्मृतिसिद्धा । तथा (गी० अ० १४ । श्लो० ६) ।

तत्र सत्त्वं निर्मलत्वात् प्रकाशकमनामयम् ।
सुखसङ्गेन बध्नाति ज्ञानसङ्गेन चानघ ॥ १ ॥
रजो रागात्मकं विद्धि तृष्णासङ्गसमुद्भवम् ।
तन्निबध्नाति कौन्तेय कर्मसङ्गेन देहिनम् ॥ २ ॥
तमस्त्वज्ञानजं विद्धि मोहनं सर्वदेहिनाम् ।
प्रमादालस्यनिद्राभिस्तन्निबध्नाति भारत ॥ ३ ॥

इत्युपक्रम्य,

मां च योऽव्यभिचारेण भक्तियोगेन सेवते ।
स गुणान् समतीत्यैतान् ब्रह्मभूयाय कल्पते ॥

इत्युतसंहरन् भगवानेवात्मभक्तेस्त्रिगुणात्मकान्तःकरणलयपूर्वकब्रह्मानन्दावाप्तिलक्षणमुक्तिहेतुतामाह—न चात्मज्ञानवैयर्थ्यम् ; अश्रद्धामलक्षालनेन भक्तावुपयोगात् । न त्वपरोक्षान्तःकरणरूपोपाधिधर्माध्यासनिराससमर्थं ज्ञानम् । अत एव (गी० अ० १४ । श्लो० १९) "गुणेभ्यश्च परं वेत्ति मद्भावं सोऽधिगच्छति" इति; (गी०।अ० १४। श्लो० ४१) "ज्ञानसञ्छिन्नसंशयम्" इत्यादावयमर्थः स्फुट एव, न चाज्ञानकृतः संसारो येन ज्ञानान्निवृत्तिरपि वक्तुं शक्या प्रमाणाभावात् , रजतावयवादेः कारणस्याभावादज्ञातशुक्तित उत्पत्त्यसम्भवाच्च । अपि च (छान्दो०, पृ० ३९२) "कुतस्तु खलु सौम्यैवं स्यादसतः सज्जायेत" इति श्रुतिः कार्यसत्तया कारणसत्तां बोधयन्ती संसारस्य सत्यत्वमेवाह । नितराञ्च (छान्दो० पृ० २०४) सत्यसंकल्प इत्यादिना परमेश्वरसर्गस्य, नापि भगवान् बादरायणः क्वचिदपि सूत्रे संसारस्याज्ञानकल्पितत्वमुक्तवान् ; प्रत्युत स्वप्नसृष्टिनिराकरणेन जाग्रत्सृष्टेः सत्यत्वम् । न च दृष्टान्तार्थम् , तन्मानाभावात् । सुखादिधर्माणां तु साहजिकत्त्वं नोपपद्यते ; सुखादयो न साक्षादात्मविकारा आत्मनि प्रतीयमानत्वाद् गौरत्वादिवत् । सुखाद्युपलब्धिः सकरणिका क्रियात्वादित्यत्र लाघवात् समवायेनैव करणजन्यत्वं युज्यते श्रोत्रजन्यत्वमिव शब्दस्य । सुखादयः करणसमवेताः, अनादीन्द्रियग्राह्यगुणत्वात् शब्दवदिति परमते । उभयमते स्पर्शशून्येन्द्रियग्राह्यगुणत्वात् । आत्मसिद्धिस्तु सर्वसत्ताप्रकाशकतयेति । सर्वमेतद् द्वितीये तृतीये स्फुटीभविष्यति । तस्मात् पुरुषार्थहेतुत्वाद्धर्मस्येव भक्तेर्मीमांसाविवित्सयेदं सूत्रम्—

अथातो भक्तिजिज्ञासा ॥ १ ॥

अथेत्यधिकारार्थः, नानन्तर्यार्थः; आनन्तर्यं हि न स्वाध्यायाध्ययनस्य

आनिन्द्ययोन्यधिकृतेर्वक्ष्यमाणत्वात् । नापि शमादिसम्पत्त्यर्थः, मुमुक्षामात्रस्य भक्त्यधिकारत्वात् । यथा मन्त्रवर्णः (श्वेता०, पृ० ३६९)—

यो ब्रह्माणं विदधाति पूर्वं
यो वै वेदांश्च प्रहिणोति तस्मै ।
तं ह देवमात्मबुद्धिप्रकाशं
मुमुक्षुर्वै शरणमहं प्रपद्ये ।। इति ।

न च मङ्गलार्थोऽपि तदुच्चारणमात्रस्य मङ्गलत्वात् । तथा च मुमुक्षुणा भक्तिविचारः कर्तव्य इत्यर्थः । जिज्ञासया विचार आक्षिप्यते—यद्यपि परमेश्वरानुरक्तिरूपाया भक्तेर्न धर्मवत् कृतिसाध्यत्वम् न वा ब्रह्मवद्ज्ञेयत्वम् ; तथापि तस्याः स्वकारणपूर्वसुकृतैहिकगौणभक्त्यादिसम्पन्नाया अपि नेयं भक्तिः, नेयं निःश्रेयसार्था, नेयमुत्तमविषयेत्यादिकुतर्ककवलनेन निवृत्तिरपि भवति, यथा पत्यौ पत्न्याः । तन्निरासमुखेनैव तन्मीमांसाया भक्तावुपयोग इति, अतः शब्देनोच्यते—यतः कुतर्कनिरासोऽपेक्षणीयः, अतस्तज्जिज्ञासेति । अत एव (विष्णुपु०, अंशे १, अ० २०, श्लो० १६)—

नाथ योनिसहस्रेषु येषु येषु व्रजाम्यहम् ।
तेषु तेष्वचला भक्तिरच्युतास्तु सदा त्वयि ॥ इति ।

तदविच्युतिप्रार्थनमपेक्षितत्वादिति, अत एव च फलवद्भक्त्यङ्गमपि विचारः फलवानेवेति ॥ १ ॥

अथ तस्या लौकिकाकारतामन्तरेण बुद्ध्यनारोहान्न विचारविषयत्वमतस्तल्लक्षणमुच्यते—

सा पराऽनुरक्तिरीश्वरे ॥ २ ॥

अत्र सा परेति लक्ष्यनिर्देशः, शेषं लक्षणम् । परेति गौणीं व्यावर्तयति । ईश्वर इति प्रकृताभिप्रायम् । आराध्यविषयकरागत्वमेव सा । इह तु परमेश्वरविषयकान्तःकरणवृत्तिविशेष एव भक्तिस्तद्वैशेष्यं च

लौकिकानुरागादौ सुग्रहम्। यथोक्तं परभक्तिमता प्रह्लादेन (विष्णुपु०, अंशे १, अ० २०, श्लो० १७)—

या प्रीतिरविवेकानां विषयेष्वनपायिनी।
त्वामनुस्मरतः सा मे हृदयान्मापसर्पतु॥

अत्र प्रीतिपदेन सुखनियतो राग एव लक्षितः, अन्यथा प्रीतेः सुखरूपाया निर्विषयत्वेन विषयसप्तमी न स्यात्, तस्याः सुखज्ञानरूपत्वेऽपि तज्ज्ञानस्य सुखविषयत्वाद्विषयविषयत्वासम्भवात्। तस्मादनुरक्तिरेव सविषयिणी लक्षिता। न च विषयजन्यप्रीतिरर्थः, जनकसप्तम्या अननुशासनात्। किञ्च "अच्युतास्तु सदा त्वयि" इत्यत्र भक्तेरीश्वरविषयतासिद्धौ प्रीतिपदेनापि तदेकवाक्यतया सैवोच्यते। पूर्वं प्रतिजन्म भक्तिप्रार्थनम्, इह तु विषयरागदृष्टान्तेन तस्या एव सर्वथाऽप्यपरिहार्यत्वप्रार्थनमिति विशेषः। विषयजन्यप्रीतिरपि रागं विना न सम्भवतीति रागावश्यकत्वम्। तथा च पातञ्जलसूत्रम् (पा० २, सू० ७)—"सुखानुशयी रागः" इति। तस्यैव वक्ष्यमाणलिङ्गेषु व्यापनाल्लाघवाच्च भक्तित्वम्; न तु कचित् स्मरणस्य, कचित् कीर्तनादेः, अननुगमात्। न च तज्ज्ञानस्य तत्त्वम्, द्वेषादिमत्स्वपि तत्प्रसङ्गात्। नाप्याराध्यत्वेन ज्ञानम्, सा पूजानमस्काराद्याराधनास्वननुगमात्। अपि च बलाद्भयाद्वा नमस्कार्यत्वादिज्ञानवत्यपि भक्तोऽयमनुरक्तोऽयमिति व्यवहारापत्तेः। अनुरागादिसहिताराध्यत्वज्ञानमिति चेत्, अनुराग एवास्तु। अत एव (गी० अ० १०, श्लो० ९)—

मच्चित्ता मद्गतप्राणा बोधयन्तः परस्परम्।
कथयन्तश्च मां नित्यं तुष्यन्ति च रमन्ति च॥ १॥
तेषां सततयुक्तानां भजतां प्रीतिपूर्वकम्।
ददामि बुद्धियोगं तं येन मामुपयान्ति ते॥ २॥

इत्यादौ तद्गतचित्तप्राणादीनां भजनमुक्तम्, नाराध्यत्वेन ज्ञानवतामेव। अत एव च कृष्णस्य कमनीयाकृतिदर्शनेनानुरक्तानां गोपतरुणीनामपि

भक्तिफलं मुक्तिः स्मर्यते। अनुस्तु न लक्षणान्तर्गतः, किन्तु भगवन्महिमादिज्ञानादनु पश्चाज्जायमानत्वादनुरक्तिरित्युक्तम्। ननु पित्रादिगोचरानुरागस्यापि प्रकृतभक्तित्वं प्रसज्येत, जगत एव परमेश्वरात्मत्वात्। अथ विकाराविशिष्ट एव तथात्वं वाच्यम्; तथापि गोपीप्रभृतीनां प्रादुर्भावावच्छिन्नैश्वरभक्तावव्यापकम्। उच्यते—"जीवोपाध्यनवच्छिन्नचेतनविषयिणी अनुरक्तिरेव सा" इति। एवञ्च प्रदुर्भावावच्छिन्ने परिपूर्णे च रक्तिः संगृहीता भवति। २॥

तत्संस्थस्यामृतत्वोपदेशात् ॥ ३ ॥

तस्मिन्नीश्वरे संस्था भक्तिर्यस्य स तथोक्तः, तस्यामृतत्वं फलमुपदिश्यते (छा०, पृ० १३७)—ब्रह्मसंस्थोऽमृतत्वमेतीति। तस्मान्निष्फलत्वगौणफलत्वनिबन्धना तदजिज्ञासा परिहृता भवतीति ॥ ३ ॥

ज्ञानमिति चेन्न द्विषतोऽपि ज्ञानस्य तदसंस्थितेः ॥४॥

ननु ब्रह्मसंस्थाशब्देन ब्रह्मज्ञानमेवोच्यते, न तु तद्भक्तिः। तथा चामृतत्वफलं तस्यैवेति चेद् ब्रूषे। नैष दोषः। संस्था भक्तिरेव न ज्ञानम्, द्विषतस्तज्ज्ञानवतोऽपि तत्संस्थत्वव्यवहाराभावात्। राजाद्यनुरक्ताः खल्वमात्यमित्रादयस्तत्संस्था इति व्यपदिश्यन्ते, न पुनः प्रतिपक्षभूपालाः। शब्दार्थनिर्णयो हि लोकवदेव वेदेऽपीति। अत एव चिरकालिकोपाख्याने—

विमृश्यते न कालेन पत्नीसंस्थाव्यतिक्रमः।
सोऽब्रवीच्च भृशं तप्तो दुःखेनाश्रूणि वर्तयन्॥

इत्यनेन पतिभक्त्यतिक्रम उक्तः। तस्मात् संस्था भक्तिरिति। एवञ्च (ब्रह्मसू०, अ० १, प० ७)—तन्निष्ठस्य मोक्षोपदेशादिति। बादरायणीयसूत्रस्याप्ययमेवार्थोऽध्यवसेय इति ॥ ४ ॥

तयोपक्षयाच ॥ ५ ॥

तया भक्त्या मुक्तिं प्रति ज्ञानमुपक्षीणं यस्मात्प्रकार उक्तयुक्तिसमुच्चयार्थः। (गी०, अ० ७, श्लो० १३)—

देवान् देवजनो यान्ति मद्भक्ता यान्ति मामपि। इत्यादि।

तथा प्रह्लादं प्रति भगवद्वाक्यम् (विष्णुपु० अंशे १, अ० २०, श्लो० २१)—

यथा ते निश्चलं चेतो मयि भक्तिसमन्वितम्।
तथा त्वं मत्प्रसादेन निर्वाणमपि यास्यसि॥

इति स्थितम्।

ननु (श्वे०। पृ० ३२७)—"तमेव विदित्वातिमृत्युमेति नान्यः पन्था विद्यतेऽयनाय" इत्यत्र वेदनफलं मुक्तिः श्रुता तद्विरोधेन स्मृतीनामन्यार्थत्वं स्यादिति चेन्न, अत्रापि तयैवोपक्षयात्। तथाह्यतिमृत्युपदं न मुक्तौ रूढम्, किन्तु यस्यां सत्यां मृत्योरतिक्रम इति व्युत्पत्त्या तदपेक्षायां यतो भक्तेर्मृत्य्वतिक्रम इति व्युत्पाद्य भक्तिमेवातिमृत्युपदेनाभिधत्ताम्; उपपदविभक्त्यर्थापेक्षया कारकविभक्त्यर्थस्य बलवत्त्वात्, (गी०, अ० १२, पृ० ७)—

तेषामहं समुद्धर्ता मृत्युसंसारसागरात्।
भवामि न चिरात् पार्थ मय्यावेशितचेतसाम्॥

इत्यादिना भक्तितो मृत्य्वतिक्रमप्राप्तेः। मन्त्रश्च भवति (तैत्तिरीयमन्त्रभागे)—"त्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्द्धनम्। उर्व्वारुकमिव बन्धनान्मृत्योर्मुक्षीय मामृतात्" इति। अत्र यजनं भक्तिः, तथैव तत्कल्पव्याख्यानात्। न चास्यां श्रुतौ भक्तेरसन्निधानं मुक्तावपि तुल्यत्वात्। तस्मादनपायिश्रुत्या ज्ञानस्योपक्षय एव प्रतीयत इति ॥ ५ ॥

ननु तथापि भक्ते रागरूपत्वे किं कारणमित्यपेक्षायामाह—

द्वेषप्रतिपक्षभावाद्रसशब्दाच्च रागः ॥ ६ ॥

भक्तिः खलु राग एव भवितुमर्हति, कुतः ? द्वेषविरोधित्वात्। लोके हि द्वेष्टायं भक्तोऽयमिति मिथो विरुद्धधर्मवति व्यवह्रियते, तत्र द्वेषविरोधी च राग एव प्रसिद्धः, न ज्ञानादिः। एवञ्च वैष्णवे भगवति शिशुपालस्य द्वेषानुबन्धमभिधाय अयं हि भगवान् कीर्तितः संस्मृतश्च द्वेषानुबन्धेनापि अखिलसुरासुरदुर्लभं फलं प्रयच्छति, किमुत सम्यग्भक्तिमतामित्युक्तम्। तथा चात्रिस्मृतौ—

विद्वेषादपि गोविन्दं दमघोषात्मजः स्मरन्।
शिशुपालो गतः स्वर्गं किं पुनस्तत्परायणः॥ इति।

तत्रापि द्वेषविरोधित्वेन भक्तेरभिधानात्। तथा च गीतासु (गी०, अ० १६, श्लो० १८)—

मामात्मपरदेहेषु प्रद्विषन्तोऽभ्यसूयकाः।
तानहं द्विषतः क्रूरान् संसारेषु नराधमान्॥
क्षिपाम्यजस्रमशुभानासुरीष्वेव योनिषु।
आसुरीं योनिमापन्ना मूढा जन्मनि जन्मनि॥
मामप्राप्यैव कौन्तेय ततो यान्त्यधमां गतिम्। इति।

तद्विरोधिनी च भक्तिरीश्वरविषयैवानुरक्तिरिति युज्यते। किञ्च, (तैत्ति०, पृ० ९९)—रसं ह्येवायं लब्ध्वानन्दी भवतीति शब्दाद् ब्रह्मानन्दाविर्भावमुक्तेर्ब्रह्मगोचरस्य रसस्य हेतुतावगम्यते। रसश्च रागः। (गी०, अ० २, श्लो० ५६)—

रसवर्ज्जं रसोऽप्यस्य परं दृष्ट्वा निवर्तते।

इत्यादौ प्रसिद्धः। अत्र रसो विषयरागः। अत एव च रामलक्ष्मणादीनां स्वर्लोकारोहणमुक्त्वा येऽपि तेषु भगवदंशेष्वनुरागिणः कोशलनगरजानपदास्तेऽपि तन्मनसस्तत्सलोकतामापुरिति साक्षादेव भक्तावनुराग-

शब्दः प्रयुक्त इति। तस्मादपि न ज्ञानम्, किन्त्वनुरागरूपैव भक्तिर्निःश्रेयसफलेति। ननु द्वेषविरोधित्वं न रागत्वे लिङ्गम्; उदासीनत्वेनानैकान्त्यादिति चेत्, उच्यते—"द्वेषकार्यं निवृत्तिस्तद्विरोधिनी प्रवृत्तिः" इति। भवति च भक्तानां भजनीयानुवर्तनादौ प्रवृत्तिस्तद्विरोधिनां तदनुवर्तनादौ निवृत्तिः। एवञ्च कार्यमुखेन विरोधमभिप्रेत्य द्वेषविपक्षेत्युक्तम्। तथा च प्रयोक्तव्यं भक्तिर्भजनीयगोचररागरूपा तदनुवर्तनादिहेतुहितसाधनताधीभिन्नात्मविशेषगुणत्वाद् यन्नैवं तन्नैवं यथा द्वेषः। रागोत्कर्षेण तदनुवर्तनाद्युत्कर्षस्य दृष्टत्वाच्च। किञ्च यो यस्मिन् भक्तस्तत्र तस्यौदासीन्याभावेऽवगते भक्तिस्तादृशानुवर्तनाद्यनुकूलद्वेषविरोधिगुणरूपा अनुवर्तनहेत्वात्मविशेषगुणत्वाद्धितसाधनताधीवदिति हितसाधनताधीत्वबाधसहकारेण परिशेषाद् रागत्वसिद्धिः। किमुत भक्तिमतामित्येतत्कैमुतिकन्यायो विरोधिन्येव द्रष्टव्यः। (गी०, अ० ९, श्लो० ३२)—

मां हि पार्थ व्यपाश्रित्य येऽपि स्युः पापयोनयः।

"किं पुनर्ब्राह्मणाः पुण्याः" इत्यादौ च। एवं (गी० अ०। १६। श्लो० १८)—"मामात्मपरदेहेषु" इत्यनेन द्वेषस्य संसारहेतुत्वात् तद्विरोधिगुणो जीवोपाधिपरिहारेण परात्मगोचरो राग एव भक्तिरूपः संसारनाशहेतुः। एतदेवोक्तं मामप्राप्यैवेति। चकारात् पुलकादिरागलिङ्गेनापि रागत्वम्। प्रसिद्धं हि "पुलकाञ्चितेन कथयति मय्यनुरागं कपोलेन" इत्यादौ। भक्तेर्गुणान्तरत्वे तु पृथग् लिङ्गताकल्पने गौरवात्। स च रागः केषाञ्चिदिष्टसाधनताज्ञानजन्योऽपि यागादिवदिच्छारूप एव। अस्माकं तु "प्रीणाम्यनुरज्यामि नेच्छामि" इत्यादिप्रतीतेरागः पृथगेव द्वेषवत्। इच्छाया असिद्धमात्रविषयत्वाद्रागस्य सिद्धासिद्धविषयात्वाच्च। प्रत्युत तस्येच्छात्वादिव्याप्यत्वकल्पनागौरवाच्चेति दिक्। तस्मान्न तल्लक्षणासिद्धिरिति ॥ ६ ॥

ननु भक्तिः क्रियात्मिका सा च निःश्रेयसाय न क्षमते (तैत्ति० आरण्य०; खिलप्रश्ने ऋक् २१) "न कर्म्मणा न प्रजया धनेन त्यागेनैकेऽमृतत्वमानशुः" इत्यादिश्रुतिभ्य इत्याशङ्कां परिहरन्नाह—

न क्रिया कृत्यनपेक्षणाज्ज्ञानवत् ॥ ७ ॥

सा भक्तिर्न क्रियात्मिका भवितुमर्हति; प्रयत्नानुविधानाभावात्। यन्न प्रयत्नानुविधायि तन्न क्रियात्मकम्, यथा ज्ञानम्। तद्धि प्रमाणसम्पत्त्यधीनं न पुरुषेण स्वेच्छया कर्तुमकर्तुमन्यथा कर्तुं शक्यते। तथा भक्तिरपि। नहि रागिणां प्रमदापुत्रादिविषयिणी पुंव्यापारेण तथा तथा भवति भक्तिः, किन्तु पूर्वसुकृतगौणभक्त्यादिसाधनाधीनेति ॥ ७ ॥

अत एव फलानन्त्यम् ॥ ८ ॥

यतः सा न क्रियात्मिका अत एव तत्फलस्य निःश्रेयसस्यानन्तत्वमुपपद्यते। अन्यथा (छां०, पृ० ५३८)—"तद्यथेह कर्मजितो लोकः क्षीयते एवमेवामुत्र पुण्यजितो लोकः क्षीयते" इत्यनेनामृतत्वस्यापि क्षयित्वं प्रसज्येतेति ॥ ८ ॥

तद्वतः प्रपत्तिशब्दाच्च न ज्ञानमितरप्रपत्तिवत् ॥ ९ ॥

भवति हि भगवद्वाक्यम् (गी०, अ० ७, श्लो० १९)—

बहूनां जन्मनामन्ते ज्ञानवान् मां प्रपद्यते।
वासुदेवः सर्वमिति स महात्मा सुदुर्लभः॥ इति।

ज्ञानवतः प्रपत्तिरुक्ता। भक्तेर्ज्ञानहेतुत्वे नेदमुपपद्यते इतरप्रपत्तिवदिति, यथा तदनन्तरम् (गी०, अ० ७; श्लो० २०)—

कामैस्तैस्तैर्हृतज्ञानाः प्रपद्यन्तेऽन्यदेवताः।

इत्यनेन देवतान्तरप्रपत्तिनिन्दामुखेनैव प्रपत्तिः स्तूयते। तत्र देवताभक्तेरेव प्रपत्तिशब्देन कथनं न तज्ज्ञानस्य। तस्या एव प्रपत्तेरुभयत्र प्रत्यभिज्ञानादिति। चकाराज्ज्ञानानन्तर्य्यश्रवणमपि ज्ञानत्वाभावे निदानम्। यथा (गी० अ० १५, श्लो० १९)—

यो मामेवमसंमूढो जानाति पुरुषोत्तमम्।
स सर्वविद्भजति मां सर्वभावेन भारत॥ इति।

तथा (गी० अ० ९ श्लो १३)—

भजन्त्यनन्यमनसो ज्ञात्वा भूतादिमव्ययम्।
इति मत्वा भजन्ते मां बुधा भावसमन्विताः॥

इति च, तस्मान्न ज्ञानात्मिका। यद्यपि रागत्वेनैव ज्ञानभेदः सिद्धस्तथापि भक्तिशब्दो ब्रह्मज्ञाने गौण इति शङ्कानिरासार्थमेतत्। इदं तु चिन्त्यते, भगवद्गीतावाक्यानि न शब्दविधया वेदवत् प्रमाणम्, किन्तु भारते स्मृतित्वेन। तथा च कथं शब्दादिति निर्देशः। अत्रैकेऽनुमितशब्दादिति व्याचक्षते। अत्रोच्यते—अदृष्टार्थकभगवद्वाक्यत्वमेव वेदत्वम्, तच्च गीतास्वप्यविशिष्टम्। अत एव भगवद्गीतासूपनिषत्स्विति दृश्यते। केवलं त एव श्लोका व्यासेन निबद्धाः। तथा च पुराणान्तरम्—

गीता सुगीता कर्तव्या किमन्यैः शास्त्रविस्तरैः।
या स्वयं पद्मनाभस्य मुखपद्माद्विनिसृताः॥

न च शूद्राणामश्रवणप्रसङ्गो भारतश्रवणाभ्यनुज्ञानेनैव तदुपपत्तेः प्रणवादिस्तुत्यादिवत्। तद्विहायेति चेन्न, लक्षताऽपरिपूर्तेः। तथा चोक्तमाचार्यैः—

तानेव वैदिकान् मन्त्रान् भारतादिनिवेशितान्।
स्वाध्यायनियमं हित्वा लोकबुद्ध्या प्रयुञ्जते॥ इति॥९॥

इत्याचार्य्यस्वप्नेश्वरविद्वद्वरविरचिते शाण्डिल्यशतसूत्रीयभाष्ये
प्रथमाध्यायस्य प्रथममाह्निकम्॥१॥॥*॥

—:०:—

एवममृतत्वं प्रत्यनन्यथासिद्धायां भक्तौ लक्षितायां ज्ञानयोगभक्तीनामङ्गप्रधानभावविवेकाय द्वितीयाह्निकस्यारम्भः।

सा मुख्येतरापेक्षितत्वात्॥१०॥

आह्निकसमाप्तावुक्तस्य पुनः स्मरणाय सेति निर्देशः। सा परा भक्तिर्मुख्या प्रधानम्; इतरैरात्मज्ञानयोगादिभिः स्वोपकार्यतयापेक्षि-

त्वादित्यर्थः । छान्दोग्ये (पृ० ५१६)—"यो वै भूमा तत्सुखम्" इत्याद्युपक्रम्याम्नायते । आत्मैवेदं सर्वमिति स वा एष एवं पश्यन्नेवं मन्वान एवं विजानन्नात्मरतिरात्मक्रीड आत्ममिथुन आत्मानन्दः स स्वराड् भवतीति तत्रात्मरतिरूपायाः परभक्तेः पश्यन्निति दर्शनमप्रियत्वादिभ्रमनिरासमुखेनाङ्गं भवति । यथा दण्डी प्रैषमन्वाह प्राचीनावीती दोहयति अभिजानन् जुहोति धनवान् सुखवानित्यादौ दण्डाद्यङ्गम्, तथा दर्शनमपि रतेरङ्गं मननविज्ञानयोरुक्तप्रदर्शनार्थतया न्यायप्राप्तयोरनुवादः। एवमात्मक्रीडादेरतिनैयत्यादर्थप्राप्तोऽनुवाद एव, अन्यथा रत्युद्देशेन दर्शनादिविधौ, दर्शनाद्युद्देशेन वा रत्यादिविधौ वाक्यानि भिद्येरन् । तस्मात् (पूर्वमीमांसायाम्, अ० ३, पा० १, सू० २)—"शेषः परार्थत्वात्" इति न्यायाद्दर्शनमङ्गमिति । अत एव भगवान् मनुरपि (महाभार० शान्ति०, अ० १९४, श्लो० ७१११+७११२)—

यस्त्यक्त्वा प्राकृतं कर्म नित्यमात्मरतिर्मुनिः ।
सर्वभूतात्मभूतात्मा स्याच्चेत् परतमा गतिः ॥

इत्यनेनात्मरतेः प्राधान्यमाहेति ॥ १० ॥

प्रकरणाच्च ॥ ११ ॥

प्रकरणं रतेरेव फलवत्त्वात् तस्यास्तत्प्रकरणस्थं दर्शनमङ्गं भवितुमर्हतीति ॥ ११ ॥

दर्शनफलमिति चेन्न, तेन व्यवधानात् ॥१२॥

अथ दर्शनस्यैव फलं स्वाराज्यलक्षणममृतत्वं तथा च तस्यैव प्रकरणमिति वैपरीत्यमिति चेन्न, तेन तच्छब्देन व्यवधानात् । (छां०, पृ० ५१६-१७)—"स स्वराड् भवति" इत्यत्र तच्छब्देन सन्निकृष्टात्मरतिमानेवोपस्थाप्यते, न विप्रकृष्टः पश्यन्निति व्यवहितोपस्थितौ कारणाभावात् । प्रकरणमेव कारणमिति चेन्न अन्योन्याश्रयात् ॥ १२ ॥

दृष्टत्वाच्च ॥ १३ ॥

दृष्टं हि लोके सौन्दर्यादिज्ञानस्य तरुण्यास्तरुणे रतिहेतुत्वम्, न तु रतेर्ज्ञानहेतुत्वमिति दृष्टोपकारत्वादप्यङ्गत्वमवसीयते। दृष्टं च प्रकृतेर्निष्करुणत्वाल्पमहिमत्वाप्रियत्वादिज्ञानं मनोमालिन्यकारणं भूतेषु करुणाबहुलाव्याहतैश्वर्यातिशयितरूपाश्रय आत्मेति ज्ञानान्मालिन्यनिवृत्तिस्ततः परा भक्तिरिति। अत एव गीयते (गी०, अ० ५, श्लो० १७)—

तद्बुद्धयस्तदात्मानस्तन्निष्ठास्तत्परायणाः।
गच्छन्त्यपुनरावृत्तिं ज्ञाननिर्धूतकल्मषाः॥ इति।

तथा आयुर्वेदेऽपि (अष्टाङ्गहृदये, अ० १, श्लो० २३)।

धीधैर्यात्मादिविज्ञानं मनोदोषौषधं परम्। इति ॥ १३ ॥

अत एव तदभावाद्वल्लवीनाम् ॥ १४ ॥

यत एव ज्ञानं दृष्टोपकारकमङ्गम्, अत एव दृष्टोपकारं निरस्य मनोमालिन्यादिबाधात् प्रधानभगवदनुरागमात्रेण वल्लवीनां मुक्तिः स्मर्यते। यथा (विष्णुपुराणे, अंशे ५, अ० १३, श्लो० १४-१५)—

तच्चिन्ताविपुलाह्लादक्षीणपुण्यचया सती।
तदप्राप्तिमहादुःखविलीनाशेषपातका॥
चिन्तयन्ती जगत्सूतिं परब्रह्मस्वरूपिणम्।
निरुच्छ्वासतया मुक्तिं गतान्या गोपकन्यका॥ इति।

अत्र सुखदुःखलिङ्गेनानुरागोऽनुमीयते, न मुक्तिरिति वाक्यार्थः। द्वारबाधादनवहतकृष्णलेनापि कर्मणा फलसिद्धिरिव तासां रागान्मुक्तिस्तदप्यवगम्यते ज्ञानमङ्गमेव, प्रधानत्वे तु तदभावे फलं न स्यात्, चिन्ता च न ब्रह्मात्मैक्यज्ञानं तत्कारणश्रवणमननाद्यसम्भवात्, किन्त्वनुरागनियतानुस्मृतिरेव। न चायमर्थवादः, अपूर्वार्थत्वात् सन्निधौ विध्यभावाच्चेति ॥ १४ ॥

भक्त्या जानातीति चेन्नाभिज्ञप्त्या साहाय्यात् ॥१५॥

इदानीं श्रुतिविरोधेन प्रकरणस्थानलिङ्गबाधमाक्षिप्य समाधीयते। यथा श्रुतम् (गी०, अ० १८, श्लो० ५५)

भक्त्या मामभिजानाति यावान् यश्चास्मि तत्त्वतः।
ततो मां तत्त्वतो ज्ञात्वा विशते तदनन्तरम् ॥ इति।

तत्र (तैत्तिरीयसं०, अ० १, प्र० ५, अनुवाक० ८)—"ऐन्द्र्या गार्हपत्यमुपतिष्ठते" इतिवत् कारकश्रुत्या बलीयस्या भक्तेर्ज्ञानहेतुत्वमवसीयते। यद्यपि दृष्टत्वादित्यनेन दृष्टोपकारे प्रत्यक्षगम्ये न श्रुतेरवकाशः, तथापि ब्रह्मविषयिण्या रतेर्ब्रह्मविषयज्ञानोपकार्यत्वं न प्रत्यक्षगम्यम्, किन्तु तरुण्यादे रतौ तथा दर्शनेन ब्रह्मगोचरायामप्यनुमातव्यम्। तथा च लिङ्गत्वे पर्यवसानादिति चेत्, न दोषः। तथा हि यदि केवलं जानातीति वदेन्न त्वेवम्, किन्त्वभिजानातीति। अभिज्ञा पूर्वज्ञातज्ञानमुच्यते। तथा भक्त्युपकारिपूर्वज्ञानं तत्फलरूपभक्तिप्रवर्तकम्। अनन्तरं यावत् तद्दार्ढ्यं भक्त्यैवाभिज्ञप्तिभावेनापेक्ष्यते व्रीह्यवहननेनावघातवदिति। कार्यसाहाय्यार्थमुक्तम्, ततो ज्ञानदार्ढ्येन भक्तिदार्ढ्ये सति विशत इति। तस्मान्नेयं श्रुतिः, किन्तु न्यायप्राप्तानुवाद इति। एतमेवार्थं स्फुटीकरोति ॥ १५ ॥

प्रागुक्तं च ॥ १६ ॥

भक्त्या मामित्यस्य पूर्वं ब्रह्मभूयाय कल्पत इत्यभिधाय (गी०, अ० १८, श्लो० ५४)—

ब्रह्मभूतः प्रसन्नात्मा न शोचति न काङ्क्षति।
समः सर्वेषु भूतेषु मद्भक्तिं लभते पराम् ॥

इत्युक्तम्। तस्य तु ज्ञानब्रह्मणो ज्ञानप्रयोजनाभावाद् युक्तमनुवादत्वमिति ॥ १६ ॥

एतेन विकल्पोऽपि प्रत्युक्तः ॥ १७ ॥

एतेन ज्ञानस्याङ्गत्वनिर्णयेन ज्ञानभक्त्योरत्र विकल्पपक्षोऽपि प्रत्युक्तः, निराकृत इति मन्तव्यम्। नह्यङ्गाङ्गिनोरेकत्र विकल्पो भवतीति। अपिशब्दात् समुच्चयोऽपीति ॥ १७ ॥

देवभक्तिरितरस्मिन् साहचर्यात् ॥ १८ ॥

क्वचिदेवं श्रूयते (श्वेताश्व०, पृ० ३७४)।

यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ।
तस्यैते कथिता ह्यर्थाः प्रकाशन्ते महात्मनः ॥ इति।

अत्र देवभक्तिरीश्वरेतरस्मिन् देवे मन्तव्या, कुतः ? गुरुभक्तिसाहचर्यात्। साहचर्यं हि नामृतफलायां भक्तौ घटते। इन्द्रादिदेवतास्त्वाराधिताः शुभवज्ज्ञानफलाय भवन्तीति साहचर्यमपि निर्णायकम्। साहचर्यादुलूकशब्दवदुक्तयुक्तेरुपष्टम्भकमेतत् ॥ १८ ॥

योगस्तूभयार्थमपेक्षणात् प्रयाजवत् ॥ १९ ॥

योगः पुनर्ज्ञानार्थं भक्त्यर्थं च भवति, समाहितमनस्कताया उभाभ्यामपेक्षणात्। ननु (पूर्वमीमांसायाम्, अ० ३, पा० १, सू० २१) "गुणानां च परार्थत्वादसम्बन्धः समत्वात् स्यात्" इति न्यायात् प्रधानाङ्गं योगः कथमङ्गाङ्गमित्यत आह—प्रयाजवदिति। यथा प्रयाजो वाजपेयाद्यङ्गम्, तदीयदीक्षणीयादेरप्यङ्गं तद्वत्। तदङ्गताबोधकप्रमाणाविशेषात्। केवलं ज्ञानार्थं योगानुष्ठानप्रसङ्गेन भक्तिमुपकरोतीति। एवं विषयवैराग्यमप्युभयार्थं मन्तव्यम् ॥ १९ ॥

ननु (योगे पा० १, सू० २३)—"ईश्वरप्रणिधानात्" इति पतञ्जलिस्मरणं दुरपह्नवम्, तत्र प्रणिधानाभिधेयस्य भगवद्भजनस्य समाधिसिद्ध्यर्थत्वमिति कथं भक्तेः प्राधान्यमित्यत आह—

गौण्या तु समाधिसिद्धिः ॥ २० ॥

तत्र प्रणिधानं गौणभक्तिरेव न प्रधानम्, तया समाधिसिद्धिरिति न स्मृतिविरोधोऽपीति। भवति च वाक्यशेषस्तत्रैव (योगे पा० १, सू० २७-२८)—"तस्य वाचकः प्रणवः। तज्जपस्तदर्थभावनम्" इति ॥ २० ॥

हेया रागत्वादिति चेन्नोत्तमास्पदत्वात् सङ्गवत् ॥ २१ ॥

योगशास्त्रप्रस्तावादिदं सूत्रम्। योगशास्त्रोक्तरागत्वाविशेषाद्भक्तिरपि मुमुक्षुणा हेयैव। तथा च सूत्रम् (यो०, पा० २, सू० ३)—"रागद्वेषाभिनिवेशाः क्लेशाः" इति। एवञ्चेदुच्यते—नैवं वाच्यम्; उत्तमास्पदत्वाद्भक्तेः परमेश्वरविषयत्वादिति यावत्। नहि रागत्वमात्रेण हेयत्वम्, किन्तु संसारानुबन्धिरागत्वेनैव। यथा सङ्गत्वमात्रेण न त्याज्यता, किन्त्वसत्सङ्गत्वेन तद्वत्। तथा चेश्वरभक्तिर्हेया रागत्वादित्यत्र संसारानुबन्धित्वं मोक्षाननुगुणत्वं चोपाधिः। न चासात्त्विकी सा, (गी०, अ० १७, श्लो० ४)—"यजन्ते सात्त्विका देवान्" इत्यादिना सात्त्विकत्वकीर्तनादिति ॥ २१ ॥

तदेव कर्मिज्ञानियोगिभ्य आधिक्यशब्दात् ॥ २२ ॥

तदेव भजनं मुख्यं तस्या भक्तेर्वा मुख्यत्वम्। एतत् सर्वथैव निश्चितम्, यस्मादेवं शब्द्यते (गी०। अ० ६। श्लो० ४६। ४७)।

तपस्विभ्योऽधिको योगी ज्ञानिभ्योऽपि मतोऽधिकः।
कर्मिभ्यश्चाधिको योगी तस्माद्योगी भवार्जुन ॥ १ ॥
योगिनामपि सर्वेषां मद्गतेनान्तरात्मना।
श्रद्धावान् भजते यो मां स मे युक्ततमो मतः ॥ २ ॥ इति।

अत्र विशेषणानां तपआदीनामाधिक्यनिबन्धनं विशेष्याणामाधिक्यं क्रमादिति मन्तव्यम्। न खल्वङ्गस्य मुख्यादाधिक्यमुपपद्यते, तस्माद् भक्तिः प्रधानमिति ॥ २२ ॥

श्रुत्यर्थेनापि तदुत्पत्तिपरिहारार्थं पठति—

प्रश्ननिरूपणाभ्यामाधिक्यसिद्धेः ॥ २३ ॥

अत्र कृत्स्नोऽपि द्वादशाध्याय उदाहरणम् (गी०, अ०, १२। श्लो० १–७)।

एवं सततयुक्ता ये भक्तास्त्वां पर्युपासते।
ये चाप्यक्षरमव्यक्तं तेषां के योगवित्तमाः ॥ १।

इति प्रश्नः।

मय्यावेश्य मनो ये मां नित्ययुक्ता उपासते।
श्रद्धया परयोपेतास्ते मे युक्ततमा मताः ॥ २ ॥
ये त्वक्षरमनिर्देश्यमव्यक्तं पर्युपासते।
सर्वत्रगमचिन्त्यं च कूटस्थमचलं ध्रुवम् ॥ ३ ॥
सन्नियम्येन्द्रियग्रामं सर्वत्र समबुद्धयः।
ते प्राप्नुवन्ति मामेव सर्वभूतहिते रताः ॥ ४ ॥
क्लेशोऽधिकतरस्तेषामव्यक्तासक्तचेतसाम्।
अव्यक्ता हि गतिर्दुःखं देहवद्भिरवाप्यते ॥ ५।
ये तु सर्वाणि कर्माणि मयि संन्यस्य मत्पराः।
अनन्येनैव योगेन मां ध्यायन्त उपासते ॥ ६ ॥
तेषामहं समुद्धर्ता मृत्युसंसारसागरात्।
भवामि न चिरात् पार्थ मय्यावेशितचेतसाम् ॥ ७ ॥

इति निरूपणम्। ताभ्यां भक्तेः प्राधान्यसिद्धेर्नार्थवादत्वमायाति। प्रश्ननिरूपणं हि निर्णयार्थं प्रसिद्धम्, न स्तुत्यर्थमिति। केवलाङ्गानुष्ठानेन क्लेशाधिक्यमेवेति ।। २३ ।।

श्रद्धाप्रसङ्गाद्भक्तेः श्रद्धारूपत्वशङ्कापिशाचीं निराकरोति—

नैव श्रद्धा तु साधारण्यात् ॥ २४ ॥

भक्तिर्न सर्वथा श्रद्धात्वेन शङ्कनीया, श्रद्धायाः कर्ममात्राङ्गत्वात्। न चैवमीश्वरभक्तिरिति ॥ २४ ॥

तस्यां तत्त्वे चानवस्थानात् ॥ २५ ॥

(गी० अ० ६ । श्लो० ४७)—

श्रद्धावान् भजते यो मां स मे युक्ततमो मतः ।

इति हि श्रुतम् । तत्र भक्तौ श्रद्धारूपायां श्रद्धाङ्गत्वे प्रतीतेऽनवस्थाप्रसङ्गात्, श्रद्धाया अनङ्गत्वात् । अन्यथा तस्यामपि श्रद्धान्तरमित्यनवस्थैव । तस्मादारम्भणीयारम्भे आरम्भणीयवदाचमने चाचमनवद्भक्तौ श्रद्धा नाङ्गं स्यात् । श्रद्धाभक्तिसमन्वित इति भेदेन कथनाच्च ॥ २५ ॥

ब्रह्मकाण्डं तु भक्तौ तस्यानुज्ञानाय सामान्यात् ॥ २६ ॥

ज्ञानप्राधान्ये ज्ञानकाण्डमित्युत्तरकाण्डप्रसिद्धिर्न स्यादिति मन्वानं प्रत्युच्यते । भक्त्यर्थं ब्रह्मकाण्डं श्रूयते, न ज्ञानार्थम् ; अज्ञातार्थज्ञापनस्य काण्डद्वयसामर्थ्यात् । अन्यथा धर्मज्ञानार्थं पूर्वकाण्डाम्नातमपि ज्ञानकाण्डं स्यात् । न च ज्ञानविधिः सम्भवति येन तत्प्राधानान्यादपि ज्ञानकाण्डं भवेदिति । तस्माद् ज्ञानकाण्डमिति भ्रमः, किन्तु ब्रह्मकाण्डमेव । अत एव (ब्रह्मसू०, पा० १, सू० १)—"अथातो ब्रह्मजिज्ञासा" इति सूत्रितम् । तत्तु भक्त्यर्थत्वाद्भक्तिकाण्डमपीति ॥ २६ ॥

इत्याचार्यस्वप्नेश्वरविद्वद्वरविरचिते शाण्डिल्यशतसूत्रीये भाष्ये

प्रथमाध्यायस्य द्वितीयमाह्निकम् ॥ २ ॥

समाप्तश्च प्रथमोऽध्यायः ॥ १ ॥

—:०:—

तस्या भक्तेः साक्षात् प्रयत्नानिष्पाद्यत्वेन निष्पत्त्यर्थं साधनान्तरापेक्षा तत्रान्तरङ्गसाधनं ज्ञानं बहिरङ्गसाधनान्यपरभक्तिप्रभृतीनि तेषां विवेकाय द्वितीयाध्यायारम्भः ।

बुद्धिहेतुप्रवृत्तिराविशुद्धेरवघातवत् ॥ २७ ॥

बुद्धिर्ब्रह्मप्रमितिः, सा यद्यपि कृत्यनिष्पाद्या; तथापि तद्धेतूनां श्रवणमनननिदिध्यासनादीनां तन्निष्पत्तयेऽनुष्ठानमावश्यकम् । तत्किं "सकृत्

कृते कृतः शास्त्रार्थः, इति न्यायात् सकृत् प्रवर्तते, उत यावद्भक्तिदार्ढ्यम् ? तत्रोच्यते—भक्तिपरिशुद्धिपर्यन्तं तत्प्रवृत्तिरावश्यकी, यथा व्रीहीनवहन्तीत्यनेन विहितव्रीह्यवघातस्य यावद्वैतुष्यमनुष्ठानं शास्त्रार्थः, तथा दृष्टोपकारकत्वान्मनोमालिन्यनिरासपर्यन्तं ज्ञानाद्यनुष्ठाने यतनीयमिति ॥ २७ ॥

तेषामङ्गानां यान्यङ्गानि तदनुष्ठानं तु न प्रसज्यत इत्यत्रोत्तरम् ।

तदङ्गानां च ॥ २८ ॥

तदङ्गानां गुर्वनुगमनवेदाविरोधितर्कानुसन्धानशमादीनामप्यनुष्ठानं युक्तम् । नह्यङ्गविकलान्यङ्गानि सैन्यसेनापतिवत् प्रधानोपकाराय क्षमन्ते ॥ २८ ॥

इदानीं बुद्धिविषयपरिशुद्धिश्चिन्त्यते—

तामैश्वर्यपरां काश्यपः परत्वात् ॥ २९ ॥

तां बुद्धिं परमेश्वरैश्वर्यादिमद्विषयिणीं निःश्रेयसफलां काश्यप आचार्यो मन्यते, कुतः ? जीवात्मभ्यः परत्वात् तैः स्वज्ञानाय परज्ञानस्यापेक्षितत्वात् । एतन्मते जीवब्रह्मणोरत्यन्तं भेद इति ॥ २९ ॥

आत्मैकपरां बादरायणः ॥ ३० ॥

बादरायण आचार्यः पुनः शुद्धात्मविषयिणीमेव मनुते, तथा च सूत्रं (ब्रह्मसू०, अ० ४, पा० १, सू० ३)—"आत्मेति त्ववगच्छन्ति ग्राहयन्ति च" इति । एतन्मते जीवब्रह्मत्वकल्पनाया मिथ्यात्वाच्छुद्धचिदात्ममात्रबुद्धेस्तत्त्वज्ञानत्वात् तदेव मुक्तिफलायेति ॥ ३० ॥

उभयपरां शाण्डिल्यः शब्दोपपत्तिभ्याम् ॥ ३१ ॥

शाण्डिल्य आचार्यस्तूभयपरामेव मन्यते, कुतः ? शब्दो हि वेदस्तथा ब्रूते (छां०, पृ० १, १०१)—"सर्वं खल्विदं ब्रह्म तज्जलानिति शान्त उपासीत । इत्युपक्रम्य एष म आत्मान्तर्हृदयमेतद्ब्रह्मैतमितः प्रेत्याभिसम्भवितास्मीति यस्य स्यादद्धा न विचिकित्सास्तीति ह स्माह शाण्डिल्यः"

इति विचिकित्स्य तदुभयविषयविदो ब्रह्माभिप्रायलक्षणप्रेमभक्तिजन्यब्रह्मसम्भवफलत्वमाह (तैत्तिरीयसं०, अ० ७, प्र० १, अनु० १०, मं० २)—"बबरः प्रावाहणिरकामयत" इतिवत् पूर्वशाण्डिल्यार्थत्वान्न नित्यानित्यसंयोगविरोधः। वस्तुतो वेदस्य भगवत्कर्तृकत्वमेव। श्रुतेरपि (तैत्तिरीयारण्यके, प्र० ३, अनु० ११, दशक ४)—

तस्माद्यज्ञात् सर्वहुत ऋचः सामानि जज्ञिरे।
छन्दाँसि जज्ञिरे तस्माद्यजुस्तस्मादजायत ॥ इति।

उपपत्तिश्च भवति—ब्रह्म खलु परमैश्वर्यवत्तया श्रुतं जीवस्वरूपतया च। तथा च श्रुतिः (तैत्तिरीयोप०, पृ० १२३)—"यतो वा इमानि भूतानि जायन्ते येन जातानि जीवन्ति यत् प्रयन्त्यभिसंविशन्तीति तद्विजिज्ञासस्व"। तथा (गी०, अ० १५, श्लो० ७)।

ममैवांशो जीवलोके जीवभूतः सनातनः इति।

तत्र किं कस्योपमर्दकम्। तस्मात् (छां०,पृ० ४४२)—तत्त्वमस्यादिवाक्येनोभयबोधनमेवोपपत्तिमदिति ॥ ३१ ॥

वैषम्यादसिद्धमिति चेन्नाभिज्ञानवदवैशिष्ट्यात् ॥ ३२ ॥

ननूभयविषयत्वमेव न सिद्ध्यति वैषम्यात्। विषमं हि जगत्कर्तृत्वादिविशिष्टे तदकर्तृत्वादिविशिष्टज्ञानमितिचेन्न; यतः सोऽयं देवदत्तः सोऽहमिति प्रत्यभिज्ञावदेकविशिष्टेऽपरवैशिष्ट्यमन्तरेण सामानाधिकरण्यस्य स्वरूपाभेदांशगोचरकत्वेन तदुपपत्तेः, विशिष्टवैशिष्ट्यबुद्धेरौत्सर्गिकत्वात्। अथ विशेष्यमात्रलक्षणया स्वरूपाभेदोपस्थितिरिति मतं तन्न; लक्षणया बोधस्य जघन्यत्वात्, लक्ष्योपस्थितौ तदवच्छेदकोपस्थितिहेतुसत्त्वाच्च। अन्यथा कदाचिच्छक्यतावच्छेदकमन्तरेणापि शक्यस्मृतिर्भवेदित्यास्तां तावत् ॥ ३२ ॥

नच क्लिष्टः परः स्यादनन्तरं विशेषात् ॥ ३३ ॥

न चैवं सति जीवोपाधिक्लेशादिमत्त्वमपि परमेश्वरे प्रसज्येतेति वक्तुं शक्यम् , उक्ताभेदबुद्ध्यनन्तरं क्लेशादेरात्मासम्बन्धित्वरूपविशेष-निर्णयादिति ॥ ३३ ॥

ऐश्वर्यं तथेति चेन्न स्वाभाव्यात् ॥३४॥

नन्वेवं क्लेशादिवदैश्वर्यं कर्तृत्वादिलक्षणं परमेश्वरस्य बाध्यते वैभवं त्वात्मनि प्रतीतत्वात् , न क्लेशादिवदिति चेन्न; कर्तृत्वादेः परमेश्वरस्य स्वाभाव्यात् । नहि वह्नेरुष्णस्वाभाव्यमन्यथा भवति । तस्मा-दस्वाभाविकत्वमुपाधिरिति । अत एव दर्पणादिप्रतिफलितबिम्बे भास्वति मालिन्यादिबाधेऽपि वृत्तिप्राकाश्यादिस्वभावस्याबाध एवेति ॥ ३४ ॥

ननु परमेश्वरस्य सत्यमैश्वर्यं जीवानां तु कथमागन्तुकः क्लेशादि-रित्यत्र हेतुमाह—

अप्रतिषिद्धं परैश्वर्यं तद्भावाच्च नैवमितरेषाम् ॥३५॥

नहि कस्यामपि श्रुतौ परमेश्वरस्यैश्वर्यं प्रतिषिद्धमस्ति येन प्रतिपन्न-मपि बाधितं स्यात् ; प्रत्युत (छां०, पृ० २०४)—सत्यसङ्कल्प इत्यादिना तस्य स्वाभाव्यमवगम्यते । न च जीवस्येव प्रतीतधर्मत्यागे कारणमस्ति, सदैवेश्वरत्वात् , सदैव मुक्तत्वात् । तदितरेषां तु जीवानां नैवं स्वाभाविकः क्लेशादिः । कस्मात् ? तद्भावात् । श्रूयते हि (छां०, पृ० ५४७,६१२)—"परं ज्योतिरुपसम्पद्यते स्वेन रूपेणाभिनिष्पद्यते" इत्यादिभिः । तच्च स्वभावत्वे नोपपद्यते, उपपद्येतापि यदि परस्य क्लेशादिस्वभावः स्यात् । न चैवं तस्माद् ब्रह्मभावलक्षणमुक्त्यन्यथानुपपत्त्यापि जीवानामौपाधिकी संसृति-रिति। यद्यपि परस्यापि मायौपाधिकमैश्वर्यम् तथापि तदुपाधेः कदाचिदपि नात्यन्तलयः। जीवोपाधिबुद्धीनां तु परभक्तौ सत्यामत्यन्तलय एव। नहि भगवतो माया शक्तिः क्षीयते, जीवानामनन्तत्वेन तत्संसारतद्भ-

जनाद्यर्थं भगवतः प्रवृत्तेरावश्यकत्वादिति। एवञ्च (बृहदार०, पृ० ७३०)—"ध्यायतीव लेलायतीव" इत्यादिश्रुतिः, (बृहदार०, पृ० ४३५)—"अथात आदेशो नेति नेति" इत्यादिश्रुतिश्च जीवविषयिण्येवेति ॥ ३५ ॥

सर्वानृते किमिति चेन्नैवम्बुद्ध्यानन्त्यात् ॥ ३६ ॥

अथ क्रमशो मुक्तावपि यदा सर्वबुद्धीनां विलयस्तदा परोपाधेः स्थितौ प्रयोजनाभावात् तस्याप्यत्यन्तलये किं कृतमैश्वर्यं स्वभाव इति चेन्नैवं भवति; जीवोपाधिबुद्धीनामनन्तत्वात्। तादृशकाल एव नास्तीति युक्तं स्वाभाविकमैश्वर्यम्। न च प्रागभावाः प्रतियोगिजनकास्तत्त्वादित्येतावतापि कालस्तथाभूतः सिद्ध्यति। अथैकदा सर्वे जनितप्रतियोगिन इति चेन्न, अप्रयोजकत्वात्। सर्वकार्यशून्यकालानुमानं त्वत्यन्ततर्कशून्यम्। अन्यथा सर्वे प्रागभावाः कदाचिद्जनितप्रतियोगिन इत्यनुमानेन ध्वंसानधिकरणः प्राक्कालः सिद्ध्येत्। अथाहमेवामुक्तः स्यामिति धिया मुक्तावयत्नप्रसङ्ग इति चेत्, फलानिश्चयेऽप्युपायतानिश्चयेन तत्साधने प्रवृत्तिरस्तु। प्रत्युत सर्वमुक्तिनिश्चये तत एवाप्रवृत्तिप्रसङ्ग इति ॥ ३६ ॥

अथोपादानकर्तृत्वलक्षणमैश्वर्यं यदि परस्य साहजिकं तदा विकारित्वमेव प्राप्तं मृदादिवदित्यत उच्यते—

प्रकृत्यन्तरालादवैकार्यं चित्सत्त्वेनानुवर्तमानात् ॥ ३७ ॥

प्रकृतिर्नाम जडकार्यमात्रोपादानम्। सा विकार्या, न तु ब्रह्मस्फुरणरूपसत्तया प्रकृत्यनुगतत्वेन च परस्य कर्तृत्वादि। न च प्रकृतिरेव सत्तेति वक्तुं शक्यते, जीवानामसत्त्वप्रसङ्गात्। तेषां प्रकृतेः परत्वात्। तस्मात् प्रकृतिलक्षणां मायाशक्तिमन्तरालीकृत्य परस्य कर्तृत्वादिस्वभाव्यमिति न विकार्यता। न हि मायया सृजन् मायावी मायाकार्यो भवतीति। यद्यपि तादात्म्येन कार्यत्वमेव विकार्यत्वम्, तच्च वर्तत एव; तथापि क्षीरादिवन्न स्वरूपपरिवर्तनेन विकारित्वम्। यद्वा स्वाधिकविकाराहेतुत्वेन घटं

प्रति दण्डादिवदविकार्यत्वमस्ति। तदेवोक्तं प्रकृत्यन्तरालादिति ॥ ३७ ॥

ननु मायोपादानत्वे मायायामेव जगत् प्रतिष्ठितम्, तर्हि कथम् (तैत्तिरीयखिलोपनि०, खं० २६)—"तस्मिन् सर्वं प्रतिष्ठितम्" इति श्रुत्या जगतो ब्रह्मप्रतिष्ठा प्रतिपाद्यत इत्यत्रोत्तरम्।

तत्प्रतिष्ठा गृहपीठवत् ॥ ३८ ॥

तस्मिन् ब्रह्मण्यपि विकारप्रतिष्ठानमविरुद्धं गृहपीठवत्। यथा गृहमध्यस्थपीठे स्थितोऽपि गृहे तिष्ठति पीठे तिष्ठतीति व्यपदिश्यते तद्वत् ॥ ३८ ॥

ननु तर्हि प्रकृत्यैव ब्रह्मान्यथासिद्धमस्तु नेत्युच्यते—

मिथोऽपेक्षणादुभयम् ॥ ३९ ॥

ब्रह्म प्रकृतिश्चोभयमपि कारणम्। परस्परं चेतनाचेतनाभ्यां स्वज्ञानाय स्वशक्तिविषयाय चाऽपेक्षितत्वात्, किं कस्यापेक्षकमिति ॥ ३९ ॥

इदानीं स्वशास्त्रे व्यवहारलाघवाय पदार्थसङ्कलनमुच्यते—

चेत्याचितोर्न तृतीयम् ॥ ४० ॥

चेत्या प्रकृतिः चिद् ब्रह्म तयोर्न तृतीयमर्थान्तरमत्रेत्यर्थः। ननु न तृतीयस्य सिद्ध्यसिद्धिभ्यां चोद्यत इति चेत्। अयमर्थः ब्रह्मभिन्ने ज्ञातृत्वं प्रकृतिभिन्ने च ज्ञेयत्वं निषिध्यत इति ॥ ४० ॥

अथ प्रकृतिपुरुषयोरसम्बन्धे सर्वकार्यविलोपः, सम्बन्धे तु स एव तृतीय इत्यत आह—

युक्तौ च सम्परायात् ॥ ४१ ॥

मिथ इत्यनुवर्तते। तौ प्रकृतिपुरुषौ बुद्धिस्थौ परस्परं प्रतिसम्बन्धरूपौ, न त्वागन्तुकः कश्चित्, कस्मात्? सम्परायात् अनादित्वादेव। तथा च गीतायाम् (अ०,३, श्लो० १९)—"प्रकृतिं पुरुषं चैव विद्ध्यनादी उभावपि"

इति। अथानादिरेव सम्बन्धान्तरमस्त्विति चेन्न; जडाजडविकल्पेन तयोरनन्यत्वादिति ॥ ४१ ॥

ननु प्रकृतिर्मिथ्यैव, मायारूपत्वात्, तस्याः (श्वेताश्व०, पृ० ३४०)—

मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरम्।

इत्यादिश्रुतिभ्यः। तथा च कथं वेद्यं पदार्थ इत्यत आह—

शक्तित्वान्नानृतं वेद्यम् ॥ ४२ ॥

वेद्यं प्रधानं नानृतं न मिथ्या भवितुमर्हति, कुतः ? शक्तित्वादेव। न हि मायावी मायाशक्तिं विना विहितागन्तुकसृष्टये प्रभवति। किञ्च, (छां०, पृ० ३९२)—"कुतस्तु खलु सौम्यैवं स्यादसतः सज्जायेत" इति श्रुतिः कार्यसत्त्वेन कारणसत्तां वदन्ती सर्वसत्तामाह, नानृतत्वम्। अस्ति तु सर्वदा भागवती सृष्टिः सादृश्यसहकार्यपेक्षा चेतनकृतसृष्टित्वान्मायिकसृष्टिवदिति। न चादृष्टादिभिरर्थान्तरम्, एकशक्त्यपेक्षायां लाघवाद्भोगतत्साधनेतरेष्वदृष्टहेतुतायां मानाभावात्। एवं सर्वकार्येषु मिथो व्यभिचारादेकनित्यसहकारिशक्तिसिद्धिः। तदवान्तरानेककल्पनं तु फलमुखमिति न गौरवायेति। विस्तरोऽस्यैव तृतीये इति ॥ ४२ ॥

गता प्रासङ्गिकी चर्चा प्रकृतमनुसरति—

तत्परिशुद्धिश्च गम्या लोकवल्लिङ्गेभ्यः ॥ ४३ ॥

यद्यपि जानामीच्छामीत्यादिवदहं भज अनुरज्ये इत्येवमादिना प्रत्यक्षगम्यैव भक्तिः, तथापि तस्या दृढतरसंस्कारवैशिष्ट्यलक्षणा परिशुद्धिर्न प्रत्यक्षतो निर्णेतुं शक्यते ज्ञानप्रामाण्यवत्। तस्मात् तन्निर्णयो लोकवज्ज्ञातलिङ्गेभ्य एव। यथा लोकेऽनुरागतारतम्यं तत्कथादावश्रुपुलकादिविकारैरनुमीयते तद्वदिति ॥ ४३ ॥

न केवलं लोकवल्लिङ्गानि भवन्ति, महर्षीणां स्मृतिभ्योऽपि तानि लिङ्गानि बाहुल्येन लक्ष्यन्त इत्याह—

सम्मानबहुमानप्रीतिविरहेतरविचिकित्सामहिमख्यातितदर्थ-प्राणस्थानतदीयतासर्वतद्भावाप्रातिकूल्यादीनि च स्मरणेभ्यो बाहुल्यात् ॥ ४४ ॥

यथाऽर्जुनस्य सम्मानम्—

प्रत्युत्थानं तु कृष्णस्य सर्वावस्थो धनञ्जयः ।
न लङ्घयति धर्मात्मा भक्त्या प्रेम्णा च सर्वदा ॥

बहुमानं यथा इक्ष्वाकोः ।

पक्षपातेन तन्नाम्नि मृगे पद्मे च तादृशि ।
बभार मेघे तद्वर्णे बहुमानमतिं नृपः ॥

प्रीतिर्यथा विदुरस्य । (महाभारते, उद्यो०, अ० ८८, श्लो० ३११४)—

[1]या प्रीतिः पुण्डरीकाक्ष तवागमनकारणात् ।
सा किमाख्यायते तुभ्यमन्तरात्मासि देहिनाम् ॥

विरहो यथा गोपीनाम् (विष्णुपु०, अंशे ५, अ० १८, श्लो० १७)—

गुरूणामग्रतो वक्तुं किं ब्रवीमि न नः क्षमम् ।
गुरवः किं करिष्यन्ति दग्धानां विरहाग्निना ॥

इतरविचिकित्सा यथा श्वेतद्वीपनिवासिनाम् । नारददर्शनेऽपि विभ्रबुद्धिर्यथा चोपमन्योः । (महाभारते, अनुशा०,अ० १४, श्लो० ७०७७)—

अपि कीटः पतङ्गो वा भवेयं शङ्कराज्ञया ।
न तु शक्र त्वया दत्तं त्रैलोक्यमपि कामये ॥

महिमवृद्धौ यथा यमस्य—

नरके पच्यमानस्तु यमेन परिभाषितः ।
किं त्वया नार्चितो देवः केशवः क्लेशनाशनः ॥

(विष्णुपु०, अंशे ३, अ० ७, श्लो० १०)

---

१. "या मे प्रीतिः पुष्कराक्ष त्वद्दर्शनसमुद्भवा" इति मुद्रित-महाभारतपाठः ।

स्वपुरुषमभिवीक्ष्य पाशहस्तम्
वदति यमः किल तस्य कर्णमूले ।
परिहर मधुसूदनप्रपन्नान्
प्रभुरहमन्यनृणां न वैष्णवानाम् ॥

तदर्थप्राणस्थितिर्यथा हनूमतस्तेनैवोक्तम् (वाल्मीकीये, उत्तरकाण्डे, स० १०७, श्लो० ३१)—

यावत् तव कथा लोके विचरिष्यति पावनी ।
तावत् स्थास्यामि मेदिन्यां तवाज्ञामनुपालयन् ॥

अथवा कृतकृत्यानामपि नारदादीनां तदेकाराधनार्थं प्राणधारणम् । अत एव श्रुतिः । (नृसिंहतापिनी, खं० ६)—"यं सर्वे देवा नमन्ति मुमुक्षवो ब्रह्मवादिनश्च" इति ॥

तदीयताभावस्तु वसोरुपरिचरस्य (महाभारते, शा०, अ० ३३७, श्लो० १२७१८)—

आत्मराज्यं धनं चैव कलत्रं वाहनं तथा ।
[1]एतद्भागवतं सर्वमिति तत् प्रेक्षते सदा ॥ इति ।

सर्वभूतेषु तद्भावो यथा प्रह्लादस्य प्रसिद्धः, उक्तञ्च तेनैव (विष्णुपु०, अंशे १, अ० १९, श्लो० ५)—

एवं सर्वेषु भूतेषु भक्तिरव्यभिचारिणी ।
कर्तव्या पण्डितैर्ज्ञात्वा सर्वभूतमयं हरिम् ॥

तस्मिन्नप्रातिकूल्यं यथा हन्तुमागतेऽपि भगवति भीष्मस्य । तेनैवोक्तम् (महाभारते, भीष्मप०, अ० ५८, श्लो० २६०४)—

एह्येहि देवेश जगन्निवास
नमोऽस्तु ते शार्ङ्गगदासिपाणे ॥

---

१. "यत तद्भागवतं सर्वमिति तत प्रेक्षितं सदा" इति मुद्रित-महाभारतपाठः ॥१९॥

प्रसह्य मां पातय लोकनाथ
रथादुदग्राद्भुतशौर्यसंख्ये ॥

आदिशब्दादुद्धवाक्रूरादिचेष्टितान्यपि द्रष्टव्यानि। यद्यपि द्वेषविपक्षभावादित्यत्रेदमुक्तम्, तथापि तत्र रागलिङ्गत्वेनात्र च बहुभक्तिपरिशुद्धिलिङ्गतयेति विशेष इति ॥ ४४ ॥

ननु स्वामिन्यनुरागिणां तदनुग्रहतारतम्यवत्सु द्वेषेर्ष्यादयो भवन्ति, तेऽपि किं लिङ्गानि ? नेत्याह—

द्वेषादयस्तु नैवम् ॥ ४५ ॥

तदसम्भवादेव। यथोक्तं भगवता द्वैपायनेन (महाभारते, अनुशा०, अ० १४९, श्लो० ७६९)—

न क्रोधो न च मात्सर्यं न लोभो नाशुभा मतिः।
भवन्ति कृतपुण्यानां भक्तानां पुरुषोत्तमे ॥ इति।

शिशुपालस्य तु द्वेषात् स्मरणं ततः परा भक्तिस्ततो मुक्तिरित्येव क्रम इति ॥ ४५ ॥

अथ प्रायशो भगवदवतारविषयाण्येव तानि लिङ्गानि स्मर्यन्ते ब्रह्मज्ञानजन्यत्वात् पूर्णविषयता च भक्तेर्युक्तेत्यत्र सिद्धान्तमाह—

तद्वाक्यशेषात् प्रादुर्भावेष्वपि सा ॥ ४६ ॥

सा परा भक्तिः प्रादुर्भावात्मविषयाऽपि भवति, कस्मादिदं ज्ञायते ? वाक्यशेषात्, (गी०, अ० ७, श्लो० २३)—

देवान् देवयजो यान्ति मद्भक्ता यान्ति मामपि। इति।

प्रतिज्ञातार्थस्थिरीकरणाय देवतान्तरभक्तिनिन्दायां वाक्यशेषो भवति, (गी०, अ० ७, श्लो० २१)—

यो यो यां यां तनुं भक्तः श्रद्धयार्चितुमिच्छति।
तस्य तस्याचलां श्रद्धां तामेव विदधाम्यहम् ॥ इति।

तत्र यो यो यां यां भक्त इत्येतावदुक्तार्थसिद्धौ तनुपर्यन्तनिर्देशाद्भक्ते-स्तत्त्वात्मविषयत्वे तात्पर्यमुन्नीयते। प्रकरणञ्च भक्तेरेवेति ॥ ४६ ॥

जन्मकर्मविदश्चाजन्मशब्दात् ॥ ४७ ॥

जन्म शरीराविनाभूतवेदप्रणयनदैत्यवधभक्तदर्शनादिकार्याय भगवतः शरीरपरिग्रहः, कर्म च वेदप्रणयनादि। तत्त्ववेदिनो जन्माभावफलाय भवति। यथाह (गी०, अ० ४, श्लो० ९)—

जन्म कर्म च मे दिव्यमेवं यो वेत्ति तत्त्वतः।
त्यक्त्वा देहं पुनर्जन्म नैति मामेति सोऽर्जुन ॥ इति।

न च जन्मकर्मवेदनस्य साक्षादमृतत्वफलमुपपद्यते, किन्तु तद्गत-मनोमालिन्यनिवृत्तिद्वारा तद्विशिष्टपरमेश्वरगोचरपरभक्तिं जनयित्वा जन्मभावफलाय भवति। तस्मात् प्रादुर्भावापन्नगोचरत्वं परभक्तेः शब्दा-देवावगम्यत इति ॥ ४७ ॥

तच्च दिव्यं स्वशक्तिमात्रोद्भवात् ॥ ४८ ॥

(गी० । अ० ४ । श्लो० ९) "जन्म कर्म च मे दिव्यम्" इत्यत्र किं दिव्यत्वं न धर्मजत्वम्, धर्मयोगाभावात् तस्मिन्नदृष्टासिद्धेः। नापि दिवि भवत्वं भूलोकजन्मन्यव्याप्तेः। किन्तु जीवशरीरवन्न भूतोपादानकत्वम्; अपितु स्वमायाशक्तिकृतत्वम्। अत एव मोक्षधर्मे नारदं प्रति भगवाद्वाक्यम् (महाभारते, शां , अ० ३४१, श्लो० १२९०९)—

मायैषा हि मया सृष्टा यन्मां पश्यसि नारद। इति।

तथा च गीयते (गी०, अ० ४, श्लो० ६)—

अजोऽपि सन्नव्ययात्मा भूतानामीश्वरोऽपि सन्।
प्रकृतिं स्वामधिष्ठाय सम्भवामि युगे युगे ॥ इति।

न चाभौतिकत्वे शरीरत्वव्याघातः, भोगायतने भौतिकत्वनियमात्। अथ भोगायतनत्वमेव शरीरत्वमिति चेन्न, चेष्टाश्रयत्वस्य तत्त्वे लाघवात्।

चेष्टात्वं तु क्रियागतो जातिविशेषः । न च क्रियैव चेष्टा, मृतशरीरक्रियायां तद्व्यवहारापत्तेः । नापि साक्षात् प्रयत्नजक्रियात्वमेव चेष्टात्वम्, घटादावपि चेष्टत इति व्यवहृतिप्रसङ्गात् । सर्वक्रियायाः साक्षात् परमेश्वरयत्नजन्यत्वात् । एवञ्च परमेश्वरशरीरबोधकमानेन तच्छरीरचेष्टासिद्धिरित्यास्तां तावदिति । न च तत्त्वाधिक्यं तच्छरीरस्य ब्रह्माण्डानुपादानतया घटादिवदत्त्वभावात्, इन्द्रियाप्रकृतित्वाच्च ॥ ४८ ॥

ननु स्वतः प्रयोजनाभावे कथं प्रवर्तत इत्यपेक्षायामाह—

मुख्यं तस्य हि कारुण्यम् ॥ ४९ ॥

लोके हि निरुपाधिपरदुःखहानाय प्रवृत्तेषु कारुणिकव्यपदेशः । न चासौ तेषु मुख्यः कृपाजन्यदुःखहानाय पुण्यार्थं वाप्यन्ततः प्रवृत्तेर्न निरुपाधित्वं सम्भवति । नापि परदुःखप्रहाणमात्रप्रवृत्ते तथा धनाद्युपाधियुक्ते तदव्यवहृतेः । किन्तु निरुपाधिपरक्लेशनाशिनो भगवत एव मुख्यं कारुण्यम् । तत्कृत एवान्यप्रयोजनार्थिषु कारुण्यव्यवहारो गौण इति । तस्माद् जननीयादृष्टमपेक्ष्य स्वकारुण्यात् प्रवृत्तिरिति ॥ ४९ ॥

ननु (गी० अ० १० । श्लो० २७) "नराणां च नराधिप" इत्यादिना विभूतीनामपि भगवद्रूपत्वकथनाद्राजादिभक्तेरपि मुक्तिः स्यादित्यत आह—

प्राणित्वान्न विभूतिषु ॥ ५० ॥

जीवोपाध्यनवच्छिन्नविषयैव परा भक्तिः, न तु प्राणादिजीवोपाधियुक्तेषु राजादिषु रतिर्मुक्तिफलेति ॥ ५० ॥

द्यूतराजसेवयोः प्रतिषेधाच्च ॥ ५१ ॥

धर्मशास्त्रेषु द्यूतराजसेवयोः प्रतिषेधः स्मर्यते, परमेश्वरत्वे तु तन्न स्यादिति ॥ ५१ ॥

वासुदेवेऽपीति चेन्नाकारमात्रत्वात् ॥ ५२ ॥

ननु (गी०, अ०, १०—श्लो० ३७) "वृष्णीनां वासुदेवोऽस्मि" इति विभूतिषु श्रुतिस्तथा च राजादिवत् सोऽप्यभजनीय एव स्यादिति चेन्न, परब्रह्मण एव कृष्णाकारमात्रत्वात्। यथा पराशर आह, (विष्णुपु०, अंशे ४, अ० ११, श्लो० २)—

यदोर्वंशं नरः श्रुत्वा सर्वपापैः प्रमुच्यते।
यत्रावतीर्णं विष्णवाख्यं परब्रह्म नराकृति ॥ इति।

जीवत्वे तन्न स्यादिति ॥ ५२ ॥

प्रत्यभिज्ञानाच्च ॥ ५३ ॥

वासुदेवविषये परब्रह्मप्रत्यभिज्ञा च श्रूयते (नारायणोपनि०, अर्थशिरसि, दशके ६, वाक्य ९)—

ब्रह्मण्यो देवकीपुत्रो ब्रह्मण्यो मधुसूदनः।

सर्वभूतस्थमेकं नारायणं कारणरूपमकारणं परब्रह्मस्वरूपमिति। स्मर्यते च प्रत्यभिज्ञा यथा प्रलये दृष्टानुभावेन युधिष्ठिरं प्रति मार्कण्डेयेनोक्तम् (महाभारते, वन०, अ० १८९, श्लो० १३००२)

यः स देवो मया दृष्टः पुरा पद्मायतेक्षणः।
स एव पुरुषव्याघ्रः सम्बन्धी ते जनार्दनः ॥ इति।

तथा (महाभार०, शा०, मोक्षधर्मे, अ० ३४५, श्लो० १३३२५–२६) "तपोभिरप्यदृश्यो हि भगवान्" इति श्रुत्वा जनमेजयेनाभिहितम्—

तपसाऽप्यसुदृश्यो हि भगवान् लोकपूजितः।
तं दृष्टवन्तस्ते साक्षात् श्रीवत्साङ्कविभूषणम् ॥ इति।

चकारात् तद्भक्तेषु फलस्मरणलिङ्गात् ॥ ५३ ॥

तर्हि कथं विभूतिषु तत्कीर्तनं तत्राह—

वृष्णिषु श्रैष्ठ्येन तत् ॥ ५४ ॥

(गी०, अ० १०, श्लो० २१)—"आदित्यानामहं विष्णुः" इत्यादौ तेषु श्रेष्ठत्वं परमेश्वरस्यैवेति दृष्टिमात्रार्थं विभूतिकथनम्, तच्च वासुदेवेऽपि वृष्णिषु श्रेष्ठोऽयमित्येतावन्मात्रदृष्टिविधानार्थं विभूतिषु वासुदेवकीर्तनमिति ॥५४॥

एवं प्रसिद्धेषु च ॥ ५५ ॥

एवमनेन प्रकारेण वासुदेववद् ब्रह्मलिङ्गवत्तया प्रसिद्धेषु वराहनृसिंहवामनरामभद्रादिषु भक्तिरपि मुक्तिफलेति बोध्यम्। यद्वा एवं ब्रह्मलिङ्गवत्तया प्रसिद्धेषु (गी०, अ० १०, श्लो० २३)—"रुद्राणां शङ्करश्चास्मि" इत्यादिविभूत्यात्मसु श्रैष्ठ्यमात्रदृष्टिर्मन्तव्या। उक्तं हि स्कान्दे (काशीखं०) पूर्वभा०, अ० २७, श्लो० १८१)—

विष्णुरुद्रान्तरं ब्रूयाद्यः श्रीगौर्यन्तरं तथा।
तद्भ्रान्तिकस्य मूर्खस्य वाक्यं शास्त्रविगर्हितम् ॥ इति।

शङ्करस्य ब्रह्मलिङ्गप्रसिद्धिः स्मृत्यादौ बहुलमुपलभ्यत इति ॥ ५५ ॥

इत्याचार्यस्वप्नेश्वरविद्वद्वरविरचिते शाण्डिल्यशतसूत्रीयभाष्ये

द्वितीयाध्यायस्य प्रथममाह्निकम् ॥ १ ॥

—×—

उक्तौ दृष्टोपकारकौ ज्ञानयोगौ सम्प्रति प्रतिबन्धकदुरितक्षयमुखेनापवर्गवत्यो गौणभक्तय उच्यन्ते—

भक्त्या भजनोपसंहाराद्गौण्या परायै तद्धेतुत्वात् ॥ ५६ ॥

भजन्त्यनन्यमनसो ज्ञात्वा भूतादिमव्ययम्।
(गी० अ० ९। श्लो० १३)

इत्यनेन सप्तमाध्यायप्रतिपादितपरभक्तिमनूद्य तत्पश्चाद्गीतम् (गी० अ० ९, श्लो० १४)—

सततं कीर्तयन्तो मां यतन्तश्च दृढव्रताः।
नमस्यन्तश्च मां भक्त्या नित्ययुक्ता उपासते ॥ १ ॥

इत्यादि। तत्पश्चात् (गी० अ० ९, श्लो० २९)—

ये भजन्ति तु मां भक्त्या मयि ते तेषु चाप्यहम्। इति।

तदुपसंहारस्ततस्तत्र (तैत्तिरीयसं०, अष्ट० २, प्र० ४, अनु० ६)—"चित्रया यजेत" इतिवत् सामानाधिकरण्येन भक्तिनाम्ना भजनेन फलं भावयेदित्यर्थः। (गी० अ० ७, श्लो० १७)—"एकभक्तिर्विशिष्यते" इत्यादौ भगवद्वक्तौ भक्तिशब्दस्य प्रयुक्तत्वेन संज्ञाप्राप्तेः, भक्तिभजनयोरेकार्थत्वाच्च। नाप्यत्र परभक्तिः फलभावनया विधीयते, तस्या अकृतिसाध्यत्वेनाविधेयत्वात्। न चापि तस्या निःश्रेयसहेतुत्वमज्ञातं ज्ञाप्यते (गी० अ० ७। श्लो २३)—"मद्भक्ता यान्ति मामपि" इत्यादिना सप्तम एव तज्ज्ञापनस्यापि प्राप्तत्वात्। किन्तु परभक्तेर्विघ्ननाशनसाधनाकाङ्क्ष्या कीर्तनादिकमेवोपक्रान्तं भक्तिशब्देन गौण्या वृत्त्या तृतीयान्तेन निर्दिश्य परभजनसाधनत्वं तेषु विधीयते इत्यत्रार्थवादाकाङ्क्षायाम् (गी० अ० ९, श्लो० २९)—"मयि ते तेषु चाप्यहम्", इति पश्चादन्वयः। अन्यथा भक्त्या भजनं तेन च मयि स्थिरिति वाक्यं भिद्येत। कीर्तनादिषु भक्तिसाधनत्वेन (तैत्तिरीयसं०, अष्ट० २, प्र० ३, अनु० २)—"आयुर्वै घृतम्" इतिवद्भक्तिशब्दो गौणः शक्यसंस्कारेण सुग्रह इति। यद्वा भज्यते एभिरिति व्युत्पत्त्या तासु भक्तिशब्दः (आश्वलायनश्रौतसू०, अ० ९, खं० ८)—उद्भिद्वत्। अथवा (गी० अ० ७, श्लो० १६)—"चतुर्विधा भजन्ते माम्" इति भजनगणपाठात् सृष्टिवत्। (गी० अ० ७, श्लो० १८) –"उदाराः सर्व एवैते" इत्यौदार्यगुणयोगाद्वा गौणत्वमिति ॥ ५६ ॥

रागार्थं प्रकीर्तिसाहचर्याच्चेतरेषाम् ॥ ५७ ॥

एवं हि श्रुतम् (गी० अ० ११, श्लो० ३६)—

स्थाने हृषीकेश तव प्रकीर्त्या

जगत् प्रहृष्यत्यनुरज्यते च। इति।

तत्र साक्षादेवानुरागार्थत्वं कीर्तनस्य श्रुतम् । तत्साहचर्य्यात् (गी० अ० ९, श्लो० १४)—

सततं कीर्तयन्तो मां यतन्तश्च दृढव्रताः ।

इत्यादिनोक्तानामपि तदेव फलमिति ॥ ५७ ॥

अन्तराले तु शेषाः स्युरुपास्त्यादौ च काण्डत्वात् ॥ ५८ ॥

भजन्त्यनन्यमनसो ज्ञात्वा भूतादिमव्ययम् ।
(गी० अ० ९ । श्लो० १३)
ये भजन्ति तु मां भक्त्या मयि ते तेषु चाप्यहम् ।
(गी० अ० ९, श्लो० २९)

इत्येतयोरन्तराले या गौणभक्तयः श्रुतास्ताः परभक्त्यङ्गानि भवन्ति, परभक्तिसन्दंशादेवेति भावः । ता यथा (गीता० अ० ९, श्लो० १४, १५, २२, २५, २६, २७, २८)

सततं कीर्तयन्तो मां यतन्तश्च दृढव्रताः ।
नमस्यन्तश्च मां भक्त्या नित्ययुक्ता उपासते ॥
ज्ञानयज्ञेन चाप्यन्ये यजन्तो मामुपासते ।
एकत्वेन पृथक्त्वेन बहुधा विश्वतोमुखम् ॥ इति ।

तथा

अनन्याश्चिन्तयन्तो मां ये जनाः पर्युपासते ।
तेषां नित्याभियुक्तानां योगक्षेमं वहाम्यहम् ॥ इति ।

तथा

यान्ति देवव्रता देवान् पितॄन् यान्ति पितृव्रताः ।
भूतानि यान्ति भूतेज्या यान्ति मद्याजिनोऽपि माम् ॥ इति ।
पत्रं पुष्पं फलं तोयं यो मे भक्त्या प्रयच्छति ।
तदहं भक्त्युपहृतमश्नामि प्रयतात्मनः ॥ इति ।

तथा—

यत् करोषि यदश्नासि यज्जुहोषि ददासि यत् ।
यत् तपस्यसि कौन्तेय तत् कुरुष्व मदर्पणम् ॥
शुभाशुभफलैरेवं मोक्ष्यसे कर्म्मबन्धनैः । इति ।

तत्र नाम्नामभिधानं कीर्तनम् । भक्त्यर्थं यत्नश्चात्र लौकिकोऽप्यङ्गता-प्रस्तावादुक्तः । दृढव्रतत्वं मद्भक्त्यैकादश्युपवासाद्यनुष्ठानम् । नमस्कारः स्वापकर्षबोधककरशिरःसंयोगादिव्यापारः । ज्ञानयज्ञश्च द्विधा—मुख्या-मुख्यभेदेन, एकत्वपृथक्त्वविषयतया । तन्मात्रचिन्ता तु ध्यानमनुस्मृतिश्च । यागः पूजा भगवन्तमुद्दिश्य पत्रादिदानञ्च, तथा विहितनिषिद्धसर्वकर्मणां परमेश्वरे समर्पणमिति । न केवलमेतान्येवाङ्गानि, किन्तु (छां०, पृ० २२५) —"मनो ब्रह्मेत्युपासीत", (गी० अ० १०, श्लो० २१)—"आदित्याना-महं विष्णुः" इत्याद्युपासनादिशब्दकवलीकृतान्यपि भक्तिसाधनानि, कुतः ? ब्रह्मकाण्डस्य सर्वस्यापि भक्तितत्साधनप्रतिपादकत्वादिति ॥ ५८ ॥

ताभ्यः पावित्र्यमुपक्रमात् ॥ ५९ ॥

ताभ्यो गौणभक्तिभ्यः पावित्र्यमन्तःकरणमालिन्यहेतुदुरितक्षयः, स एव द्वारम्, कुतः ? (गी० अ० ९, श्लो० २)—"पवित्रमिदमुत्तमम्" इत्युपक्रम्या-भिधानात्, भक्तेरन्तःकरणधर्मत्वात् पावित्र्यस्यान्तरङ्गत्वादिति ॥ ५९ ॥

तासु प्रधानयोगात् फलाधिक्यमेके ॥ ६० ॥

तास्वेव कीर्तनादिषु (गी० अ० ९ श्लो० २६)—"यो मे भक्त्या प्रयच्छति," (गी० अ० ९, श्लो० १४)—"नमस्यन्तश्च मां भक्त्या" इत्यादौ प्रकरणादिसिद्धाङ्गभावेषु पुनर्भक्तिसंयोगकथनं प्रवृत्तभक्तीनां तदनुष्ठाने फलाधिक्यार्थमेवेत्येक आचार्या मन्यन्ते ॥ ६० ॥

नाम्नेति जैमिनिः सम्भवात् ॥ ६१ ॥

जैमिनिराचार्यस्तु तासु गौणत्वसिद्धेः (आश्वलायनश्रौतसू०, अ० ९, खं० ७)—"श्येनेनाभिचरन् यजेत" इत्यादाविव भक्त्या कीर्तनेन

भक्त्या दानेन परभक्तिं साधयेदिति सामानाधिकरण्यसम्भवाज्ञामभावे-नान्यार्थं तां मन्यते न फलान्तरार्थं गौरवादिति ॥ ६१ ॥

अत्राङ्गप्रयोगाणां यथाकालसम्भवो गृहादिवत् ॥ ६२ ॥

कीर्तननमस्यादीनां सहानुष्ठानमेकैकेन वा क्रमेण वाऽनुष्ठानमिति त्रयः पक्षाः । तत्राद्ये कस्यचिदननुष्ठानेऽप्यन्येषां निष्फलत्वप्रसङ्गः; द्वितीये विकल्पप्राप्तावर्थैक्यनियमः स्यात्; तृतीयस्त्वशास्त्रार्थः । एककृतावन्य-स्याननुष्ठानं च प्रसज्यते गौरवात् । तस्मादेतेषां मिथो व्यभिचारहेतुत्व-मिति पूर्वपक्षः, सिद्धान्तस्तु सर्वाण्येव साधनानि, प्रमाणसत्त्वात्; किन्तु सहानुष्ठाननियमो नास्ति, प्रमाणाभावात् । येषां तु गन्धपुष्पधूपदीपनैवेद्या-दीनामेकप्रयोगश्रवणं तेषामेव सहानुष्ठानम् । तदितरेषां तु यथाकालं यथासम्भवमनुष्ठानं गृहकृत्यादाविव यथा गृहसाधनतृणस्तम्भाद्याहरणं कदाचिदेकदा, कदाचित् क्रमश इति नह्येतावता तृणादीनामकारणत्व-मायाति । तस्माद् यद्यादृशदुरितक्षयसमर्थं तत् तादृशदुरितक्षयं कृत्वा सर्वैः स्वस्वसामर्थ्ये दर्शिते परभक्तिसिद्धिरिति । तथा च गीयते (गी० अ० ७, श्लो० १९)—

बहूनां जन्मनामन्ते ज्ञानवान् मां प्रपद्यते । इति ॥ ६२ ॥

ईश्वरतुष्टेरेकोऽपि बली ॥ ६३ ॥

तेषु मध्ये यः कश्चिदतिशयानुष्ठानेन बलवान् भवति, स एकोऽपि परमेश्वरतुष्टिं जनयित्वा परभक्तये प्रभवति बहुतरशिथिलपरिचर्याभिरपि यथा नेतरः प्रभुस्तुष्यति तुष्यति चैकेनापि निर्व्यलीकसततकृतपाद-संवाहनेन तद्वत् । कीर्तनाद्यन्यतमेनापि दृढतरसेवितेन भगवत्प्रसादा-द्भक्तिः प्राप्यते, यथा (गी० अ० १८, श्लो० ५७)—

बुद्धियोगं समाश्रित्य मच्चित्तः सततं भव ।
मच्चित्तः सर्वदुर्गाणि मत्प्रसादात् तरिष्यसि ॥ इत्यादि ।

तथा कालादिकृतमपि कस्यचिद्वलम् । यथा (ब्रह्म पु०, अ० ९७, श्लो० १६६)—

ध्यायन् कृते यजन् यज्ञैस्त्रेतायां द्वापरेऽर्चयन् ।
यदाप्नोति तदाप्नोति कलौ संकीर्त्य केशवम् ॥

इत्यादिकम् । न च व्यभिचारो बलवत् प्रत्येकजन्यभक्तिं प्रति कीर्तनत्वादिना हेतुत्वादिति ॥ ६३ ॥

ननु कीर्तनाद्यान्तरालिकानां सर्वेषामेव पावित्र्यं द्वारम् ? उत केषाञ्चिदन्यदपीत्यत आह—

अबन्धोऽर्पणस्य मुखम् ॥ ६४ ॥

भगवत्यर्पितशुभाशुभकर्मणां स्वफलाजननलक्षणबन्धाभाव एव द्वारम् । यथोक्तम् (गी० अ० ९, श्लो० २८)—

शुभाशुभफलैरेवं मोक्ष्यसे कर्मबन्धनैः । इति ।

अर्पणमन्त्रोऽपि पुराणान्तरे—

कामतोऽकामतो वापि यत् करोमि शुभाशुभम् ।
तत्सर्वं त्वयि संन्यस्तं त्वत्प्रयुक्तः करोम्यहम् ॥ इति ।

न चैवं स्वातन्त्र्यप्रसङ्गः; तत्करणबलेन पापाचरणाभावस्यापि तदङ्गत्वात् । यथा स्मृतिः—"न वेदबलमाश्रित्य पापकर्मरतिर्भवेत्" इति । तस्मात् पावित्र्यं तदितरविषयमेवेति । अत्र शुभं कर्म स्वाश्रमविहितनित्यनैमित्तिकात्मकं बोध्यम् । सम्यगाश्रमपरिपालनाद् ब्रह्मलोकादिफलं तत्प्राप्तौ मुक्तये विलम्बः स्यादित्यादिबन्धः, ब्रह्मण्यर्पिते तु तत्प्रसिद्धिः । एवं कामाज्ञानकृतकाम्यकर्मपापयोरपि पश्चादर्पणे फलाभाव एव इति ॥ ६४ ॥

अथ गौणीष्वेव विशेषश्चिन्त्यते, तत्र श्रुतिस्मृतिमध्ये यत्स्वरूपमुच्यते, यथा (छां० पृ० ६०)—"य एषोऽन्तरादित्ये हिरण्मयः पुरुषो दृश्यते हिरण्यश्मश्रुर्हिरण्यकेशः" इत्यादि । तथा (नारदपञ्चरात्रे, पटले ११, श्लो० ७१)—

ध्येयः सदा सवितृमण्डलमध्यवर्ती
नारायणः सरसिजासनसन्निविष्टः ।
केयूरवान् मकरकुण्डलवान् किरीटी
हारी हिरण्मयवपुर्धृतशङ्खचक्रः ॥

इत्येवमादि ॥ ६४ ॥

तत्र किमेवंविधेष्वेव ध्याननियमः पूर्णप्रादुर्भावादौ वा यथा श्रुतेष्विति । तत्र ध्येयस्वरूपश्रवणान्नियमप्राप्तावुच्यते—

ध्याननियमस्तु दृष्टसौकर्यात् ॥ ६५ ॥

ध्याने ध्येयनियमकथनं दृष्टार्थं नानाविषयत्वे चित्तविक्षेपसम्भवात् । तस्मात् सौकर्यार्थमेव तत्कथनं ज्ञेयम् , अदृष्टार्थत्वे विकल्पादिप्रसङ्गात् । तस्माद्यथा श्रुतेषु व्यवस्था । अत एव गोपीनां शिशुपालादेश्च तन्नियमम-न्तरेणैव ध्यानस्य दुर्लभं फलमुपलब्धमिति ॥ ६५ ॥

तद्यजिः पूजायामितरेषां नैवम् ॥ ६६ ॥

(गी० अ० ९, श्लो० २५)—"यान्ति मद्याजिनोऽपि माम्" इत्यत्र यजिः किं प्रसिद्धज्योतिष्टोमादिविषयः ? किंवा पूजावचन इति ? तत्रायं यजिः पूजायामेव प्रयुक्तः, कुतो ज्ञायते ? विष्णुं पूजयेदित्यादिना; नित्यकाम्यपूजा तादर्थ्ये विहता, तस्याः परभक्त्यङ्गत्वमात्रमत्र विधीयते, तेन तादर्थ्यम् । इतरयागानां तु न तादर्थ्यं श्रुतं तेषामीश्वरोद्देश्यकत्वं भक्तिसंयोगश्चोभयं विधातव्यमिति वाक्यभेदः स्यात् । "अथ विष्णवे उरुक्रमाय सूते चरुम्" इत्यादिविहितस्य भक्तिसंयोगोऽस्त्विति चेत्, सत्यम् ; काम्यानां तत्फलेनैव निराकाङ्क्षत्वात् । जीवनमात्रनिमित्तकनित्यपूजायास्तु भक्तिसंयोगविधौ बाधकाभावात्, नित्यत्वे सततोपस्थितिलाघवाच्चेति । अत एव मोक्षधर्मे हिंसायुक्तधर्मनिन्दायाम् (महाभार०, शां०, अ० २६५, पृ० ६९९, श्लो० ६४७०)—

सर्वकर्मस्वहिंसां हि धर्मात्मा मनुरब्रवीत् ।
कामरागा हि हिंसन्ति बहिर्वेद्यां पशून् नराः ॥

विष्णुं ये चाभिजानन्ति धर्मादेव यजन्ति ते ।
पायसैः सुमनोभिश्च तथापि यजनं स्मृतम् ॥ इति ॥ ६६ ॥

अथ पूजाप्रस्तावादधिकरणत्रयम्—

पादोदकं तु पाद्यमव्याप्तेः ॥ ६७ ॥

एवं स्मर्यते (नृसिंहपु०, अ० ५९, श्लो० ४६)—
गङ्गाप्रयागगयपुष्करनैमिषाणि
पुण्यानि यानि कुरुजाङ्गलयामुनानि ।
कालेन तीर्थसलिलानि पुनन्ति पापान्
पादोदकं भगवतः प्रपुनाति सद्यः ॥

इत्यत्र तत् किं पादसंयुक्तं जलं पादोदकमुत पादे दत्तकोत्सृष्टं जलम् ? तत्र पाद्यमेव पादोदकम्, कुतो ज्ञायते ? अन्यथाऽव्याप्तिप्रसङ्गात् । तथाहि भगवतः साक्षात्पादसम्बन्धो न सम्भवति, नाप्यवतारद्वारा; तस्याप्यनुष्ठातृसन्निधानासम्भवात्, किन्तु पूजाधिष्ठानप्रतिमापादसम्बन्धादुपचारस्तत्रापि प्रतिष्ठितायाः, अप्रतिष्ठितायास्तु पूजार्थमावाहने सति, तथा च शालिग्रामशिलाद्यधिष्ठाने पादाभावे तन्न स्यात् । तत्रैवं व्याप्त्यनुरोधात् पाद्यमेवास्तु, प्रतिमाद्यत्यन्तव्यवहितसम्बन्धकल्पनाप्रसङ्गात् ॥ ६७ ॥

स्वयमर्पितं ग्राह्यमविशेषात् ॥ ६८ ॥

पूजायां भगवते दत्तनैवेद्यनिर्माल्यादिकं वैष्णवं सात्वतेभ्य इत्यादिना प्रतिपाद्यत्वेन विहितम्, तदिह सात्वतत्वाविशेषादेव भगवद्भक्तेन स्वयमपि ग्राह्यं भोजनधारणादिना स्वोपकार्यमित्यर्थः । स्वयमपि ग्रहणे प्रतिपत्तिः सिद्ध्यति । धर्मशाठ्यं तु वर्जनीयमेव, यथा अग्न्याद्युद्देशेन त्यक्तपुरोडाशस्यापि उत्तरार्द्धात् स्विष्टकृतमवद्यति, यजमानपञ्चमाः पुरोडाशं भक्षयन्तीति प्रतिपत्तिः, तथेदमपि वचनादेव । अन्यथा सात्वतेभ्योऽपि न प्रतिपादयेत्, परद्रव्यत्वात् । वचनादिति चेन्न; न हि वचने स्ववर्जनमुक्तम् ।

अथ ब्राह्मणेभ्यो दद्यादित्यादिना ब्राह्मणत्वादात्मनेऽपि दानप्रसङ्गादिति चेन्न; दानस्य स्वस्वत्वध्वंसेन परस्वत्वापादानरूपत्वात्। न चैवं प्रतिपत्तौ युक्तम्, पुरोडाशस्यापि यजमाने प्रतिपत्तिदर्शनात्। क्रयादिवत् प्रतिपत्तिरपि स्वत्वापादिकैव। तदेवं यत्रान्यसात्वताऽसंपत्तिस्तत्र स्वयं ग्रहणेनाप्यवैगुण्यं परिहार्यमेव, तथा स्वयं दत्तपाद्यादिधारणेऽपि ज्ञेयमिति। किञ्च, (गी० अ० ३, श्लो० १२)—"तैर्दत्तानप्रदायैभ्यो यो भुङ्क्ते स्तेन एव सः" इत्यत्र समानकर्तृकत्वात् स्वत्वध्वंसे समानकर्मत्वप्रतीतेः। क्त्वासमभिव्याहृतनञः सामानाधिकरण्येनान्वयात्, तैर्दत्तानित्यत्र तज्जातीयपरत्वे मानाभावात्। तस्माद्बाधकं विना देवेभ्यो दत्तमपि भोक्तव्यमिति ध्येयम् ॥ ६८ ॥

निमित्तगुणाव्यपेक्षणादपराधेषु व्यवस्था ॥ ६९ ॥

(वराहपुराणे, अ० १२४, श्लो० ४)—"देवपूजापराधास्ते द्वात्रिंशत् परिकीर्त्तिताः"। इत्युपक्रम्य द्वात्रिंशापराधास्तत्तत्प्रायश्चित्तानि च विहितानि। तत्र किं सर्वापराधवर्जनं पूजाङ्गमुत केषाञ्चिद्वर्जनमङ्गं केषाञ्चित् पुरुषार्थ इति। अत्रोच्यते (वराहपु०, अ० १२४, श्लो० ६५)—

अकर्मण्येन पुष्पेण यो मामर्चयते नरः।
पतनं तस्य वक्ष्यामि तच्छृणुष्व वसुन्धरे॥ इत्यादि।

तत्राकर्मण्यानां पुष्पाणां पर्युदस्तत्वान्न पूजाङ्गत्वम्, किन्तु पूजाक्रमप्रयोगमध्ये भ्रमादिनार्पणे कृते तन्निमित्तमपेक्ष्य प्रायश्चित्तम्। यत्र तु वराहपु०, अ० २५, श्लो० ३६)—"अदत्वा गन्धमाल्यानि धूपं यो मे प्रयच्छति" इत्यनेन पूजाक्रमभङ्गापराधे तत्तत्क्रमस्य पूजाङ्गत्वादङ्गवैगुण्यपरिहारात् तत्प्रायश्चित्तस्याङ्गत्वं द्रष्टव्यम्। यत्र पूजामन्तरेण (वराहपु०, अ० १२५, श्लो० १)—"दन्तकाष्ठमखादित्वा यस्तु मामुपसर्पति" इत्यादि श्रुतम्, तत्र व्यक्तमेव पुरुषार्थत्वमिति व्यवस्थैवेति ॥ ६९ ॥

एवं पूजाया भक्तिसंयोगसिद्धौ (गी० अ० ९, श्लो० २६)—"पत्रं पुष्पं फलं तोयम्" इत्यनेन भगवदुद्देश्यकदानमात्रस्य भक्त्यङ्गत्वविधिरित्याह—

पत्रादेर्दानमन्यथा हि वैशिष्ट्यम् ॥ ७० ॥

यद्यदिष्टतमं लोके यच्चान्यद्दयितं गृहे ।
तत् तद्धि देयं प्रीत्यर्थं देवदेवाय चक्रिणे ॥

इत्यादिना प्राप्तस्य भगवदुद्देश्यकसर्वदानस्य भक्त्यङ्गत्वविधिः; अन्यथा पत्रादिचतुष्टयविशिष्टदानमेव स्यात् । प्रत्येकविधौ वाक्यभेदः । तस्मात् पत्रादिशब्देन प्राप्तं दानमनूद्य (तैत्तिरीयसं०)—"उपव्ययत" इत्यनेन नित्योपवीतस्य दर्शाङ्गत्ववदङ्गत्वविधिरेव युक्त इति ॥ ७० ।

सुकृतजत्वात् परहेतुभावाच्च क्रियासु श्रेयस्यः ॥ ७१ ॥

ता भक्तयः सर्वकर्मसु श्रेयस्य एव, कुतः ? परभक्तिहेतुत्वात्, इतरधर्मजन्यत्वाच्च, यथा (गी० अ० ४, श्लो० १०, ११)—

बहवो ज्ञानतपसा पूता मद्भावमागताः ।
ये यथा मां प्रपद्यन्ते तांस्तथैव भजाम्यहम् ॥ इति ।

भावशब्दश्च भक्तौ प्रयुक्तः,

गङ्गाजले किं न वसन्ति मत्स्या
देवालये पक्षिगणा वसन्ति ।
भावोज्झितास्ते न फलं लभन्ते
तीर्थाच्च देवायतनाच्च मुख्यात् ॥ इत्यादौ ।

तथा (गी० अ० ७, श्लो १६)—

चतुर्विधा भजन्ते मां जनाः सुकृतिनोऽर्जुन ॥ इति ।

अत्र पूर्वसुकृतजत्वाद्भक्तीनां तास्तेभ्यो मुख्याः ।

एतेन भक्तिमीमांसायां विचारो युज्यते, न कर्ममीमांसायामित्युक्तम् ॥ ७१ ॥

ननु भक्तानां न गौणमुख्यभावस्तथा सति (गी० अ० ७, श्लो० ६)—

चतुर्विधा भजन्ते मां जनाः सुकृतिनोऽर्जुन ।
आर्तो जिज्ञासुरर्थार्थी ज्ञानी च भरतर्षभ ॥ इति ।

चतुर्णां तुल्यवदभिधानं किं कृतमित्यत आह—

गौणं त्रैविध्यमितरेण स्तुत्यर्थत्वात् साहचर्यम् ॥ ७२ ॥

गौणं त्रैविध्यमेव तासां मुख्येन साहचर्य्यश्रवणं तु स्तुत्यर्थम् । यथा राजसमभिव्याहारेणामात्यानाम् । एवञ्च पापक्षयविपदुद्धारादिनिमित्तं स्मरणकीर्तनाद्यार्तभक्तिः, ज्ञानार्थं यज्ञाद्याचरणं जिज्ञासोर्भक्तिः । यथा च (बृहदा०, पृ० ८९१)—"तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसाऽनाशकेन" इत्यादि । तथा (गी० अ० १८ श्लो० ४८)

स्वकर्मणा तमभ्यर्च्य सिद्धिं विन्दन्ति मानवाः ।

(विष्णुपु०, अं० ३, अ० ७, श्लो० १६)—

न चलति निजवर्णधर्मतो यः
सममतिरात्मसुहृद्विपक्षपक्षे ।
न हरति न च हन्ति किञ्चिदुच्चैः
[1]स्थितमनसं तमवेहि विष्णुभक्तम् ॥

इत्यनेन स्वस्ववर्णाश्रमविहितवेदानुवचनादीनां ज्ञानार्थमनुष्ठानं जिज्ञासा भक्तिः । अर्थार्थिता भक्तिरपि द्विधा, तत्रैका परभक्त्यर्थं क्रियमाणा पूर्वोक्ता राज्यस्वर्गाद्यर्थं क्रियमाणा च कीर्तनादिरूपाऽपरा । यथा विष्णुपु०, अं० ३, अ० ७ । श्लो० ३)—

भौमान् मनोरथान् कामान् स्वर्गिवन्द्यं परं पदम् ।
प्राप्नोत्याराधिते विष्णौ निर्वाणमपि चोत्तमम् ॥ इति ।

तत्र निर्वाणप्राप्तिः परभक्तिद्वारेति परभक्तिप्रयोजनार्थिता (गी० अ० ९, श्लो० १९)—"ये भजन्ति च मां भक्त्या मयि ते तेषु चाप्यहम्"-इत्यनेन सहैकवाक्यत्वात् । यच्च भागवते (स्कन्ध ७, अ० ५, । श्लो० २२,२३)

---

१. सितमनसमिति पाठान्तरम् ।

श्रवणं कीर्तनं विष्णोः स्मरणं पादसेवनम् ।
अर्चनं वन्दनं दास्यं सख्यमात्मनिवेदनम् ॥
इति पुंसार्पिता विष्णौ भक्तिश्चेन्नवलक्षणा । इति ।

तदेतेष्वेव यथायथमन्तर्भावनीयम् । तदेवमुपाधीनामेषामुपधेयसाङ्कर्येऽपि न दोष इति ॥ ७२ ॥

ननु कीर्तनादीनामङ्गत्वे कथमार्त्यादिषु प्राधान्यं घटत इत्यपेक्षायामुच्यते—

बहिरन्तरस्थमुभयमवेष्टिसववत् ॥ ७३ ॥

स्मरणकीर्तनादीनां परभक्त्यङ्गतया तदन्तर्गतत्वमनारभ्य फलान्तरश्रवणात् तद्बहिर्भावेनोत्कर्षोऽपि । यथा राजसूयान्तर्गताप्यवेष्टिः प्रधानापि अनारभ्य फलान्तरसम्बन्धात् तत उत्कृष्यते । यथा वा बृहस्पतिसवः क्वचित् प्रधानमपि वाजपेयाङ्गं तद्वत् प्रमाणसत्त्वाभ्यां विशेषात् । एवम्—

प्रमादात् कुर्वतां कर्म प्रच्यवेताध्वरेषु यत् ।
स्मरणादेव तद्विष्णोः सम्पूर्णं स्यादिति श्रुतिः ॥

इत्यनेन सर्वकर्मणां नैमित्तिकाङ्गत्वेनापि प्रवृत्तेः स्वभावाङ्गत्वं स्वर्गादिफलाय प्राधान्यं च न विरुद्धमिति ॥ ७३ ॥

इदानीमार्तभक्तौ विशेषश्चिन्त्यते—

स्मृतिकीर्त्योः कथादेश्चार्तौ प्रायश्चित्तभावात् ॥ ७४ ॥

स्मरणकीर्तनकथानमस्कारादीनामार्तभक्तौ निवेशस्तत्तत्पापकृतनरकीर्तिमतां तत्तत्पापक्षयहेतुत्वेन कथनात्, यथा (विष्णुपु०, अं० २, अ० ६, श्लो० ३२, ३३)—

पापे गुरूणि गुरुणि लघूनि च लघुन्यपि ।
प्रायश्चित्तानि मैत्रेय जगुः स्वायंभुवादयः ॥

प्रायश्चित्तान्यशेषाणि तपःकर्मात्मकानि वै ।
यानि तेषामशेषाणां कृष्णानुस्मरणं परम् ॥

तथा (विष्णुपु०, अं० ६, अ० ७, श्लो० ९)—

यन्नामकीर्तनं भक्त्या विलायनमनुत्तमम् ।
मैत्रेयाशेषपापानां धातूनामिव पावकः ॥

एवं (महाभार०, शां०, मोक्षध०, अ० ३४५, श्लो० १३३०५, १३३०६)

सर्वाश्रमाभिगमनं सर्वतीर्थावगाहनम् ।
न तथा फलदं सौते नारायणकथा यथा ॥
पाविताङ्गाः स्म संवृत्ताः श्रुत्वेमामादितः कथाम् ।
नारायणाश्रयां पुण्यां सर्वपापप्रणाशिनीम् ॥ इत्यादि ।

तस्माद्युक्तमार्तौ निवेशनमिति ॥ ७४ ॥

भूयसामननुष्ठितिरिति चेदाप्रयाणमुपसंहारान्महत्स्वपि ॥ ७५ ॥

स्यादेतत् । न्यायविरोधादेतद्वचनानां स्वल्पपापविषयत्वमेव युक्तम्, अन्यथा भूयः क्लेशसाध्यानामननुष्ठानलक्षणमप्रामाण्यमितिचेन्न; तेषामामरणमुपसंहारस्मरणात्, क्लेशाधिक्यात् । यथा (विष्णुपु०, अं० २, अ० ६, श्लो० २९)—

तस्मादहर्निशं विष्णुं संस्मरन् पुरुषो मुने ।
न याति नरकं शुद्धः संक्षीणाखिलकल्मषः ॥

इत्यनेन सातत्योपसंहारात्, उपक्रमोपसंहारयोरेकार्थत्वादिति भावः । न चोपक्रमे कालः श्रूयते येन तद्विरोधादुपसंहारस्य भिन्नार्थतापि भवेत् । तथा च क्लेशसाम्यादितरेषां नाननुष्ठानमप्रामाण्यम्, (विष्णुपु०, अं० २, अ० ६, श्लो० ३५)—"प्रातर्निशि तथा सन्ध्यामध्याह्नादिषु संस्मरन्" इत्येतदवयुत्यानुवाद एव । नाप्यनुतप्ताधिकारिकमिदम् (विष्णुपु०, अं० २, अ० ६, श्लो० ३४)—

कृते पापेऽनुतापो वै यस्य पुंसः प्रजायते ।
प्रायश्चित्तं तु तस्यैकं हरिसंस्मरणं परम् ॥

इत्यस्यापि सर्वप्रायश्चित्ताङ्गानुतापस्यानुवादत्वादेकमित्यस्यापि प्रायश्चित्तान्तरनैरपेक्ष्यस्य न्यायप्राप्तस्यानुवादः, अन्यथा वाक्यानि भिद्येरन् विशिष्टविषयाश्च भवेयुः । अतो यच्छब्दान्तर्गतत्वाद्यथायथमनुवादत्वान्नार्थवादत्वं पूर्ववाक्यानाम् । अत एवान्यत्रापि (विष्णुपु०, अं० ३, अ० ७, श्लो० ३४–३५ ।

किङ्करा दण्डपाशौ वा न यमो न च यातनाः ।
समर्थास्तस्य यस्यात्मा केशवालम्बनः सदा ॥
चक्रायुधस्य नामानि सदा सर्वत्र कीर्तयेत् ।
नाशौचं विद्यते तस्य स पवित्रकरो यतः ॥

इत्यादिभिः सातत्यमुक्तमिति ॥ ७५ ॥

लघ्वपि भक्ताधिकारे महत्क्षेपकमपरसर्वहानात् ॥ ७६ ॥

लघ्वपि सकृत्स्मरणकीर्तनादि महतामपि पापानां क्षेपकं नाशकं भवति । यतो भक्ताधिकारे प्रायश्चित्तान्तराणां सर्वेषां त्यागलक्षणहानिप्रतीतेरित्यर्थः । यथा गीतम् (गी०,अ० १८, श्लो० ६६)—

सर्वधर्मान् परित्यज्य मामेकं शरणं व्रज ।
अहं त्वा सर्वपापेभ्यो मोक्षयिष्यामि मा शुच ॥ इति ।

अत्र हि न काम्यकर्मत्यागपूर्वकत्वमर्थः, काम्यत्यागे पापाभावात् किं भगवता मोक्षणीयम् । अथ पापान्तरं नाश्यं काम्यत्यागस्यादृष्टार्थत्वापत्तेर्नित्यनैमित्तिकयोरपि त्यागपूर्वकता न तस्यार्थः, तयोस्त्यागे यदि विधिरस्ति न ततः पापम्, किं मोक्षणीयम्? अथ नास्तीति वाच्यम् । मैवम्; एवं वाक्येनैव तद्विधानात्, पापाजनकत्वात् । अथ सर्वधर्मान् परित्यज्येत्यनेन संन्यासिनमनूद्य तदधिकारिकमिदं तेषामवकीर्णादिप्रायश्चि-

त्तादिस्मरणात् तैः सह विकल्पप्रसङ्गात् पूर्ववन्महतामननुष्ठानं च स्यात्, न च सातत्येन तद्दोषपरिहारः,

महापातकयुक्तोऽपि ध्यायन्निमिषमच्युतम् ।
पुनस्तपस्वी भवति पङ्क्तिपावनपावनः ॥

इत्यादिना लघुनोऽपि महत्क्षेपकत्वात् । किञ्च, संन्यासाश्रमस्यासन्निधानेन बुद्ध्यनारोहात् । तस्माद्यथा लोके "सर्वान् विहाय मां भज क्लेशांस्ते नाशयिष्यामि" इत्यत्र क्लेशनाशकान्तरहानिः प्रतीयते । तथान्तरपापनाशकान्तरत्यागोऽवगम्यते वाक्यादेव । एतेन कथञ्चित् संन्यासविधायकेन सहैकाध्यायपाठेऽपि न तद्विषयकत्वं प्रकरणसन्निधानयोः सबलत्वात् । किञ्चास्मिन्नध्याये, (गी० अ० १८, श्लो० २)—"काम्यानां कर्मणां न्यासं संन्यासं कवयो विदुः" इत्यादिना काम्यकर्मत्याग एवोक्तः, न संन्यासाश्रमः । एवञ्च प्रायश्चित्तान्तरत्यागसङ्कल्पेन केवलभगवन्नामादिभिरार्तिं यस्तर्तुमिच्छति तदधिकारिकमेव सकृत्स्मरणादि । तथा च भिन्नाधिकाराद् दूषणानां न समुच्चितिः, नापि क्लेशभयाद् भूयसामननुष्ठानम्, (गी० अ० १८, श्लो० ८)—

दुःखमित्येव यत् कर्म कायक्लेशभयात् त्यजेत् ।
स कृत्वा राजसं त्यागं नैव त्यागफलं लभेत् ॥

इत्यनेन तादृशसंन्यासस्य हेयत्वात् । (विष्णुपु०, अं० ६, अ० ७, श्लो० १०)—

कलिकल्मषमत्युग्रं नरकार्तिप्रदं नृणाम् ।
प्रयाति विलयं सद्यः सकृद्यत्रानुसंस्मृते ॥ इत्यादि ।

तदधिकारपरम् । एवम् (गी० अ० ९, श्लो० ३०–३१)—

अपि चेत् सुदुराचारो भजते मामनन्यभाक् ।
साधुरेव स मन्तव्यः सम्यग्व्यवसितो हि सः ॥

क्षिप्रं भवति धर्मात्मा शश्वच्छान्तिं निगच्छति ।
कौन्तेय प्रतिजानीहि न मे भक्तः प्रणश्यति ॥

इत्यनेन, तथा (नृसिंहपु०, अ० ८, श्लो० २८–२९)—

नारकाः कृष्णकृष्णेति नारसिंहेति चुक्रुशुः ।
इति संकीर्तितो विष्णुर्नारकैर्भक्तिपूर्वकम् ।
नारक्यो यातनाः सर्वास्तेषां नष्टा महात्मनाम् ॥

इत्यादिना च भक्त्यधिकारः सुव्यक्त इति । अत्र कीर्तनस्योच्चारणत्वमात्रमिह प्रतीतम्, न तु प्रथमान्तपदेनेत्यादिनियम इति ॥ ७६ ॥

तत्स्थानत्वादनन्यधर्मः खले वालीवत् ॥ ७७ ॥

(विष्णुपु०, अं० २, अ० ६, श्लो० ३४)—"प्रायश्चित्तं तु तस्यैकं हरिसंस्मरणं परम्" इत्यादौ नामाऽतिदेशेन प्रायश्चित्तान्तरधर्मस्तु न मन्तव्यः, प्रायश्चित्तस्थानत्वात्, तत्थाने तद्विधानादित्यर्थः । यथा (आश्वलायनश्रौतसू०, अ० ९, खं० ७)—"खले वाली यूपो भवति" इत्यत्र पशुनियोजने यूपकार्ये खले वालीविधिरिति । न यूपधर्मस्याष्टाश्रिकरणादेः प्रसङ्गः, तद्वदत्र नखलोमादिवपनानां प्रायश्चित्तधर्माणामप्राप्तिरिति । न कीर्तनादेरपि पापक्षयहेतुत्वात् प्रायश्चित्तमेवेति वाच्यम् ।

प्रायो नाम तपः प्रोक्तं चित्तं निश्चय उच्यते ।
तयोर्निश्चयसंयुक्तं प्रायश्चित्तमिति स्मृतम् ॥

इत्यनेन तपोरूपे प्रायश्चित्तशब्दो मुख्यः, अन्यत्र गौण इति ध्येयम् ॥७७॥

अथाङ्गानां प्रधानाधिकरणनैयत्यात् तदधिकारश्चिन्त्यते ।

आनिन्द्ययोन्यधिक्रियते पारम्पर्यात् सामान्यवत् ॥ ७८ ॥

निन्दितचाण्डालादियोनिपर्यन्तं भक्तावधिक्रियते, संसारदुःखजिहासाया अविशेषात् । अथ वेदाध्ययनानधिकारात् कथमत्रैवर्णिकानां स

इति चेत्, तत्राह—पारम्पर्यादिति । (पूर्वमीमांसासू०, अ० १, पा० १, सू० २)–"चोदनालक्षणोऽर्थो धर्मः", (उत्तरमीमांसासू०, अ० १, पा० १, सू० ३)—"शास्त्रयोनित्वात्" इति न्यायादलौकिकोऽर्थः श्रुत्यैकसमधिगम्य इत्यत्र न विप्रतिपद्यामहे, किन्तु स्त्रीशूद्रादीनामितिहासपुराणादिद्वारा चाण्डालादीनां च स्मृत्याचारवदुपदेशपारम्पर्येण ज्ञानमपि श्रुतिमूलमेव भवति। यथा तेषां सामान्याऽहिंसाधर्मादिज्ञानम् । अन्यथा तदसिद्धिप्रसङ्गादिति ॥ ७८ ॥

अतो ह्यविपक्वभावानामपि तल्लोके ॥ ७९ ॥

यतः सर्वाधिकारोऽतः खलु येषामत्र परभक्तिर्विपक्वभावं न गता तेषां श्वेतद्वीपे भगवल्लोके परभक्तिसाधनानुष्ठानं स्मर्यते । यथा (महाभार०, शां०, मोक्षधर्मे, नारायणीये, अ० ३३८, श्लो० १२७७८–१२७७९)–

क्षीरोदधेरुत्तरतः श्वेतद्वीपो महाप्रभः ।
तत्र नारायणपरा मानवाश्चन्द्रवर्चसः ॥
एकान्तभावोपगतास्ते भक्ताः पुरुषोत्तमे ।

इत्याद्युपक्रम्य तेषां परभक्तिसाधनानुष्ठानं श्रुतम् । (महाभार०, शां०, मोक्षधर्मे, अ० ३३८, श्लो० १२७९१, १२७९२)—

सहिताश्चाभ्यधावन्तस्ततस्ते मानवा द्रुताः ।
कृताञ्जलिपुटा हृष्टा नम इत्येव वादिनः ॥
ततो विवदतां तेषामश्रौषं विपुलध्वनिम् ।
बलिः किलोपक्रियते तस्य देवस्य तैर्नरैः ॥ इत्यादि ।

तस्मात् सर्वत्र तदधिकार इति । अत एव (उत्तरमीमांसासू०, अ० १, पा० ३, सू० २६)—तदुपर्यपि बादरायणेन सम्भावादिति सूचितम् ॥ ७९ ॥

अथ विपक्वभावानामपि कथं न तल्लोक इत्युपोद्घातेनोच्यते—

क्रमैकगत्युपपत्तेस्तु ॥ ८० ॥

तुश्चागतशङ्काव्यवच्छेदार्थः। नारायणीय एव श्रूयते (महाभार०, शां०, अ० ३४६, श्लो० १३३८३)—"येऽतिनिष्कलुषा लोके पुण्यपापविवर्जिताः" इत्युपक्रम्य आदित्यमण्डलद्वारा अनिरुद्धप्रद्युम्नसंकर्षणव्यूहक्रमेण गतिमभिधायाभिहितम् (महाभार०, शां०, अ० ३४६, श्लो० १३३८३-१३३८९)—

समाहितमनस्कास्तु नियताः संयतेन्द्रियाः।
एकान्तभावोपगता वासुदेवं विशन्ति ते॥

इति क्रमगत्यभिधानम्। तथा पश्चादुक्तम् (महाभार०, शां०, मोक्षधर्मे, अ० ३५०, श्लो० १३५४८, १३५४९, १३५५०)—

ये तु दग्धेन्धना लोके पुण्यपापविवर्जिताः।
तेषां त्वयाभिनिर्दिष्टा पारंपर्यक्रमाद्गतिः॥
चतुर्थ्यां चैव ते गत्यां गच्छन्ति परमं पदम्।
नूनमेकान्तधर्मोऽयं श्रेष्ठो नारायणप्रियः॥
अगत्वा गतयस्तिस्रो यद्गच्छन्त्यव्ययं हरिम्।

इत्येकगत्यभिधानं च पक्वभक्तिविषयत्वेनोपपद्यते। अन्यथा विरोधात् तस्मादपक्वविषयस्तत्तल्लोकलाभ इति॥ ८०॥

उत्क्रान्तिस्मृतिवाक्यशेषाच्च ॥ ८१ ॥

उत्क्रान्तौ (गी० अ० ८, श्लो० १०)—"भक्त्या युक्तो योगबलेन चैव" इत्युपक्रम्य (गी० अ० ८, श्लो० १३)—

ओमित्येकाक्षरं ब्रह्म व्याहरन् मामनुस्मरन्।
यः प्रयाति त्यजन् देहं स याति परमां गतिम्॥

इत्युक्तम्। तत्र च वाक्यशेषः (गी० अ० ८, श्लो० २४)—

अग्निर्ज्योतिरहः शुक्लः षण्मासा उत्तरायणम् ।
तत्र प्रयाता गच्छन्ति ब्रह्म ब्रह्मविदो जनाः ॥

इति क्रमाद्गतिः श्रुता, तथा (गी० अ० ८, श्लो० १६)—

आब्रह्मभुवनाल्लोकाः पुनरावर्तिनोऽर्जुन ।
मामुपेत्य तु कौन्तेय पुनर्जन्म न विद्यते ॥

इति वाक्यशेषे लोकोपक्रमादुपशब्दमहिम्ना च तत्समीपलोकप्राप्तिरविपक्वभावानामेव युक्ता, विपक्वभावस्य न; तल्लोकगमनमपि फलं युज्यते, तत्फलस्याक्षयित्वात्, तल्लोके साधनानुष्ठानश्रवणाच्च । किञ्च, अविपक्वभक्तेस्तत एव क्रममुक्तिसिद्धौ तत्कालीनस्मरणविधिवैयर्थ्यप्रसङ्गात् । न च तेन परभक्तिसमुच्चयो घटते (गी० अ० ८, श्लो० २२)—"पुरुषः स परः पार्थ भक्त्या लभ्यस्त्वनन्यया" इत्यन्यनिरपेक्षमोक्षसाधनत्वावगतेः । तस्मात् तल्लोकेऽप्यधिकारः । भारतभूमेस्तु (विष्णुपु०, अं० २, अ० ३, श्लो० ५)—

न खल्वन्यत्र मर्त्यानां भूमौ कर्म विधीयते ।

इत्यनेन कर्मोत्पत्तिहेतुतैव, भक्तिस्तु न कर्मात्मिकेत्युक्तं प्राक् । तदङ्गानामप्राप्तिः स्यादितिचेन्न, प्रधानप्राप्तावेवाङ्गप्राप्तेर्निषादस्थपतियागाङ्गवदिति । शूद्रादीनां तु वैदिकमन्त्रजकर्मनिर्वृत्तिः, न तु स्मरणकीर्तनादेर्भक्तिसाधनस्येति तावतैवाधिकारसिद्धौ न विद्याप्रयुक्तिकल्पना युक्ता ॥ ८१ ॥

अस्तु तर्हि महापातकिनामपि परभक्तावेवाधिकारः, तथा तदङ्गाङ्गवेदानुवचनादावपीत्यत आह—

महापातकिनां त्वार्तौ ॥ ८२ ॥

पतनहेतुपापरतानां च पुनरार्तिभक्तावेवाधिकारः, प्रायश्चित्तवन्नान्यत्र; तत्पापक्षयस्य सर्वापेक्षयाऽभ्यर्हितत्वात् । भुञ्जानो वर्द्धयेत् पापमित्यादिना । तदपगमे तु सुतरामधिकारसिद्धिः ॥ ८२ ॥

अथैकान्तिकप्रस्तावात् सर्वधर्मः किं परभक्तितो भिन्न इति शङ्कापिशाचीमपाकरोति—

सैकान्तभावो गीतार्थप्रत्यभिज्ञानात् ॥ ८३ ॥

सा पराभक्तिरेवैकान्तभावः, नान्यः; कुतः ? गीतार्थेन प्रत्यभिज्ञाश्रवणात् । यथा नारायणीय एव (महाभार० शां०, मोक्षध०, अ० ३५०, श्लो० १३५५१–५२, ५४)।

सहोपनिषदो वेदान् ये विप्राः सम्यगास्थिताः ।
पठन्ति विधिमास्थाय ये चापि यतिधर्मिणः ॥
ततो विशिष्टां जानामि गतिमेकान्तिनां नृणाम् ।
केनैष धर्मः कथितो देवेन ऋषिणाथवा ॥

इति प्रश्ने प्रत्युत्तरम्—

समुपोढेष्वनीकेषु कुरुपाण्डवसेनयोः ।
अर्जुने विमनस्के वै गीता भगवता स्वयम् ॥ इति ।

तस्मादेकान्तिता परभक्तिरिति ॥ ८३ ॥

अथ गौण्योऽपि साक्षान्मुक्तिं जनयन्तु को दोषस्तत्राह—

परां कृत्वैव सर्वेषां तथाह्याह ॥ ८४ ॥

परां भक्तिं कृत्वैव सर्वेषां मुक्तावुपयोगः । तथा हि सहेतुकं भगवानाह (गी० अ० १८, श्लो० ६८)—

य इदं परमं गुह्यं मद्भक्तेष्वभिधास्यति ।
भक्तिं मयि परां कृत्वा मामेवैष्यत्यसंशयम् ॥ इति ।

तत्रैतद्धर्मस्योपदेशफलमपि ब्रह्मभावापत्तिरित्येवार्थसिद्धौ भक्तिं मयि परां कृत्वेति किमर्थमाह ? तस्या मोक्षसाधनत्वेन श्रुतत्वात् । अत एवोपरिचरवसोः (महाभार०, शां०, अ० ३३७, श्लो० १२७१८)—"आत्मराज्यं धनं च" इत्यादिना परमेश्वरानुरक्तिरूपाया भक्तेर्लिङ्गं प्रदर्शितमिति

स्वतः प्रयोजनत्वाभावात् । तस्मात् सर्वेषां मुक्तिहेतुत्वेन श्रुतानां परभक्तिजननेन मुक्तावुपयोग इत्यभिप्राय उन्नीयत इति । न चोभयजनकत्वं तस्य कर्मत्वेन मोक्षाजनकत्वात् । एवञ्च दृष्टार्थता भवति वाक्यस्येति ॥ ८४ ॥

इत्याचार्यस्वप्नेश्वरविद्वद्वरविरचिते शाण्डिल्यशतसूत्रीये भाष्ये द्वितीयाध्यायस्य द्वितीयमाह्निकम् ॥ २ ॥

समाप्तश्चाध्यायः ॥ २ ॥

—:*:—

भजनीयोत्तमत्वेन भक्तेरुत्तमता यतः ।
भक्ततद्भावतश्चात्र भजनीयो निरूप्यते ॥

भजनीयेनाद्वितीयमिदं कृत्स्नस्य तत्स्वरूपत्वात् ॥ ८५ ॥

ज्ञानाधीना ज्ञेयसिद्धिरिति तन्त्रेषु निर्णयः ।
ज्ञानं सत्ता न सा जातिर्जात्यादौ तदसत्त्वतः ॥
सत्त्वे वा नेष्टसम्बन्धकल्पनागौरवादपि ।
तस्माज्ज्ञानं परं ब्रह्म सर्वत्रानुगतं स्वतः ॥
तदभेदो दृश्यमात्रे दृश्यभेदस्तु सत्परे ।
घटो ज्ञानमितीदृक् स्यात् प्रत्ययः सन्निवेति चेत् ॥
अस्ति स्वरूपधीनैव सत्वत्वेनानुपस्थितेः ।
तदुपादानविषये ज्ञानेच्छाकृतिहेतुना ॥
तासां सविषयत्वेन हेतुत्वे लाघवं महत् ।
यत् तत् सविषयं ब्रह्म गुणवन्नैव गौरवात् ॥
कालवेद्योपाधिकृता तज्ज्ञातृत्वादिकल्पना ॥इति॥८५॥

तच्छक्तिर्माया जडसामान्यात् ॥ ८६ ॥

तस्य ब्रह्मण ऐश्वर्यशक्तिर्मायेति गीयते (गी० अ० ७, श्लो० १४)—

दैवी ह्येषा गुणमयी मम माया दुरत्यया ।
मामेव ये प्रपद्यन्ते मायामेतां तरन्ति ते ॥
मयाध्यक्षेण प्रकृतिः सूयते सचराचरम् ।
हेतुनानेन कौन्तेय जगद्विपरिवर्तते ॥
तन्मायात्वं तु कार्याणां वैचित्र्यान्नानृतत्वतः ।
कार्यसत्त्वोपपत्त्यर्थं ब्रह्मसत्ताश्रुतेरिति ॥
मिथ्यात्वस्यानुषक्तेश्च तन्मिथ्यात्वं न साम्प्रतम् ।
तत्त्वज्ञानेन बाध्यत्वं मिथ्यात्वमिति चेन्नहि ॥
मिथ्यात्वस्याप्यतथ्यत्वात् सत्यत्वं सुतरां स्थितम् ।
मिथ्यात्वस्य च सत्यत्वे दृश्यसत्यत्वमागतम् ॥
अलीकानामभानाच्च भाष्यत्वे तु सदेव तत् ।
रज्जौ सर्पादिभानं यदन्यथाख्यातिरेव सा ॥
अन्यस्य सदसत्त्वाभ्यां बाधाधारव्यवस्थितेः ।
सा माया जडसामान्यं ज्ञेयत्वं नित्यमेव तत् ॥
अन्यथा तु व्यवस्था स्यात् तस्माच्चिज्जाड्यनित्यता ॥इति॥८६॥

व्यापकत्वाद्व्याप्यानाम् ॥ ८७ ॥

एवं व्यापकतत्त्वेभ्यो व्याप्यतत्त्वसमुद्भवः ।
व्यापकानां हि तादात्म्याद्व्याप्योपादानता मता ॥
न तावत् समवायेन भेदसम्बन्धगौरवात् ।
शब्दानां समयोऽप्येवं शृङ्गग्राहिकया लघुः ॥
सत्त्वेन सर्वकार्येषु कारणत्वं परेशितुः ।
निमित्तत्वं हि तद्बुद्धेर्बोद्धव्येष्वनुगत्वतः ॥
बुद्धेस्तु साक्षिभास्याया अबोध्यत्वं यतो धियः ।
बोद्धव्याया बुद्धितत्त्वव्यभिचारेऽपि सम्भवेत् ॥

सुप्तोत्थितस्य प्रलयाद्बुद्धेः प्रथमसुद्भवः ।
कार्यकारणभावादि बुध्वा निर्माति स प्रभुः ॥
स्वतो निर्विषयाप्येषा चैतन्योपाधिभावतः ।
तैलादिवत् प्रदीपस्था सप्रकारप्रकाशिनी ॥

(छां०, पृ० ३९८)—

करिष्यामीतिसङ्कल्पादहङ्कारोद्भवस्ततः ।
स ऐक्षत बहुस्यामित्येवमादिश्रुतिस्मृतेः ॥
बुद्धेर्विकारेष्विच्छादावनुगत्वा दहङ्कृतेः ।
साप्येकतत्त्वं तत्त्वे तु बुद्धिर्व्यापकभावनात् ॥
ईशोऽहं कृतिजन्यत्वात् तन्नैयत्यादहङ्कृतेः ।
मात्राभूतेन्द्रियादीनामहङ्कारोऽपि कारणम् ॥
तत्र शब्दस्पर्शरूपरसगन्धत्वसंज्ञया ।
सामान्यान्येव शब्दादिस्थूलानां चापि हेतवः ॥
सर्वत्र ग्रह एव स्यात् तत्त्वानामितिचेदतः ।
विकारग्रहणे जातिग्रहवत् तद्ग्रहस्थितेः ॥
एवं व्यापकतत्त्वानां व्याप्येष्वनुगमः क्रमात् ।
ब्रह्मादिसर्वतत्त्वानां घटोपादानता स्फुटम् ॥
न कर्मणान्यथासिद्धिरिह तत्त्वस्य युज्यते ।
तादात्म्यादन्यथासिद्धेरतादात्म्यप्रयोजकम् ॥
एवं कारणतत्त्वानां मोक्षोपायतया पुनः ।
निर्मितिः प्राणिबुद्ध्यादेरतादात्म्यात् पृथक् पृथक् ॥
आसर्गप्रलयादीनां बुद्धिर्नास्ति न यत् क्वचित् ।
सुषुप्तौ जीवबुद्धीनां लयोऽनन्तः स मोक्षणे ॥ इति ॥ ८७ ॥

अथानीश्वरसाङ्ख्यानां बुद्धेः सर्गो न युज्यते ।
क्रमाद्विनिगमाभावादित्येतत् सूत्रमुच्यते ॥

न प्राणिबुद्धिभ्योऽसम्भवात् ॥ ८८ ॥

क्रमाद् देवर्षिसर्गादिः श्रूयते कस्य बुद्धितः ।
सम्भावद्भूतसर्गोऽयं तस्मादीशोऽस्ति बुद्धिमान् ॥इति॥ ८८ ॥

निर्माय्योच्चावचं श्रुतीश्च निर्मिमीते पितृवत् ॥ ८९ ॥

उच्चावचानि भूतानि धर्माधर्मानुसारतः ।
निर्माय निर्मिमीतेऽसौ वेदांस्तद्धितकाम्यया ॥
यथा पितोत्पाद्य पुत्रानज्ञातौ ज्ञापयत्यपि ।
हिताहितपरीहारौ वाक्यैस्तद्वदयं प्रभुः ॥ इति ॥ ८९ ॥

मिश्रोपदेशान्नेति चेन्न स्वल्पत्वात् ॥ ९० ॥

अथायमीश्वरो नैव हितः पितृसमो यतः ।
पापसाधनहिंसाभिर्मिश्रयागोपदेशनात् ॥
इति चेन्न प्रधानांशफलसौख्याद्यपेक्षया ।
अङ्गहिंसाफलाल्पत्वान्नाहितस्तद्विधानकृत् ॥
ननु क्रत्वङ्गहिंसायाः प्रधानैकफलत्वतः ।
न सामान्यनिषेधस्य विषयत्वं प्रसज्यते ॥
कुर्यान्न कुर्यादित्येवं विकल्पत्वन्यथा भवेत् ।
तस्माद्विशेषादन्यत्र स्याद्यदाहवनीयवत् ॥
अत्रोच्यतेऽङ्गहिंसायाः स्यादपूर्वस्य हेतुता ।
पापहेतुश्च सामान्यहिंसेत्येवाऽविरोधिता ॥
अथ प्रबलदुःखस्याननुबन्धीष्टहेतुता ।
विध्यर्थोऽयं नन्वयुक्तस्तदभावस्य बोधकः ॥

तथा च सर्वान् मा हिंस्यादस्य दुःखाद्यहेतुता ।
सत्यं यागाङ्गहिंसातो यद्दुःखं प्रबलं न तत् ॥
प्रधानफलसौख्यादेर्नैयत्यान्नान्तरीयकम् ।
अन्यथातिप्रसङ्गः स्यात् प्रबलत्वानिरुक्तितः ॥
तस्माज्जातिविशेषोऽयं दुःखेषु प्रबलत्वता ।
प्रायश्चित्तादिस्मरणे प्रयागमरणेऽपि वा ॥
आत्महत्याकृतं दुःखं तत्फलापेक्षया लघु ।
अतः प्रत्यवमर्शं हि प्राह पञ्चशिखोऽपि तत् ॥
स्वल्पत्वान्न बलीयस्त्वाद्यत्र दुःखस्य गौरवम् ।
पर्यग्निकरणोत्सर्गास्तत्र श्रुत्यैव दर्शिताः ॥

(मनुसं०, अ० ३, श्लो० ६८)—

पञ्चसूना गृहस्थानामिति स्मृतिषु चोदितम् ।
न सामान्यविशेषोक्तिर्न शून्ये सुतरां यथा ॥

(विष्णुपु०, अं० ३, अ० ६, श्लो० १८-१९)—

रङ्गोपजीवी पशुहा नरकं शरणं व्रजेत् ॥ इति ॥ ९० ॥
श्रुतिप्रसङ्गाच्छ्रौतानामपूर्वमथ चिन्त्यते ।
कर्तृभोक्तृगतं तत् किमथवा परमेश्वरे ॥

फलमस्माद्बादरायणो दृष्टत्वात् ॥ ९१ ॥

(उत्तरमीमांसा० अ० १, पा० १, सू० २)—

राजादिरोषतोषाभ्यां दृष्टत्वात् कर्मणां फलम् ।
अस्माद् ब्रह्मण एवाह भगवान् बादरायणः ॥
तन्न कर्तृगतं पुत्रे जातेष्टिफलदर्शनात् ।
अथ भोक्तृगतो भोगः कस्मिन्नित्येव चिन्त्यते ॥
अन्योन्याश्रय एव स्यादुभयोः स्वव्यपेक्षणात् ।
तस्माद्दृष्टतया रोषतोषाभ्यां परमेशितुः ॥

हिताहितफलप्राप्तिः फलोद्देश्यगता भवेत् ।
नाप्युद्देश्यगतत्वेन व्यापारान्तरकल्पनम् ॥
अन्यथा राजसेवादावप्यपूर्वं प्रसज्यते ।
अत एवेश्वरप्रीतिप्रदत्वं कर्मणां श्रुतम् ॥

(गी० अ० १२, श्लो० २०)—

ये तु धर्मामृतमिदं यथोक्तं पर्युपासते ।
श्रद्दधाना मत्परमा भक्तास्तेऽतीव मे प्रियाः ॥
रोषतोषादिसत्त्वेऽपि न संसारित्वमीशितुः ।
तद्वृत्तत्वाद्दुःखत्वान्नित्यमुक्ततयापि च ॥इति॥ ९१ ॥

व्युत्क्रमादप्ययस्तथा दृष्टम् ॥ ९२ ॥

प्रलयो व्याप्यतत्त्वानां व्यापकेषूत्क्रमान्मतः ।
व्यापिकायां मृदिव्याप्यघटादिलयदर्शनात् ॥ इति ॥ ९२ ॥

इत्याचार्यश्रीस्वप्नेश्वरविद्वद्वरविरचिते शाण्डिल्यशतसूत्रीये भाष्ये तृतीयाध्यायस्य प्रथममाह्निकम् ॥ १ ॥

—:•:—

जीवस्य ब्रह्मभावो हि मुक्तिरित्यभिधीयते ।
तद्विवेकतयात्रापि भजनीयविवेचनम् ॥
अन्यस्य कथमन्यत्वं घटेतेति वितर्कयन् ।
जीवानां भगवद्भावे योग्यतामाह सूत्रकृत् ॥

तदैक्यं नानात्वैकत्वमुपाधियोगहानादादित्यवत् ॥ ९३ ॥

(छां०, पृ० २००)—"सर्वं खल्विदं ब्रह्म नेह नानास्ति किञ्चन"

(गी० अ० १३, श्लो० ३३-३४)—

यथा प्रकाशयत्येकः कृत्स्नं लोकमिमं रविः ।
क्षेत्रं क्षेत्री तथा कृत्स्नं प्रकाशयति भारत ॥
क्षेत्रज्ञं चापि मां विद्धि सर्वक्षेत्रेषु भारत ।

इत्यादिभिस्तस्यैकत्वमेव स्वभावः। उभयथा चात्मप्रत्ययः स जीवोपाधिबुद्धिरात्मानुकृतः। तथा च श्रुतिः—"एकधा बहुधा चैव दृश्यते जलचन्द्रवत्"। (विष्णुपु०, अं० २, अ० १६, श्लो० १२)—

सितनीलादिभेदेन यथैकं दृश्यते नभः।
भ्रान्तदृष्टिभिरात्मापि तथैकः सन् पृथक् पृथक्॥ इति॥

ततः परभक्त्या जीवोपाधिबुद्धिहाने सति पुनरेकत्वमप्यविरुद्धम् यथादित्यस्य प्रकाशात्मनः प्रतिबिम्बोपाधिदर्पणाद्यपगमे तद्वत्॥ ९३॥

पृथगिति चेन्न परेणासम्बन्धात् प्रकाशानाम्॥ ९४॥

पृथगेव परस्परमत्यन्तभिन्नाः प्रकाशात्मान एव जीवाः, अन्यथा कश्चिन्मुक्तः कश्चिद्बद्ध इति व्यवस्था न स्यादिति चेन्न; कथञ्चिदनीश्वरसाङ्ख्यानां तथा सम्भवेऽपि सेश्वरसाङ्ख्यानां तदसम्भवात्। कथम्? प्रकाशात्मनां परेण परमेश्वरेण सह द्रष्टृत्वदृश्यत्वलक्षणसम्बन्धाभावात् तेषां स्वप्रकाशतयादित्येनेव प्रदीपानामप्रकाशनात्। तथा चानीश्वरत्वमसर्वज्ञत्वं ज्ञेयत्वं च ब्रह्मणः स्यात्। अथ प्रकाश्यास्तेषां जाड्यप्रसङ्गान्नापि मिथो बुद्धिवृत्त्या प्रकाश्यत्वम्। तद्धि तमोऽभिभूत्यैव नैवान्तःकरणसत्त्ववृत्त्या, न च तदयोग्यत्वे तत् सम्भवति। न खल्वावरणनिवृत्तावपि दीपो दीपान्तरप्रकाश्य इति बाह्याभ्यन्तरप्रकाशयोः कश्चिदौपाधिकोऽप्येकधर्मो येन (बृहदा०, पृ० ७५५)—"स्वयं ज्योतिरेवायं पुरुषः" इत्यादौ गौणो ज्योतिःशब्दः। तस्माच्चिदात्मा जगत्प्रकाशकत्वेनैव सिध्यतीति न तत्र परापेक्षा। किञ्च, मनोधर्मभ्रमतत्त्वधियोरधिष्ठानतया चात्मसिद्धिरप्रत्यूहैव बुद्धिवृत्तीनां तु गौण एव ज्ञानत्वसुखत्वव्यवहारः।

किं मानमात्मनां भेदे बुद्धितत्त्वभिदा स्थिता।
बन्धमोक्षव्यवस्थाने नित्यमुक्तात्मनां कुतः॥ इति ॥९४॥

अथ विकारिण एव सत्तात्मानो ज्ञानेच्छादयस्तद्गुणाः जानामीच्छामि सुखीत्यादिप्रत्ययादिति मतं निरस्यन्नाह—

न विकारिणस्तु जीवाः कारणविकारात् ॥ ९५ ॥

न ज्ञानादिविकारवन्त आत्मानो भवितुमर्हन्ति, कुतः ? सुखोपलम्भादेः करणगतत्वेन ज्ञानादीनामुपपत्तेरात्मनाम-विकारित्वात्। तथा हि सुखोपलब्धिः सकरणिकेत्याद्यनुमाने तादृशकरणासम्बन्धस्य तादात्म्येन सत्त्वात् सुखादयो नात्मविकाराः, आत्मनि प्रतीतत्वाद्गौरत्वादिवदित्यनुमानञ्च। एवमहन्त्वस्यापि कारणतादात्म्येनैव मनसा ग्रहणम्। सुषुप्तौ मनोलये तदग्रहणम्। कालोपाधीनां कालत्ववदिति दिक् ॥ ९५ ॥

अथ कथं जीवस्य ब्रह्मभाव इत्यपेक्षायामाह—

अनन्यभक्त्या तद्बुद्धिर्बुद्धिलयादत्यन्तम् ॥ ९६ ॥

(गी० अ० ८, श्लो० २२)—

पुरुषः स परः पार्थ भक्त्या लभ्यस्त्वनन्यया।
यस्यान्तःस्थानि भूतानि येन सर्वमिदं ततम् ॥

इति श्रुतम्। तथा (नृसिंहपु० अ०, श्लो०)—"भक्त्यैकलभ्ये पुरुषे पुराणे मुक्तौ किमर्थं क्रियते न यत्नः" इति। तस्मात् परभक्तिमात्रेण बुद्धेरत्यन्तलये सति ब्रह्मानन्दावाप्तिलक्षणा मुक्तिरित्यर्थः। तथा च तदीयबुद्धिविलयप्रागभावसहवृत्तिब्रह्मानन्दावाप्तिर्मुक्तिरिति तल्लक्षणं सूचितम्। अथ ब्रह्मानन्दावाप्तेः सिद्धत्वेनापुरुषार्थत्वमिति चेन्न, ग्रामादिवद्विशिष्टतया पुमर्थत्वात्। अत्र बुद्धिर्जीवोपाधिर्मता, भगवत एव बुद्धितत्त्वाभ्युपगमात्। अन्यथा इदं सुखमत्र सुखत्वमिति ज्ञानाज्जातेर्नित्यतया तद्विशिष्टस्य पुमर्थाभावप्रसङ्गात्, ईहाकृत्योर्विकल्पकत्वाभावात्। तस्मादसिद्धोपरागेण सिद्धे अपीच्छाकृती इति। कृत्यसाध्यत्वज्ञानं प्रतिबन्धकमिति चेत् श्येनादौ बलवदनिष्टानुबन्धित्वतिरोधानादिवोत्कटरागेण कृत्यसाध्यत्वमपि तिरोधाय प्रवर्तितमिति किमनुपपन्नम् ? आनन्दं

ब्रह्मणो रूपं तच्च मोक्षे प्रतिष्ठितमित्यागमादपि तथात्वमध्यवसेय-मिति ॥ ९६ ॥

अथ परभक्तिसिद्धौ जीवनादृष्टभोगवदितरेषामपूर्वाणामपि भोगेनैव लय इत्यनिर्मोक्ष एव स्यादित्यत उच्यते—

आयुश्चिरमितरेषां तु हानिरनास्पदत्वात् ॥ ९७ ॥

आत्मरतौ सत्याम् (छां० । पृ० ४६०)—"तस्य तावदेव चिरं यावन्न विमोक्ष्ये, अथ सम्पत्स्ये" इति । तथा (विष्णुपु०, अं० १, अ० २०, श्लो० २०)—

धर्मार्थकामैः किं तस्य मुक्तिस्तस्य करे स्थिता ।
समस्तजगतां मूले यस्य भक्तिः स्थिरा त्वयि ॥

तथा च आयुर्जीवनादृष्टं तन्मात्रमेव चिरं परभक्तौ सत्यामपि मुक्तिप्रतिबन्धकं तावदेव जीवन्मुक्तिः । इतरेषां धर्माधर्माणां जीवनादृष्टलये सति बुद्धेरत्यन्तलये भोगास्पदस्याभावाद् बुद्धिभोगाभाव एवेति नानिर्मोक्ष इति बुद्धेरपि विकार्यत्वेन कारणत्वात् । नापि तददृष्टाहेतुत्वं कारणान्तराभावे फलानिष्पत्तावपि हेतुत्वाक्षतेः । तस्य भगवत्तोषरोषरूपस्यापि लयः कालात् प्रलयसामग्रीतो वा यथाङ्गापूर्वाणामङ्गवैगुण्यादजनितपरमापूर्वाणां लय इति । ब्रह्मार्पणं तु प्रतिबन्धकीभूतकर्मणामबन्धायेति सर्वमनवद्यम् । परंपरयैव ज्ञानाग्निना कर्मक्षय इति ॥ ९७ ॥

संसृतिरेषामभक्तिः स्यान्नाज्ञानात् कारणासिद्धेः ॥ ९८ ॥

अथ जीवस्य संसारः किमज्ञानकृतो मतः ।
उताभक्तिकृतस्तत्र सूत्रमेतत् प्रवर्तते ॥
स्वर्गोऽथ जीवन्मुक्तत्वं मुक्तिरेषां त्रयी गतिः ।
जीवन्मुक्तिः परा भक्तिस्तदसिद्धिस्तु संसृतिः ॥
सापि भक्तेः कामनानामभावादेव तिष्ठति ।
भक्तौ सत्यां निवर्तेत तथा चोक्तं महर्षिभिः ॥

(विष्णुपु०, अं० १, अ० ९, श्लो० ५९)—

तावदार्तिस्तु सा वाञ्छा तावन्मोहस्तथा सुखम् ।
यावन्नायाति शरणं त्वामशेषाघमोचनम् ॥
तत्त्वाज्ञानकृता सृष्टिर्ज्ञानात्तद्धानिरिष्यते ।
रज्जुसर्पादिहेतूनामभावात् तदसम्भवात् ॥

जन्मानि घोरयमकिङ्करताडनानि
दैन्यानि तानि तपनात्मजदर्शनानि ।
जन्तोरहंममतरङ्गकुरङ्गतृष्णा-
कृष्णाङ्घ्रिपङ्कजपराङ्मुखतानुभावः ॥ इति ॥ ९८ ॥

त्रीण्येषां नेत्राणि शब्दलिङ्गाक्षभेदाद्रुद्रवत् ॥ ९९ ॥

एषां जीवानां त्रीणि नयनानि साधनानि अर्थप्रमितौ प्रमाणभूतानीति यावत् । प्रमितत्वाविशेषेऽपि करणत्रैविध्यात् त्रैविध्यम् । तानि यथा ज्ञानमानयोग्यपदपदार्थरूपः शब्दः शब्दप्रमाकरणम् । तस्य प्रथममभिधानमलौकिकभक्तेस्तत्साधनतादौ प्राधान्यकथनार्थम् । तथा ज्ञायमानव्याप्यपक्षधर्मलिङ्गज्ञानमनुमितिकरणमस्माकं सत्कार्यत्वाज्ज्ञायमानत्वमप्यविरुद्धम् । प्रत्यक्षप्रमितिकरणान्यक्षाणि विषयसम्बद्धानि तानि च मनःश्रोत्रत्वक्चक्षूरसनघ्राणानि षट् स्वसम्बन्धेनान्तःकरणस्य तमोऽभिभूय चिदात्मप्रकाशमानार्थाकारां सत्त्ववृत्तिं जनयन्ति, अत एवोक्तम् (गी० अ० १४, श्लो० ११)—"सर्वद्वारेषु देहेऽस्मिन् प्रकाश उपजायते" इति । जीवबुद्धिरूपमनसो दुःखादिविकारास्तु नाज्ञाताः सन्तीत्यात्मप्रकाशेनैव प्रकाश्यन्त इति न तत्र सत्त्ववृत्त्यवकल्पनं गौरवात् । एतदेव साक्षिभास्वत्वम् । एवं शब्दानुमानप्रत्यक्षभेदात् त्रीण्येव यथा रुद्रस्य त्रीणि चक्षुरधिष्ठानानि नाधिकानि न न्यूनानि, तद्वच्चन्द्रसूर्याग्निरूपत्वचिह्नानि । उपमानं तु शक्तिग्रहमात्रार्थम्, तच्च सामान्यतो दृष्टानुमानसहकारेण प्रसिद्धपदसामानाधिकरण्यात् कविकाव्यपरिच्छेदवन्मनसापि सम्भवतीति त्रिष्वे-

वान्तर्भूतमिति न पृथक्। प्रमाणविचारोऽस्माभिर्न्यायतत्त्वनिकषे वेदान्ततत्त्वनिकषे च निरूपित इति नेह प्रतन्यते।

जीवबुद्धिर्मनो नाम तत् सङ्कोचविकासवत्।
यौगपद्यायौगपद्ये धियां तेनोपपद्यते॥
ईश्वराऽहंकृतेर्जीवबुद्धीनामुद्भवो यतः।
बुद्धौ दुःखादिवत् साक्षादहन्त्वमपि गृह्यते॥
मात्राभूतेन्द्रियादीनां भगवद्बुद्धिजन्मतः।
भगवद्बुद्धिबोद्धृत्वाच्चिदाग्राह्यं तथेन्द्रियैः॥
भूतानि पञ्च तन्मात्राः पञ्च चैकादशेन्द्रियम्।
अहम्बुद्धिप्रधानात्मपरेशास्तत्त्वसंग्रहः॥

इति षड्विंशतितत्त्वानि॥ ९९॥

आविस्तिरोभावाविकाराः स्युः क्रियाफलसंयोगात्॥ १००॥

प्रसङ्गादुत्पत्तिलयौ चिन्त्येते, तत्रोत्पत्तिराविर्भावलक्षणा सत एव क्रियायोग्यता, तथा तिरोभावस्तदयोग्यता, एवं वृद्धिहानादयो विकार एव भवन्ति। कुतः? करोति घटं नाशयति घटमित्यादौ धात्वर्थफलसम्बन्धव्यपदेशात्। ते च सत एव घटन्ते नासतः। तथा चोक्तम्। (गी० अ० २, श्लो० १६)—"नासतो विद्यते भावो नाभावो विद्यते सतः" इति। एवं भवति नश्यतीत्यादावपि क्रियाश्रयत्वं प्रतीयते। तच्च सत एव सम्भवति। स चाद्यक्षणसम्बन्धो नाशप्रतियोगित्वं च तदर्थः, आद्यत्वस्यानिरुक्तेः। न चाविर्भावस्याविर्भावान्तरावश्यकत्वेऽनवस्थागौरवयोरन्यतरप्रसङ्गः, घटसामग्र्या एवाविर्भावस्याविर्भावत्वात्। अन्यथा उत्पत्तेरुत्पत्तावपि तथात्वप्रसङ्गात्। एवञ्च घटस्य पूर्वपूर्वाविर्भावतिरोभावपरम्परैव प्रागभावस्तिरोभाव एव नाशः। स च कदाचिदात्यन्तिकोऽपि, यथा देवदत्तशरीरस्य, यथा वा मुक्तबुद्ध्यादीनाम्। अन्योन्यात्यन्ताभावौ च परस्परविरुद्धधर्मतदधिकरणयोर्नातिरिच्येते। अन्यथा भावेऽप्यभावान्तरस्वीकारप्रसङ्गा-

दिति प्रलये तु प्रलयाख्यविकारातिरिक्तस्य विकारस्याभाव एव। संस्कारास्तु सूक्ष्मात्मना तिष्ठन्तीति न कोऽपि दोषः। पर्यवसिता त्रिलक्षणी भक्तिमीमांसा ॥

परिवीतपीतवसनं घनोपमं
शतपत्रपत्रसदृशायते क्षणम्।
धृतवेणुरेणुपरमण्डितं गवां
हृदि वोऽस्तु कौस्तुभविभूषणं महः ॥

गौडक्ष्मावलये विशारद इति ख्यातादभूद्भूमणेः
सर्वोर्वीपतिसार्वभौमपदभाक् प्रज्ञावतामग्रणीः।
तस्मादास जलेश्वरो बुधवरः सेनाधिपः क्ष्माभृतां
स्वप्नेशेन कृतं तदङ्गजनुषा सद्भक्तिमीमांसनम् ॥

इति श्रीस्वप्नेश्वरविद्वद्वरविरचिते शाण्डिल्यशतसूत्रीये भाष्ये तृतीयस्याध्यायस्य द्वितीयमाह्निकम् ॥ २ ॥

समाप्तश्चाऽध्यायः ॥ ३ ॥

समाप्तेयं भक्तिमीमांसा ॥

—:०:—

अथ श्रीशाण्डिल्यमहर्षिप्रणीतानि भक्तिसूत्राणि ।

१ अथातो भक्तिजिज्ञासा ॥ १ ॥

२ सा परानुरक्तिरीश्वरे ॥ २ ॥

३ तत्संस्थस्यामृतत्वोपदेशात् ॥ ३ ॥

४ ज्ञानमितिचेन्न द्विषतोऽपि ज्ञानस्य तदसंस्थितेः ॥ ४ ॥

५ तयोपक्षयाच्च ॥ ५ ॥

६ द्वेषप्रतिपक्षभावाद्रसशब्दाच्च रागः ॥ ६ ॥

७ न क्रिया कृत्यनपेक्षणाज्ज्ञानवत् ॥ ७ ॥

८ अत एव फलानन्त्यम् ॥ ८ ॥

९ तद्वतः प्रपत्तिशब्दाच्च न ज्ञानमितरप्रपत्तिवत् ॥ ९ ॥

इति प्रथमाह्निकम् ।

अथ द्वितीयाह्निकम् ।

१० सा मुख्येतरापेक्षितत्वात् ॥ १ ॥

११ प्रकरणात् (१) ॥ २ ॥

१२ दर्शनफलमितिचेन्न तेन व्यवधानात् ॥ ३ ॥

१३ दृष्टत्वाच्च ॥ ४ ॥

१४ अत एव तद्भावाद्बल्लवीनाम् ॥ ५ ॥

१५ भक्त्या जानातीति चेन्नाभिज्ञया साहाय्यात् (२) ॥ ६ ॥

अथ भाष्यकारधृतपाठयुतसूत्राणि—

१ प्रकरणाच्च । २ भक्त्या जानातीति चेन्नाऽभिज्ञप्त्या साहाय्यात् ।

१६ एतेन विकल्पोऽपि प्रत्युक्तः (१) ॥ ७ ॥

१७ देवभक्तिरितरस्मिन् साहचर्यात् ॥ ८ ॥

१८ भक्तिः प्रमेया श्रुतिभ्यः* ॥ ९ ॥

१९ पुराणेतिहासाभ्याञ्चेति* ॥ १० ॥

२० पृथुध्रुवप्रह्लादाम्बरीषशुकसनकनारदभजनाचाराच्च* ॥ ११ ॥

२१ योगस्तूभयार्थमपेक्षणात् प्रयाजवत् ॥ १२ ॥९

२२ गौण्या तु समाधिसिद्धिः ॥ १३ ॥१०

२३ हेया रागत्वादिति चेन्नोत्तमास्पदत्वात् सङ्गवत् ॥ १४ ॥११

२४ तदेव कर्मिज्ञानियोगिभ्य आधिक्यशब्दात् ॥ १५ ॥१२

२५ प्रश्ननिरूपणाभ्यामाधिक्यसिद्धेः ॥ १६ ॥१३

२६ नैव श्रद्धा तु साधारण्यात् ॥ १७ ॥१४

२७ तस्यां तत्त्वे चानवस्थानात् ॥ १८ ॥१५

२८ ब्रह्मकाण्डं तु भक्तौ तस्यानुज्ञानाय सामान्यात् ॥ १९ ॥१५

इति द्वितीयाह्निकं प्रथमोऽध्यायश्च ।

अथ द्वितीयाध्याये प्रथमाह्निकम् ।

२९ बुद्धिहेतुप्रवृत्तिराविशुद्धेरवघातवत् ॥ १ ॥

३० तदङ्गानां च ॥ २ ॥

३१ तामैश्वर्यपदां काश्यपः परत्वात् (२) ॥ ३ ॥

३२ आत्मैकपदां बादरायणः (३) ॥ ४ ॥

३३ उभयपदां शाण्डिल्यः शब्दोपपत्तिभ्याम् (४) ॥ ५ ॥

---

१ प्रागुक्तश्च । (इति सूत्रमस्मात्पूर्वमधिकम्) । * इदं भाष्ये नास्ति

२ तामैश्वर्यपरां काश्यपः । ३ आत्मैकपरां बादरायणः ।

४ उभयपरां शाण्डिल्यः परत्वात्।

३४ वैषम्यादसिद्धमिति चेन्न प्रत्यभिज्ञावद्वैशिष्ट्यात् (१)॥६॥

३५ न च क्लिष्टः परः स्यादनन्तरं विशेषात् ॥ ७ ॥

३६ ऐश्वर्यं तथेति चेन्न स्वाभाव्यात् ॥ ८ ॥

३७ अप्रतिषिद्धं परैश्वर्यं तद्भावाच्च नैवमितरेषाम् ॥ ९ ॥

३८ सर्वांमृते किमिति चेन्नैवम्बुद्ध्यानन्त्यात् ॥ १० ॥

३९ प्रकृत्यन्तरालादवैकार्यं चित्सत्त्वेनानुवर्तनात् (२) ॥ ११ ॥

४० तत्प्रतिष्ठा गृहपीठवत् ॥ १२ ॥

४१ मिथोऽपेक्षणादुभयम् ॥ १३ ॥

४२ चेत्याचितोर्न तृतीयम् ॥ १४ ॥

४३ युक्तौ च सम्परायात् ॥ १५ ॥

४४ शक्तित्वान्नानृतं चेत्यम् (३) ॥ १६ ॥

४५ तत्परिशुद्धिश्च गम्या लोकवल्लिङ्गेभ्यः ॥ १७ ॥

४६ सम्मानबहुमानप्रीतिविरहेतरविचिकित्सामहिमख्यातितदर्थ-प्राणस्थानतदीयतासर्वतद्भावाप्रातिकूल्यादीनि च स्मरणेभ्यो बाहुल्यात् ॥ १८ ॥

४७ द्वेषादयस्तु नैवम् ॥ १९ ॥

४८ तद्वाक्यशेषात् प्रादुर्भावेष्वपि सा ॥ २० ॥

४९ जन्मकर्मविदश्चाजन्मने शब्दात् (४) ॥ २१ ॥

५० तच्च दिव्यं स्वशक्तिमात्रोद्भवात् ॥ २२ ॥

५१ मुख्यं हि तस्य कारुण्यम् (५) ॥ २३ ॥

५२ प्राणित्वान्न विभूतिषु ॥ २४ ॥

५३ द्यूतराजसेवयोः प्रतिषेधाच्च ॥ २५ ॥

---

१ वैषम्यादसिद्धमितिचेन्नाभिज्ञानपदवैशिष्ट्यात। २ प्रकृत्यन्तरालादवैकार्यं चित्सत्वेनानुवर्तमानात। ३ शक्तित्वान्नानृतं वेद्यम्। ४ जन्मकर्म विदश्चाजन्मशब्दात। ५ मुख्यं तस्य हि कारुण्यम्।

५४ वासुदेवेऽपीति चेन्नाकारमात्रत्वात् ॥ २६ ॥

५५ प्रत्यभिज्ञानाच्च ॥ २७ ॥

५६ वृष्णिषु श्रैष्ठ्येन तत् ॥ २८ ॥

५७ एवं प्रसिद्धेषु च ॥ २९ ॥

इति द्वितीयाध्याये प्रथमाह्निकम् ।

अथ द्वितीयाध्याये द्वितीयाह्निकम्

५८ भक्त्या भजनोपसंहाराद्गौण्या परायै तद्धेतुत्वात् ॥ १ ॥

५९ रागार्थप्रकीर्तिसाहचर्याच्चेतरेषाम् ॥ २ ॥

६० अन्तराले तु शेषाः स्युरुपास्त्यादौ च काण्डत्वात् ॥ ३ ॥

६१ ताभ्यः पावित्र्यमुपक्रमात् ॥ ४ ॥

६२ तासु प्रधानयोगात् फलाधिक्यमेके ॥ ५ ॥

६३ नाम्नेति जैमिनिः सम्भवात् ॥ ६ ॥

६४ अप्रयोगाणां यथाकालसम्भवो गृहादिवत्[1] ॥ ७ ॥

६५ ईश्वरतुष्टेरेकोऽपि बली ॥ ८ ॥

६६ अबन्धोऽर्पणस्य मुखम् ॥ ९ ॥

६७ ध्याननियमस्तु दृष्टसौकर्यात् ॥ १० ॥

६८ तद्यजिः पूजायामितरेषां नैवम् ॥ ११ ॥

६९ पादोदकं तु पाद्यमव्याप्तेः ॥ १२ ॥

७० स्वयमप्यर्पितं ग्राह्यमविशेषात्[2] ॥ १३ ॥

७१ निमित्तगुणाव्यपेक्षणादपराधेषु व्यवस्था ॥ १४ ॥

७२ पत्रादेर्दानमन्यथा हि वैशिष्ट्यम् ॥

---

१. अत्राङ्गप्रयोगाणां यथाकालसंभवो गृहादिवत् ।

२. स्वयमर्पितं ग्राह्यमविशेषात् ।

७३ सुकृतजत्वात् परहेतुभावाच्च क्रियासु श्रेयस्यः[1] ॥१६॥

७४ गौणत्रैविध्यमितरेण स्तुत्यर्थत्वात् साहचर्यम्[2] ॥ १७ ॥

७५ बहिरन्तस्थमुभयमवेष्टिसववत् ॥ १८ ॥

७६ स्मृतिकीर्त्योः कथादेश्चार्तौ प्रायश्चित्तभावात् ॥ १९ ॥

७७ भूयसामननुष्ठितिरिति चेदाप्रयाणमुपसंहारान्महत्स्वपि ॥२०॥

७८ लघ्वपि भक्तयधिकारे महत्क्षेपकमपरसर्वहानात्[3] ॥२१॥

७९ तत्स्थानत्वादनन्यधर्मः खलेवालीवत् ॥ २२ ॥

८० आनिन्द्ययोन्यधिक्रियते पारम्पर्यात् सामान्यवत् ॥ २३ ॥

८१ अतो ह्यविपक्वभावानामपि तल्लोके ॥ २४ ॥

८२ क्रमैकगत्युपपत्तेस्तु ॥ २५ ॥

८३ उत्क्रान्तिवाक्यशेषाच्च[4] ॥ २६ ॥

८४ महापातकिनां त्वार्तौ ॥ २७ ॥

८५ सैकान्तभावे गीतार्थप्रत्यभिज्ञानात्[5] ॥ २८ ॥

८६ परां कृत्वैव सर्वेषां तथा ह्याह ॥ २९ ॥

इति द्वितीयाह्निकं द्वितीयोऽध्यायश्च ।

अथ तृतीयाध्याये प्रथमाह्निकम्

८७ भजनीयेनाद्वितीयमिदं कृत्स्नस्य तत्स्वरूपत्वात् ॥ १ ॥

८८ तच्छक्तिर्माया जडसामान्यात् ॥ २ ॥

८९ व्यापकत्वाद्व्याप्यानाम् ॥ ३ ॥

९० न प्राणिबुद्धिभ्योऽसम्भवात् ॥ ४ ॥

९१ निर्मायोच्चावचं श्रुतीश्च निर्मिमीते पितृवत् ॥ ५ ॥

---

१. सुकृतजत्वात परहेतुभावाच्च क्रियासु ताः श्रेयस्यः । २. गौणं त्रैविध्यमितरेण स्तुत्यर्थत्वात्साहचर्यम् । ३. लघ्वपि भक्ताधिकारे महत्क्षेपकमपरसर्वहानात । ४. उत्क्रान्तिस्मृतिवाक्यशेषाच्च । ५. सैकान्तभावो गीतार्थप्रत्यभिज्ञानात ।

९२ मिश्रोपदेशान्नेति चेन्न स्वल्पत्वात् ॥ ६ ॥

९३ फलमस्माद्बादरायणो दृष्टत्वात् ॥ ७ ॥

९४ व्युत्क्रमादप्ययस्तथा हि दृष्टम्[1] ॥ ८ ॥

इति प्रथमाह्निकम् ।

अथ तृतीयाध्याये द्वितीयाह्निकम्

९५ तदैक्यं नानात्वैकत्वमुपाधियोगहानादादित्यवत् ॥ १ ॥

९६ पृथगिति चेन्न परेणासम्बन्धात्प्रकाशानाम् ॥ २ ॥

९७ न विकारिणस्तु करणविकारात्[2] ॥ ३ ॥

९८ अनन्यभक्त्या तद्बुद्धिलयादत्यन्तम्[3] ॥ ४ ॥

९९ आयुश्चिरमितरेषां तु हानिरनास्पदत्वात् ॥ ५ ॥

१०० संसृतिरेषामभक्तेः स्यान्नाज्ञानात्[4] ॥ ६ ॥

१०१ त्रीण्येषां नेत्राणि शब्दलिङ्गाक्षभेदाद्रुद्रवत् ॥ ७ ॥

१०२ आविस्तरो भावविकाराः स्युः क्रियाफलसंयोगात् ॥ ८ ॥

इति तृतीयाध्याये द्वितीयाह्निकम् ।

इति श्रीशाण्डिल्यमहर्षिप्रणीतभक्तिसूत्राणि ।

---

१. व्युत्क्रमादप्ययस्तथा दृष्टम् ।

२. न विकारिणस्तु कारणविकारात् ।

३. अनन्यभक्त्या तद्बुद्धिबु द्धिलयादत्यन्तम् ।

४. संसृतिरेषामभक्तिः स्यान्नाज्ञानात् ।

अथ विशेषनामघटितसूत्राणि

अत एव तद्भावाद्बल्लवीनाम् ।	१—२— ५
पुराणेतिहासाभ्याञ्चेति ।	२—१— ३
पृथुध्रुवप्रह्लादाम्बरीषशुकसनकनारदभजनाचाराच्च ।	१—२—११
ब्रह्मकाण्डं तु भक्तौ तस्यानुज्ञानाय सामान्यात् ।	१—२—१९
तामैश्वर्यपदां काश्यपः परत्वात् ।	२—१— ३
आत्मैकपदां बादरायणः ।	२—१— ४
उभयपदां शाण्डिल्यः शब्दोपपत्तिभ्याम् ।	२—१— ५
नाम्नेति जैमिनिः संभवात् ।	२—२— ६
सैकान्तभावे गीतार्थप्रत्यभिज्ञानात् ।	२—२—४९
फलमस्मादिति बादरायणो दृष्टत्वात् ।	३—१— ७

इति विशेषनामघटितसूत्राणि ।

परिशिष्टम्

भक्तितत्त्वविवरणम्

(१)

त्रिविधभक्तिविवरणम्

[पद्म० ४।८५।४—२४]

त्रिविधा भक्तिरुद्दिष्टा मनोवाक्कायसम्भवा।
लौकिकी वैदिकी चापि भवेदाध्यात्मिकी तथा ॥ ४ ॥

ध्यानधारणया बुद्ध्या वेदानां स्मरणेन च।
विष्णुप्रीतिकरी चैषा मानसी भक्तिरुच्यते ॥ ५ ॥

वेदमन्त्रसमुच्चारैरविश्रान्तं दिवानिशम्।
जपैश्चारण्यकैश्चैव वाचिकी भक्तिरिष्यते ॥ ६ ॥

व्रतोपवासनियमैः पञ्चेन्द्रियजयेन च।
कायिकी भक्तिरुद्दिष्टा सर्वसिद्धिविधायिनी ॥ ७ ॥

पाद्यार्घ्याद्युपचारैश्च नृत्यवादित्रगीतकैः।
वलिभिर्जागरार्चाभिर्लौकिकी भक्तिरीरिता ॥ ८ ॥

ऋग्यजुःसामजप्यैश्च संहिताध्ययनादिभिः।
हविर्होमक्रियाभिश्च या भक्तिः सा तु वैदिकी ॥ ९ ॥

दर्शश्च पौर्णमासश्च विषुवादिषु यः पुनः।
यागः संकीर्तितो विज्ञैर्वैदिकीभक्तिसाधकः ॥ १० ॥

चतुर्विंशतितत्त्वानि प्रधानादीनि संख्यया।
अचेतनानि राजेन्द्र पुरुषः पञ्चविंशकः ॥ ११ ॥

चेतनः स समुद्दिष्टः कर्ता भोक्ता च कर्मणाम्।
आत्मनित्यो ह्यसक्तश्च ह्यधिष्ठाता प्रयोजकः ॥ १२ ॥

व्यक्तिस्थचेतनो नित्यः कारणानां च कारणम्।
तत्त्वसर्गो भावसर्गो भूतसर्गश्च तत्त्वतः ॥ १३ ॥

संख्यायाश्च प्रसंख्यानं प्रधानं च गुणात्मकम् ।
ज्ञात्वासाधर्म्यवैधर्म्ये प्रधानस्य गुणात्मनः ॥ १४ ॥

कारणत्वं ब्राह्मणस्य साधर्म्यमिदमुच्यते ।
नानात्वं चात्र वैधर्म्यं प्रधानस्य विदुर्बुधाः ॥ १५ ॥

तत्त्वान्तरं च तत्त्वानां कार्यकारणमेव च ।
प्रयोजनं प्रयोज्यत्वं ज्ञात्वा तत्त्वप्रसंख्यया ॥ १६ ॥

संख्यानां प्रोच्यते प्राज्ञैः सर्वतत्त्वार्थचिन्तकैः ।
इति मत्वास्य सद्भावं तत्त्वसंख्यां च तत्त्वतः ॥ १७ ॥

ब्रह्मतत्त्वाधिकं चापि ज्ञात्वा तत्त्वं विदुर्बुधाः ।
सांख्यैः कृता भक्तिरेषा प्रोच्यतेऽध्यात्मिकी नृप ॥ १८ ॥

योगजामपि वक्ष्यामि भक्तिमाध्यात्मिकीं शृणु ।
प्राणायामपरो नित्यं ध्यानवान् नियतेन्द्रियः ॥ १९ ॥

भैक्ष्यभक्ष्यव्रती चापि विषयेभ्यो निवृत्तिमान् ।
पश्यन्नुद्योतितमुखं ब्रह्मसूत्रं कटीतटे ॥ २० ॥

श्वेतवर्णं चतुर्बाहुं वरदाभयहस्तकम् ।
ध्यायमानः स्वहृदये योगयुक्तो महेश्वरम् ॥ २१ ॥

हृष्टं स्वतेजसा राजन् पीतवस्त्रं सुलोचनम् ।
योगजा मानसी सिद्धिर्विष्णुभक्तिः परा स्मृता ॥ २२ ॥

यथैवं भक्तिमान् देव विष्णुभक्तः स उच्यते ।
एवं भक्तिः समुद्दिष्टा त्रिविधा नृपनन्दन ॥ २३ ॥

सात्त्विकी राजसी चैव तामसी भेदतस्त्विमाः ।
भक्तयो विविधा ज्ञेया विष्णोरमिततेजसः ॥ २४ ॥

त्रिविधभक्तिविवरणम्

[पद्म० ५।१५।१६४—१९१ (आनन्दाश्रम)]

त्रिविधा भक्तिरुद्दिष्टा मनोवाक्कायसम्भवा ।
लौकिकी वैदिकी चापि भवेदाध्यात्मिकी तथा ॥१६४॥

ध्यानधारणया बुद्ध्या वेदार्थस्मरणं हि यत् ।
ब्रह्मप्रीतिकरी चैषा मानसी भक्तिरुच्यते ॥१६५॥

मन्त्रवेदनमस्कारैरग्निश्राद्धादिचिन्तनैः ।
जाप्यैश्चारणकैश्चैव वाचिकी भक्तिरुच्यते ॥१६६॥

व्रतोपवासनियमैश्चित्तेन्द्रियनिरोधिभिः ।
कृच्छ्रैः सान्तपनैश्चान्यैस्तथा चान्द्रायणादिभिः ॥१६७॥

ब्रह्मकृच्छ्रोपवासैश्च तथा चान्यैः शुभव्रतैः ।
कायिकी भक्तिराख्याता त्रिविधा तु द्विजन्मनाम् ॥१६८॥

गोघृतक्षीरदधिभी रत्नदीपकुशोदकैः ।
गन्धैर्माल्यैश्च विविधैर्धातुभिश्चोपपादितैः ॥१६९॥

घृतगुग्गुलधूपैश्च कृष्णागरुसुगन्धिभिः ।
भूषणैर्हेमरत्नाद्यैश्चित्राभिः स्रग्भिरेव च ॥१७०॥

नृत्यवादित्रगीतैश्च सर्वैर्वन्योपहारकैः ।
भक्ष्यभोज्योपहारैश्च या पूजा क्रियते नरैः ॥१७१॥

पितामहं समुद्दिश्य भक्तिः सा लौकिकी मता ।
ऋग्यजुःसामजाप्यानि संहिताध्यापनानि च ॥१७२॥

क्रियते ब्रह्म उद्दिश्य सा भक्तिर्वैदिकी स्मृता ।
वेदमन्त्रहविर्योगैर्या क्रिया वैदिकी स्मृता ॥१७३॥

दर्शे वा पौर्णमास्यां वा कर्तव्यमग्निहोत्रकम् ।
प्रशस्तं दक्षिणादानं पुरोडाशचरुक्रिया ॥१७४॥

इष्टिर्धृतिः सोमपानं यज्ञीयं कर्म सर्वशः ।
अग्निभूम्यनिलाकाशानिशाम्बुकरभास्करम् ॥१७५॥

समुद्दिश्य कृतं कर्म तत्सर्वं ब्रह्मदैवतम् ।
आध्यात्मिकी तु द्विविधा ब्रह्मभक्तिः स्थिता नृप ॥१७६॥

सांख्याख्या योगजा चान्या विभागं तत्र मे शृणु ।
चतुर्विंशतितत्त्वानि प्रधानादीनि संख्यया ॥१७७॥

अचेतनानि भोग्यानि पुरुषः पञ्चविंशकः ।
चेतनः पुरुषो भोक्ता न कर्ता तस्य कर्मणः ॥१७८॥

आत्मा नित्योऽव्ययश्चैव अधिष्ठाताप्रयोजकः ।
अव्यक्तः पुरुषो नित्यः कारणं च पितामहः ॥१७९॥

तत्त्वसर्गो भावसर्गो भूतसर्गश्च तत्त्वतः ।
संख्यया परिसंख्याय प्रधानं च गुणात्मकम् ॥१८०॥

ज्ञात्वा साधर्म्यवैधर्म्ये सततं च पृथक् पृथक् ।
प्रधानपुरुषेशानां सामर्थ्यमिदमुच्यते ॥१८१॥

अजो नित्यमयोनित्वं चैतन्यं वा गुणात्मकम् ।
साधर्म्यमानमैश्वर्यं प्रधानं च विधर्मि च ॥१८२॥

कारणत्वं च ब्रह्मत्वं कामित्वमिदमुच्यते ।
प्रयोज्यत्वं प्रधानस्य वैधर्म्यमिदमुच्यते ॥१८३॥

सर्वत्र कर्तृता ब्रह्म पुरुषस्याप्यकर्तृता ।
चेतनत्वं प्रधाने वा समत्वमिदमुच्यते ॥१८४॥

तत्त्वान्तरं च तत्त्वानां कार्यकारणमेव च ।
प्रयोजनं च वै योज्यं ज्ञात्वा तत्त्वं च संख्यया ॥१८५॥

संख्यास्तीत्युच्यते प्राज्ञैर्विनिश्चित्यार्थचिन्तकैः ।
इति तत्त्वस्य संभारं तत्त्वसंख्या च तत्त्वतः ॥१८६॥

ब्रह्मतत्त्वादिकं चापि ज्ञात्वा तत्त्वं विदुर्बुधाः ।
संख्याकृता भक्तिरेषा सद्भिराध्यात्मिकी मता ॥१८७॥

योगजामपि मे भक्त्या शृणु भक्तिं पितामहे।
प्राणायामपरो नित्यं ध्यानवान् नियतेन्द्रियः ॥१८८॥
भैक्ष्यभक्षी व्रती चापि सर्वप्रत्याहृतेन्द्रियः।
धारणं हृदये कृत्वा ध्यायमानः प्रजेश्वरम् ॥१८९॥
हृत्पद्मकर्णिकासीनं रक्तवस्त्रं सुलोचनम्।
परितो द्योतितमुखं ब्रह्मसूत्रकटीतटम् ॥१९०॥
रक्तवर्णं चतुर्बाहुं वरदाभयहस्तकम्।
योगजा मानसी सिद्धिर्ब्रह्मभक्तिः परा स्मृता ॥१९१॥

—:०:—

त्रिविधभक्तिविवरणम्

[स्कन्द० प्रभास० १०७२—१६ (वङ्गवासिसंस्क०)]

त्रिविधाभक्तिरुद्दिष्टा मनोवाक्कायसम्भवाः।
लौकिकी वैदिकी चापि भवेदाध्यात्मिकी तथा ॥२॥
ध्यानधारणया या तु वेदानां स्मरणेन च।
ब्रह्मप्रीतिकरी चैषा मानसी भक्तिरुच्यते ॥३॥
मन्त्रवेदनमस्कारैरग्निश्राद्धविधानकैः।
जाप्यैश्चारण्यकैश्चैव वाचिकी भक्तिरुच्यते ॥४॥
व्रतोपवासनियमैश्चित्तेन्द्रियनिरोधिभिः।
कृच्छ्रसान्तपनैश्चान्यैस्तथा चान्द्रायणादिभिः ॥५॥
ब्रह्मोक्तैश्चोपवासैश्च तथान्यैश्च शुभव्रतैः।
कायिकी भक्तिराख्याता त्रिविधा तु द्विजन्मनाम् ॥६॥
गोघृतक्षीरदधिभिर्मध्विक्षुसुकुशोदकैः।
गन्धमाल्यैश्च विविधैर्वस्तुभिश्चोपपादिभिः ॥७॥
घृतगुग्गुलधूपैश्च कृष्णागुरुसुगन्धिभिः।
भूषणैर्हेमरत्नाद्यैश्चित्राभिः स्रग्भिरेव च ॥८॥

न्यासैः परिसरैः स्तोत्रैः पताकाभिस्तथोत्सवैः ।
नृत्यवादित्रगीतैश्च सर्ववस्तूपहारकैः ॥९॥

भक्ष्यभोज्यान्नपानैश्च या पूजा क्रियते नरैः ।
पितामहं समुद्दिश्य सा पूजा लौकिकी मता ॥१०॥

वेदमन्त्रहविर्भागैः क्रिया या वैदिकी स्मृता ।
दर्शे च पौर्णमास्याञ्च कर्तव्यं चाग्निहोत्रजम् ॥११॥

प्राशनं दक्षिणादानं पुरोडाश इति क्रिया ।
इष्टिर्धृतिः सोमपानं यज्ञियं कर्म सर्वशः ॥१२॥

ऋग्यजुःसामजाप्यानि संहिताध्ययनानि च ।
क्रियन्ते ब्रह्माणमुद्दिश्य सा भक्तिर्वैदिकोच्यते ॥१३॥

प्राणायामपरो नित्यं ध्यानवान् विजितेन्द्रियः ।
भैक्ष्यभक्षी व्रती चापि सर्वप्रत्याहृतेन्द्रियः ॥१४॥

धारणं हृदये कृत्वा ध्यायमानः प्रजेश्वरम् ।
हृत्पद्मकर्णिकासीनं रक्तवर्णं सुलोचनम् ॥१५॥

पश्यन्नुद्योतितमुखं ब्रह्माणं सुकटीतटम् ।
रक्तवर्णं चतुर्बाहुं वरदाभयहस्तकम् ॥
एवं यश्चिन्तयेद्देवं ब्रह्मभक्तः स उच्यते ॥१६॥

नारदभक्तिसूत्रम्

भक्तेः स्वरूपम्

१. अथातो भक्तिं व्याख्यास्यामः ॥ १ ॥

२. सा त्वस्मिन् परमप्रेमरूपा ॥ २ ॥

३. अमृतस्वरूपा च ॥ ३ ॥

४. यल्लब्ध्वा पुमान् सिद्धो भवत्यमृतो भवति तृप्तो भवति ॥ ४ ॥

५. यत्प्राप्य न किञ्चिद्वाञ्छति, न शोचति, न द्वेष्टि, न रमते, नोत्साही भवति ॥ ५ ॥

६. यज्ज्ञात्वा मत्तो भवति, स्तब्धो भवति, आत्मारामो भवति ॥ ६ ॥

प्रेम्णि अनन्यता

७. सा न कामयमाना निरोधरूपत्वात् ॥ १ ॥

८. निरोधस्तु लोकवेदव्यापारन्यासः ॥ २ ॥

९. तस्मिन्ननन्यता तद्विरोधिषूदासीनता च ॥ ३ ॥

१०. अन्याश्रयाणां त्यागोऽनन्यता ॥ ४ ॥

११. लोके वेदेषु च तदनुकूलाचरणं तद्विरोधिषूदासीनता ॥ ५ ॥

१२. भवतु निश्चयदार्ढ्यादूर्ध्वं शास्त्ररक्षणम् ॥ ६ ॥

१३. अन्यथा पातित्याशङ्कया ॥ ७ ॥

१४. लोकोऽपि तावदेव, किन्तु भोजनादिव्यापारस्त्वा-शरीरधारणावधि ॥ ८ ॥

प्रेमरूपाया भक्तेर्लक्षणानि उदाहरणानि च

१५. तल्लक्षणानि वाच्यन्ते नानामतभेदात् ॥ १ ॥

१६. पूजादिष्वनुराग इति पाराशर्यः ॥ २ ॥

१७. कथादिष्विति गर्गः ॥ ३ ॥
१८. आत्मरत्यविरोधेनेति शाण्डिल्यः ॥ ४ ॥
१९. नारदस्तु तदर्पिताखिलाचारिता तद्वि-
स्मरणे परमव्याकुलतेति ॥ ५ ॥
२०. अस्त्येवमेवम् ॥ ६ ॥
२१. यथा व्रजगोपिकानाम् ॥ ७ ॥
२२. तत्रापि न माहात्म्यज्ञानविस्मृत्यपवादः ॥ ८ ॥
२३. तद्विहीनं जाराणामिव ॥ ९ ॥
२४. नास्त्येव तस्मिँस्तत्सुखसुखित्वम् ॥ १० ॥

प्रेमरूपाया भक्तेः फलरूपत्वम्

२५. सा तु कर्मज्ञानयोगेभ्योऽप्यधिकतरा ॥ १ ॥
२६. फलरूपत्वात् ॥ २ ॥
२७. ईश्वरस्याप्यभिमानद्वेषित्वाद्दैन्यप्रियत्वाच्च ॥ ३ ॥
२८. तस्या ज्ञानमेव साधनमित्येके ॥ ४ ॥
२९. अन्योन्याश्रयत्वमित्यन्ये ॥ ५ ॥
३०. स्वयं फलरूपतेति ब्रह्मकुमाराः ॥ ६ ॥
३१. राजगृहभोजनादिषु तथैव दृष्टत्वात् ॥ ७ ॥
३२. न तेन राजपरितोषः क्षुच्छान्तिर्वा ॥ ८ ॥
३३. तस्मात् सैव ग्राह्या मुमुक्षुभिः ॥ ९ ॥

भक्तेः साधनानि

३४. तस्याः साधनानि गायन्त्याचार्याः ॥ १ ॥
३५. तत्तु विषयत्यागात् सङ्गत्यागाच्च ॥ २ ॥
३६. अव्यावृतभजनात् ॥ ३ ॥
३७. लोकेऽपि भगवद्गुणश्रवणकीर्तनात् ॥ ४ ॥
३८. मुख्यतस्तु महत्कृपयैव भगवत्कृपालेशाद्वा ॥ ५ ॥

सत्सङ्गस्य माहात्म्यम्

३९. महत्सङ्गस्तु दुर्लभोऽगम्योऽमोघश्च ॥ ३९ ॥
४०. लभ्यतेऽपि तत्कृपयैव ॥ ४० ॥

४१. तस्मिंस्तज्जने भेदाभावात् ॥ ४१ ॥

४२. तदेव साध्यतां तदेव साध्यताम् ॥ ४२ ॥

दुःसङ्गस्य त्यागः

४३. दुःसङ्गः सर्वथैव त्याज्यः ॥ १ ॥

४४. काम-क्रोध-मोह-स्मृतिभ्रंश-बुद्धिनाशसर्वनाशकारणत्वात् ॥ २ ॥

४५. तरङ्गायिता अपीमे सङ्गात् समुद्रायन्ति ॥ ३ ॥

मायां कस्तरति

४६. कस्तरति कस्तरति मायाम् ? यः सङ्गांस्त्य-
जति, यो महानुभावं सेवते, निर्ममो भवति ॥ १ ॥

४७. यो विविक्तस्थानं सेवते, यो लोकबन्धमुन्मूलयति,
निस्त्रैगुण्यो भवति, यो योगक्षेमं त्यजति ॥ २ ॥

४८. यः कर्मफलं त्यजति, कर्माणि संन्यसति,
ततो निर्द्वन्द्वो भवति ॥ ३ ॥

४९. यो वेदानपि संन्यसति, केवलमविच्छिन्नानुरागं लभते ॥ ४ ॥

५०. स तरति स तरति, स लोकांस्तारयति ॥ ५ ॥

पराभक्तिर्गौणीभक्तिश्च

५१. अनिर्वचनीयं प्रेमस्वरूपम् ॥ १ ॥

५२. मूकास्वादनवत् ॥ २ ॥

५३. प्रकाशते क्वापि पात्रे ॥ ३ ॥

५४. गुणरहितं कामनारहितं प्रतिक्षणवर्द्ध-
मानविच्छिन्नं सूक्ष्मतरमनुभवरूपम् ॥ ४ ॥

५५. तत्प्राप्य तदेवावलोकयति, तदेव श‍ृणोति, तदेव चिन्तयति ॥ ५ ॥

५६. गौणी त्रिधा गुणभेदादार्तादिभेदाद्वा ॥ ६ ॥

५७. उत्तरस्मादुत्तरस्मात् पूर्वपूर्वा श्रेयाय भवति ॥ ७ ॥

भक्तेः सौलभ्यं महत्त्वं च

५८. अन्यस्मात् सौलभ्यं भक्तौ ॥ १ ॥

५९. प्रमाणान्तरस्यानपेक्षत्वात् स्वयं प्रमाणत्वात् ॥२॥

६०. शान्तिरूपात् परमानन्दरूपाच्च ॥ ३ ॥

भक्तेः साधनान्यन्तरायाश्च

६१. लोकहानौ चिन्ता न कार्या, निवेदितात्मलोकवेदत्वात्[1] ॥ १ ॥

६२. न तदसिद्धौ[2] लोकव्यवहारो हेयः, किन्तु फलत्यागस्तत्साधनं च कार्यमेव ॥ २ ॥

६३. स्त्री-धन-नास्तिकचरित्रं[3] न श्रवणीयम् ॥ ३ ॥

६४. अभिमान-दम्भादिकं त्याज्यम् ॥ ४ ॥

६५. तदर्पिताखिलाचारः सन् कामक्रोधाभिमानादिकं तस्मिन्नेव करणीयम् ॥ ५ ॥

प्रेमिभक्तानां महिमा

६६. त्रिरूपभङ्गपूर्वकं नित्यदास्यनित्यकान्ताभजनात्मकं वा प्रेमैव कार्यं प्रेमैव कार्यम् ॥ १ ॥

६७. भक्ता एकान्तिनो मुख्याः ॥ २ ॥

६८. कण्ठावरोधरोमाञ्चाश्रुभिः परस्परं लपमानाः पावयन्ति कुलानि पृथ्वीं च ॥ ३ ॥

६९. तीर्थीकुर्वन्ति तीर्थाणि, सुकर्मीकुर्वन्ति कर्माणि, सच्छास्त्रीकुर्वन्ति शास्त्राणि ॥ ४ ॥

७०. यतस्तन्मयाः ॥ ५ ॥

७१. मोदन्ते पितरो नृत्यन्ति देवताः सनाथा चेयं भूमिर्भवति ॥ ६ ॥

---

१. लोकभेदशीलत्वादिति पाठान्तरम् ।

२. पाठान्तरम्—'तत्सिद्धौ' ।

३. पाठान्तरम्—'स्त्रीधननास्तिकवैरिचरित्रम्' ।

७२. नास्ति तेषु जाति-विद्या-रूप-कुल-धनक्रियादिभेदः ॥ ७ ॥

७३. यतस्तदीयाः ॥ ८ ॥

वाद-विवादरूपा विघ्नाः

७४. वादो नावलम्ब्यः ॥ १ ॥

७५. बाहुल्यावकाशत्वादनियतत्वाच्च ॥ २ ॥

भक्तेः प्रधानाः सहायकाः

७६. भक्तिशास्त्राणि मननीयानि तदुद्बोधककर्माण्यपि करणीयानि ॥ १ ॥

७७. सुखदुःखेच्छालाभादित्युक्ते काले प्रतीक्ष्यमाणे क्षणार्द्धमपि व्यर्थं न नेयम् ॥ २ ॥

७८. अहिंसा-सत्य-शौच-दयाऽऽस्तिक्यादिचारित्र्याणि परिपालनीयानि ॥ ३ ॥

७९. सर्वदा सर्वभावेन निश्चिन्तितैर्भगवानेव भजनीयः ॥ ४ ॥

प्रेमभक्तेः फलं भक्तेः सर्वश्रेष्ठता च

८०. स कीर्त्यमानः शीघ्रमेवाविर्भवति अनुभावयति च भक्तान् ॥ १ ॥

८१. त्रिसत्यस्य भक्तिरेव गरीयसी भक्तिरेव गरीयसी ॥ २ ॥

८२. गुणमाहात्म्यासक्ति-रूपासक्ति-पूजासक्ति-स्मरणासक्ति-दास्यासक्ति-सख्यासक्ति-कान्तासक्ति-वात्सल्यासक्ति-आत्मनिवेदनासक्ति-तन्मयतासक्ति-परमविरहासक्तिरूपा एकधाप्येकादशधा भवति ॥ ३ ॥

८३. इत्येवं वदन्ति जनजल्पनिर्भया एक-
मताः कुमार-व्यास-शुक-शाण्डिल्य-गर्ग-
विष्णु-कौण्डिन्यशेषोद्धवारुणि-बलि-
हनुमद्विभिषणादयो भक्ताचार्याः ॥ ४ ॥

८४. य इदं नारदप्रोक्तं शिवानुशासनं विश्व-
सिति श्रद्धत्ते, स भक्तिमान् भवति, स
प्रेष्ठं लभत इति ॥ ५ ॥

समाप्तमिदं नारदभक्तिसूत्रम् ।

—:०:—

भक्तिमीमांसा

श्रीबदरीनाथो जयति

प्रथमाध्यायः

प्रथमः पादः

१. अथातो भक्तिजिज्ञासा ॥ १ ॥

२. भक्तिर्मनस उल्लासविशेषः ॥ २ ॥

३. भाव एवेयमित्येके ॥ ३ ॥

४. रसस्तु तत्सामग्रीत उत्पत्तेः ॥ ४ ॥

इति भक्तिमीमांसासूत्रे प्रथमाध्यायस्य प्रथमः पादः ॥

—:०:—

द्वितीयः पादः

५. स द्विविधो निर्गुणः सगुणश्च ॥ १ ॥

६. अन्त्यो नवविधो भोक्तृभेदात् ॥ २ ॥

७. नवविधश्चैषः पुराणादिषु ॥ ३ ॥

---

३. सूत्रमिदमालङ्कारिकाणामन्यतमं पक्षं निर्दिशति । द्रष्टव्यम्—
'रतिर्देवादिविषया व्यभिचारी तथाञ्जितः ।
भावः प्रोक्तः' इति काव्यप्रकाशस्थं ४।४८ पद्यम् ।

४. परत्रानासङ्गं जनयति रतिर्या नियमतः
परस्मिन्नेवास्मिन् समरसतया पश्यत इमम् ।
परप्रेमाढ्येयं भवति परमानन्दमधुरा
पराभक्तिः प्रोक्ता रस इति रसास्वादनचणैः ॥
(साहित्यसारस्य टीकायामुद्धृतमिदं पद्यम् ; निर्णयसागरसंस्करणम्, पृ० १३०)

६–७. वोपदेवरचितमुक्ताफलस्थं वचनमेतदनुसन्धेयमस्मिन् विषये—"स नवधा भक्तः । नवविधत्वे हेतुमाह—भक्तीति । भक्तिर्हि विहिताऽविहिता च । भक्तिरसस्यैव हास्य-शृङ्गार-करुण-रौद्र-भयानक-बीभत्स-शान्ताद्भुत-वीररूपेणानुभवात् ।" (एकादश-परिच्छेदे) ।

८. समासव्यासाभ्यां स पुनस्त्रिविधो त्रिस्रुण्नदी समुद्रश्च पूर्वपूर्वाभ्यासात् ॥ ४ ॥
९. तद्भेदोऽल्पकालाऽवच्छेदाऽनवच्छेदाभ्याम् ॥ ५ ॥
१०. जातिभेदो वा ॥ ६ ॥
११. साधनेषु भक्तिशब्दो गौणः, आयुर्घृतमितिवत् ॥ ७ ॥

इति भक्तिमीमांसासूत्रे प्रथमाध्यायस्य द्वितीयः पादः ॥

—:०:—

द्वितीयाध्यायः

प्रथमः पादः

१२. भक्तिर्न जन्या रसो हि सा ॥ १ ॥
१३. नागमविरोधात् ॥ २ ॥
१४. भक्तियोगो बहुविधः पुराणेषु ॥ ३ ॥
१५. स द्विविधः—शुद्धो मिश्रश्च ॥ ४ ॥
१६. मिश्रस्त्रिविधः, कर्मज्ञानतदुभयमिश्रणात् ॥ ५ ॥
१७. आद्यस्य न विधा कर्मज्ञानविरोधात् ॥ ६ ॥
१८. परिपाकापरिपाकावपीतरभेदाविति चेन्न; अवस्थाभेदौ हि तौ ॥ ७ ॥

इति भक्तिमीमांसासूत्रे द्वितीयाध्यायस्य प्रथमः पादः ॥

—:०:—

द्वितीयः पादः

१९. त्रिविधः कर्ममिश्रः सात्त्विकादिभेदेन ॥ १ ॥
२०. सात्त्विकस्त्रिविधः, कर्मक्षयविष्ण्वर्पणविधिसिद्ध्यर्थभेदेन ॥ २ ॥
२१. तथा राजसो विषयाद्यभिसन्धिभेदात् ॥ ३ ॥

---

१९. तुलनीयं मुक्ताफलवचनम् (पञ्चमपरिच्छेदे)—"कर्ममिश्रा त्रेधा" ।

२०. तत्रैव—"सात्त्विकी त्रेधा—कर्मक्षयार्था, विष्णुप्रीत्यर्था विविधसिद्ध्यर्था च" तथ्यमिदं श्रीमद्भागवतवचनमूलकमेव । तद्यथा—

कर्मनिर्हारमुद्दिश्य परस्मिन् वा तदर्पणम् ।
यजेद् यष्टव्यमिति वा पृथग्भावः स सात्त्विकः ॥
(भागवत० ३।२९।१०)

२१. तत्रैव "राजसी त्रेधा—विषयार्था यशोऽर्था-ऐश्वर्यार्था च" । तुलनीयमेतद् भागवतपद्येनानेन—

२२. एवं तामसो हिंसादिफलभेदात् ॥ ४ ॥

२३. ज्ञानमिश्रस्त्वेक एव ॥ ५ ॥

२४. उभयमिश्रश्च त्रिविध उत्तममध्यमप्राकृतभेदेन सत्त्वतारतम्यात् ॥ ६ ॥

२५. कामाद्योऽपीति चेन्नाद्याऽन्त्ययोः साधनं हि फलं न भक्तिः कर्मवत् ॥ ७ ॥

२६. मध्यमयोर्न साधनमपि ॥ ८ ॥

इति भक्तिमीमांसासूत्रे द्वितीयाध्यायस्य द्वितीयः पादः ।

—:०:—

विषयानभिसन्धाय यश ऐश्वर्यमेव वा ।
अर्चादावर्चयेद् यो मां पृथग्भावः स राजसः ॥
(भागवत० ३।२९।९)

२२. तत्रैव "तामसी त्रेधा—हिंसार्था, दम्भार्था मात्सर्यार्था च" । तुलनीयम्—

अभिसन्धाय यो हिंसा दम्भं मात्सर्यमेव वा ।
संरम्भी भिन्नदृग्भावं मयि कुर्यात् स तामसः ॥
(भागवत० ३।२९।८)

२३. ज्ञानमिश्राभक्तिर्मुक्ताफले वोपदेवेन निर्गुण्यभक्तिरिति कथ्यते । कथनमिदं भागवत-वचनमेतदनुरुणद्धि—

मद्गुणश्रुतिमात्रेण मयि सर्वगुहाशये ।
मनोगतिरविच्छिन्ना यथा गङ्गाम्भसोऽम्बुधौ ।
लक्षणं भक्तियोगस्य निर्गुणस्य ह्युदाहृतम् ॥
(भागवत० ३।२९।११)

२४. मुक्ताफले चोच्यते—"कर्मज्ञानमिश्रा त्रेधा; उत्तमा, मध्यमा, अधमा च सत्त्वतार-तम्यात्" । एतच्च भागवतपद्यान्यनुरुणद्धि । भागवते एकादशस्कन्धस्य द्वितीयाध्यायस्य ४५–४७ पद्यानि द्रष्टव्यानि ।

२४–२५. अनयोः सूत्रयोर्मुक्ताफलस्य पञ्चमपरिच्छेदे वर्णिता निषिद्धभक्तिप्रकाराश्चत्वारो निर्दिष्टाः । ते च यथा—(क) कामजा, (ख) द्वेषजा, (ग) भयजा तथा (घ) स्नेहजा । हेमाद्रेर्व्याख्यानुरोधेन कामस्वरूपमित्थमात्मानमभिव्यनक्ति—परपरिगृहीताया अनूढाया वा स्त्रियाः परपुरुषे दुरभिसन्धिः । द्वेषो भयश्च प्रख्यातावेव । कामस्तु 'सन्निकर्षजः परस्परमकृत्रिमश्चित्तबन्धः' इति व्याख्यातः स्नेहात्सुतरां विभिद्यते । एतेषां दृष्टान्तास्तु क्रमश इत्थमुच्यन्ते—(क) गोपीनाम्, (ख) शिशुपालस्य, (ग) कंसस्य तथा (घ) युधिष्ठिरादिपाण्डवानां वृष्णीनां च ।

तृतीयाध्यायः

प्रथमः पादः

२७. सर्वं भक्तियोगोऽविशेषात् ॥ १ ॥
२८. त्रिवर्गो वा तस्यैव भक्तिसम्बन्धात् ॥ २ ॥
२९. यथाश्रुतीति चेन्न भक्तिवैषम्यात् ॥ ३ ॥
३०. अपि वा विलम्बाऽविलम्बाभ्यां तदुभयोपपत्तेः ॥ ४ ॥
३१. श्रवणमेव वा सर्वत्र सामर्थ्यसव्यपेक्षो हि विधिः ॥ ५ ॥
३२. स्मरणमपि वा ॥ ६ ॥
३३. उत्तरोत्तरस्मिन् पूर्वः पूर्वश्च ॥ ७ ॥
३४. समुच्चयस्त्वङ्गभावेऽपि ॥ ८ ॥
३५. न चैष विधिर्हेतुनिर्देशात् ॥ ९ ॥
३६. विधिश्चेन्नित्यः स्यात् ॥ १० ॥

इति भक्तिमीमांसासूत्रे तृतीयाध्यायस्य प्रथमः पादः ।

—:०:—

द्वितीयः पादः

३७. इतराणि तदङ्गानि ॥ १ ॥
३८. सर्वैः सर्वाण्यविशेषात् प्रयुज्यन्ते ॥ २ ॥
३९. विन्दुना वाद्यानि लौकिकतुल्यसामग्रीको हि सः ॥ ३ ॥
४०. इतराणि तु द्वाभ्याम् ॥ ४ ॥
४१. आरादुपकारीण्यप्येवमिति चेत् ॥ ५ ॥
४२. नोच्छिद्येतैव हि नदी ॥ ६ ॥
४३. पादसेवादिकमप्यङ्गं भयद्वेषवतोस्तदनुत्पत्तेः ॥ ७ ॥
४४. नेह प्रधानानिष्पत्तेः ॥ ८ ॥
४५. अपि चोद्दीपकाऽभावाल्लौकिकवत् ॥ ९ ॥
४६. सङ्गीतशब्दश्रवणमपि प्रधानं भक्तिकामश्रुतेः ॥ १० ॥
४७. न शब्दप्रधानत्वात् ॥ ११ ॥
४८. गानञ्च स्वकर्तृकम् ॥ १२ ॥
४९. सङ्गाने नास्ति नियमः ॥ १३ ॥
५०. पर एव वा गायति, अप्रयोज्यं हि तत्तमेवेति श्रुतेः ॥ १४ ॥

५१. श्रवणं तु भक्तमुखतोऽतिशयहेतुः श्रुतेरनुभवाच्च ॥ १५ ॥
५२. सप्तमवर्गोक्ता आद्यवर्गप्रधानस्याऽपि वाक्यसंयोगात् ॥ १६ ॥
५३. अपि वा नाज्ञातवृद्धिधर्मकस्य द्वित्वयापत्तेः ॥ १७ ॥
५४. न च लक्षणा प्रधानधर्मवित्ततिरल्पधर्मकत्वात् ॥ १८ ॥
५५. अपूर्वं वाऽऽज्ञातधर्मकत्वात् ॥ १९ ॥
५६. नान्यानर्थक्यं फलतारतम्यादधिकारिभेदाच्च ॥ २० ॥
५७. सप्तमवर्गोक्ता इहापि ॥ २१ ॥
५८. कीर्तनं पुनरुक्तं स्यादिति चेन्न भिन्नं ह्येतत ॥ २२ ॥
५९. एतेन षष्ठवर्गश्रवणं व्याख्यातम् ॥ २३ ॥
६०. सप्तमवर्गीयास्तु न तत्र यमनियमोपदेशात् ॥ २४ ॥
६१. सङ्कीर्तनं नाम्नां सुस्वरेण सम्बन्धिगानम् ॥ २५ ॥
६२. नवं लक्षणादौ कीर्तनं शब्दसंस्कारकम् ॥ २६ ॥
६३. नमस्कारमात्राङ्गकं च क्वचिच्छ्रवणम् ॥ २७ ॥
६४. अनुपदेशे फलं स्वर्गः स्यात् ॥ २८ ॥
६५. भक्तिर्वानर्थो हि सः ॥ २९ ॥
६६. लिङ्गाच्च ॥ ३० ॥
६७. षाष्ठवर्गिकप्रकृतिकमिदं साप्तवर्गिकधर्मकं वा न वा पुनरुपदेशात् ॥ ३१ ॥
६८. नमस्कारोपदेश एवायमिति चेन्नानेकगुणश्रुतेः ॥ ३२ ॥
६९. क्वचित्तु केवलं स्मरणं तदप्येवमेव ॥ ३३ ॥
७०. एतयोरत्युत्तमाधिकारिकत्वम् ॥ ३४ ॥

इति भक्तिमीमांसासूत्रे तृतीयाध्यायस्य द्वितीयः पादः ।

—:०:—

चतुर्थाध्यायः

प्रथमः पादः

७१. भक्तेः फलमीश्वरवशीकारः ॥ १ ॥

---

७१. तुलनीयं श्रीमद्भागवतवचनम्—

अहं भक्तपराधीनो ह्यस्वतन्त्र इव द्विज ।
साधुभिर्ग्रस्तहृदयो भक्तैर्भक्तजनप्रियः ॥

७२. अनर्थनिवृत्तिरित्येके ॥ २ ॥
७३. तन्न विनाऽपि पुरुषप्रयत्नं निवृत्तेः ॥ ३ ॥
७४. जीवन्मुक्तिः फलं नैष्कर्म्यमपीति श्रुतेः ॥ ४ ॥
७५. नैवमपि बाधितनिवृत्तेः पुरुषानुपेयत्वात् ॥ ५ ॥
७६. उक्तदोषाच्च ॥ ६ ॥
७७. भक्तिरेव परमः पुरुषार्थो मोक्षस्याऽपुरुषार्थत्वादिति तु भागवताः ॥ ७ ॥

इति मीमांसासूत्रे चतुर्थाध्यायस्य प्रथमः पादः ॥

—:०:—

द्वितीयः पादः

७८. तानि च भक्तेः श्रूयन्ते हि ॥ १ ॥
७९. नानानभिसंहितानि हि भक्तिर्हि साधनम् ॥ २ ॥
८०. अविशेषाच्चयमिति चेत् ॥ ३ ॥
८१. न समुद्रस्तद्वशीकरणविरोधात् ॥ ४ ॥
८२. अन्ययोरपि न त्वं तत्कालेन तद्विरोधादिति चेत्, नैवम्; प्रागुत्तरं वा तत्सम्भवात् ॥ ५ ॥
८३. भक्त्या मामभिजानातीति चतुर्थसाधनमधि + त्येत्याचार्याः ॥ ६ ॥
८४. नदी वा ॥ ७ ॥
८५. मध्यमोत्तमयोर्वशीकारः परिग्रहस्तु त्रयाणाम् ॥ ८ ॥
८६. भक्तिर्नार्थो विनाशयोगाज्जन्यभावो हि ॥ ९ ॥
८७. न हेतुर्जन्यत्ववदप्रयोजकत्वात् ॥ १० ॥
८८. अवच्छदवत्त्वेनाऽश्रुतेश्च ॥ ११ ॥
८९. ध्वंसकादृष्टाभावाच्च ॥ १२ ॥
९०. मनोनाशात्तन्नाशश्चेत्तथापि नानार्थ इष्टनाशाननुभवात् ॥१४॥
९१. सामर्थ्यमर्थिता विद्यावाधिकारिविशेषणं नान्यदश्रुतेः ॥१५॥
९२. चतुर्णामेवेतरेषां विद्याविरहात् ॥१६॥
९३. पापनाशसाधनत्वं सर्वेषामिति चेत् ॥१७॥
९४. न विद्याद्यपेक्षानपेक्षाभ्यां विशेषात् ॥१८॥

मयि निर्बद्धहृदयाः साधवः समदर्शिनः ।
वशे कुर्वन्ति मां भक्त्या सत्स्त्रियः सत्पतिं यथा ॥

९५. निरङ्कत्वाच्च तस्य तत्र ॥१९॥
९६. अपि वाऽन्येषामपि श्रवणात् ॥२०॥
९७. विद्या कथमिति चेद् गुरूपदेशादितः ॥२१॥
९८. पूर्वमीमांसासिद्धान्त एवं सति व्याप्ये [बाध्ये] तेति चेत् ॥२२॥
९९. नाध्ययनविधितोऽधिकारनिर्णयो हि तत्र ॥२३॥
१००. लिङ्गदर्शनाच्च ॥२४॥
१०१. उपलभ्यते च ॥२५॥
१०२. वामदेवादीनामिव जन्मान्तरीणपुराणश्रवणादिसम्भवाच्च ॥२६॥

इति भक्तिमीमांसासूत्रे चतुर्थाध्यायस्य द्वितीयः पादः ।

ग्रन्थश्च समाप्तः ॥

—×—

परभक्तिसूत्राणि

[स्वामिहरिहरानन्दारण्यप्रणीतानि]

अथ भक्तितत्त्वानुशासनम् ॥१॥
इष्टा महापुरुषसंस्था भक्तिः ॥२॥
योग्यविषया स्वर्गापवर्गदा ॥३॥
त्वम्पदलक्ष्ये रागात्मिकाऽपरा ॥४॥
प्रत्यगात्मनि प्रतिष्ठा परा ॥५॥

इति प्रथमाह्निकम्

अवाङ्मनोगोचरत्वाद् न सा रागात्मिका ॥६॥
न ज्ञमात्रं भक्तिरुपविद्धबोधप्रवाहात्मकत्वात् ॥७॥
तत्र सुखोपविद्धाऽपरा ॥८॥
शान्त्युपविद्धा परा ॥९॥

इति द्वितीयाह्निकम्

अपरया परनिष्पत्तिः ॥१०॥
अनुकूलाचारादुत्कर्षः ॥११॥

प्रसन्नानां चित्तेन्द्रियप्राणानां भजनीयपुरुषे प्रवृत्तिस्थिती अनुकूलाचाराः ॥१२॥

रुचिवैचित्र्यात् प्रशान्तशान्तदास्यादयो भावाः ॥१३॥

श्रेष्ठः प्रशान्तभावः, शान्तेर्निरतशयोत्कर्षत्वात् ॥१४॥

विक्षिप्तचेतसां बाह्येज्या ॥१५॥

रागस्य चिरसङ्गनिमित्तत्वात् ततो दृढा रतिः ॥१६॥

दृढरतेश्चेतरविरक्तस्यान्तरेज्या ॥१७॥

बहुलस्मरणं तल्लक्षणम् ॥१८॥

आनन्दाश्रुरोमहर्षादयस्तत्सहभुवः ॥१९॥

भजनीयमात्रख्यातिस्तन्निष्ठा ॥२०॥

इति तृतीयाह्निकम्

तदा निश्चलाश्चित्तेन्द्रियप्राणा भजनीयसंस्थत्वात् ॥२१॥

भजनीयतत्त्वज्ञानं सालोक्यादयश्च तत्फलम् ॥२२॥

तत्त्वज्ञानाच्छान्तात्माधिगमः ॥२३॥

सम्यग्विरक्तस्य तन्मात्रसंस्था पराभक्तिः ॥२४॥

शश्वच्छान्तिः क्षयातिशयहीना तत्फलम् ॥२५॥

ततः कृतकृत्यता ततः कृतकृत्यता ॥२६॥

इति चतुर्थाह्निकम्

॥ ग्रन्थश्च समाप्तः ॥

अथ विशेषार्थबोधकपदानामुपलब्धि-
क्रमेण संकलनम्

शब्दः	अर्थः	पृष्ठम्
भक्तिः, भजनम्, भावः—	इहामुत्रोपाधिनैराश्येनामुष्मिन् मनः कल्पनम्।	४
नैष्कर्म्यम्—	” ”	”
प्रेम—	प्रीतिरेव रतेः परां काष्ठां गता।	६
अनन्यममता—	ईशविषयकाव्यभिचारिममता।	६
ब्रह्मण्याविष्टचित्तः—	नित्यप्रेमपरीतात्मादिचतुर्विधान्यतमः।	१०
नित्यप्रेमपरितात्मा—	ईशप्रेमसमाधियुततत्वात् सर्वदेशयुक्तः।	१०
कदाचित्प्रेमसमोहितः—	सर्वत्र समबुद्ध्या कदाचिदीशप्रेमयुक्तः।	१०
कृत्रिमप्रेमयुक्तः—	ईशप्रेम्णि हठाच्चित्तनिवेशनशीलः।	१०
प्रेमोदारः—	परमभक्तादिसदृशो नास्मीति शोकयुक्तः	१०
उन्नम्—	ईशदर्शनोत्कण्ठितस्य देहाद्यास्थारहितस्य मनसो द्रुतिः*।	१२
पत्तम्—	ईशाभिव्यक्तिकारकव्याजप्रश्नादिना मनसो द्रुतिः*।	१३
ललितम्—	औत्कण्ठ्यादीशदर्शनार्थं धाष्टर्यादियुक्ता मनसो द्रुतिः*।	१४
दलितम्—	ईशदर्शनाभावे शरीरादिवैवर्ण्यादिप्रयोजिका अन्तःकरणवृत्तिः*।	१५

* सर्वत्रैतच्चिह्नयुते कथञ्चित्स्वरूपानुगमो लक्षणबोधकश्लोकाधारेणेति ज्ञेयम्।

मिलितम्—	वियुक्तस्वेष्टप्राप्त्या सुखततेः कारणभूता चित्तद्रुतिः* ।	१६
कलितम्—	स्वेष्टोपभोगेन लब्धपदस्य चेतसो द्रुतिः* ।	१७
छलितम्—	स्वेष्टासक्तिविशिष्टस्यापि चेतसोऽमर्षेण निन्दादिप्रयोजिका द्रुतिः* ।	१८
चलितम्—	अन्यजन्मन्यपि स्वेष्टचिन्तायुतचेतसः स्वेष्ट-भजनप्रयोजिका द्रुतिः* ।	१९
क्रान्तम्—	अन्यविषयत्यागपूर्वकं स्वेष्टस्य निमीलित-नयनपूर्वकसेवनप्रयोजिका चेतसो द्रुतिः* ।	२०
विक्रान्तम्—	क्रान्तमेव स्वीयभाग्यमहत्त्वबोधकप्रयोगयुतम्* ।	२०
संक्रान्तम्—	स्वदोषज्ञानपूर्वकपश्चात्तापविशिष्टा चेतसो द्रुतिः* ।	२१
विहृतम्—	ईशदर्शनाद्यर्थमेव स्वीयशरीरादिसर्वस्व-मित्युत्कटा चेतसो द्रवावस्था* ।	२२
गलितम्—	ईशगुणस्मरणादितोऽन्यत्सर्वविस्मरणपूर्विका जडादेरिव तदेकविषया वृत्तिः* ।	२४
संतृप्तम्—	व्यापकानन्तानन्दपूर्णेश्वरध्यानादिना सर्वथा निवृत्तभेदा सुखघना चेतसो द्रुतिः* ।	२४
भक्तिः—	महत्सेवादिभूमिकाभेदेनैकादशधान्यतमा ।	२६
महत्सेवा—	भगवत्सेवाभगवद्भक्तसेवयान्यतरा ।	३१
भगवत्सेवा—	परमेश्वरस्य प्रीत्यै हृत्कायवचोभिः सेवा ।	३१
भगवद्भक्तसेवा—	भक्तप्रीत्यै हृत्कायवचोभिः सेवा ।	३२
भक्तदयापात्रता—	सौशील्यादिगुणैरस्य दुःखं मा भवत्वेवंरूप-दयाविषयता ।	३४
भगवद्धर्मश्रद्धा—	सद्गुरुदर्शितभागवतधर्मेष्वास्तिक्यबुद्धिः ।	३७
हरिगुणश्रुतिः—	परमेश्वरगुणसंश्रवादिरूपा सत्कृतिः ।	३६

रत्यङ्कुरः—	द्रुतचित्तप्रविष्टभगवदाकारतारूपोत्कटसंस्कार-विशेषोत्पत्तिः ।	४१
स्वरूपाधिगमः—	प्रत्यक्स्वात्मनः स्थूलादिदेहद्वयातिरिक्तत्वेन साक्षात्कारः ।	४२
प्रेमवृद्धिः—	परमात्मभावनया विलक्षणानन्दयुक्ता सर्वदा तन्मनस्कता ।	४४
प्रेमस्फुरणम्—	प्रेमविषयस्य भगवतः संतोषहेतुकः साक्षात्कारः ।	४५
भगवद्धर्मनिष्ठा—	परमेश्वरस्य कीर्तनादिनियमानां स्वप्नेऽप्यत्यागः ।	४६
भगवद्गुणशालिता—	हृदि कामसमवाप्तता-परमानन्दपूर्णता-सद्रूपतादिकावस्था ।	४९
प्रेम्णः परमा काष्ठा—	प्रेमविषयस्याल्पलवादिकालमपि विरहासहिष्णुता ।	५०
मोक्षः—	भगवत्प्रीतिरेव स्वप्रकाशनिजसुखसंविदालिङ्गितत्वेन सुखरूपा ।	५१
परमपुरुषार्थः—	तत्त्वज्ञानसाध्यः सुखसंविद्भगवदालिङ्गितः प्रेमा ।	५२
रसः—	विभावाद्यभिव्यक्तो रागः ।	६१
फलभक्तिः—	परमेश्वरचरणसेवामवगाहमानमनःसमुल्लासः स्वानन्दमाविर्भावयन् कार्यकारणलिङ्गादिभिरभिव्यक्तो रसरूपो रत्याख्यः स्थायी भावः ।	६२
सार्ष्टिः—	सारूप्यम् ।	६३
सायुज्यम्—	तादात्म्यम् ।	६३
विभावः—	यत्र येन च रसो विभाव्यते (आलम्बन-उद्दीपनान्यतरः)।	६३
आलम्बनः—	यमुद्दिश्य यत्र च रतिःप्रवर्तते ।	६३

उद्दीपनविभावः—	यस्मिन् कृते रस उद्दीप्तः पुष्टो भवति ।	६५
अनुभावः—	रसो येनानुभाव्यते—प्रकाश्यते सः ।	६६
व्यभिचारिभावः—	रत्यादेर्विशेषतोऽभिमुखतां यश्चारयति भावः सः।	६७
हार्दम्—	दोषदर्शननाश्यस्नेहः ।	७०
सौहार्दम्—	दोषदर्शनेऽपि यावत्प्रियाप्तिं न नश्यति स्नेहः ।	७०
प्रेमा-रागः-भावः—	दोषदर्शने प्रियाप्तावपि यो न नश्यति स्नेहः ।	६३
भक्तिशेषत्वम्—	भक्तिफलोपकारकत्वम् ।	७९
साधनसिद्धभक्तः—	श्रवणादिसाधनतः सिद्धः ।	९७
कृपासिद्धभक्तः—	केवलेश्वरकृपातः सिद्धः ।	९७
नित्यसिद्धभक्तः—	सर्वदा भक्त एव ।	९८
विशेषणत्वम्—	विशेष्यस्यान्वयिनान्वयित्वे सदि व्यावर्तकत्वम् ।	११०
बन्धः—	नित्यमुक्तस्य कार्यकारणोपाध्यवच्छेद्यत्वम् ।	११८
कारुण्यम्—	परदुःखप्रहाणेच्छानियतो वृत्तिभेदः ।	१२६
सम्मानः—	सर्वावस्थासु निर्हेतुक आदरः ।	१३०
शरीरत्वम्—	चेष्टावत्वमखण्डोपाधिर्जातिर्वा ।	१३७
चेष्टा—	हिताहितप्राप्तिपरिहारार्थी क्रिया ।	१३७-३८
भगवान्—	सच्चिदानन्दघनोऽद्वितीयो निर्विशेषसर्वकारणत्वाद्युपलक्षितः परमात्मा परब्रह्मपदाभिधेयो भगवान् ।	१४७
ईश्वरः—	भगवानेव त्रिगुणमायाविशिष्टः ।	१४७
रुद्रः—	तमोगुणप्रधान ईश्वरः ।	१४७
ब्रह्मा—	रजोगुणप्रधान ईश्वरः ।	१४७-४८
विष्णुः—	सत्त्वगुणप्रधान ईश्वरः ।	१४८
गुणावतारः—	गुणमात्रोपाधिकोऽवतारः ।	१४८
लीलावतारः—	स्वेच्छापरगृहीतलीलाविग्रहोपाधिकोऽवतारः ।	१४८

अवतारः—	स्वसङ्कल्पपूर्वकं पराधीन इव व्यक्तीकृतदेहो भक्तवात्सल्याद्यनेकगुणोल्बणः ।	१५०
विभवावतारः—	गमनागमनसंश्लेषविश्लेषयोग्यं यथा भवति तथा दिव्यं देहं प्रकटयन् स्थितः ।	१५०
स्वरूपावतारः—	सर्वेश्वरः स्वीयाप्राकृतरूपमितरसजातीयतया प्रकटयन् स्थितः ।	१५१
मनुजस्वरूपावतारः—	मनुजत्वे सति सर्वेश्वरत्वादिकः ।	१५१
अमनुजस्वरूपावतारः—	देवतिर्यगादित्वे सति सर्वेश्वरत्वादिकः ।	१५१
पूर्णावतारः—	आविष्कृतानेकशक्तिमान् ।	१५१
अंशाद्यवतारः—	आविष्कृताल्पशक्तिमान् ।	१५१
स्वरूपावेशावतारः—	केषुचिच्चेतनेषु स्वेन सन्निधीभूय स्थितः ।	१५१
शक्त्यावेशवतारः—	केषुचिच्चेतनेषु शक्त्या सन्निधीभूय स्थितः ।	१५१
अर्चावतारः—	मन्त्रादिसंस्कृता मूर्तिः ।	१५१
भावः❀—	परभक्तेः प्रथमावस्था ।	१५५
प्रेम❀—	परभक्तेरुत्तरावस्था ।	१५५
श्रवणम्—	सगुणस्य निर्गुणस्य वा शब्दकरणकशाब्दबोधप्रतिपादकशब्दस्य श्रोत्रेण ग्रहणम् ।	१५९-६०
कीर्तनम्—	सगुणस्य निर्गुणस्य वा बोधकशब्दोच्चारणम् ।	१६०
स्मरणम्—	स एवंविधगुण इत्याद्याकारा स्मृतिः ।	१६०
पादसेवनम्—	परिचर्या, विष्णुप्रतिमापादसम्बन्धिगृहलेपनादिरूपा, गुरोरपि परमेश्वररूपत्वात्तस्य भगवद्भक्तस्य वा पादसंवाहनरूपा च ।	१६०
अर्चनम्—	श्रवणादिभिन्नो विष्णुप्रीतिहेतुर्व्यापारः प्रतिमादौ गन्धपुष्पाद्यर्पणरूपः ।	१६०

❀ पूर्वापेक्षया विच्छिन्नरूपेणार्थोपलब्धेः पुनरत्र संग्रहः ।

वन्दनम्— गुरुशालग्रामप्रतिमाभगवद्भक्तानां पूजा-
बहिर्भूतनमस्कारः। १६०
दास्यम्— दासस्येव परमेश्वरप्रीतिफलकं सकलकर्मा-
र्पणम्। १६०
सख्यम्— विश्वासो मित्रवृत्तिश्च। १६०
आत्मनिवेदनम्— गवाश्वादिस्थानीयस्य स्वस्य देहादि-
सङ्घातस्य तदेकभजनार्थं विक्रयस्थानीयं
तस्मिन्नर्पणम्। १६०
अविहिता भक्तिः— रागानुगा (सा कामसम्बन्धरूपेण द्विविधा)। १६१
सम्बन्धरूपा भक्तिः—पितृत्वाद्यभिमानमूला। १६१
विहिता भक्तिः— श्रवणकीर्तनाद्यन्यतमा, अथवा कर्मसिश्रा—
कर्मज्ञानमिश्राज्ञानमात्रमिश्रान्यतमरूपा। १६१-६२
कर्ममिश्रा भक्तिः— सात्विकी-राजसी-तामस्यन्यतमरूपा (गृह-
स्थाधिकृता)। १६२
सात्त्विकी भक्तिः— पापनाश-भगवत्प्रीति-विधिसिद्धिफलिका
(दास्यभक्त्यन्तर्गता)। १६२
राजसी भक्तिः— विषय-यश-ऐश्वर्यफलिका (अर्चन-
भक्त्यन्तर्गता)। १६२
तामसी भक्तिः— हिंसा-दम्भ-मात्सर्यफलिका(अर्चनभक्त्यन्तर्गता)१६२
कर्मज्ञानमिश्रा भक्तिः— उत्तमा-मध्यमा-प्राकृतभेदभिन्ना, (सत्त्व-
गुणतारतम्यभेदेन त्रिविधभक्तभिन्ना, वान-
प्रस्थाधिकृता च)। १६३
उत्तमभक्तः— सर्वभूतग्रहणसमयेऽपि चित्तद्रवावस्थाप्रविष्ट-
भगवदाकारतया सर्वत्र भगद्भावनोपपन्नः। १६३
मध्यमभक्तः— ईश्वरादिषु प्रेमादियुतः चित्तस्य किञ्चिद्-
द्रवावस्थायुक्तः। १६३

प्राकृतभक्तः— द्रवावस्थारहितोऽपि तदर्थं श्रवणादिभाग-
वतधर्मानुष्ठानशीलः। १६३

ज्ञानमात्रमिश्रा भक्तिः— भगवद्गुणश्रवणेन द्रवावस्थां प्राप्तस्य
चित्तस्य धारावाहिक्यनवच्छिन्ना सर्वेशविषया
वृत्तिः (द्रवावस्थाप्रविष्टभगवत्स्वरूपभानस्य
त्रिविधत्वात् त्रिविधा, भिक्ष्वधिकृता च)। १५२

प्राकृतो भागवतोत्तमः—प्रपञ्चसत्यत्वभानसहितः। १६४

मध्यमो भागवतोत्तमः—प्रपञ्चमिथ्यात्वभानसहितः। १६४

उत्तमो भागवतोत्तमः—प्रकारद्वयेनापि प्रपञ्चभानविरहितः। १६४-६५

अर्चिरादिमार्गः— अर्चिरादिदेवताद्वारा ब्रह्मपुरुषगमनसाधनभूतः २१९

देवपथः— ,, २२०

ब्रह्मपथः— ,, २२०

दक्षिणो मार्गः— धूमाभिमानिदेवताद्वारा देवसेवासाधकः। २२०

पितृयानम्— ,, २२०

धूमादिमार्गः— ,, २२०

षड्विधं कर्म— केवलसात्त्विकाद्यन्यतमम्। २२४

केवलसात्त्विकम्— भगवद्ध्यानादिकं (निःशेषपापहरम्)। २२४

सात्त्विकराजसम्— हिंसारहितकायक्लेशादिरूपम् (प्रायेण-
दुष्कर्मविशेषहरम्)। २२४-२५

सात्त्विकतामसम्— हिंसासहितं नित्यकर्म (पापसंवलितं
पापविशेषहरम्)। २२५

राजसम्— हिंसारहितं काम्यम् (कर्मफलभोगानुकूल-
चित्तनैर्मल्यकरं न पापहरम्)। २२५

राजसतामसम्— हिंसासहितं काम्यम् (भोगानुकूलचित्त-
नैर्मल्यधायकमपि दुःखसंवलितसुखा-
धायकम्)। २२५

केवलं तामसम्—	शास्त्रनिषिद्धलक्षणम् (हिंसारहितं हिंसासमेतं च दुःखैकसाधनं चित्तकालुष्यकरम्)।	२२५
त्रिविधं प्रायश्चित्तम्—	सात्त्विकराजसाद्यन्यतमम्।	२२५
सात्त्विकराजसम्—	हिंसारहितं कायक्लेशादिमत् (पूर्वोक्तद्वितीयकर्मण्यन्तर्भूतम्)।	२२५
सात्त्विकतामसम्—	हिंसासमेतं पापहरम् (तृतीये कर्मण्यन्तर्भूतम्)।	२२५
केवलसात्त्विकम्—	भगवद्ध्यानादिलक्षणम् (प्रथमे कर्मण्यन्तर्भूतम्)।	२२५
अनुतापः—	पुनः पुनः पापचिकीर्षाप्रतिबन्धको मानसो व्यापारः।	२२८
एकान्तभावः—	एकान्तभक्तिः परभक्तिरिति यावत्।	२२९
भक्तिः—	रागावान्तरजातिः।	२३४
ज्ञानम्—	बुद्ध्यवान्तरजातिः।	२३४
प्रपत्तिः—	शरणाभिन्ना।	२४१
शरणम्—	आत्मनिवेदन-दीनतान्यतरत्।	२४१
आत्मनिवेदनम्—	जीवसमर्पणं स्थूलादिशरीरसमर्पणञ्च।	२४१
जीवसमर्पणम्—	जीवत्वपरित्यागेन ब्रह्मणैकीकरणम्।	२४१
शरीरसमर्पणम्—	गवादिसमर्पणवत्स्वसत्तात्यागः।	२४२
दीनता—	कदाचित्कृपया तत्सन्निधौ तन्मूर्तिसन्निधौ वा स्वस्यानुग्राह्यत्वज्ञापनम्।	२४२
सगुणशरणता—	वाग्मनस्तनुभिः परमात्मन आश्रयणम्।	२४२
निर्गुणशरणता—	प्रपञ्चाभावेन स्वस्मिंस्तज्ज्ञानतस्तद्रतिशालिता।	२४२
मुक्तिः—	वैजात्यशालितत्त्वभावोपलक्षितस्वाभिन्नभगवत्स्वरूपावाप्तिलक्षणा।	२४३
विवर्तः—	पूर्वरूपापरित्यागेनोत्तरावस्थारूपः।	२४४

कर्तृत्वम्—	(ब्रह्मणो वेदविषये) सर्वेषां पुरुषार्थसिद्ध्ये नियतक्रमस्वराद्यपेक्ष्य पूर्वकल्पेषु स्वकृतेनैव नियतेन क्रमादिना विशिष्टवर्णानां प्रकृते निर्मातृत्वम् ।	२५०
ध्वंसः—	सर्वदा सतः कार्यस्यातीतावस्था ।	२६६
प्रागभावः—	सर्वदा सतः कार्यस्यानागतावस्था ।	२६६
अन्योन्याभावः—	प्रतियोग्यविशिष्टाधिकरणस्वरूपः ।	२६७
अत्यन्ताभावः—	,, ,, ,,	२६७
अभिव्यक्तिः—	वस्तुनो वर्तमानावस्था ।	२६७
अनभिव्यक्तिः—	वस्तुनोऽनागताद्यवस्था ।	२६७
लयः—	सूक्ष्मतया कारणेष्वविभागः । (कार्यस्यातीतावस्था) ।	२६७

इति विशेषार्थबोधकपदसंकलनम्[1] ।

---

1. शब्दानां मातृकाक्रमेणावश्यकमपि निवेशनमेकार्थसंबद्धानां शब्दानामेकस्थल एवोपलब्धिर्भवत्वित्यभिप्रायेण न कृतम् ।

अथ प्रत्ययायादिसूत्रसंकलनम्

अध्यायः	आह्निकम्	अत्र सूत्रसंख्या		भाष्यकारमते	
१	१	९	२८	९	२६
	२	१९		१७	
२	१	२९	५८	२९	५८
	२	२९		२९	
३	१	८	१६	८	१६
	२	८		८	
३	६	१०२		१००	

भक्तिविभागादिबोधकं चित्रम्

भक्तिः (पृष्ठम् १६०–१६५)

विहिता (श्रवणादिका नवविधा)। अविहिता (रागानुगा)।

१ कर्ममिश्रा, २ कर्मज्ञानमिश्रा, ३ ज्ञानमात्रमिश्रा। ४ कामरूपा ५ सम्बन्धरूपा ।

सात्त्विकी, राजसी, तामसी उत्तमा, मध्यमा, प्राकृता । (क्रमेणैषा-आत्मनिवेदनदास्यार्चनान्तर्भूता)

पापनाशार्था, भगवत्प्रीत्यर्था, विधिसिध्यर्था । (एषा त्रिविधापि दास्यभक्तावन्तर्भूता)

विषयार्था, यशोऽर्था, ऐश्वर्यार्था। (अर्चनभक्तावन्तर्भूता)

हिंसार्था, दम्भार्था मात्सर्यार्था। (अर्चनभक्तावन्तर्भूता)

१ अस्यां भक्तौ गृहस्था अधिकारिणः । २ अस्यां वानप्रस्था अधिकृताः । ३ अत्र भिक्षवोऽधिकृताः ।

४ एषा गोप्यादिषु प्रसिद्धा । ५ नन्दादिषु प्रसिद्धैषा ।

अथात्र स्थितग्रन्थतद्भागग्रन्थकारनामानि

ग्रन्थादिनाम	पृष्ठम्
पञ्चरात्रम्	६
श्रीभागवतम्	४, ६, ७, ८, इ०
विष्णुपुराणम्	५, १०, इ०
नारदीयम्	९, २३७ इ०
तन्त्रम्	१०, १४९ इ०
रामायणम्	१९
भगवत्पादीयाः	२६
वृद्धाः	३०, ५९ इ०
पराशरोपपुराणम्	३८
पतञ्जलिः	५३
चिरकारिकोपाख्यानम्	५४
बादरायणसूत्रम्	५४
भगवद्गीता	५६
पुराणानि	५९
वैष्णवम्	६१
स्कान्दम्	६१, २३७ इ०
वल्लव्यः	७९
आदिपुराणम्	८०
बृहदारण्यकम्	८४, ११७ इ०
गोपालतापिनी	८४, १४५
भाष्यकारः (स्वप्नेश्वरः)	८५
पुराणेतिहासौ	९१
महाभारतम्	९२, ९७ इ०
स्कन्दपुराणम्	९७
योगसूत्रम्	९९
योगशास्त्रम्	१००
प्राचीनाः	१०३
ब्रह्मकाण्डम्	१०४
बादरायणः	१०६, १०८ इ०
काश्यपः	११०
व्यासः	१०८, २०७ इ०
शाण्डिल्यः	१०९
ऋषिः	११०
श्रीमद्रामानुजाचार्याः	११३
छान्दोग्यम्	११३
मोक्षधर्मः	११६
ईश्वरगीता	११८, २१३ इ०
श्रुतिः	१३४, २३८ इ०
पुराणम्	१३४
वाराहम्	१३६, २४०
मीमांसावार्तिककृत्	१४०
वेदान्तसिद्धान्तः	१४०
पराशरोपपुराणादि	१४५
मैत्रायणीयश्रुतिः	१४६

ग्रन्थादिनाम	पृष्ठम्
कालीपुराणम्	१४४
बृहन्नारदीयम्	१३५
भविष्यत्पुराणम्	१४६
द्रोणपर्व	१५०
वायुपुराणम्	१५०
अगस्त्यसंहिता	१६०
विष्णुधर्मोत्तरम्	१८३
मीमांसकाः	१८४
कापिलपञ्चरात्रम्	१९४
भविष्योत्तरम्	१९५
पद्मपुराणम्	१९५
शातातपः	१९५
शूद्राधिकरणम्	१९८
महाभारते मतङ्गोपाख्यानम्	१९८
लिङ्गपुराणम्	२०१
याज्ञवल्क्यम्	२०४
वासिष्ठम्	२०८
रासपञ्चाध्यायी	२१०
वेदान्तसूत्रं तद्भाष्यं च	२०७
अजामिलोपाख्यानम्	२२४
भरतोपाख्यानम्	२२४
नारायणीयम्	२३०
स्मृतिः	२३२
निबन्धः	२३५, २४२
पाद्मम्	२३७
कौर्म्यम्	२३७
लैङ्गम्	२३८
कात्यायनसंहिता	२३८
नारसिंहम्	२४२
श्वेताश्वतरोपनिषद्	२४३
अभियुक्ताः	२४५
मात्स्यम्	२४६
पञ्चशिखाचार्यः	२५०
मन्त्रः	२५१
वनपर्व	२५५
वेदान्तसूत्रव्याख्या	२५८
शारीरकमीमांसासूत्रम्	२६२

इति ग्रन्थादिनामसूचिका ।

---

(१) प्रायः सर्वत्रानेकविभक्त्यन्तपदानां प्रथमान्ततया विपरिणामेनोल्लेख इति ज्ञेयम् ।

भगवद्भक्तिचन्द्रिकोद्धारे मिलितपाठभेदादिसंकलनम्

विद्यमानम्	मिलितम्	पङ्क्तिः	पृष्ठम्
यदि सकृद्गता (?)	ह्यपि सकृदुदिता	१३	१
रसिकां शाण्डिल्यसूत्रे	रसदां शाण्डिल्यसूत्रेषु		
युतां	तां	१६	१
फलिकां	फलदां	१७	१
स्मृत्वा चित्तरितीर्ण-	कृत्वात्रोल्लसितं		
शास्त्रजलधीन्	हितं जितमनो	१८	१
रपि हि	रपि च	२१	२
रखिलै	रसिकै	६	३
स्तामानाद्यैर्विलसद-	स्तां मानाद्यैर्विलसदनु-		
नुबन्धा	बन्धां	१०	३
न्यायैरथ	स्मामूरथ	१२	३
न च गु	नवगु	१७	७
मुकुन्दादा	मुकुन्देन्दा	२०	१२
सुषमा	सुखमा	४	१३
तूणीधनुर्धारिणौ	कोदण्डबाणान्वितौ	२३	१३
बुधः	बुधैः	२४	१३
रुदिता व	हृदि ताव	५	१४
गुरुजनास्ते + ल	गुरुजनात्प्रेमल	७	१४
पृष्टः	विपृष्टः	२३	१४
दृशः + वि	दृशः स्याद्वि	७	१५
कृति कृतैः	कृतिकृते	१३	१५

विद्यमानम् ।	मिलितम् ।	पङ्क्तिः	पृष्ठम्
चिरेण	परं हि	२२	१५
मपि त	मथ त	२	१६
न्त + घ	न्तर्घोघ	७	१६
सम्बभूव पुलकम्	सम्बभूव पुलकान्वितगात्रो गद्गदस्वर उदश्रुलोचनः ॥	१८	१६
अभितस्य	अभिनम्य	२२	१६
मितपदः	मितमदः	२	१६
द्विधाभि	प्रियाभि	१०	१७
शीलिन	शालिन	७	१९
तर सं	तव सं	२३	१९
समार + मा	समारब्धे मा	४	२०
परेषां सा	परेष्टाप्त्या	१९	२०
सुकृते	सुकृतै	२३	२०
सुखोद्धा	सुखोद्वा	२४	२०
+ + वतां	अक्षण्वतां	२	२१
वर्णयामः	वर्णनीयं	१०	२१
स्वनेत्र	सुनेत्र	११	२१
+ + + + + शु	संद्रावयत्याशु	१५	२१
पा + मिति	पारुह्यंसमि	२०	२१
काचित्स्वा	कापि स्वा	२१	२१
मुक्तौ	मुक्त्यै	१४	२२
वपुः प्रादुर्भूतेन	मनः प्रादुर्भूतेर्न	१६	२२
त्वस्याः	न्वस्याः	१०	२४
मुखमखिनः	मुखमतितः	१६	२५

त्येवं तद्भूत इत्यथात्मनि परे लग्नं मनो नन्दजे		१३	३०
विद्यमानम् ।	मिलितम् ।	पङ्क्तिः	पृष्ठम्
यस्यासौ सुख	किंवा यस्य श	१४	३०
र्निशं रक्ता महान्तो हरौ	रुपधिं त्यक्त्वा महान्तस्तथा	३	३१
सोक्ता	प्रोक्ता	५	३१
पश्यन्नाहितया	पश्यन्नादृतया	८	३१
न्न मन्सा	न्नमन्दा	८	३१
न्नमहतां	न्नभजतां	९	३१

इति पाठभेदसंकलनम्[1] ।

१. भगवद्भक्तिचन्द्रिकोल्लासग्रन्थः केवलप्रथमभक्तिप्राधान्यप्रकाशान्तो भक्तिचन्द्रिकासमानानुपूर्विकः, ततः परमुदाहरणभूतश्लोकाः प्रायो भक्तिचन्द्रिकान्तर्गता एव । अयं सार्धैकादशप्रकाशपर्यन्तः खण्डित उपलब्धः । अस्य कर्ता नारायणतीर्थ एवेत्यनुमीयते । भक्तिचन्द्रिकैकोनत्रिंशत्पृष्ठपर्यन्तमयं पाठसंशोधन उपयुक्तः । बुलन्दशहरसमीपवर्ति 'स्याना' ग्रामनिवासिनां पण्डितकन्हय्यालालवैद्यमहोदयानामयं ग्रन्थस्तद्ग्रामनिवासिनां श्रीमतां हीरालालरस्तोगिमहोदयानां कृपातः श्रीमतां डॉ० मङ्गलदेवशास्त्रिणां द्वारोपलब्धः ।